॥ श्रीः ॥

॥ शुभमस्तु ॥

जग्गू वकुलभूषणकविविरचितम्

# अद्भुतदूतम्

श्रीभगवल्लक्ष्मीदासानुगृहीतया रत्नप्रभासमाख्यया
व्याख्यया समलङ्कृतम्

" *With the Financial Assistance from the Ministry of Education, Government of India* "

१९६८

|| श्रीः ||

|| शुभमस्तु ||

जग्गू वकुलभूषणकविविरचितम्

# अद्भुतदूतम्

श्रीभगवल्लक्ष्मीदासानुगृहीतया रत्नप्रभासमाख्यया
व्याख्यया समलङ्कृतम्

*" With the Financial Assistance from
the Ministry of Education, Government of India "*

❀

BOOKS AVAILABLE WITH
J.R. SUDARSHAN
No. 8, II Stage, M.S.H Colony
Anandanagar,
Bangalore-24. Ph:3331009
१९६८

FIRST EDITION DECEMBER 1968

ALL RIGHTS RESERVED BY THE AUTHOR

**Jaggu Vakulabhushanam**
**(Jaggu Alwar Iyengar)**
2721, IV Cross Road, Malleswaram
BANGALORE - 3

**Price : Rs 84 - 75**

Printed by D. S. Krishnachar, M.SC., Proprietor
Prabha Printing House, Basavangudi, Bangalore-4

# ग्रन्थकर्तुर्विज्ञापनम्

अयि ! सहृदयाः !

भारतसारसर्वस्वं भागममुं भगवतो वासुदेवस्य दूत्यप्रतिपादकं वस्तूकृत्य पञ्चदशसर्गात्मकं महाकाव्यं व्यरचयम् "स्वयं खलु स भगवान्पाण्डवदूतः समुद्योजयन्नस्मिन् स्वकीये कैङ्कर्ये मदीयरसनां सरसां सफलां भगवच्चरणकमल-मधुस्यन्दसंदोहसंप्लावितां याथार्थ्येन रसज्ञतामनीनयत्" कृतिमेनामङ्गीकुर्वन्तु भोग्यतया स भगवान् भागवतास्सहृदयाश्चेति ।

विज्ञापयिता,

**जग्गू वकुलभूषणः**

Pandit P. S. SUBBARAMA PATTAR
NEXT TO SRI KRISHNA TEMPLE
CHERUMUKKU, CHEMBUKKAVU

TRICHUR - I
KERALA
16 - 12 - 1968

# स्वस्ति ।

अयि मित्र कवे मान्य जग्गू वकुलभूषण ।
स्वस्ति ते कवितोत्कर्षो वर्धतामायुषा सह ॥

प्रतिज्ञाकौटिल्यं प्रतिनवविचित्रार्थरुचिरं
प्रगल्भैर्वाग्गुम्फैः सहृदयसमास्वाद्यरचनम् ।
प्रहर्षं सूरीणां जनयति रसाभिज्ञमनसां
प्रकृष्टं नैपुण्यं प्रथयति च नाट्ये रचयितुः ॥

सहृदयविधेयः,

**पि. एस्. सुब्बरामभट्टः**

# FOREWORD

I consider it a privilege to write this Foreword to the *Mahakavya* 'ADBHUTADUTAM' written by the erudite Poet-Scholar Sri Jaggu Vakulabhushanam (Jaggu Alwar Iyengar) who is already known to the contemporary Sanskrit-World through his published works.

He hails from the well-known Poet-Scholar Jaggu family of Melkot in Mysore State, the holy pilgrim centre of Srivaishnavas and a great centre of Sanskrit learning. Many of his ancestors were Poets and Commentators on the works of Visistadvaita School of Vedanta propounded by Sri Ramanujacharya.

Sri Jaggu Alwar Iyengar published his first work 'Adbhutamsukam' as early as 1932. Since then he has published about ten dramas, two champus and one prose. Now this Mahakavya is being published. There are dozen more works consisting of dramas, kavya, stotra, gadya and prahasana that are yet to be published. Thus, in the course of last thirty years he has written nearly thirty works in Sanskrit covering all forms of Sanskrit compositions.

The present work 'ADBHUTADUTAM' is a Mahakavya in fifteen cantos. It draws its theme from the Udyogaparvan of Mahabharata. The role of Sri Krishna as a messenger of Pandavas to mediate between Pandavas and Kauravas is depicted here. The poem begins with the mention of the completion of Ajnatavasa of Pandavas, Abhimanyu's marriage and the arrival of Sri Krishna and Balarama to see Pandavas.

All along the poem the poet depicts Sri Krishna as an avatara of Lord Vishnu. Excepting Duryodhana all are aware of this divine nature of Sri Krishna. Their appeal to him to mediate is not addressed to him as an astute statesman but is sought as divine intervention to avert a dreadful war. It is interesting to note that not only Yudhisthira but Bhima, Arjuna and even Balarama appeal for his intervention. Draupadi, of course, would like a lesson to be taught to the culprits.

The journey of Sri Krishna to Hastinapura is beautifully described. The welcome gestures of various animals and birds in the forests on the way, the ascetics' prayers of Sri Krishna, etc. though remind similar descriptions of Kalidasa, have their own richness of diction and imagery. The grand feast arranged by Sri Krishna for the Brahmins in Vrikaprastha when he halted there, is probably a poetic representation of the grand feasts at

Melkot observed by our poet in his childhood. The royal receptio given by Duryodhana to Sri Krishna at the instance of h: father Dhritarastra makes one wonder whether Duryodhana als forgot his dislike for Sri Krishna in his divine presence. Th eagerness of the young damsels of Hastinapur to see Sri Krishn when he was taken in a procession through the royal road of Ha tinapur is characteristic of women's enthusiasm in such context

Dhritarastra is depicted here as much more sincere in hi advice to his son to accept the mediation of Sri Krishna than i the original story. He is not blind to the fact of Sri Krishn being an Avatara but Karna's advice prevails upon Duryodhan much more than his old father's advice.

There is no alteration in the main structure of the stor But a good deal of poetic content is introduced in depicting th events. The motif of the poem is not so much to expose th futility of negotiating with Duryodhana, but to bring out divin majesty of Sri Krishna and point out that while everyone els was aware of this divine incarnation, Duryodhana who lacke faith in this was led into the path of Adharma. The suprem qualities of Sri Krishna are sung on as many as four occasior in detail, and are implied in almost all cantos of the poem Santi and Bhakti are the predominant sentiments here.

The poet has employed a number of Alankaras here. H excels in Virodhabhasa and Arthantaranyasa. He employs variety of metres. His command over Sanskrit language i remarkable. His diction is neither too pedantic nor too simple I heartily congratulate him on producing a sustained work c high order in twentieth century and hope that all his works wil be published in due course.

The authorities of the Government of India who have offere financial assistance for the publication of this work deserve ou thanks. We may thank them in anticipation of similar assistanc for the remaining works also, which is well deserved.

I also hope that many more works will come from the pen of this Scholar-Poet.

Prof. K. T. PANDURANGI, M.A.
*Vedanta Vidwan, Meemamsa Siromai*
Head of the Department of Sanskri
Bangalore University

Bangalore
31-12-1968

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

# उपोद्घातः

अमन्दानन्दसंदोहमनन्तममलं ध्रुवम् ।
ज्ञानस्वरूपं गोविन्दं वन्देऽहं श्रितवत्सलम् ॥

नन्दनन्दनपादाब्जमरन्देन्दिन्दिरास्सदा ।
जयन्तु जगदीशस्य प्राणात्मानो भवन्ति ये ॥

विदितचरमेवैतत्सर्वेषां यत् "भारतः पञ्चमो वेदः" इति भारतस्य पञ्चमवेदत्वं, तथैव "इतिहासपुराणाभ्यां, वेदं समुपबृंहयेत्" इति वेदोपबृंहणरूपत्वं च तस्येति ।

परात्परस्सर्वज्ञस्सर्वशक्तस्सर्वस्वतन्त्रः निखिलचराचरनियमननिरतो भगवान्वासुदेवः ब्रह्मादीनामपि वाङ्मनसागोचरे नित्यनूत्ने सदानन्दमये वैकुण्ठाख्ये दिव्यलोके दूरतस्तिष्ठन्, परत्वैकगुणोज्ज्वलस्य स्वस्य लीलाविभूतिगतचेतनेषु काननकौमुदीकल्पतां विचिन्त्य, तेषामेवाश्रयणीयत्वाय सौलभ्यसौशील्यादिगुणपरिपूर्णो मनुष्यादिसजातीयोऽवततार । तत्राप्यतीव सौलभ्येन लोष्टकल्पस्समजनि नितरामवज्ञास्पदम् । अतः परत्वसमानाधिकरणं सौलभ्यादिकमेवात्मनोऽनर्घतामापादयतीति निश्चिकाय ।

ततश्च बाल्य एव पूतनाशकटयमलार्जुनादिभङ्ग विश्वरूपप्रदर्शनाद्यतिमानुषचेष्टितैः, यशोदागोपिकागोपबालादिभिश्चपेटिकाप्रहेलनादिप्रतिग्रहैः दामबन्धानुभवादिभिरपि निकृष्टतरचेष्टितैरपि स्वस्य परत्वसमानाधिकरणमेव सौलभ्यं मुहुर्मुहुः प्राचीकशद्वासुदेवजन्मनि नन्दगोपसद्मनि ।

तस्यैतस्य परस्य ब्रह्मणो वासुदेवस्य सकलचित्ताकर्षकत्वात्कृष्णशब्दाभिलपनीयस्य परात्परतां सर्वस्वतन्त्रतां तत्काष्ठाभूतं सौशील्यसौलभ्यवात्सल्यादिकं,

तत्परमकाष्ठाभूतामाश्रितपरतन्त्रतां च स्पष्टं प्रतिपादयत्येतदाख्यानम् । तदेतत्प्रतिज्ञातं महर्षिणा व्यासेन "नारायणकथामिमां" इति ग्रन्थादौ ।

एतदेवाख्यानमुपजीवन्ति किल सकलसहृदयमनस्सुमनःपरिकल्पितमृदुलतरतल्पे शयानाः कविकुलतिलका अपि । यतश्चोक्तम्—"महत्वाद्भारवत्त्वाच्च महाभारतमुच्यते" इति, "यदिहास्ति तदन्यत्र यन्नेहास्ति न-तत्क्वचित्" इति च ।

तत्र पाण्डवकौरवचरितानि तु परिणतिविरसानि परवैराग्यजननेन भगवति वासुदेवे परभक्तिजननानि मोक्षप्रयोजकानि । स एक एव खलु भगवान्नारायणः परमपुरुषः परात्परः सकलैः प्राप्यस्सेव्यस्सर्वेषां प्रापको भोग्यश्चेति तु तत्त्वम् ।

तत्र सारतरत्वं गीतोपदेश विश्वरूपप्रदर्शनसहस्रनामाध्यायाख्यस्य भागत्रयस्य "सारतमत्वं च पाण्डवदूत्यकरणेनाश्रितात्यन्तपरतन्त्रताख्यापकस्य भागस्य" तदुक्तमाचार्यैः—"महाभारतेन दूतकर्मणि निष्णातस्य महिमानुवर्ण्यते" इति ।

तमेनं भागमधिकृत्य कृतकृत्यताधिया कृतिः कृता निजजन्मनः कृतार्थतामनुसन्दधानेन कविना वकुलभूषणेन "सैषा भगवतः पाण्डवदूतस्य दूत्यसङ्कल्पेनेव सुदीर्घप्रतिभाविभावितपञ्चदशसर्गात्मकाद्भुतदूताख्यमहाकाव्यात्मना पर्यणमत् ।

तस्यैतस्य महाकाव्यस्य महिमानमनुभूय भूयोभूयः प्रहृष्टमानसस्तत्रभवान् विष्वक्सेनो भगवतस्सेनानायको दास्यनाम्ना लक्ष्मीदासः "काव्यरत्न"मितिनामास्य निधाय भगवतो गुणगणानुभवपरीवाहरूपां "रत्नप्रभा"ख्यां व्याख्यामाख्यत् "अनेनास्यानितरसाधारणा प्रभा प्रवर्धिता काव्यस्येति व्याख्यानुसन्धातृभिरेवावधार्यते" तदेतत्काव्यरत्नं रत्नप्रभा च भावनातरङ्गपरम्परातरङ्गितनिजान्तरङ्गाणां निरन्तररसमञ्जरीप्रस्रवन्मधुरमधुधुनीसंक्षालितहृदयान्तराणां सहृदयानां मनांसि समावर्जयतः एव इति दृढं विश्वसिमि ।

"रसान्भक्तस्य जिह्वायामश्नामी"ति भगवद्वचनानुसारेण भगवद्गुणानुभव रसास्वादतुन्दिल-सहृदय-मूर्धन्य-भक्ताग्रगण्यजनपरितोषेण भगवान्पाण्डवदूतस्स्व-यमपि परितुष्यतीति तयोरुभयोरपि प्रीत्यावहं महाकाव्यमिदमस्मादृशानामपि मोदावहं भवत्येवेति कविवर्यमिममभिनन्दन्नुक्तिमेतामुपसंहरामि ।

इति सहृदयवशंवदः

**बालधन्वि जग्गु सुदर्शनाचार्यः**

साहित्यवेदान्तविद्वान्

विशिष्टाद्वैतवेदान्तविभाग-

मुख्याध्यापकः

महाराज संस्कृत कालेज्

मैसूरु

१—१२—१९६८

|| श्रीः ||

शुभमस्तु

श्रीमते हयग्रीवाय नमः

# अद्भुतदूतम्

## रत्नप्रभाख्या व्याख्या

यस्याः कटाक्षलेशेन प्राणी प्राचीनबर्हिताम् ।
उपैति तां महादेवीं वीरलक्ष्मीं नमाम्यहम् ॥ १ ॥

शारदेन्दुमयूखाभं शारदाभ्राच्छवाससम् ।
इन्दुतद्भगिनीकान्तं वन्देऽहं हयकन्धरम् ॥ २ ॥

वकुलभूषण एष महाकविः
वकुलभूषणवत्परभक्तिभाक् ।
अनुभवन्भगवद्विभवं सदा-
प्यमृतपात्रमिहैव विराजते ॥ ३ ॥

व्यासः कृष्णमुखाच्छ्रुत्वा काव्यरत्नमिदं यतः ।
श्लाघाकम्पशिरास्तस्थौ स्वकृत्यब्धिसुधाधिया ॥ ४ ॥

श्रावंश्रावं निरवधिगुणं काव्यरत्नं मुकुन्दः
स्मेरास्याब्जो विकसितमहापद्मपत्रायताक्षः ।
रुक्मिण्यै तन्नवनवरसं सन्निगद्य स्वयं यत्
प्रैति प्रीतिं विवृतिमधुना तत्करोम्यस्य भक्त्या ॥ ५ ॥

स्मारंस्मारं काव्यरत्नमिदमद्भुतदूतकम् ।
रत्नप्रभाव्याख्ययैवमास्वदे कृष्णवैभवम् ॥ ६ ॥

इह खलु जगति बहूनि कविप्रतिभावैभवपिशुनानि काव्यानि रसवन्ति सन्ति । तेषु च कानिचिद्भगवल्लीलाविभूतिपराणि, कानिचिच्च भगवत्पराणि विराजन्ते । अतो नास्त्येव भेदस्सत्काव्यमसत्काव्यमिति । सर्वमपि तदीयत्वेनानुसन्धेयमिति मदीयोऽयमाशयः । ईदृश एव हि भगवत्सङ्कल्पः । यज्जगतस्तेजस्तिमिरसजातीयसौजन्यदौर्जन्यशबलितत्वमन्तरा नैव प्रचलति भगवतो लीलाविभूतिः । सुरनायके पाकशासनेपि दृष्टचरं दौर्जन्यम् असुराधीश्वरे बलावपि दृष्टचरं सौजन्यम् । एवं सत्यपि न हि विनश्यति

तदीयतासम्बन्धः। अतो जगति विद्यमानं सद्वा असद्वा सर्वमपि तदीयमेव। एवमेव हि ज्ञानिनां पन्थाः। भगवत्सम्बन्धमन्तरा वस्तुसत्तैव नास्तीति। अन्यथा सर्वान्तर्यामित्वं कुण्ठितं भवेत्। एवं तर्हि हेयोपादेयविवेकज्ञानमुपदिशन्ति सर्वाण्यपि शास्त्राणि निरर्थकानीति नाशङ्कनीयम्। अत्रैव सूक्ष्मेक्षिकयावेक्षणीयम्। अनादिवासनावासितमानसाश्चेतनाः कदाप्यननुभूतभगवन्महिमातिशयाः शरीरात्मविवेकज्ञानशून्याः मन्यमानाश्चैहिकविषयजातमेवात्मभोग्यं, तदर्थमेव परिश्रमेण सर्वमपि कालं क्षिपन्तः भगवद्विमुखा भवन्ति। तेषां तानि शास्त्राण्यत्यावश्यकानि। ज्ञानी तु सर्वमपि भगवदात्मकं पश्यति। अत एव ज्ञानी समदृष्टिस्सर्वत्र। एवं हि भगवान्वकुलाभरणः। तर्हि किमर्थं स मोक्षापेक्षी भगवन्तमनवरतमप्यार्तः प्रार्थयामासेति चेदुच्यते? विस्मृतभगवन्महिमातिशयायाः विषयैकलम्पटायाः जनतायाः मध्ये स्थातुमशक्नुवन् भगवत्कैङ्कर्यैकमनस्कतया परमभक्तिविश्लथहृदयः सत्वरं तत्प्राप्तिमभ्यर्थयामासेति। तस्मात्क्षुद्रपुरुषविषयकेप्यसत्काव्ये भगवत्सम्बन्धोऽनुसन्धेयः। एवं स्थिते किमु वक्तव्यं सत्काव्ये? इत्यलमप्रकृतातिविस्तरेण। अथ तत्रभवान्कविमूर्धन्यः वकुलभूषणनामा बालधन्विकुलाब्धीन्दुः विविधरूपकरूपेण भगवद्विभववैभवमनुभूय भूयोभूयः तत्सौलभ्यसौशील्यवात्सल्यादिकल्याणगुणगणानुभवविलीनहृदयः भगवत्कृष्णद्वैपायनमुनीन्द्रानुगृहीतसकलशास्त्रार्थसारभूतमहाभारतपारावारसारतमं भगवतः पाण्डवप्राणस्य वासुदेवस्य दौत्यमनुसन्धाय महाभारतसारभूतमिदमेव श्रीकृष्णदौत्यमिति लोकायोपदिशन् "अद्भुतदूतं" नाम काव्यरत्नमारभमाणः निर्विघ्नपरिसमाप्तिकामनया सकलविद्याधिदेवताभजनात्मकं मङ्गलमादौ निबध्नाति॥ आन्तरेति॥

**आन्तरध्वान्तनाशाय निर्मलालोकसिद्धये।**
**उपास्महे महो भक्त्या किमप्याम्नायगोचरम् ॥ १ ॥**

अन्तर्भवं आन्तरं यद्धान्तं तमः अज्ञानमिति यावत्। अज्ञानस्य ध्वान्तत्वेन व्यवहारोपि लोकसिद्ध एव। तस्य नाशाय पलायनाय। निर्मलः भगवद्भजनादिना निर्गतदुरितरूपमलः यः आलोकः उद्योतः भगत्साक्षात्कार इति यावत्। तस्य सिद्धये आम्नायगोचरं अत्र आम्नायः उपनिषत्। उपनिषदेकसमधिगम्यं न तु तर्कादिभिरित्यर्थः। किमपि इत्थंत्वेन निर्णेतुमशक्यं महः तेजः हयाननमिति यावत्। तस्यैव अज्ञानध्वंसनपूर्वकं भगवत्साक्षात्कारजननसामर्थ्यात्। अत्र मानसिकसाक्षात्कार एव विवक्षितः। एवं च भगवतो वासुदेवस्य सौलभ्यसौशील्यादिगुणानां यथा मानसानुभवः तथैव काव्येपि तद्वर्णनातिशयः हयग्रीवानुग्रहादेवेति। भक्त्या परमभक्त्येत्यर्थः। उपास्महे मनोवाक्कायकर्मभिः भजाम इति। अत्रातिशयोक्तिरलङ्कारः। अत्र प्रथमपादेन अन्धस्य धृतराष्ट्रस्य चक्षुर्दानम्। द्वितीयपादेन विश्वरूपदर्शनं द्वितीयार्धेन भगवतो विश्वरूपश्च सूच्यन्ते।

कविरिदानीं चतुर्दशभुवनमण्डलगतमुदन्तं करतलामलकवत्कृपया महाभारतमुखेनानुगृहीतवति भगवति विष्णुरूपे व्यासे कृतज्ञतामनुसन्धाय जगदुपकृतिकन्दं तं प्रणमति। द्वैपायनेति।

**द्वैपायनमुनिं वन्दे कविकल्पतरुं कविम्।**
**येन भारतमाख्यातं शान्तैकरसपुष्कलम् ॥ २ ॥**

द्वीपसम्भूतत्वादयं द्वैपायनः स एव मुनिः मननशीलः ध्यानमास्थाय मननेन महाभारतं रचितमित्यतो मुनिमित्युक्तम्। व्यासं वन्दे कीदृशं व्यासं कविकल्पतरुं कवीनामभिलषितार्थपूरकमित्यर्थः। कवीनां स्वकाव्ये महाभारतातिरिक्तं विषयान्तरमभिधातुमशक्यत्वात्। पुनः कीदृशं कविं तपोमहिमसाक्षात्कृतसर्वविषयम्। येन व्यासेन शान्तैकरसपुष्कलं नवरसपूर्णमपि शान्तरसस्यैव प्राधान्यात्। इतरेषामङ्गत्वात्। प्राधान्येन पुष्कलत्वमुक्तम्। भारतं महाभारतनामकं आश्चर्यकरं काव्यं "महत्वाद्भारवत्वाच्च महाभारतमि"ति काव्यनाम आख्यातं अभिहितमित्यर्थः। एतेन प्रयत्नसाध्यत्वमितरेषां कवीनामेव न पुनरस्येति भावस्सूचितः। तं व्यासं वन्दे इति पूर्वेणान्वयः उत्तरवाक्ये यच्छब्दप्रयोगात्।

एवं कविः व्यासमुनिमभिवन्द्य ततः स्वनैच्यमनुसन्धत्ते। कालिदासेति।

**कालिदासादिभिर्मान्यैरसवत्सु कृतेष्वपि।**
**महाकाव्येषु यत्नो मे काव्ये हास्यपदं व्रजेत् ॥ ३ ॥**

मान्यैः पूज्यैः रघुवंशादिमहाकाव्यरचनया कृतजगदुपकृतितया यशस्कायतया च तेपि मान्याः। कालिदासादिभिः अत्र कालिदासनामग्रहणेन तस्य जगद्विख्याततत्वं कविष्वभ्यर्हितत्वञ्च सूच्येते। आदिपदेन तस्मादर्वाचीनाः माघभारविप्रभृतयः कवयो गृह्यन्ते। रसवत्सु नवरसहृदयङ्गमेष्वित्यर्थः। महाकाव्येषु नगरार्णवशैलादिवर्णनया तल्लक्षणलक्षितेषु काव्येषु कृतेषु सत्स्वपि। अपिर्विरोधे। काव्ये नूत्नतया काव्यनिर्माणविषये मे मम यत्नः हास्यपदं परिहास्यस्थानं व्रजेत् गच्छेत्। अत्र सम्भावनायां विधिलिङ्प्रयोगः।

एवं नैच्यमनुसन्धाय सकारणं अवश्यं स्वकर्तव्यमाह। तथापीति।

**तथापि यदुनाथस्य सौलभ्यगुणवञ्चितः।**
**यतेऽत्र श्रेयसे नृणां स्पृहा नैसर्गिकी किल ॥ ४ ॥**

तथापि हास्यास्पदयत्नोपीत्यर्थः यदुनाथस्य यदुकुलसम्भूतस्य शौरेः श्रीवासुदेवस्येत्यर्थः। यदुनाथस्येत्यनेन वाङ्मनसागोचरो भगवानवाप्तसमस्तकामः श्रुत्येकसमधिगम्यः

सर्वेश्वरः केवलयदुनाथत्वेन सकलजनगोचरतां गत इति सौशील्यं सूच्यते । सौलभ्याख्य-गुणश्च । किञ्चिदपि स्वीयं परत्वमप्रकाश्य पाण्डवार्थं तुच्छतरदौत्यकृत्ये सज्ज इति यत्स एवात्र सौलभ्यगुणः । तेन वञ्चितः विप्रलब्धः यथा वञ्चनाविषयः कृत्याकृत्यविमूढधीः स्वाभिलषिते कार्ये प्रवर्तते तथा अहमपि अत्र अद्भुतदूताख्य काव्यरत्ने यते प्रयत्नवान्भवामि । तदेव सामान्येन समर्थयति नृणां पुंसां श्रेयसे अपवर्गायेत्यर्थः । स्पृहाशब्दप्रयोगाच्चतुर्थी । स्पृहा इच्छा नैसर्गिकी किल स्वभावसिद्धा किल, "किलेति प्रसिद्धौ" यः श्रेयसे स्पृहयति स तु साध्यासाध्यविचारशून्यः श्रेयस्साधनकार्ये प्रवर्तत इति लोकसिद्धमेवेति भावः ।

एवं स्वकर्तव्यमभिधाय प्रकृतकथामारभमाणः पाण्डवानां द्वादशवत्सरारण्यवासानन्तरभाविनमज्ञातवासं प्रस्तौति । त्रयोदशेति ।

**त्रयोदशशरत्पूर्त्यै पाण्डवा गूढतेजसः ।**
**शमीवृक्षा इवोषुस्ते कान्तया मत्स्यराट्पुरे ॥ ५ ॥**

ते, कृतद्वादशवत्सरारण्यवासाः पाण्डवाः पाण्डुपुत्राः पाण्डवा इत्यनेन तेषां धार्मिकत्वं सूचितम् । गूढतेजसस्सन्तः निगूहितपराभिभवनसामर्थ्यास्सन्तः एतेन तेषां वेषपरिवृत्तिस्सूचिता । कान्तया सैरन्ध्रीवेषधारिण्या द्रौपद्या सहेत्यर्थः । त्रयोदशशरत्पूर्त्यै त्रयोदशवत्सरपूरणरूपप्रयोजनायेत्यर्थः शमीवृक्षा इव मत्स्यराट्पुरे विराटनगरे ऊषुः वासमकुर्वन् । अत्रोपमानेन पाण्डवानामज्ञातत्वं सूचितं भवति । उपमालङ्कारः ।

एवमज्ञातवासमुक्त्वा तत्फलमाह । यत्रेति ।

**यत्राभिमन्युविक्षुब्धा अपि ते पाण्डुनन्दनाः ।**
**अभिमन्युविवाहेन प्रापुर्मोदमनुत्तमम् ॥ ६ ॥**

यत्र यस्मिन्विराटनगरे ते निगूहितात्मवेषाः पाण्डुनन्दनाः पाण्डवाः अभिमन्युविक्षुब्धा अपि अभिमन्युसंज्ञकेन पार्थसूनुना लब्धक्षोभा अपीति विरोधः अभितः मन्युः शोकः तेन विक्षुब्धा इति तत्परिहारः । अभिमन्युविवाहेन अर्जुनपुत्रस्याभिमन्योः उत्तरापाणिपीडनेन अनुत्तमं अवर्णनीयं मोदं सन्तोषं प्रापुः । अत्र विरोधेन पाण्डवानां सौजन्यं सूचितम् । किञ्च, अत्राभिमन्युविवाहकथनेन पाण्डवानामज्ञातवाससमाप्तिस्सूचिता । अनुत्तमं मोदं प्रापुरित्यनेन, भगवतो वासुदेवस्य सान्निध्यं तत्साह्यं च सूचिते भवतः ।

अथ विवाहानन्तरभाविकार्यं वक्तुमारभते । अथेति ।

**अथ ते प्रथनोत्सिक्तमानसाः प्रापुरञ्जसा ।**
**उपप्लव्यं सुहृद्भिस्तु साह्यकृद्भिस्ससैनिकैः ॥ ७ ॥**

अथ विवाहानन्तरं ते पाण्डवाः प्रथनोत्सिक्तमानसास्सन्तः युद्धौत्सुक्याक्रान्तमानसा-स्सन्तः साह्यकृद्भिरित्यनेन धर्मपक्षपातित्वं पाण्डवसुहृदां सूच्यते । अत एव ससैनिकैः चतुरङ्गबलसमेतैरित्यर्थः । सुहृद्भिस्तु मित्रैस्सममेवेत्यर्थः अव्ययानामनेकार्थत्वात् । अञ्जसा सहसेत्यर्थः । अत्रापि पूर्ववत् । उपप्लव्यं तदाख्यं स्थलं प्रापुः ।

तदा सर्वज्ञस्य विज्ञातपाण्डवमतस्य प्रकृतसौकर्येप्सोः भगवतो वासुदेवस्य हलिना सहागमनमाह । शरदिति ।

**शरत्प्रावृट्पयोदाभौ नीलाम्बरजनार्दनौ ।**
**दारुकप्रेरितेनाथ रथेनाजग्मतुर्नृपम् ॥ ८ ॥**

अथ अनन्तरं अत्र यथासङ्ख्यमन्वयः शरत्पयोदाभो नीलाम्बरः प्रावृट्पयोदाभो जनार्दनः । शरदभ्रकान्त्युक्त्या भगवतो बलभद्रस्य विशुद्धभोगादिशेषांशसम्भूतत्वं सूचितम् । प्रावृ-ट्पयोदकान्त्युक्त्या भगवतो जनार्दनस्य आश्रितसन्तापहरत्वं सद्यः फलप्रदत्वञ्च सूचिते । जनार्दनोक्त्या भगवतो दौत्यनैष्फल्यं भाविभारतयुद्धञ्च सूचिते भवतः । दारुकप्रेरितेन दारुकनाम्ना स्वसारथिना चोदितेन रथेन नृपं धर्मराजमुद्दिश्य आजग्मतुः । एव-मप्रार्थितागमनकथनेन वासुदेवस्याश्रितवात्सल्यं सौलभ्यञ्च सूचिते ।

**उपस्थितं सह भ्रात्रा वासुदेवं पृथासुतः ।**
**परिरभ्य भुजाभ्यां तमप्राक्षीत्कुशलं मुदा ॥ ९ ॥**

पृथासुतः धर्मराजः अत्र पृथासुत इत्यनेन परस्परसम्बन्धो ज्ञापितः । भ्रात्रा सह बलरामेण सह उपस्थितं सन्निहितं अप्रार्थितागतमिति यावत् । वासुदेवं वसुदेवपुत्रं श्रीकृष्णं मुदा प्रीत्या भुजाभ्यां दीर्घतरबाहुभ्यां परिरभ्य आलिङ्ग्य तं वासुदेवं कुशलं अप्राक्षीत् पप्रच्छ । अपि ते सुखागमनमिति कुशलप्रश्नमकरोदित्याशयः ।

धर्मराजकृतप्रश्नोत्तरभाविकार्यमाह । तत इति ।

**ततो जाम्बूनदोदग्रपीठमासेदिवान्हरिः ।**
**सुवर्णशिखरिप्रस्थं स्तनयित्नुरिवासितः ॥ १० ॥**

ततः प्रश्नानन्तरं हरिः भगवान्वासुदेवः जाम्बूनदोदग्रपीठं सुवर्णमयोच्चतरासनं सुवर्ण-शिखरिप्रस्थं मेरुपर्वतसानुं असितः नीलः असित इत्यनेन जलभरितत्वं सूचितं स्तनयित्नुरिव मेघ इव । अत्र स्तनयित्नुशब्देन घोषयुक्तत्वं सूचितम् । तेन युधिष्ठिर-कृतस्य प्रश्नस्य कृष्णेनोत्तरं दत्तप्रायमेवेत्यपि भावस्सूचितः । आसेदिवान् ।

सर्वेष्विति।

**सर्वेष्वप्युपविष्टेषु व्याजहार युधिष्ठिरः।**
**कृष्णं कमलपत्राक्षं केकिस्निग्धगलत्विषम् ॥ ११ ॥**

सर्वेष्वपि तत्रत्येषु समस्तजनेष्वपि उपविष्टेषु सत्सु परिगृहीतस्वोचितासनेषु सत्सु युधिष्ठिरः धर्मराजः अत्र युधिष्ठिर इत्यनेन "युद्धेचाप्यपलायनं" इति रीत्या युधिस्थिरस्थितिकथनेन युद्धभीत्यभावस्सूचितः। एवं च कृष्णं प्रति धर्मराजेन वक्ष्यमाणं भावियुद्धसम्भविष्यत्प्राणिहिंसानिवारणवचनं सङ्गच्छते। एतेन सर्वसौहार्दं सूचितम्। कमलपत्राक्षमित्यनेन श्रुतिसिद्धं पुण्डरीकाक्षत्वं सूचितम्। केकिनः मयूरस्य स्निग्धः मसृणः यो गलः कण्ठः तस्य त्विडिव कान्तिरिव त्विट् यस्य स तथोक्तः तम्। काञ्चनकान्तिसम्भिन्नेन्द्रनीलप्रभमिति यावत्। कृष्णं प्रति व्याजहार उवाच। वक्ष्यमाणप्रकारेणेत्यनुसन्धेयम्।

धर्मराजो भगवदायत्तस्थितित्वविवक्षया प्रथमं तत्कारणमाह। जगदिति।

**जगद्योने भवन्मायाजालबद्धचिदण्डजाः।**
**जन्तवो यान्ति ते लीलाचित्रकन्दुकतां ध्रुवम् ॥ १२ ॥**

हे जगद्योने, हे सर्वजगत्कारण। एवं हि भगवतानुगृहीतं "सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्। कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्। प्रकृतिं स्वामवष्टभ्य विसृजामि पुनःपुनः। भूतग्राममिमं कृत्स्नं अवशं प्रकृतेर्वशात्। मयाध्यक्षेण प्रकृतिस्सूयते सचराचरम्। हेतुनानेन कौन्तेय जगद्धि परिवर्तते। प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि। मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्। सम्भवस्सर्वभूतानां ततो भवति भारत" इति। श्रुतिरप्येवमेव हि, "तदैक्षत बहुस्यां प्रजायेयेति सोकामयत बहुस्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत" इत्येवं विधा बह्व्यः श्रुतयः। विस्तरभयान्नलिख्यन्ते। अत्र जगद्योनित्वोक्त्या भगवतस्सर्वान्तर्यामित्वं सूचितम्। भगवतस्सर्वशेषित्वात्, चिदचितोस्तच्छेषत्वात् च तदायत्तस्थितित्वं दर्शयति। भवदित्यादिना। भवतः या माया प्रकृतिः "मायान्तु प्रकृतिं विद्यात् मायिनन्तु महेश्वरम्" इति वचनात्। सैव जालं आनायः तेन बद्धाः नियन्त्रिताः चित एवाण्डजाः मत्स्याः। अत्र चिदण्डजानां मायाजालबद्धत्वोक्त्या बद्धचेतनानां प्रकृत्यविनाभावित्वं साधु दृढीकृतम्। अत एव "मम माया दुरत्यया" इत्युक्तम्। जन्तवः प्राणिनः अत्र जन्तुसामान्योक्त्या सुरनरतिर्यक्स्थावरादयः प्रोक्ताः। ते चिदचिच्छरीरकस्य तव लीलाचित्रकन्दुकतां "विचित्रा कर्मणो गतिः" इति रीत्या तत्तत्कर्मानुगुणतया परिगृहीतविचित्रतरशरीराः खलु जीवात्मानः। अत एव चित्रकन्दुकतामित्युक्तम्। नानावर्णशबलितेन

कन्दुकेन लीलावतां लीलायामौत्सुक्यं वर्धते किल ? तद्वदत्रापि लीलाविभूतौ भगवतो लीलावतः इति भावः। यान्ति अधिगच्छन्तीत्यर्थः। ध्रुवम्। अथवा ध्रुवं यान्तीत्यपि वा।

पूर्वोक्तकारणादाह। त्वदायत्तेति।

**त्वदायत्तस्थितिस्सोऽहं किं ब्रवीमि जगत्पते।**
**भूभारपरिहाराय तव जन्मेति मे मतिः ॥ १३ ॥**

हे जगत्पते हे सर्वेश्वर। अत्र जगच्छब्देन चेतनाचेतनमयं कार्यरूपं कारणरूपं सर्वमपि जगदुक्तं भवति। "मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव" इत्युक्तदिशा जगदन्तर्यामित्वात्। त्वदायत्तस्थितिः भवदधीनसत्तावानित्यर्थः। अन्यथा मदीया स्थितिरेव नास्तीति यावत्। सः भवतश्शरीरभूतः अहं अहंशब्दवाच्यः एतत्पिण्डविशिष्टः जीवात्मा। किं ब्रवीमि सर्वज्ञस्य सर्वशक्तस्य सर्वेश्वरस्य भवतः पुरतः यत्किञ्चिन्निवेदनमपि हास्यास्पदमिति भावः। अतः न किमप्यहं ब्रवीमि। किन्तु, मदाशयं प्रकटयामीति भावेनाह। भूभारेति। भूभारपरिहाराय यदा दुष्कृतां स्थितिः प्रबला तदा सम्भवत्येव भुवो भारः तत्परिहारस्तु दुष्कृतां निषूदनेन जायते। एवं हि भगवताऽनुगृहीतं "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥" "परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥" इति। धर्मसंस्थापनमेव मे प्रयोजनं नान्यदिति भावः। तव जन्म उत्पत्तिः। एतेन कर्मबद्धत्वं निराकृतम्। इति मे मतिः। एवं जानामीति यावत्।

तदेवोपपादयति। व्रज इत्यादिना।

**व्रजे शैशव एवोग्रां पूतनां कामरूपिणीम्।**
**कुचकुम्भमुखात्पीत्वा प्राणान्निहतवान्यतः ॥ १४ ॥**

यतः यस्मात्कारणात् व्रजे गोकुले शैशव एव अत्यन्तबाल्य एव डिम्भत्वदशायामिति यावत्। उग्रां घोररूपां कामरूपिणीं पयःप्रदानावसरे स्वेच्छया सुन्दररूपिणीं इति यावत्। एतेन तस्याः केवलवञ्चनात्मकत्वं सूचितम्। पूतनां प्राणान् कुचकुम्भमुखात् कुम्भसदृशकुचचूचुकात् कुच एव कुम्भः तस्य मुखात् वदनाग्रभागादित्यर्थः। पीत्वा निहतवान्। असीति शेषः। अत्र कुचकुम्भमुखात्पानोक्त्या प्राणेषु दुग्धत्वारोपः सिद्ध इत्येकदेशविवर्तिरूपकम्।

त्वन्नामेति।

**त्वन्नामलिप्सयेवारिश्शकटश्चक्रभृद्यतः।**
**डिम्भस्य चक्रिणस्तेऽङ्घ्रिप्रहतस्त्रुटितोऽभवत् ॥ १५ ॥**

यतः यस्मात्कारणात् अरिः निर्निमित्तमधिगतशत्रुभाव इत्यर्थः, "देवानां दानवानाञ्च सामान्यमधिदैवतं" इत्युक्तदिशा देवेष्विव दानवेष्वपि तस्य समत्वात् । शकटः तन्नामकासुरः त्वन्नामलिप्सयेव भवतः चक्रीति नाम लब्धुमिच्छयेवेत्युत्प्रेक्षा । चक्रभृत् सन् चक्रं रथाङ्गं बिभर्तीति चक्रभृत् डिम्भस्य उत्तानशयस्य चक्रिणः चक्रधारिणः ते तव अङ्घ्रिप्रहतस्सन् किसलयारुणकोमलचरणाहतस्सन् त्रुटितस्सन् चूर्णीकृतस्सन् अभवत् । गृहकार्यासक्तया यशोदया शकटाधस्स्थले शायितः सर्वशक्तोऽपि डिम्भत्वमाश्रितः स्वहननाय तच्छकटाविष्टं असुरं रोदनव्याजेन चालितचरणारविन्दः निहतवानित्याशयः ।

**तृणावर्तं कृतावर्तं वर्तयंस्तृणवद्यतः ।**
**गोकुले मर्त्यधर्मं त्वं प्रापयामासिथासुरम् ॥ १६ ॥**

गोकुले यतः यस्मात्कारणात् कृतावर्तं सर्वजिघांसया कृतचक्रभ्रमं तृणावर्तं तन्नामकमसुरं तृणवत् तृणमिव वर्तयन्सन् भ्रामयन्सन्नित्यर्थः । चक्रवातस्यापि चक्रवात इति यावत् । त्वं मर्त्यधर्मं मरणं प्रापयामासिथ ।

वत्सानामिति ।

**वत्सानां रक्षणौत्सुक्याच्चरता विपिने त्वया ।**
**हतो वत्सस्तु मायी यत्क्रूरकर्मा जनार्दन ॥ १७ ॥**

हे जनार्दन, यत् यस्मात्कारणात् वत्सानां शकृत्करीणां यद्वा अत्र वत्सशब्देन द्विहायन त्रिहायनप्रभृतयः गृह्यन्ते । शकृत्करीणां वनेचरत्वाभावात् । रक्षणौत्सुक्यात् परिपालन-कुतूहलात् हेतोः । विपिने अरण्ये चरता पर्यटता त्वया गोपबालकसजातीयविग्रहेण भवतेत्यर्थः । क्रूरकर्मा नैसर्गिकासुरकर्मेत्यर्थः । मायी मायया लब्धवत्सरूपः तुकारः एवकारार्थकः वत्सः तन्नामकासुरः हतः । अत्र विरोधो गम्यते ।

कृतेति ।

**कृतमत्स्यावतारत्वाच्छत्रुत्वं भावयन्निव ।**
**शितचञ्चूपुटाग्रं यज्जघन्थ बकमच्युत ॥ १८ ॥**

हे अच्युत, शत्रुसकाशाच्च्युतिरहित भगवन् कृतमत्स्यावतारत्वात् पूर्वं धृताद्भुतमहा-मीनरूपत्वात् हेतोः शत्रुत्वं मद्भक्षकोयं निसर्गरिपुरिति द्वेषं भावयन्निव मनसा स्मरन्निवेत्युत्प्रेक्षा । शितचञ्चूपुटाग्रं तीक्ष्णतरत्रोटिपुटकोटिं बकं धृतघोरबकरूपमसुरं जघंथ हतवान् ।

प्रख्यापयन्निति ।

**प्रख्यापयन्निवाघानां हन्तृत्वं श्रितवत्सल ।**
**अघमुन्मूल्य दुर्धर्षमरक्षस्संश्रितान्यतः ॥ १९ ॥**

हे श्रितवत्सल, अज्ञानाद्विपत्पात्राणामप्याश्रितानां रक्षणे जागरूकेत्यर्थः । "एवं हि अनुगृहीतं भागवते" तान्वीक्ष्य कृष्णस्सकलाभयप्रदो ह्यनन्यनाथान्स्वकरादपच्युतान् । दीनांश्च मृत्योर्जठराग्निघासान् घृणार्दितो दिष्टकृतेन विस्मितः" इति । यतः यस्मात्कारणात् अघानां दुरितानां हन्तृत्वं नाशकत्वं प्रख्यापयन्निव जगति प्रदर्शयन्निवेत्युत्प्रेक्षा । दुर्धर्षं मायया परिगृहीतोदग्रपर्वताकाराजगररूपतया केनाप्यविचाल्यमित्यर्थः, अघं तन्नामकमसुरं उन्मूल्य नाशयित्वा संश्रितान् तदुदरगतान् परेतान्सुहृदः वत्सांश्च अरक्षः रक्षितवान् ।

धेनुकेति ।

**धेनुकावनसक्तात्मा बभूविथ वने यतः ।**
**धेनुकोद्दलनोद्रिक्तसिंहरम्यविलासभाक् ॥ २० ॥**

यतः यस्मात्कारणात् वने अरण्ये धेनुकावनसक्तात्मा गोरक्षणासक्तहृदयः त्वं धेनुकायाः करिण्याः उद्दलने हनने अथवा तद्विभेदने उद्रिक्तः रुष्टः यः सिंहः तस्य रम्यः भयङ्करोपि दर्शनीय इत्यर्थः यः विलासः तं भजतीति भाक् सन् बभूविथ । धेनुकासुरं हतवानसीति यावत् । अत्रापि विरोधो गम्यते ।

बाल इति ।

**बालो भरतशास्त्रेपि प्रागल्भ्यमुपदर्शयन् ।**
**कालियस्य स्फटाग्रे यन्नृत्यन् दर्पमशीशमः ॥ २१ ॥**

यत् यस्मात्कारणात् बालोऽपि शैशवावस्थोपीत्यर्थः । भरतशास्त्रे भरतः नाट्यशास्त्रप्रवर्तकः तस्य शास्त्रं नाट्यशास्त्रं तस्मिन् । यद्वा अपिरत्रैवान्वेतव्यः । एतेन शैशव एव सर्वशास्त्रनिष्णातत्वं सूचितम् । प्रागल्भ्यं सामर्थ्यं उपदर्शयन्सन् प्रकटीकुर्वन्सन् । एतेन नृत्यवैविध्यं सूचितम् । कालियस्य तन्नामकसर्पस्य स्फटाग्रे फणाशिखरे अत्र अग्रग्रहणेन दौस्थ्यं प्रकाशितम् । नृत्यन् नर्तनं कुर्वन् एतेन धाष्ट्र्यं सूचितम् । दर्पं कालियस्य दृप्ततां अशीशमः नाशयामासिथ । एतेन बाल्य एव निजामानुषचेष्टितं प्रकाशितं भवति ।

छत्रेति ।

**छत्रीकृतगिरिर्बालः खण्डिताखण्डलोन्मदः ।**
**गोविन्देति समाहूतो यद्गोरक्षणतत्परः ॥ २२ ॥**

यत् यस्मात्कारणात् गोरक्षणतत्पर. गवां रक्षणमेव परमप्रयोजनं मन्यमान इति यावत्। बालः अबालोपि बालत्वेन सकलनयनगोचरतां गत इति यावत्। छत्रीकृतगिरिस्सन् स्वाश्रितगोगोपरक्षणार्थमेव अच्छत्रं छत्रं सम्पद्यमानं कृतः छत्रीकृतः गिरिः गोवर्धनपर्वतः येन स तथोक्तस्सन्। दण्डायमाननिजकोमलैकबाहुलीलोद्धृतपृथुलायतगोवर्धनगिरिरिति यावत्। अत एव खण्डितः नाशितः आखण्डलस्य इन्द्रस्य उन्मदः उद्रिक्तमदः येन स तथोक्तस्सन्। गोविन्देति गाः विन्दतीति गोविन्दः तस्य सम्बुद्धिः। स्वाश्रितगोरक्षणार्थं दर्शिताद्भुतचेष्टेति यावत्। इति समाहूतस्सन् पुरुहूतेन कामधेन्वाचेति शेषः। अभव इत्यध्याहार्यम्।

बहुगेहेति।

**बहुगेहनिगीर्णं यदजीर्णं च नवोद्धृतम्।**
**दावाग्निरिव तज्जीर्त्यै निगीर्णो भवता यतः ॥ २३ ॥**

यतः यस्मात्कारणात् भवता लीलामानुषविग्रहेण त्वया बहुगेहनिगीर्णं गोकुलगतसमस्तगोपीजनसदनेषु निगीर्णं यन्नवोद्धृतं नवनीतं तज्जीर्त्यै इव तस्य नवनीतस्य परिपाकरूपेण जीर्त्यै इवेत्युत्प्रेक्षा। दावाग्निः काननवह्निः निगीर्णः भक्षित इत्यर्थः।

द्रोग्धारमिति।

**द्रोग्धारं शङ्खचूडश्च चूडाशङ्खे प्रहृत्य तम्।**
**तच्चूडामणिमादाय प्रादास्सङ्कर्षणाय यत् ॥ २४ ॥**

यत् यस्मात्कारणात् द्रोग्धारं निर्निमित्तं द्रोहैकपरं तं क्रौर्येण प्रसिद्धं शङ्खचूडं च तन्नामकमसुरं च चूडाशङ्खे ललाटास्थ्नि प्रहृत्य तच्चूडामणिं तच्छिरोरत्नं आदाय सङ्कर्षणाय बलरामाय प्रादाः प्रदत्तवान्।

युग्मकेनाह, भ्रूभङ्गेति।

**भ्रूभङ्गभङ्गुरोद्रक्ततारकं सृक्कशष्पकम्।**
**रम्भमाणं नतग्रीवमुत्पुच्छं शकृदाविलम् ॥ २५ ॥**
**शृङ्गाग्रोत्क्षिप्तवल्मीकं खुरालिखितभूतलम्।**
**वृषभं वृषभेत्तारं यतः प्राणैर्व्ययूयुजः ॥ २६ ॥**

यतः यस्मात्कारणात् भ्रुवो भङ्गेन भङ्गुरोद्रक्ता वक्रातिशोणा तारका यस्य स तथोक्तः तम्। आकेकराख्यदृष्टिविशेषयुक्तमिति यावत्। सृक्कभागे तालुभागे शष्पकं बालतृणं यस्य स तथोक्तः तम्। रम्भमाणं तादृशरवविशिष्टं नतग्रीवं नामितस्फीतकन्धरं

उत्पुच्छं उन्नमितवालं शकृदाविलं रोषातिरेकप्रविगलद्गोमयपरिलिप्तमित्यर्थः। शृङ्गाग्राभ्यां विषाणकोटिभ्यां उत्क्षिप्तं कूलाघातकेल्या उद्धूलितमित्यर्थः। वल्मीकं नाकुः येन स तथोक्तः तम्। खुरालिखितं खुराग्रोत्कीर्णं भुवः तलं येन स तथोक्तः तं। वृषभेत्तारं धर्मनाशकं वृषभं वृषभासुरं प्राणैः व्ययूयुजः विघटयामासिथेत्यर्थः। स्वभावोक्तिः।

हेषेति।

**हेषाघोषितघोषान्तं दोषा निष्पिष्य केशिनम्।**
**तोषात्सुहृद्भिस्तुष्टो हि दोषाकरनिभानन ॥ २७ ॥**

हि यस्मात्कारणात् हे दोषाकरनिभानन, चन्द्रसदृशमुखमण्डल। एतेन घोरतराररिनिषूदनावसरेऽपि दर्शनीयमुखमण्डलतया परिश्रमाभावस्सूचितः। रोषात् अमर्षात्। एतेन तस्यारोपितबलत्वं सूचितम्। हेषया नादविशेषेण घोषितः शब्दापितः यः घोषस्य गोकुलस्येति यावत् अन्तः सीमाप्रदेशः यस्य स तथोक्तः तम्। एतेन गोकुलस्य गव्यूतिदूरवर्तिसत्वगणगर्भनिर्भेदकध्वनिविशेषस्सूचितः। केशिनं अश्वरूपधारिणं तन्नामकासुरं दोषा दीर्घतरभुजदण्डेन निष्पिष्य निष्पीड्य तद्वदनकुहराभ्यन्तरप्रवेशितबाहुदण्ड इति यावत्। सुहृद्भिः केशिदर्शनभीतैः स्वानुचरैः गोपबालैरित्यर्थः। तोषात् हर्षातिशयात् तुष्टः अभवः इति शेषः। अत्र शब्दालङ्कारः।

यत इति।

**यतो निलायनक्रीडातत्परो व्योमनामकम्।**
**दैत्यमाश्रितरक्षार्थमकार्षीर्व्योमसन्निभम् ॥ २८ ॥**

यतः यस्मात्कारणात् निलायनक्रीडातत्परः निगूहनलीलासक्तः। एतेन अज्ञत्वाभिनयस्सूचितः। त्वं व्योमनामकं तदन्तर्गततया समायातं दैत्यं। आश्रितानां गोपबालानां रक्षार्थं तद्रक्षणमेव परमप्रयोजनमिति यावत्। व्योमसन्निभं आकाशसमानं अकार्षीः नाशयामासिथेति यावत्।

असदिति।

**असत्सेवा स्वपाताय भवतीतीव बोधयन्।**
**न्यपातयो हि रजकं स्वभारग्रन्थिना समम् ॥ २९ ॥**

हे यस्मात्कारणात् असत्सेवा दुर्जनसेवा स्वपाताय आत्मन एव नाशायेत्यर्थः। भवतीति लट्प्रयोगेन शैघ्र्यं सूच्यते। इति बोधयन्निवेत्युत्प्रेक्षा। रजकं स्वभारग्रन्थिना समं निजचरमाङ्गसमारोपितवस्त्रभारसम्भारेण सहेत्यर्थः। न्यपातयः प्राणैर्वियोज्य पातयामासिथेत्यर्थः। सहोक्तिः।

यत इति ।

**यतः कुवलयापीडोऽप्याततायी त्वयाच्युत ।**
**हतः कुवलयापीडः पीडिताद्भुतविग्रहः ॥ ३० ॥**

यतः यस्मात्कारणात् हे अच्युत, गजादपि च्युतिरहित! त्वया बालेनेति यावत् कुवलयस्य भूमण्डलस्य आपीडोपि अवतंसोपि । अपिर्विरोधे । आततायी वधोद्यतः कुवलयापीडः कंसप्रेरितः तन्नामकगजः पीडिताद्भुतविग्रहस्सन् पीडितः भवता हिंसितः अद्भुतविग्रहः पीवरोदग्रतया अत्याश्चर्यकरकायः यस्य स तथोक्तस्सन् हतः ।

कन्दुकेति ।

**कन्दुकोद्वल्गनस्फीतसक्थ्यास्फोटनदोर्भ्रमैः ।**
**नियुद्ध्यन्घट्टितो मल्ले मल्लो हि भवता हतः ॥ ३१ ॥**

हि यस्मात्कारणात् भवता किंवानिष्टं भवितेति भीतैः सभ्यैरवेक्ष्यमाणेन त्वया । कन्दुकवत् उद्वल्गनं च स्फीतं च मांसलं कठिनं च यत्सक्थि ऊरुतलं तस्य आस्फोटनं च करतलेः प्रघट्टनमिति यावत् दोर्भ्रमश्च पृथुलमांसलभुजदण्डयोः परिभ्रमणं एतैः मल्लः मुष्टिकाख्य खुरलीपरिश्रमक्षीबः नियुध्यन्सन् बाहुयुद्धं कुर्वन्सन् मल्ले कपोलस्थले घट्टितस्सन् मुष्ट्या ताडितस्सन् हतः । स्वभावोक्तिः ।

पय इति ।

**पयःपानाय कंसे त्वं प्रत्यहं दर्शितादरः ।**
**कंसं हिंसितवान्यस्माद्धिसन्तं जगदच्युत ॥ ३२ ॥**

हे अच्युत, दुर्जनच्यावनायैव स्वयं च्युतिरहित । यस्मात्कारणात् । प्रत्यहं प्रतिदिनं त्वं मातापितृनिगलविमोचनैकचित्तः भवान् पयःपानाय क्षीरपानाय कंसे कंसाख्यनिजमातुले पानपात्रे च दर्शितादरस्सन् प्रकटितप्रीत्यतिशयस्सन् जगत् साधुजनबृन्दं इत्यर्थः हिंसन्तं पीडयन्तं कंसं कंसनामकं निजमातुलं हिंसितवान् मारयामासिथेत्यर्थः । अत्र विरोधो गम्यते शब्दालङ्कारः ।

भूभारेति पद्येनोपक्रान्तमुपसंहरति । सतामिति ।

**सतां हिताय लोकेश सर्वलोकसमोपि सन् ।**
**एवमुद्धृतवाल्लोककण्टकान्सत्पथेप्सया ॥ ३३ ॥**

हे लोकेश, हे सर्वेश्वर, त्वं सर्वलोकसमोपि सन् सुरनरतिर्यक्स्थावरादिषु द्वेषादिराहित्या-त्समस्सन्नपि सतां सत्पुरुषाणां हिताय भाविमङ्गलाय सत्पथेप्सया सन्मार्गं प्राप्तुमिच्छया

अथवा स्वर्गादिसुकृतलोकपद्धतिं प्रापयितुमिच्छयेति अन्तर्भावितणिच्कत्वेन व्याख्येयम् । लोककण्टकान् जनहिंसकान् दुर्जनानिति यावत् । सन्मार्गेप्सुः पथि पतितान् कण्टकान् उद्धरतीति लोकसिद्ध एव । एवं पूर्वोक्तप्रकारेण उद्धृतवान् । एतेन सर्वसमतया दूरीकृतवैषम्यनैर्घृण्यादिदोषस्य ते तादृशदुर्जनार्दनं श्लाघ्यमेवेति सूचितम् ।

तदिति ।

**तद्याभ्यर्थये नाथ भवन्तं हितकामतः ।**
**तितीर्षोर्दुःखपाथोधिं मम नौरसि यद्दृढा ॥ ३४ ॥**

हे नाथ, हे मत्स्वामिन् , एतेन सद्यो मद्दुःखनिराचिकीर्षया समायातो नाथो भवानिति सूच्यते । यत् यस्मात्कारणात् दुःखपाथोधिं दुःखसमुद्रं । एतेन निजदुःखस्य निरवधिकत्वं सूचितम् । तितीर्षोः तरितुमिच्छोः मम दुरोदरक्षपितसर्वैश्वर्यस्य मे दृढा अभेद्या अथवा नीरन्ध्रा नौः तरणिः समुद्रपारप्रापणसाधनमिति यावत् असि । तत् तस्मात्कारणात् हितकामतः भाविमङ्गलप्रेप्सयेत्यर्थः । अद्य अदृष्टदुःखान्ततयेदानीं भवन्तं मद्दुःखनाशकं त्वां अभ्यर्थये अभितः प्रार्थये । यद्वा आभिमुख्येन प्रार्थये ।

सर्वज्ञस्य भवतो धुरि कीदृशीयं मदीया प्रार्थना इत्याशङ्क्याह । नास्तीति ।

**नास्त्येवाविदितं किञ्चित्कालत्रयविदस्तव ।**
**लोकस्तु काङ्क्षते प्रायश्शुभोदर्कं हि शाश्वतम् ॥ ३५ ॥**

कालत्रयविदः भूतभविष्यद्वर्तमानकालेषु यत्प्रचलितं यत्प्रचलिष्यति यत्प्रचलति च तत्सर्वं विजानतः तव अविदितं अज्ञातं किञ्चिदपि नास्त्येव । अपि तु सर्वमपि विदितमेवेत्यर्थः । तर्हि किमर्थमभ्यर्थनेति चेत् । लोकस्तु जनस्तु । तुस्तु भेदे । प्रायः बाहुल्येन शाश्वतं शश्वद्भवं अविनाशीति यावत् । शुभोदर्कं मङ्गलभाविफलं काङ्क्षते हि अपेक्षते हि । हि प्रसिद्धौ । अयमाशयः स्वयं दुराचारोपि स्वकर्मानुगुणं फलमनादृत्य दुःखगन्धरहितं सुखैकाकारं फलमपेक्षते । तदर्थं प्रार्थनेति ।

पूर्वेति ।

**पूर्वकर्मानुबद्धं हि चेतनः फलमश्नुते ।**
**वप्त्रे निम्बतरुः किं वा दास्यत्याम्रफलं हरे ॥ ३६ ॥**

हे हरे, चेतनः प्राणिसामान्यमित्यर्थः । पूर्वकर्मानुबद्धं जन्मान्तरकृतसुकृतदुष्कृतानुसृतं फलं सुखदुःखरूपं फलं अश्नुते हि अनुभवति किल । हीति प्रसिद्धौ । तदेव व्यतिरेकदृष्टान्तमुखेनाह । निम्बतरुः मालिकवृक्षः वप्त्रे तद्बीजावापकर्त्रे आम्रफलं परिमळभरित-

मधुररसपूर्णं माकन्दफलं दास्यति किं वा न दास्यत्येव। अपितु कटुतरनिम्बफलमेव तद्वत्प्राणिसामान्येन चिरसञ्चिततत्तत्कर्मफलमनुभवेनैव क्षपयितव्यं नान्यथेति भावः।

तर्हि तत्तत्कर्मफलानुभवमन्तरा प्राणिनां नैवोत्तारणमित्याशङ्क्याह। अथवेति।

**अथवा तव कारुण्यपात्रं यो भवति प्रभो।**
**स तरिष्यति दुःखाब्धिं पापात्मापि प्रपन्नवत् ॥ ३७॥**

हे प्रभो, हे सर्वेश्वर, अथवा पूर्वोक्तदिशा तत्तत्कर्मानुगुणफलानुभवमन्तरेणापीत्यर्थः। यः चेतनः तव करुणारूपिणस्ते कारुण्यपात्रं निर्हेतुकदयाभाजनं भवति। सः पापात्मापि पापीयानपि चेतनः प्रपन्नवत् शरणागत इव। विभीषणतुल्य इति यावत्। दुःखाब्धिं दुस्तरक्लेशसमुद्रं तरिष्यति। दुःखसमुद्रोल्लङ्घनेन सुखरूपतीरमवाप्स्यतीत्याशयः।

नाहं साधनानुष्ठानेन समुज्जीवेयं अपितु भवन्निर्हेतुककृपयैवेत्याह। नेति।

**न कर्मज्ञानभक्त्याख्यान्योगानहमतन्द्रितः।**
**अनुतिष्ठामि किन्तु त्वत्कृपान्यस्तभराधिकः ॥ ३८॥**

अहं एवं दुःखसमुद्रे निमग्नोऽहं कर्मज्ञानभक्त्याख्यान् योगान् कर्मयोगज्ञानयोगभक्तियोगानित्यर्थः। अतन्द्रितस्सन् दूरीकृतालस्यस्सन् नानुतिष्ठामि नाचरामि। आलस्येन दूरीकृतयोगत्रयोस्मीति भावः। किन्तु त्वत्कृपान्यस्तभराधिकः भवन्निर्हेतुकदयापातितात्मसर्वभारतया कर्मादियोगानुष्ठात्रपेक्षया उत्कृष्टस्सन्नस्मि। अयमाशयः। भवन्निर्हेतुकदयां स्मारंस्मारं धैर्येण त्यक्तकर्माद्यनुष्ठानः निर्भरोऽस्मीति।

एवमात्मनो नैच्यमनुसन्धाय निजाशयं प्रकाशयति। अद्येति।

**अद्य यद्यपि युद्धार्थी धार्तराष्ट्रस्ससाधनः।**
**अहन्तु शान्तिमिच्छामि प्रजाक्षोभं विभावयन् ॥ ३९॥**

अद्य सम्प्रति धार्तराष्ट्रः धृतराष्ट्रतनूजः दुर्योधनः। धार्तराष्ट्र इत्यनेन केवलवञ्चनात्मकत्वं सर्वसाद्यसमृद्धिमत्वञ्च सूचिते भवतः। यद्यपि प्रार्थनायां कृतायां सत्यामपीत्यर्थः। युद्धार्थी युद्धापेक्षी। अत एव ससाधनः चतुरङ्गबलसहित इत्यर्थः। वर्तते इति शेषः। अहन्तु निरपराध्युदासीनजनहिंसाभावनापरोऽहन्तु। तुस्तु भेदे। प्रजाक्षोभं मद्रक्षणान्तर्भूतप्रजापीडामित्यर्थः। विभावयन्सन् विशेषतश्चिन्तयन्सन् शान्तिं युद्धाभावरूपां शान्तिं इच्छामि अपेक्षे। उद्धतेपि शठेपि तस्मिन्सुयोधने प्रजाक्षोभपरिहारार्थं प्रह्वभावेन मया गन्तव्यं इत्याशयः।

बन्धुयुद्धे दोषान्तरं प्रदर्श्य स्वमतमाह । किञ्चेति ।

**किञ्च बन्धुजनैस्साधं युद्धं लोकविगर्हितम् ।**
**तादृशे कर्मणि प्रज्ञा यात्यवाङ्मुखतां मम ॥ ४० ॥**

किञ्च बन्धुजनैस्साधं भ्रातृभिस्सहेत्यर्थः युद्धं कलहः लोकविगर्हितं जनैर्विशेषतो निन्दितं अयशस्करमिति यावत् । अत एव तादृशे अयशस्करे कर्मणि कार्ये मम सौहार्दमिच्छतो मे प्रज्ञा धीः अवाङ्मुखतां पराङ्मुखतां याति । अकीर्तिकरबन्धुयुद्धजिहासैव मम प्रबलेत्याशयः ।

प्रचलतु नाम युद्धमेव किं नश्छिन्नं इति चेदाह । यदीति ।

**यदि जन्यं भवेदद्य विधिना प्रोक्षितान्ध्रुवम् ।**
**मन्येहं सैनिकान्कृष्ण देवतायै पशूनिव ॥ ४१ ॥**

हे कृष्ण, जन्यं सुयोधनापेक्षया युद्धं भवेद्यदि प्रचलेद्यदि । सम्भावनायां लिङ् । सैनिकान् उभयपक्षेपि साह्यार्थं सन्नीभूतानि चतुरङ्गबलानि । देवतायै ग्रामदेवतामुद्दिश्येत्यर्थः । पशूनिव छागादिपशूनिव । अत्रानेनोपमानेन सैनिकानां अज्ञत्वं निरपराधित्वञ्च सूचिते भवतः । विधिना दैवेन कालेनेति यावत् । प्रोक्षितान्सतः अहं मन्ये । एतद्ध्रुवमित्यर्थः । छेदनात्पूर्वं छागादिपशूनां शिरस्सूदकेन प्रोक्ष्य तदनन्तरं यथा तान् छिन्दन्ति तद्वदिति भावः । प्रोक्षितानां छागादीनां जीविताशा नैव किल ।

बन्धुनाशादुपात्तो विषयोपि न मे सुखावह इत्याह । नेति ।

**नोत्सहे नाथ वैराग्यादिव शोणितकैतवात् ।**
**बद्धकाषायवसनामनुभोक्तुञ्च मेदिनीम् ॥ ४२ ॥**

हे नाथ, हे मत्स्वामिन्, मन्नाथत्वादेव त्वयि निस्सङ्कोचं मदाशयमावेदयामीत्यभिप्रायः । वैराग्यादिव आत्मार्थं परस्परं कलहायमानयोः आवयोर्दर्शनाज्जिहासया विरक्ततयेवेत्युत्प्रेक्षा । शोणितकैतवात् रणक्षेत्रे परस्परप्रहितप्रहरणप्रहारक्षतयोधदेहस्रुतासृग्व्याजात् बद्धकाषायवसनां बद्धं यत्काषायवसनं रक्तवस्त्रं यया सा तां । मेदिनीं मेदःप्रदिग्धां भूमिम् । एतेन असह्यता सूचिता । अनुभोक्तुञ्च अनुभवितुमपि नोत्सहे न वाञ्छामीत्यर्थः । अत्र हेतूत्प्रेक्षाकैतवापह्नुत्योस्सङ्करः ।

परगुणविमर्शने युद्धमेव कर्तव्यमित्यभिप्रायेणाह । यद्यपीति ।

**यद्यप्यधर्मविपणिः परस्वास्वादमत्कुणः ।**
**दुर्नीत्युपघ्नस्सभवेन्मानदण्डाहितस्थितिः ॥ ४३ ॥**

यद्यपि सः दुर्योधनः अधर्मविपणिस्सन् श्रुतिविरुद्धकर्मजातस्य पण्यवीधिका विक्रय-भूमिरिति यावत्। एतेन पण्यवीधिकायां यथा वस्तुजातं तथैतरेभ्यो विस्तारयत्ययमधर्ममिति भावस्सूच्यते। परेषां यत्स्वं द्रव्यं तस्य आस्वादः अनुभवः तस्मिन्विषये मत्कुणः रक्तचूषणपटुकीटविशेषः। दुर्नीतेः दुष्टनयस्य उपघ्नः आश्रयतरुः। मानेन चित्तसमुन्नत्या कृतः यः दण्डः शिक्षा तेन आहिता सम्पादितेत्यर्थः स्थितिः यस्य स तथोक्तः। किञ्च मानदण्डेन परिमाणदण्डेन आहिता कृता स्थितिः स्वस्थित्यनुगुणभूभाग इत्यर्थः। यद्वा मान एव दण्डः तस्मिन् आहिता स्थितिः येन स तथोक्तः। एतेन मानाभावे स्वस्थितिरेव नास्तीति भावस्सूच्यते। भवेत्। अत्र रूपकम्। एकदेशविवर्तिरूपक-भेदश्च।

तथापीति।

**तथापि सन्धिमिच्छामि कल्पयत्यैक्यमावयोः।**
**यस्त्वया योगदक्षेण दारुणोर्भिन्नयोरिव ॥ ४४ ॥**

तथापि पूर्वोक्तदुर्गुणभूयिष्ठतादर्शनेपीत्यर्थः। सन्धिं सौजन्यप्रदर्शनकर्मेति यावत्। इच्छामि अपेक्षे। योगदक्षेण उपायसमर्थेन संयोजनकुशलेन च त्वया समयोचितप्रतिभेन भवता कृतः यः सन्धिः भिन्नयोः विदलितयोरित्यर्थः। दारुणोरिव आवयोः भूम्यर्थं शत्रुत्वं भावयतोः भ्रात्रोः ऐक्यं सौहार्दं अभिन्नताञ्च कल्पयति समर्थयति। तं सन्धिमिति पूर्वेणान्वयः। उपमालङ्कारः।

एकवस्तुकृते परस्परसजातीयकलहः अत्यन्ततुच्छ इत्याह। एकेति।

**एकामिषकृते लोके कलहो यद्द्वयोरपि।**
**तद्याति श्वस्वभावं हि न तत्प्राप्तिर्द्वयोरपि ॥ ४५ ॥**

लोके एकामिषकृते एकभोग्यवस्तुप्राप्त्यर्थमित्यर्थः। द्वयोरपि कलह इति यत्। तत् श्वस्वभावं शुनकस्वभावं याति हि। अधिगच्छति किल। हीति प्रसिद्धौ। द्वयोरपि कलहायमानयोरुभयोरपि तत्प्राप्तिः भोग्यवस्तुलाभः नास्ति हि द्वयोः कलहेन तृतीयस्य लाभः। न पुनरुभयोरिति भावः। निदर्शनालङ्कारः।

अघटनघटनासामर्थ्यं सूचयितुमाह। परात्पर इति।

**परात्परोऽपि शौरे त्वं मादृशानुग्रहेच्छया।**
**अवतीर्णोऽसि ते हन्त सौलभ्यं महदद्भुतम् ॥ ४६ ॥**

हे शौरे, इदानीं शूरवंश्यत्वेन व्यवह्रियमाण मादृशजनदृष्टिगोचरेति यावत्। परात्परोपि सत्तमादपि सत्तमोपि। अथवा परः जीवात्मा तस्मादपि परः पुरुषोत्तम इत्यर्थः।

अपिर्विरोधे। त्वं मदग्रे मनुष्यसाधारण्येन स्थितो भवानित्यर्थः। मादृशानुग्रहेच्छया दुरोदरादिदुर्वृत्तस्य मादृशस्य मूढजनस्य अनुग्रहकाङ्क्षया अवतीर्णस्सन् भुवि मनुष्य-सजातीयत्वेन कृतावतारस्सन् असि। हन्तेत्यनुकम्पायाम्। वनगजः यथा तत्सजातीय-गजान्तरसान्निध्येन गृह्यते तद्वदिति भावः। सुलभस्य भावः सौलभ्यं महदद्भुतं अत्याश्चर्यं पण्डितपामरपशुपक्ष्यादिभिरपि निरन्तरायमनुभूयसे इत्याश्चर्यार्थः।

इदानीं स्वसङ्कल्पमाह। तदेवेति।

**तदेव धैर्यमापाद्य चोदयत्यद्य मे मनः।**
**एतदर्थममुं दौत्ये नियुङ्क्ष्वेति क्षमस्व माम् ॥ ४७ ॥**

अद्य भवत्सौलभ्यगुणानुचिन्तनानुपदमेवेत्यर्थः। तदेव सौलभ्याख्यगुण एव धैर्यं निर्भयत्वं आपाद्य आसमन्ताज्जनयित्वा मे स्वकार्यैकधुरन्धरस्य मम मनः अकपटं स्वान्तं एतदर्थं परस्परसौहार्दसम्पादनार्थं। अमुं अग्रतः स्थितं सुलभं परात्परं दौत्ये दूतभावे प्रेष्यत्वे इति यावत्। नियुङ्क्ष्व शाधि। इति एवं रीत्या। चोदयति प्रेरयति मां कृत्या-कृत्यविवेकशून्यं मां क्षमस्व एतादृशं मदपराधं मनसि मा चिन्तयेत्यर्थः। एवं प्रवृत्तौ भवद्गुण एवापराध्यति न मे कोप्यपराधः इत्यपि भावः।

इतीति।

**इत्युक्त्वा विररामाथ मदिरामोदमेदुरः।**
**मदघूर्णितताम्राक्षश्शौरिमूचे प्रलम्बजित् ॥ ४८ ॥**

इति पूर्वोक्तप्रकारेण उक्त्वा विरराम मौनमङ्गीचकार। अथ मदिरायाः वारुण्याः आमोदः गन्धः तेन मेदुरः पूर्ण इत्यर्थः। अत एव मदिरासेवनया यो मदः तेन परिभ्रामितारुण-नयनः। एतेन विशेषणद्वयेन सद्यो मद्यपानं सूचितं। प्रलम्बजित् बलरामः शौरिं श्रीकृष्णं प्रति ऊचे वक्ष्यमाणप्रकारेणोवाचेत्यर्थः।

प्रथमतः दुर्योधनपक्षपातित्वशङ्कां परिहरन्नाह। नाहमिति।

**नाहं ब्रवीमि शौरे तत्पक्षपातेन साम्प्रतम्।**
**मन्ये मानीति तं नीतिवर्जितं धृतराष्ट्रजम् ॥ ४९ ॥**

हे शौरे, साम्प्रतं अधुना अहं भवदग्रजोऽहं तत्पक्षपातेन तस्मिन्दुर्योधने अभिमाने-नेत्यर्थः। न ब्रवीमि दुष्टेपि गुणवत्वमारोप्य न कथयामीत्यर्थः। तं चिरपरिचितमित्यर्थः धृतराष्ट्रजमित्यनेन केवलवञ्चनापरत्वं सूचितम्। नीतिवर्जितं सन्तं नीतिबाह्यं सन्तं मानीति मन्ये अहमपि जानामीत्यर्थः। अतएव तत्पक्षपातेन वक्तुं नावकाश इति भावः।

तद्दौष्ट्यमेवोपपाद्य सतां स्वभावमाह । धर्मेति ।

**धर्मवर्त्मजुषामेषां द्रोग्धा यद्यपि वञ्चकः ।**
**सुयोधनस्तथाप्यद्य क्षन्तव्यो मन्तुरीदृशैः ॥ ५० ॥**

यद्यपि सुयोधनः दुर्योधनः । सुयोधन इत्यनेन व्यतिरेकविधया युद्धासामर्थ्यं तस्माद्भयञ्च सूचिते भवतः । वञ्चक इत्यनेन युद्धं विनैव शाठ्येन तत्स्वापहरणाभिलाषस्सूच्यते । अतएव धर्मवर्त्मजुषां धर्ममार्गैकसक्तानामित्यर्थः । एषां वनवासक्लिष्टानामिदानीं अत्र-स्थितानां पाण्डवानां द्रोग्धा विप्रियकारी । तथापि एतादृशानेकदुर्गुणभूयिष्ठोपीत्यर्थः । अद्य सन्दिग्धदशायां ईदृशैः सत्पुरुषत्वेन परिगणितैः धर्मपरायणैरेतैः मन्तुः दुर्योधन-कृतापराधः क्षन्तव्यः निसर्गजोयं स्वभाव इत्युदासितव्यमित्यर्थः ।

दुर्योधने दोषमनूद्य तदपनयनोपायमाह । आशेति ।

**आशातिमिरजो दोषः पिधत्ते चक्षुरान्तरम् ।**
**उपदेशाञ्जनेनैव व्यपोह्यस्सतु नान्यथा ॥ ५१ ॥**

आशैव इदमपि सम्पादनीयं नैतावतालमित्याकारकापर्याप्तताधीरेव तिमिरं विवेकापनोदन-दक्षगाढान्धकारः तस्माज्जातः समुत्पन्नः दोषः ममकाररूपदोषः आन्तरं चक्षुः विवेकज्ञान-मित्यर्थः पिधत्ते तिरोहितं करोति । यथा तिमिराख्यो दोषः नयनयोः ग्राहकशक्तिं तिरोधत्ते । तथेति भावः । तर्हि किं कर्तव्यमिति चेदाह । उपदेशेति । उपदेश एव कर्तव्याकर्तव्यज्ञानजनकसत्पुरुषवृत्तान्तबोधनमेव अञ्जनं तेनैव सः आशातिमिरजो दोषः व्यपोह्यः परिहरणीयः । अन्यथा अञ्जनमन्तरा प्रकारान्तरेणेत्यर्थः । न तु नैव परिहर्तुं योग्य इत्यर्थः । तुस्त्ववधारणे । तिमिरजं नयनदोषं यथौषधिविशेषनिर्मितेनाञ्जनेन परिहरन्ति तथेति भावः । रूपकालङ्कारः ।

तेन समं वैरानुबन्धे दोषान्तरं दर्शयति । अनन्तेति ।

**अनन्तभूभृद्गर्भस्स जैवातृकविवर्धितः ।**
**गम्भीरो वाहिनीनाथस्समुद्र इव दुस्तरः ॥ ५२ ॥**

अनन्ताः असंख्याताः ये भूभृतः राजानः पर्वताश्च ते गर्भे यस्य स तथोक्तः । जैवातृकैः आयुष्मद्भिः प्रबलैस्सुहृद्भिरिति यावत् । चन्द्रेण च । विवर्धितः प्रोत्साहितः वृद्धिं प्रापितश्च गम्भीरः गाम्भीर्यगुणविशिष्टः अप्रकाशितशाठ्य इति वा । अगाधश्च । वाहिनीनां सेनानां नदीनाञ्च नाथः । अत एव समुद्र इव दुस्तरः जेतुमशक्यः तरितु-मशक्यश्च । सः दुर्योधनः भवतीत्यर्थः । दुर्गतानामाढ्येन समं वैरानुबन्धो दोषायेति भावः । उपमालङ्कारः ।

समृद्धिमत्तया दुस्तरत्वमुपपाद्य सम्प्रति तस्य बलाधिक्यमाह । गदायामिति ।

**गदायां सारतो घृष्टः प्रकाशयति सर्वतः ।**
**सोपि गन्धं स्वकीयं यश्चन्दनद्रुरिवानघम् ॥ ५३ ॥**

सोपि दुर्योधनोपि । अपिना भीमार्जुनौ यथा श्लाघ्यपराक्रमौ तथा दुर्योधनोपीति गम्यते । गदायां गदायुधविषये गदायुद्धे इति यावत् । सारतः बलतः स्थिरांशतश्च घृष्टः ताडितः मर्दितश्च सर्वतः सर्वप्रकारेण सर्वत्र च । चन्दनद्रुरिव चन्दनवृक्ष इव । स्वकीयमित्यनेन निसर्गजत्वं सूच्यते । अनघं निर्दुष्टं गन्धं गर्वं आमोदञ्च । यत् यस्मात्कारणात् प्रकाशयति प्रकटीकरोति । तस्मादपि दुस्तर इति पूर्वेणान्वयः । चन्दनवृक्षः स्वयं गन्धविशिष्टोपि अन्तस्स्थिरांशघर्षणेन यथा स्वकीयं गन्धं बहिरुद्गमति तथायमपि प्रतिपक्षघर्षणेन स्वकीयं बलमिति भावः । उपमालङ्कारः ।

एवं तद्बलमभिधाय प्रकृतकार्यमाह । धर्मेति ।

**धर्माशयानुगुण्येन कुरु सन्धिं कुरूद्वहैः ।**
**अगदङ्करतां याति तव वाणी गदाधर ॥ ५४ ॥**

धर्माशयानुगुण्येन धर्मराजाभिप्रायानुकूल्येनेत्यर्थः कुरूद्वहैस्सह दुर्योधनप्रभृतिभिस्सह सन्धिं सौहार्दरूपं संयोगं कुरु कल्पय । मूर्खे कथं मया सौहार्दं कल्पयितुं शक्यते इति चेदाह । अगदङ्करतेति हे गदाधर इति सम्बोधनेन तवायुधदर्शनमात्रेण मूर्खोपि परवशो भवतीति सूच्यते । अत एव तव अप्रतिहतायुधपाणेर्भवतः वाणी हितोक्तिः अगदंकरतां वैद्यतां याति प्राप्नोति । मौर्ख्यरूपव्याधिविमुक्ततां जनयतीति यावत् ।

एवमिति ।

**एवं ब्रुवति तालाङ्के बलवाननिलात्मजः ।**
**विललापाबलाभोऽथ विनिपात्य गदां भुवि ॥ ५५ ॥**

एवं पूर्वोक्तप्रकारेण तालाङ्के बलरामे ब्रुवति सति निवेदयति सतीत्यर्थः । अथ तदनन्तरं बलवान् गजायुतबलविशिष्टः अनिलात्मजः वायुसुतः भीमः । एतेन तस्य युद्धे पराजयाभावस्सूचितः । एवं सत्यपि अबलाभस्सन् स्त्रीसदृशस्सन् गदां स्वविजयनिदानं निरन्तरमविनाभूतां गदामित्यर्थः । भुवि विनिपात्य दुःखातिरेकेण स्रंसयित्वेत्यर्थः । विललाप रुरोद । प्रत्यर्थिविमर्दनदक्षे सत्यपि बले अनिर्वचनीयापराधभूयिष्ठेपि शत्रौ दयाद्रवीभूतहृदयः बलकार्ये पराङ्मुखो बभूवेत्याशयः ।

अनन्तरं दयाधीनहृदयो निजाशयं प्रकाशयति । अन्तर्यामीति ।

**अन्तर्यामी भवान्नाथ त्वदायत्ता च भारती ।**
**तत्त्वया चोदितश्चित्ते भावमावेदयाम्यहम् ॥ ५६ ॥**

हे नाथ, हे मत्स्वामिन् भवान् सकलचराचरान्तःप्रविष्टस्त्वं अन्तर्यामी ममाप्यन्तस्थितोसीत्यर्थः । अत एव मम जिह्वायां प्रवर्तमाना भारती वाणी त्वदायत्ता भवदधीना । तत् तस्मात्कारणात् चित्ते हृदये त्वया अन्तस्स्थितेन भवता चोदितः प्रेरितः अहं भवद्दासोहं भावं अभिप्रायं आवेदयामि प्रकाशयामि । एतेन सर्वथा भवदायत्तस्थितिरहं स्वातन्त्र्येण न किमपि कर्तुं समर्थः इति निजनैच्यं प्रकाशितं भवति ।

स्वभावजं कार्यमपि प्रतिबध्नाति भवद्दर्शनमित्याह । अमर्षेति ।

**अमर्षज्वलनज्वालाक्वाथ्यमानोपि साम्प्रतम् ।**
**दृष्ट्वैव कालजीमूतं भवन्तं शान्ततां गतः ॥ ५७ ॥**

अमर्ष एव क्रोध एव ज्वलनः अग्निः तस्य ज्वाला शिखा तया क्वाथ्यमानोपि पच्यमानोपीति यावत् । अपिर्विरोधे । साम्प्रतं अधुना कालजीमूतं नीलमेघं भवन्तं अत्र भगवति नीलजीमूतत्वरूपणेन केवलसूर्यातपतापध्वंसनदक्षप्रसिद्धजीमूतापेक्षया स्वाश्रितजनतातापत्रयविध्वंसनदक्षत्वं सूचितम् । दृष्ट्वैव विलोक्यैव एवकारेण भगवद्दर्शनमहिमातिशयः प्रदर्शितः । शान्ततां निर्वापितक्रोधानलतां गतः प्राप्तवानस्मीति यावत् । भवद्दर्शनेन स्वभावजो मदीयः क्रोधः प्रशान्त इत्याशयः ।

सम्प्रति दुर्योधनदौर्जन्यमाह । यद्यपीति ।

**यद्यप्यमर्षणो मानी मह्यं द्रुह्यति शैशवात् ।**
**दुर्योधनो धनोद्रिक्तो राधेयाराधनोत्सुकः ॥ ५८ ॥**

यद्यपि धनोद्रिक्तः परस्वापहरणमत्तः दुर्योधनः अमर्षणः निर्निमित्तं निरपराधेष्वपि कोपकलुषः मानी निसर्गतः चित्तसमुन्नतिर्धृष्टः शैशवात् बाल्यादारभ्येत्यर्थः । राधेयस्य धर्माधर्मविवेकशून्यनिकृष्टजातिसमुत्पन्नस्य कर्णस्येत्यर्थः । आराधने मनस्सन्तोषणे उत्सुकस्सन् उत्साहविशिष्टः सन् मह्यं द्रुह्यति मां द्वेष्टीत्यर्थः ।

सभायामिति ।

**सभायां निर्जितानस्माનतिसन्धानबन्धुना ।**
**न तद्याति स्मृतिपथाद्यदुदीर्णं दुरात्मना ॥ ५९ ॥**

सभायां नृपसभे अतिसन्धानबन्धुना वञ्चनाव्यापारैकप्रियेणेत्यर्थः। अत एव दुरात्मना अकृत्यकरणप्रवृत्तेनेत्यर्थः। दुर्योधनेन निर्जितान् अधर्मप्रयोगपराजितान् अस्मान्प्रति यत् अश्राव्यं कठोरं वचः उदीर्णं उक्तं तत् वचः स्मृतिपथात् न याति। न विस्मृतमित्यर्थः तत्स्मरणेन क्रोधानलो यद्यपि प्रज्वलितो भवतीति भावः।

किञ्च श्यामलेति।

**श्यामलारालसुस्निग्धां वेणीं वेदिभुवो बलात्।**
**भुजङ्गीमिव संविष्टां कर्षयामास यच्छठः ॥ ६० ॥**

शठः गूढविप्रियकृद्दुर्योधनः वेदिभुवः यजनवेदिसम्भूतायाः द्रौपद्याः। एतेन परिशुद्धत्वं अयोनिजत्वञ्च सूचिते भवतः। श्यामलाच चञ्चरीकसवर्णाच अरालाच कुटिलाच सुस्निग्धाच स्वभावतो मसृणाच तां वेणीं बलात् बलात्कारेण संविष्टां प्रसुप्तां भुजङ्गीमिव कृष्णसर्पीमिव कर्षयामासेति यत् निजानुजदुश्शासनमुखादाकर्षयामासेति यत् तत्सर्वमित्युत्तरत्रान्वेति। अत्र प्रसुप्तभुजङ्गीदृष्टान्तेन तत्प्रबोधनशीलस्य यदाकदावापि तन्मुखादेव नाशो भविष्यतीति सूचितम्।

पञ्चत्वमिति।

**पञ्चत्वं पाण्डुपुत्राणां काङ्क्षन्नक्षीणकिल्बिषः।**
**नूत्नं वेश्माश्महृद्वह्नौ यज्जुहावाहवात्तभीः ॥ ६१ ॥**

अक्षीणकिल्बिषः दानधर्माद्याचरणादप्यपरिहार्यवृजिन इत्यर्थः। पाण्डुपुत्राणां धर्मराजप्रभृतीनां पाण्डवानां पञ्चत्वं पञ्चसंख्याकत्वं मरणं च काङ्क्षन्सन् अपेक्षमाणस्सन् अत्र विरोधो गम्यते। आहवात् अर्थात्पाण्डवैस्साकं युद्धात् आत्ता प्राप्ता भीः भयं येन स तथोक्तस्सन्। एतेन पाण्डवानामेव युद्धे जय इति सूचितम्। अत एव शाठ्येन नूत्नं नवं वेश्म जतुगृहं अश्महृत्सन् पाषाणवत्कठिनहृदयस्सन् वह्नौ अग्नौ जुहावेति यत् उद्दीपयामासेत्यर्थः। तत्सर्वमित्युत्तरत्रान्वेति। पाण्डवानां प्राबल्यमनुचिन्त्य वञ्चनया परिकल्प्य जतुवेश्म तद्विधक्षया पाण्डवान्प्रवेश्य वह्निमदापयदिति कथा।

हृच्छूलमिति।

**हृच्छूलमात्मनः क्षिप्रमुत्पाटयितुमिच्छया।**
**जाह्नवीखातशूलाग्रे यन्मां चिक्षेप मन्दधीः ॥ ६२ ॥**

मन्दधीः कृत्याकृत्यविवेकशून्यः दुर्योधनः आत्मनः स्वस्य हृच्छूलं हृदयशूलभूतं भीमं यद्वा भीमसत्तामनुचिन्त्य तस्मादनवरतमुद्भूतं भयरूपं शूलमित्यर्थः। क्षिप्रं बाल्य एवा-

चिरात् उत्पाटयितुं हृदयाद्बहिर्निस्सारयितुं इच्छया सङ्कल्पतः इत्यर्थः । जाह्नव्यां जलक्रीडानुकूलायां गङ्गायां खातं यच्छूलं तस्याग्रे शिखरे मां निरपराधिनं मां चिक्षेपेति यत् प्रेरयामासेति यत् । तत्सर्वमित्युत्तरत्रान्वेति । अत्रापि गङ्गायां भीमप्रक्षेपणविषयिणी भारतकथानुसन्धेया ।

मत्क्ष्वेडमिति ।

**मत्क्ष्वेडं मन्यमानस्सन्स्वक्ष्वेडं शीलदूषकः ।**
**सूदैस्सजग्धौ क्ष्वेडं मे यददापयदुद्धतः ॥ ६३ ॥**

शीलदूषकः सदाचारविनिन्दकः अत एव उद्धतः स्वेच्छाप्रवृत्तिमान् दुर्योधनः मत्क्ष्वेडं मदीयं सिंहनादं स्वक्ष्वेडं सन्तं निजकर्णामयं सन्तं मन्यमानस्सन् जानन् सन् सजग्धौ सहभोजने मे पङ्क्तिभाजे मह्यं सूदैः औदनिकैः क्ष्वेडं विषं अदापयदिति यत् । तत्सर्वमित्युत्तरत्रान्वेति । अत्राप्येतद्विषयिणी भारतकथानुसन्धेया ।

शुभेति ।

**शुभोदर्काय तत्सर्वं कल्पते स्म निरन्तरम् ।**
**भवत्कृपाकटाक्षेण पाण्डवप्राण माधव ॥ ६४ ॥**

हे पाण्डवप्राण, पाण्डवाः प्राणाः यस्य स तथोक्तः तस्य सम्बुद्धिः । एतेन पाण्डवाभावे तस्य शरीरधारणमेव नास्तीति सूच्यते । ततश्च यथाकथञ्चिन्निजशरीरधारणार्थं पाण्डवा रक्ष्यत्वेन भवद्दृष्टिगोचरा इति भावस्सूच्यते । माधव, मायाः लक्ष्म्याः धवः पतिः तस्य सम्बुद्धिः । अत्र श्रियःपतित्वोक्त्या स्वाश्रितेभ्यः सर्वाभीष्टप्रदत्वं दयापूर्णत्वं च सूच्येते । अत एव भवतः निर्निमित्तं कृपावतः तव कृपाकटाक्षेण कारुण्यपरीवाहपरिप्लुतापाङ्गवीक्षणेन निरन्तरं अनवरतमपि तत्सर्वं पूर्वं पापिना यद्यदाचरितमसत्प्राणापहारि कर्म तत्सर्वमित्यर्थः । शुभोदर्काय मङ्गलतरभाविफलाय कल्पते स्म समर्थं बभूवेत्यर्थः । भवत्कटाक्षाभावे पाण्डवास्तदैव विनष्टा भवेयुरित्याशयः ।

एवमभिधाय सम्प्रति कृष्णकर्तव्यमाह "दौत्यमिति" ।

**दौत्यं नीचमपि प्राप्य लोककल्याणकाङ्क्षया ।**
**आर्याशयं शुभंयु तमापूरय जगत्पते ॥ ६५ ॥**

हे जगत्पते, हे त्रिभुवनस्वामिन् । एतेन जगत्त्रयस्य भगवद्रक्ष्यत्वमेव सूचितं । अत एव लोकस्य भूतसङ्घस्येत्यर्थः । कल्याणकांक्षया मङ्गलाकांक्षया नीचमपि तुच्छमपि सर्वेश्वरस्य हेयप्रतिभटस्य भगवतो भवतो विषये मनसापि स्मर्तुमनर्हमपीति यावत् । दौत्यं

दूतकृत्यं प्राप्य अङ्गीकृत्य शुभंयुं शुभान्वितं तं किञ्च बन्धुजनैरित्यादिना पूर्वं प्रकटितं आर्यस्य अत्र दयापूर्णत्वादार्यत्वोक्तिः। आशयं युद्धानारम्भरूपमभिप्रायं आपूरय साकल्येन निर्वर्तयेत्यर्थः।

इतीति।

**इत्यावेद्य नतग्रीवे विरते मारुतात्मजे।**
**दौर्जन्यजन्यं जन्यं तन्मन्यमानोऽर्जुनोऽब्रवीत् ॥ ६६ ॥**

इति पूर्वोक्तप्रकारेण आवेद्य नतग्रीवे नम्रकन्धरे। एतेन ईदृन्तामर्षदमनक्लेशस्सूचितः। मारुतात्मजे भीमे। एतेन समस्तजगद्वशीकारसामर्थ्यं सूचितम्। विरते सति मौनमङ्गीकृतवति सति। अर्जुनः जन्यं युद्धं दौर्जन्यजन्यं सत् मात्सर्यसमुद्भूतं सत् मन्यमानस्सन् विचारयन्सन्। अब्रवीत् वक्ष्यमाणरीत्या अकथयत्।

कथमिति।

**कथमपि यदुनाथ प्रापय भ्रातृभावं**
**दुरधिगममनीषं धार्तराष्ट्रं सराष्ट्रं।**
**जगदिदमचिरात्ते यत्नतस्सौख्यमीया-**
**दिति सविनयमुक्त्वा मौनमापार्जुनोऽपि ॥ ६७ ॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणमहाकविविरचिते**
**अद्भुतदूताख्यकाव्यरत्ने**
**प्रथमस्सर्गः।**

हे यदुनाथ, एतेन स्वसम्बन्धातिशयस्सूचितः। भ्रातृभावं भ्रात्रोः धर्मराजभीमयोः भावं अभिप्रायम्। किञ्च पाण्डवानां धार्तराष्ट्राणां च परस्परभ्रातृत्वमित्यर्थः। दुरधिगममनीषं कृच्छ्रादपि ज्ञातुमसाध्यबुद्धिवैभवमित्यर्थः। शठमिति यावत्। सराष्ट्रं अस्मद्राष्ट्रापहरणेनाधुना परिपूर्णराष्ट्रविशिष्टमित्यर्थः। धार्तराष्ट्रं दुर्योधनं। एतेन पैतृकराष्ट्राभावस्सूचितः। कथमपि प्रयासेन प्रापय श्रावयेत्यर्थः। ते जगत्स्वामिनः भवतः यत्नतः एतादृशप्रयत्नेन। इदं दुष्टदुर्योधनाधीनं जगत् भूमण्डलं अचिरात् क्षिप्रमेव सौख्यं युद्धानारम्भात्सुखमयत्वं ईयात् प्राप्नुयात्। इति एवंरीत्या सविनयं यथा तथा उक्त्वा निवेद्य। अर्जुनोपि मौनमाप।

भगवता लक्ष्मीदासेन अनुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
प्रथमस्सर्गः।

॥ श्रीः ॥

# द्वितीयस्सर्गः ।

अथ कविवरः प्रथमसर्गे सर्वेष्वपि पाण्डवेषु युद्धपराङ्मुखेषु सत्सु दीनाया द्रौपद्या आशयाविष्करणाय द्वितीयसर्गमारभते । प्रथमतः द्रौपद्यवस्थामाह ।

पराङ्मुख इति ।

**पराङ्मुखे वायुसुतेऽपि युद्धा-**
**त्तथार्जुने सत्यचिरश्लथाङ्गी ।**
**तटिद्धता दृष्टिरिवानभिज्ञा**
**सा याज्ञसेनी तमसावृताभूत्** ॥ १ ॥

वायुसुतेपि भीमेपि । अत्रापिना सर्वथा भीमस्य युद्धौत्सुक्यं सूच्यते । वायुसुतत्वोक्त्या निरतिशयबलदर्पितत्वं सूच्यते । युद्धात् पराङ्मुखे सति शिथिलौत्सुक्ये सतीत्यर्थः । तथा भीम इवेत्यर्थः । अर्जुने दिग्विजयाधिगतकीर्तिधवले सव्यसाचिनि । अत्राप्य-पेरनुषङ्गः । युद्धात्पराङ्मुखे सति । अचिरश्लथाङ्गी एवं पराङ्मुखत्वश्रवणसमनन्तरा-वसन्नसर्वावयवा सा याज्ञसेनी द्रौपदी तटिद्धता हठात्सौदामनीप्रभाभिभूता दृष्टिरिव दृगिव तमसा मूर्च्छाप्राग्भाविना गाढान्धकारेण आवृता सती अभिभूता सती। अत एव अनभिज्ञा सती कृत्याकृत्यविवेकशून्या सती दिङ्मूढा सतीति च अभूत् । दृष्टिः स्फूर्जथु-प्राग्भाविन्या निरतिशयतटित्प्रभया अभिभूता यथानुपदमेव द्विगुणतरान्धकारावृता न वस्त्वन्तरं गृह्णाति । तथा द्रौपदी बभूवेत्याशयः । एतेन द्रौपद्याः शोकातिशयस्सूचितो भवति । उपमालङ्कारः ।

सम्प्रति द्रौपद्याश्शोकावस्थामाह । अथेति ।

**अथाश्रुपूराप्लुतमेचकाक्षी**
**प्रलम्बवेणी कृशगात्रयष्टिः ।**
**नतोत्तमाङ्गी वसुदेवसूनुं**
**उपाससाद द्रुपदात्मजा सा** ॥ २ ॥

अथ स्वास्थ्यप्राप्त्यनन्तरं अश्रुपूरेण परिप्लुतचन्द्रकस्पृहणीयलोचना अथवा नीलोत्पल-वदसितलोचना प्रलम्बवेणी संस्काराभावात् धूसरविश्लथवेणी कृशगात्रयष्टिः वनवासक्लेशेन

क्षीणशरीरसन्निवेशा सा अनुभूतापरिमितक्लेशा द्रुपदात्मजा द्रौपदी नतोत्तमाङ्गी सती शूराभ्यर्हितपञ्चवल्लभसान्निध्ये सत्यपि निजदुर्दशास्मरणव्रीडावनतमस्तकेत्यर्थः । यद्वा शोकातिरेकेण नम्रमस्तकेत्यर्थः । वसुदेवसूनुं वस्त्राकर्षणावसरे रक्षितवन्तं श्रीकृष्णं उपाससाद उपससर्पेत्यर्थः । एतेन द्रौपद्याः निरुपाधिकबन्धुभगवदाश्रयणं सूचितम् ।

सा शोकातिरेकेण मूकेव क्षणं स्थितवतीत्याह । प्रकाशयन्तीति ।

**प्रकाशयन्ती हृदयाग्नितापम्**
**मुखाब्जवैवर्ण्यमुखेन तस्थौ ।**
**श्लथातिलोलांश्चिकुरान्क्षिपन्ती**
**करेण सा मूर्तिमतीव चिन्ता ॥ ३ ॥**

सा कृष्णसन्निहिता द्रौपदी मुखाब्जस्य मुखकमलस्य यद्वैवर्ण्यं दैन्यकन्दलितविवर्णत्वं तन्मुखेन तत्पुरस्सरेणेत्यर्थः । हृदयस्य यश्शोकरूपो वह्निः तस्य तापं प्रकाशयन्ती सती प्रकटयन्ती सती । वाचानुक्तोपि अन्तर्दुःखजनितः सन्तापः मुखवैवर्ण्यादेव विदितो भवतीति भावः । तादृशदुःखनिदानं सूचयितुमाह । श्लथेति । श्लथाश्च विगलिताश्च अत एव लोलाः लम्बमानाः यद्वा अभितः विप्रकीर्णा इत्यर्थः । तान् चिकुरान् केशपाशान् करेण पाणिना क्षिपन्ती सती पृष्ठतः प्रेरयन्ती सती मूर्तिमती परिगृहीत-द्रौपद्याकारा चिन्तेव तस्थौ स्थितवती । विश्लथतया स्तनमण्डलादिषु प्रसृमरान्केशपाशान् असकृत्पाणिना पृष्ठतो नुदन्ती तस्थावित्याशयः । एतेन द्रौपद्याः केशपाशस्य बाहुल्यं दैर्घ्यं मसृणत्वञ्च सूचितानि । उत्प्रेक्षालङ्कारः ।

दुःखेति ।

**दुःखातिवल्गत्कुचशीर्णबाष्पा**
**ताम्रायताक्षी स्फुरिताधराग्रा ।**
**मन्दं जगादाम्बुजपत्रनेत्रं**
**सा द्रावयन्तीव सगद्गदं तम् ॥ ४ ॥**

सा चिन्तामयी द्रौपदी दुःखेन शोकातिरेकेण अत्यन्तं वल्गन्तौ परिस्फुरन्तौ यौ कुचौ तत्र शीर्णानि विदलितानि बाष्पाणि नेत्राम्बूनि यस्यास्सा । एतेन कुचयोः काठिन्य-मौन्नत्यञ्च सूचिते भवतः । ताम्रायताक्षी सती रोदनातिशयरक्तायतनयना सती । एतेन अश्रुपूरस्य निरर्गलत्वं सूचितम् । स्फुरिताधराग्रा सती दुःखस्य बलादन्तर्नियमनात् स्पन्दमानाधराग्रभागा सतीत्यर्थः । एतेन अश्रुपूरस्य अधरादिना निरोधाभावस्सूचितः ।

तं आपन्नपरित्राणबद्धदीक्षं सगद्गदं द्रौपदीदुरवस्थादर्शनमात्रेण निजनैसर्गिकगाम्भीर्यविध्वंसक दुःखातिरेकपरवशतया गद्गदविशिष्टमित्यर्थः । अम्बुजपत्रनेत्रं पुण्डरीकाक्षं श्रीकृष्णम् । एतेन तन्नेत्रदर्शनमात्रेणैव आश्रितानां तापनाशस्सूच्यते । द्रावयन्तीव जलमयं कुर्वती- वेत्युत्प्रेक्षा । मन्दं एवं निरतिशयदुःखसत्वेपि कुलस्त्रीसमुचितं यथातथेत्यर्थः । जगाद उवाच ।

मन्दं जगादेत्युक्तम् । सम्प्रत्युक्तिप्रकारमाह । औपाधिकेति ।

**औपाधिकज्ञातिजनैर्न मेऽस्ति**
**प्रयोजनं किञ्चिदपीति मन्ये ।**
**त्वयि स्थितेऽपि द्रुपदात्मजाहं**
**दशामिमां प्राप्तवतीति चित्रम् ॥ ५ ॥**

यत्किञ्चिदुपाधिप्रयुक्तदेहसम्बन्धमात्रबान्धव्याभासस्निग्धैः जनैरित्यर्थः । एतेन पाण्डवादयो नात्मबान्धवाः किन्तु भवानेक एवेति सूच्यते । अत एवाह । मे बान्धवाभासपति- पारतन्त्र्यैकनिष्ठायाः अबलायाः ममेत्यर्थः । किञ्चिदपि पालनरूपमपीत्यर्थः । प्रयोजनं नास्तीति मन्ये । स्यादेतत् । नैवात्र मे व्यथा । त्वयि निरुपाधिकबन्धौ सर्वशक्ते भक्तवत्सले इत्यर्थः । स्थिते सत्यपि पाण्डवप्राणतया जागरूके सत्यपि द्रुपदात्मजा धनञ्जयप्रदित्सयैव तपस्विना द्रुपदेन समुत्पादिता अहं इमां अनिर्वचनीयां दशां दुरवस्थां प्राप्तवतीति यावत् । तच्चित्रं आश्चर्यम् ।

एवं मत्क्लेशस्य भीम एव निदानमित्याह । क्लेश इति ।

**क्लेशो महानद्य रथाङ्गपाणे**
**भीमोपि धर्मं सृतवान्यदत्र ।**
**विभाविता भाविशुभाभिकाङ्क्षा-**
**परम्परा यत्र मया कृशांग्या ॥ ६ ॥**

हे रथाङ्गपाणे, हे चक्रायुधपाणे, एतेन एतादृशाप्रतिहतायुधपाणिनापि त्वया मयि तावदौदास्यमङ्गीकृतमिति भावस्सूच्यते । यत् यस्मात्कारणात् अत्र शत्रुहननविषये भीमोपि । अत्रापिना वनवासावसरे कदावा सुयोधनेन युद्धं सम्भविष्यतीति तस्य युद्धौत्सुक्यं सूच्यते । धर्मं निजज्येष्ठभ्रातृधर्मराजम् । नामैकदेशे नामग्रहणम् । यद्वा युद्धाकरणरूपं धर्ममित्यर्थः । सृतवान् अनुससार । तस्मात्कारणात् अद्य उत्तीर्णवनवासादि- दुःखावसरे इत्यर्थः । महान् क्लेशः दुर्दमनं दुःखमित्यर्थः । कृशाङ्ग्या निरन्तरशत्रु- कृततिरस्क्रियानुध्यानक्षीणगात्र्या मया पञ्चशूरवल्लभया मयेत्यर्थः । यत्र यस्मिन्भीमे

भाविशुभाभिकाङ्क्षापरम्परा भीमो गदापाणिः धार्तराष्ट्रान् जेष्यति ततश्चाहं पाण्डवमहिषी-लब्धराज्या सुखिनी भविष्यामीत्यादिभाविशुभाभिलाषसन्ततिः विभाविता सम्भावितेत्यर्थः ।

आत्मनः लोकविलक्षणत्वमाह । योषित्स्विति ।

**योषित्सु वैकुण्ठ विलक्षणाहम्**
**यद्वल्लभैः पञ्चभिरञ्चितास्मि ।**
**यद्यज्ञवेदिप्रभवापि नित्यं**
**दुःखाग्निना प्लुष्टतनुर्भवामि ॥ ७ ॥**

हे वैकुण्ठ, योषित्सु स्त्रीषु अहं स्त्रीसजातीयाप्यहं विलक्षणा वैलक्षण्यविशिष्टा विगत-लक्षणेत्यप्यर्थः । तदेवोपपादयति । यदित्यादिना । यत् यस्मात्कारणात् पञ्चभिः पञ्चसंख्याकैः वल्लभैः अत्यन्तप्रीतिमद्भिः पतिभिः अञ्चितास्मि पूजितास्मि । यद्वा अनुसृतास्मीत्यर्थः । अञ्चुगतिपूजनयोरिति हि धातुः । लोके एकस्याः योषितः एक एव पतिः । मम तु पञ्च पतयः इत्यतो वैलक्षण्यम् । यत् यस्मात्कारणात् यज्ञवेदिप्रभवापि यज्ञीयपावकसमुत्थितापीत्यर्थः । नित्यं प्रतिदिनं दुःखाग्निना शोकज्वलनेन प्लुष्टतनुस्सती परिपक्वशरीरा सती भवामि । अतो मदुत्पत्तिरपि लोकविलक्षणेति भावः । वह्निः वह्न्यन्तरं न दहति खलु । इदानीं वह्न्यन्तरकल्पाहं दुःखाग्निना प्लुष्टा भवामीत्यतोपि लोकविलक्षणेत्यर्थः । अनेन अयोनिजत्वं पावकत्वं क्षमा च सूच्यन्ते ।

सम्प्रति कुसुमकोमलं स्त्रीहृदयमिति यत्प्रसिद्धं मद्विषये तन्नास्तीत्याह । तथेति ।

**तथानुभूयापि तिरस्क्रियां तां**
**परैः कृतां चक्रधराधुनापि ।**
**जीवामि यद्वज्रसुसारसृष्टं**
**जानाम्यभेद्यं हृदयं तदेतत् ॥ ८ ॥**

हे चक्रधर, इति सम्बोधनेन मत्तिरस्क्रियाज्ञानमात्रेण तत्क्षणं यत्र कुत्र स्थितस्यापि तस्य शत्रुहननायायुधप्रेरणयोग्यत्वं सूच्यते । परैः शत्रुभिः कृतां तां समस्तक्षितीशावलोकितां तिरस्क्रियां तिरस्कारं तथा वाचा वर्णयितुमशक्यतया अनुभूयापि । यद्वा परैः तथा सज्जनगर्हणीयतयेत्यर्थः । कृतां तिरस्क्रियामनुभूयापीत्यर्थः । अधुनापि अद्यापि यत् यस्मात्कारणात् जीवामि धृतप्राणास्मि । तत् तस्मात्कारणात् एतत् इदं मदीयमित्यर्थः । हृदयं वज्रस्य हीरमणेः सुसारेण अन्तःस्थिरांशेन सृष्टं सत् अत एव अभेद्यं

सत्, जानामि। अन्यथा तदैव स्फुटितहृदया भवेयमित्याशयः। किञ्च, मद्यतिरिक्ता यापि कापि योषित् तादृशं तिरस्कारमनुभूय, तदैव स्फुटितहृदया भवेदित्यपि सूच्यते ॥

दुर्योधनादिकृतां तिरस्क्रियामेव विवृणोति। एकेति।

**एकाम्बरा विश्लथकेशपाशा**
**स्त्रीधर्मिणी हन्त बलाद्विकृष्टा।**
**दुरात्मनाहं बहुपुष्परम्या**
**देवैकभोग्या हि शुनेव माला ॥ ९ ॥**

स्त्रीधर्मिणी ऋतुमती एतेन पुरुषदृग्गोचरत्वनिषेधस्सूच्यते। अत एव एकाम्बरा एकवस्त्रपरीतगात्री विश्लथकेशपाशा प्रथमं दृढः केशसमूहः दुर्दमनदुश्शासनदृढमुष्टिपरिकृष्टतया विश्लथः विलुलितः। अहं एतादृशावस्थाहं दुरात्मना दयाशून्यहृदयेन दुश्शासनेन बलात् बलात्कारेण बहुपुष्परम्या नानाविधवर्णशबलितकुसुमस्पृहणीया देवैकभोग्या भगवता मुख्यतयानुभवितुं योग्या मालेव स्रगिव देवैकभोग्येत्यहमित्यत्राप्यन्वेति। शुना अस्पृश्येन शुनकेन विकृष्टा सती विशेषेण कृष्टा सती अभवमिति शेषः। हीति प्रसिद्धौ। एतज्जगद्विदितमित्यर्थः। उपमालङ्कारः। अस्पृश्यशुनकदृष्टान्तेन आत्मनः अपरिशुद्धत्वं गर्हितत्वञ्च सम्भूतमिति सूचितम्। हन्तेति खेदे ॥

तदा भवन्नाम्ना रक्षिताभवमित्याह ॥ मिषत्स्विति ॥

**मिषत्सु वीरेषु मम प्रियेषु**
**चकर्ष चेलं समितौ यदाज्ञः।**
**गोविन्द न स्यात्तव नाम तच्चे-**
**त्तदा गतिर्मे बत नग्नतैव ॥ १० ॥**

वीरेषु विपक्षविध्वंसनदक्षेष्वित्यर्थः। मम वीरपतित्वाभिमानिन्या ममेत्यर्थः। प्रियेषु वल्लभेषु। मम प्रियेष्वित्यनेन तेषां तु न मयि प्रीतिरिति काक्वा सूच्यते। तदेवोपपादयति। मिषत्स्विति। मिषत्सु सत्सु पश्यत्सु सत्सु। तदग्र एवेति यावत्। स्यादेतत्। यत्र कुत्राप्यन्तरङ्गेवा इति चेत्। समितौ अनेकराजाधिराजराजिगुरुजनादिपूर्णायां धर्मव्यवस्थापकस्थानभूतायां सभायामित्यर्थः। यदा अज्ञः पशुकल्पः दुश्शासनः चेलं मदीयमेकमप्यम्बर मित्यर्थः। चकर्ष बलात्पातयामासेत्यर्थः। तदा तस्मिन्समये हे गोविन्द, परपीडितदुर्बलपशुरक्षक तव भवतः तन्नाम गोविन्देति नामधेयं न स्याच्चेत् नभवेद्यदि न स्मृतं चेदिति यावत्। मे तादृशनग्नतावस्थामापन्नाया ममेत्यर्थः। नग्नतैव विवस्त्रतैव

गतिस्स्यात्। बतेति खेदे। आश्चर्ये च। गोविन्देति भवन्नामग्रहणेन प्रवर्धितदिव्यांशुका परिरक्षिता चाभवम्। न तु वल्लभैरित्याशयः।

अरुन्तुदमिति।

**अरुन्तुदं तद्वचनं निशम्य कर्णेरितं कर्णविदारणञ्च।**
**मूकेष्वमीष्वच्युत तेन नाम्ना योषात्तरोषापि समाहिताहम् ॥११॥**

अरुन्तुदं मर्मविदारकं कर्णविदारणञ्च श्रवणपुटभेदकञ्च। एतेन बाह्येन्द्रियान्तरेन्द्रियासह्य-प्रमथनं सूचितम्। कर्णेरितं राधेयाभिहितं तत् नार्या पुनरपि स्मर्तुमप्यशक्यमित्यर्थः। वचनं परुषभाषणं निशम्य श्रुत्वा अमीषु वीराभिमानिषु पतिषु मूकेषु सत्सु वीरकृत्यम-कुर्वाणेषु जोषं स्थितेषु सत्सु। हे अच्युत, हे आश्रितरक्षक योषा अबला अहं आत्तरोषा सत्यपि तन्नाशायाधिगतक्रोधा सत्यपि तेन नाम्ना भवतः प्रसिद्धेन गोविन्देति नाम्ना समाहिता सती प्रापितसमाधाना सती अभवम्। तदा भवन्नामस्मरणाभावे अबला-प्यहमेव रोषातिरेकेण शत्रुहनने प्रभवेयमित्याशयः।

सम्प्रत्यात्मनो विभवपराकाष्ठां तन्नाशनिदानञ्च त्रिभिश्श्लोकैराह। गाण्डीवेति।

**गाण्डीवधन्वा जगदेकवीरो यद्राजसूयाध्वरपूरणाय।**
**दिश्युत्तरस्यां हिमदुर्गमायां जिगाय वीरान्गिरिदुर्गमस्थान् ॥१२॥**

जगदेकवीरः अप्रतिहतवीर्यविशिष्टः गाण्डीवधन्वा गाण्डीवाख्याग्निदत्तधनुष्पाणिरित्यर्थः। अर्जुनः राजसूयाख्यस्य अध्वरस्य यज्ञस्य पूरणाय पूर्त्यै। एतेन अस्य यागस्याशेषराज-मण्डलजयार्जितद्रविणसाध्यत्वं सूचितम्। हिमदुर्गमायां हिमपूरिततया गन्तुमशक्याया-मित्यर्थः। उत्तरस्यां दिशि हरिति गिरिदुर्गमस्थान् हिमवतः दुर्गमप्रदेशेषु निगूढतया स्थितान् वीरान् शत्रुहननैकतानान् जिगायेति यत्।

अदृष्टेति।

**अदृष्टपूर्वाननिमेषदृश्यानपूर्वरम्याननघानमूल्यान्।**
**सम्भारभारान्समनीनयत्स गोणीश्च हेमामलवालुकाढ्याः ॥१३॥**

सः अर्जुनः अदृष्टपूर्वान् पूर्वं दृष्टा नभवन्तीत्यदृष्टपूर्वाः तान् एतेन अमानुषदेशसमुत्पन्नत्वं सूचितम्। अनिमिषेण समुन्मिषितलोचनेन दृश्यान् द्रष्टुं योग्यान्। एतेन निमेषकाला-वच्छेदेन दृश्यवस्त्वनुभवालाभक्लेशो भवतीति भावस्सूचितः। अपूर्वरम्यान् इदं प्रथम-तया दृष्टत्वेन अपूर्वत्वं तेन रम्यान् मनोहरान् अनघान् दोषरहितान् अत एवामूल्यान्

नियन्त्रितमूल्यहीनान् सम्भारभारान् विचित्रवस्तुसमूहान्। हेम्नां सुवर्णानां अमलाः परिशुद्धाः या वालुकाः सिकताः ताभिः आढ्याः पूर्णाः गोणीश्च शणविशेषनिर्मितबृहद्भस्त्रिकाविशेषानित्यर्थः। समनीनयदिति यत् आनयामासेति यत्।

अक्षेति।

**अक्षप्रविक्षेपणदक्षतायां दोर्दण्डदर्पं प्रकटय्य धूर्तः।**
**सर्वस्वमस्माकमपेतलज्जो जहार तद्दस्युरिवाभिमानी ॥ १४ ॥**

अभिमानी दुर्बलोपि मुधा अहङ्कारविशिष्टः अत एव युद्धं विना अस्मद्राज्यापहरणार्थं धूर्तः कितवः दुर्योधनः अक्षाणां पाशकानां प्रविक्षेपणे परिप्रेरणे विषये दक्षतायां सामर्थ्ये दोर्दण्डस्य मुधा दीर्घदण्डसदृशस्य भुजस्य दर्पं शौण्डीर्यं प्रकटय्य प्रकाश्य अपेतलज्जस्सन् विगलितव्रीडस्सन् दस्युरिव चोर इव पश्यतोहर इवेति यावत्। अस्माकं भुजबलैकसाराणामस्माकमित्यर्थः। तत्सर्वस्वं भुजबलेनैवार्जितं पूर्वोक्तं सर्वं वस्तुजातं जहार अपहृतवान्। एतेन युधिष्ठिरस्य व्यसनायत्तत्वात् क्लेशार्जितं सर्वस्वमपि न्यायागतमन्याय्येन क्षणान्नष्टमिति भावस्सूचितः।

सम्प्रति पराक्रमशीलवृकोदरसौजन्यानुचिन्तनजन्याश्चर्यमाह। दुर्धर्षेति।

**दुर्धर्षयुद्धोद्धतदस्युदर्पविध्वंसदक्षोद्भटदोःप्रचण्डः।**
**वृकोदरोऽप्यात्तदरोऽग्रजन्मचित्तानुवर्तीति विचित्रमेतत् ॥१५॥**

दुःखेनापि धर्षयितुं प्रतिभटयितुं अशक्यं यद्युद्धं तत्र उद्धताः क्रूराः ये दस्यवः शत्रवः तेषां दर्पः तस्य विध्वंसः अपोहनं तस्मिन् दक्षौ समर्थौ अत एवोद्भटौ अप्रतिहतावित्यर्थः। यौ दोषौ भुजौ ताभ्यां प्रचण्डः अत्यन्तकोपनः वृकोदरोपि भीमोपि। अपिस्समुच्चये। आत्तदरस्सन् समधिगतभीतिस्सन् अग्रजन्मनः धर्मराजस्य चित्तं मनः अनुवर्तत इति चित्तानुवर्ती बभूवेति यत्। तदेतत् विचित्रं अत्याश्चर्यम्। अत्र वीररसानुगुणबन्धः पूर्वार्धे। तदनुक्रमेण भीमपराक्रमशैथिल्यानुगुणशिथिलबन्धोप्युत्तरार्धे प्रकाशितः कविना। अत्र शब्दालङ्कारः।

चिरादिति।

**चिरान्मया काननवृत्तिभाजा प्रलम्बकेश्या रिपुगर्ह्ययापि।**
**यत्साह्यधैर्येण बलादसह्यः क्लेशो महानश्रुदृशा विसोढः ॥१६॥**

चिरात् बहुकालादारभ्य रिपुगर्ह्ययापि शत्रुभिस्तुच्छीकृतयापीत्यर्थः । अपिर्विरोधे । अत एव प्रलम्बकेश्यां दुश्शासनहृतककठोरपाणिशिथिलीकृतचिकुरया कानने महारण्ये वृत्तिं कन्दमूलफलादिना शरीरपोषणं भजतीति वृत्तिभाक् तया । अश्रुदृशा निजावस्थानुचिन्तन-कन्दलितशोकबाष्पपूर्णलोचनया मया यस्य भीमस्य साह्यं सहकारः तस्य धैर्येण अयं भीमस्तादृशान्रिपून्निहत्य मत्क्लेशमपाकरिष्यतीति धैर्येणेति भावः । असह्यः सोढुमशक्यः महान् दुस्तर इत्यर्थः । क्लेशः बलात् विसोढः अनुभूत इत्यर्थः । स वृकोदरोपीति पूर्वेणान्वयः ।

सम्प्रति भीमोत्तेजनगर्भं भीमगदायाः नैष्फल्यमाह । गदामिति ।

**गदामहं यां परिरभ्य नित्य-**
**मावेदयन्ती निजचित्ततापम् ।**
**सखीमिवावेक्ष्य समाहिताऽसं**
**तां नास्मरन्मामिव पाणिलाल्याम् ॥ १७ ॥**

अहं तादृशक्लेशपरिप्लुष्टाहं नित्यं प्रतिदिनमपि यां गदां शत्रुविध्वंसनदक्षामपि वनवासा-वसरे निर्व्यापारां गदामित्यर्थः । परिरभ्य आलिङ्ग्य निजचित्ततापं आत्मनः हृदय-सन्तापं आवेदयन्ती सती प्रकटयन्ती सती सखीमिव सुखदुःखसमभागिनीं सखीमिव यद्वा सद्यस्सन्तापापनोदनसमर्थां सखीमिव अवेक्ष्य दृष्ट्वा समाहिता सती अस्तीयं गदा सर्वानपि शत्रून्घातयिष्यति तन्न मे कापि भीतिरिति अङ्गीकृतसमाधानासती । आसं अभवम् । भीमस्तु पाणिलाल्यां पाणिना लालयितुं योग्यां तां गदां मामिव नास्मरत् न सस्मार । अयं भावः । तादृशाप्रतिहतगदायां सत्यामपि निरन्तरदुःखभागिन्याः मम क्लेशं भीमो नास्मरत् । तथा गदायाः प्राबल्यमपि । अत एव निजाग्रजन्मचित्तानुवर्ती बभूवेति । उपमालङ्कारः । यद्यस्मरिष्यदस्मत्क्लेशं भीमस्तदा नाभविष्यदेवमिति सम्पिण्डितोर्थः ।

दैवमनतिक्रमणीयमित्याह । पञ्चेति ।

**पञ्चादितेयद्रुमसन्निभानां**
**छायाश्रयाया अपि वल्लभानाम् ।**
**तापो न शाम्यत्यतिदुस्सहो मे**
**विचित्रमेतत्खलु भागधेयम् ॥ १८ ॥**

पञ्चादितेयद्रुमसन्निभानां पञ्चकल्पवृक्षसदृशानां । एतेन जगत्पूज्यत्वं सर्वस्पृहणीयत्वं स्वाश्रितसकलेष्टार्थपूरकत्वञ्च सूचितानि । वल्लभानां पतीनां पाण्डवानाम् । अत्र

वल्लभत्वोक्त्या पञ्चस्वपि पतिषु एकरूपः प्रेमातिशयस्सूचितः। छायाश्रयाया अपि तदेकप्रवणाया अपीत्यर्थः। मे दुर्भाग्याया मम। अतिदुस्सहः दुःखेनापि सोढुमशक्यः तापः। ताप इत्यनेन निरन्तरमपि शरीरशोषकत्वं सूचितम्। न शाम्यति शान्तिं नाधिगच्छति। एतत् मद्विषयकं भागधेयं दैवम्। दैवं चात्र भगवान्पुरुषोत्तम एव। विचित्रं अत्याश्चर्यम्। वृक्षच्छायाश्रयेणाध्वश्रान्तिः प्रशाम्यतीत्यनुभवसिद्धम्। मन्दभाग्यतया मद्विषये तु तदपि नास्तीत्याशयः। विशेषोक्त्यलङ्कारः।

सर्वथा मे भीम एव शरणमित्याह। यदेति।

**यदातिनीचेन च कीचकेन**
**केशेऽभिमृष्टा धुरि कङ्कनुन्ना।**
**तदा न चेन्मारुतिरेष कृष्ण**
**का वा गतिर्मे परवेश्मभाजः ॥ १९ ॥**

यदा यस्मिन्नज्ञातवासावसरे अतिनीचेन अत्यन्ततुच्छेन। परस्त्रीसङ्गमाभिलाषित्वात्तुच्छत्वमुक्तम्। कीचकेन च तदभिधानेन विराटस्यालेन च। चकारेण दुश्शासनकृतकेशाकर्षणं समुच्चीयते। केशे दुश्शासनकृष्टे चिकुरे धुरि पश्यतो धर्मराजस्याग्रत एव अभिमृष्टा सती गृहीता सतीत्यर्थः। कङ्कनुन्ना सती कङ्कवेषधारिणा धर्मराजेन तिरस्कारपूर्वकं गच्छेति चोदिता सती।' अभवमिति शेषः। तदा तस्मिन्समये एष मारुतिः अयमग्रतस्स्थितो भीमसेनः न भवेच्चेत् अकृतसान्निध्यश्चेदित्यर्थः। हे कृष्ण, परवेश्मभाजः अन्यगृहवासिन्याः पराधीनाया इति यावत्। मे मम का वा गतिः रक्षकः कः। तदाप्ययमेव तं निहत्य मामरक्षदिति भावः।

तदिति।

**तद्भ्रातृभिस्तच्छवपार्श्वबद्धा**
**श्मशानवाटं गमिता यदाहम्।**
**तदा न चेन्मारुतिरेष कृष्ण**
**का वा गतिर्मे परवेश्मभाजः ॥ २० ॥**

तद्भ्रातृभिः शतसंख्याकैरुपकीचकैः तस्य कीचकस्य यच्छवं मृतशरीरं तस्य पार्श्वे एव बद्धा सती नियन्त्रिता सती श्मशानवाटं श्मशानप्रदेशं गमिता सती बलात्प्रापिता सती यदाहमभवम्। व्याख्यातमेवोत्तरार्धम्। उपकीचकानपि तदा निहत्य भीमोऽयमेव मामरक्षदित्याशयः।

एकेति ।

**एका वने सैन्धवनीयमाना**
**श्येनाभिनुन्ना कुररीव दीना ।**
**अनेन नोचेदभिरक्षिता स्यां**
**पाञ्चालिकात्वं विधृतं तदा स्यात् ॥ २१ ॥**

वने महारण्ये एका अनन्यसहाया कार्यान्तरव्यग्रतया पतीनां सान्निध्याभावादित्याशयः । अत एव सैन्धवेन जयद्रथेन नीयमाना बलादपह्रियमाणा । श्येनेन क्रूरतरपक्षिविशेषेण अभिनुन्ना हठादपहृता । एतेन जयद्रथस्यातर्कितापतनं द्योत्यते । कुररीव कुररस्त्रीव दीना आर्तनादविशिष्टेत्यर्थः । अहं अनेन भीमेन अभिरक्षिता सती तस्मात्पापीयसो जयद्रथाद्विमोच्य संरक्षिता सती न स्यां चेत् न भवेयं यदि । तदा पाञ्चालिकात्वं द्रुपदपुत्रीत्वं प्रतिमात्वञ्च विधृतं विशेषेण धृतं सत् दृढीकृतं सदिति यावत् । स्यात् । अयं भावः पौरुषदृप्तेन जयद्रथेन बलादबलाहमपह्रियमाणा रोदनैकसारा दौर्बल्यात्प्रतीकाराक्षमा पुत्रिकाकल्पा वशवर्तिनी निर्व्यापारा च स्यां । भीमेन रक्षिततया तथा नासम् । किन्तु मनुष्यसाधारणचेष्टाविशिष्टाऽभवमिति ।

मद्विषये लोकप्रथापि वृथैवेत्याह । अदृष्टेति ।

**अदृष्टमार्तण्डमयूखमाला**
**भूवल्लभानां महिषीति लोके ।**
**प्रथा वृथा नाथ पृथास्नुषायां**
**मय्येव पञ्चप्रियलालितायाम् ॥ २२ ॥**

हे नाथ, हे मत्स्वामिन् । एतेन अनाथानां सर्वेषामपि भवानेव नाथ इति सूचितम् । लोके अस्मिन्जगति । भूवल्लभानां राज्ञां महिषी कृताभिषेका पत्नी अदृष्टा अनवलोकिता मार्तण्डस्य सूर्यस्य ये मयूखाः किरणाः तेषां माला परम्परा यया सा । असूर्यंपश्या राजदाराः इति । इत्यंकारिका प्रथा प्रसिद्धिः पृथास्नुषायां कुन्त्यास्स्नुषायां पञ्चप्रियलालितायां पञ्चसंख्याकवल्लभाञ्चितायां । एतेन पतिविषये यथाहं लोकविलक्षणा, तथा सुखविषयेपीत्याशयः । मय्येव नान्यत्र वृथा निरर्थका । अयमाशयः एकपतिवशवर्तिनो राजदाराः असूर्यंपश्या वर्तन्ते । अहं तु पञ्चमहावीरपतिवशवर्तिन्यपि कान्तारे चण्डकिरणकिरणसन्तापितशरीरा दुःखमनुभवामीति ॥

5

सम्प्रत्यात्मनः ज्वलनादुत्पत्तिस्सार्थकेत्याह ॥ न स्यामिति ॥

**न स्यामहं चेत्सवनाग्नितीक्ष्ण-**
**ज्वालालिमध्यप्रभवा मुरारे ।**
**तदैव दुःखाग्निशिखावलीभि-**
**र्दग्धा भवेयं बत दैवमाया ॥ २३ ॥**

हे मुरारे, इति सम्बोधनेन महत्तरघोरप्रतिबन्धकनिवारकत्वं सूचितम् । तेन स्वाश्रित-रक्षणञ्च सूचितम् । अहं ईदृशावस्थाहं सवनाग्नेः यज्ञीयवह्नेः तीक्ष्णाः असह्यसन्तापकारिण्यः याः ज्वालाः शिखाः तासां आळयः पङ्क्तयः तासां मध्यात् उदरात् प्रभवा सती समुत्पन्ना सती न स्यां चेत् न भवेयं यदि । तदैव दुश्शासनाकर्षणावसर एव दुःखाग्निशिखावलीभिः शोकानलज्वालामालाभिः दग्धा सती भस्मीकृता सती भवेयम् । निर्नामतामधिगच्छेय-मित्यर्थः । दैवमाया दैवसङ्कल्पः बत अत्याश्चर्येत्यर्थः । भाविक्लेशपरम्परानुभवयोग्यता-सम्पादनायैव तीक्ष्णतराग्निमध्याद्दैवेन समुत्पादिता । वह्निः वह्निं न दहति किल । अत एव अनुभूयमानासह्यक्लेशानलसन्तापापि नाहं भस्मसात्कृताऽभवमिति भावः ।

जायमानाहं भवत्कटाक्षपात्रमपि नाभवमित्याह । कटाक्षेति ।

**कटाक्षपात्रं तव जायमाना**
**नासं तदेत्यत्र न संशयो मे ।**
**पतत्यजस्रं मयि वागतीता**
**यदीदृशी दुःखपरम्परैव ॥ २४ ॥**

जायमाना अहं तदा जननावसरे तव निर्हेतुककृपावतो भवतः कटाक्षस्य अपाङ्गवीक्षणस्य पात्रं विषयः नासम् नाभवम् । इत्यत्र इत्यस्मिन्विषये मे निरन्तरदुःखानुभवशीलाया मम न संशयः सन्देहो नास्ति । यत् यस्मात्कारणात् मयि वागतीता वाचा वर्णयितुमशक्या ईदृशी लोकविलक्षणा दुःखपरम्परैव एवकारेण सुखगन्धोपि नास्तीति सूच्यते । अजस्रं निरन्तरं पतति । यदि तदा भवत्कटाक्षपात्रं भवेयम् नैतादृशी मदीयावस्था स्यादित्याशयः ॥

दयितेन निजगृहिणी जनतादृष्टिभ्यः कथमपि रक्षणीयेत्याह । दिने दिन इति ।

**दिने दिने स्त्री परिवर्धमाना**
**मनोज्ञरूपा स्पृहणीयकान्तिः ।**
**जनैर्मुहुस्सादरमीक्ष्यमाणा**
**कलङ्किनी चन्द्रकलेव भूयात् ॥ २५ ॥**

मनोज्ञरूपा दर्शनीयाकृतिः स्पृहणीयकान्तिः दृगासेचनकरुचिः स्त्री योषित् दिने दिने प्रतिदिनं परिवर्धमाना सती बाल्यमुत्सृज्य तारुण्यं लभमाना सती । उपचीयमानमण्डला च सती । अत एव मुहुः शश्वत् जनैः सादरं यथा तथा ईक्ष्यमाणा सती विलोक्यमाना सती चन्द्रकलेव कलङ्किनी सती वचनीयपात्रं सती कलङ्कविशिष्टा च सती भूयात् । इति सम्भावनायां लिङ् । यथा उपचीयमानायाः चन्द्रकलायाः मनोज्ञरूपत्वं स्पृहणीयकान्तित्वं च तथा योषितोपि । एतदुभयमपि जनानां हृदयेषु दर्शनस्पृहां जनयति । सत्येवं सकलङ्कत्वं स्वतस्सिद्धमेव । बाल्ये तावत् उभयत्रापि कलङ्कावकाशो नास्ति खलु । यद्वा बाल्यात्प्रभृति निसर्गतो मनोज्ञरूपायाः स्पृहणीयकान्तेश्च वनितायाः तारुण्ये किमु वक्तव्यम् । अनिर्वचनीयरूपकान्तिविशिष्टा भवति । ततश्च सादरं सर्वैरपि वीक्ष्यमाणा वचनीयपात्रं भवेदेवेत्याशयः । उपमालङ्कारः ।

तदिति ।

**तद्रक्षणीया कथमप्यनिन्द्या**
**भर्त्रा प्रिया दृष्टिरिवापघातात् ।**
**नोचेत्तथाऽन्धो भविता पुमांस्तु**
**स्वधर्मसिद्धाञ्जनहीनकर्मा ॥ २६ ॥**

तत् तस्मात्कारणात् भर्त्रा भरणशीलेन प्रियेण प्रिया निजदयिता अनिन्द्या सती निन्दनानर्हा सती निर्दुष्टा सती च । अपघातात् परपुरुषकरस्पर्शनाद्यपघातात् रजश्शिलादिपातरूपापघाताच्च । दृष्टिरिव आत्मदृगिव कथमपि प्रयासेनेत्यर्थः । रक्षणीया गोपनीया । तथा उक्तप्रकारेण नो चेत् न रक्षेद्यदि । पुमांस्तु पुरुषस्तु स्वस्य आत्मनः यो धर्मः भार्यारक्षणरूपो धर्मः स एव सिद्धाञ्जनं अन्धत्वापनोदनदक्षसिद्धौषधरूपमञ्जनं तेन हीनं विरहितं कर्म कार्यकलापः यस्य स तथोक्तस्सन् । अत एव अन्धस्सन् अक्ष्णा काणस्सन् भविता भविष्यति । यः स्वभार्यारक्षणे तावदसमर्थः सत्वन्ध एवेत्याशयः । उपमालङ्कारः ।

स्वधर्मपरित्यागसमुत्पन्नं दोषमाह । निजेति ।

**निजाभिजात्यानुगुणं विसृज्य**
**धर्मं द्विजानामवलम्बमानः ।**
**पराभिमर्शाद्यवमानितां मां**
**जायां न जानाति यमात्मजोऽयम् ॥ २७ ॥**

अयं अग्रतस्स्थितः यमात्मजः धर्मराजः। अत्र स्वधर्मानुवर्तिनो दण्डधरस्य आत्मजत्वोक्त्या स्वेनापि निजधर्मोऽवश्यमनुष्ठेय इति सूच्यते। निजाभिजात्यानुगुणं आत्मनः क्षत्रियवंशोचितमित्यर्थः। धर्मं युद्धादिकं विसृज्य त्यक्त्वा द्विजानां ब्राह्मणानां धर्मं शान्त्यादिगुणविजृम्भितं कर्म अवलम्बमानस्सन् आश्रयन्सन् पराभिमर्शाद्यवमानितां शत्रुस्पर्शादिभिः यद्वा परपुरुषस्पर्शादिभिः आदिपदेन केशाम्बरकर्षणादिकं गृह्यते। अवमानितां अवहेळितां सतीं जायां अस्वतन्त्रां भार्यां। निर्दुष्टनिजवंश्यपुत्रसन्ताननिदानीभूतामिति यावत्। मां न जानाति न मनुते। परधर्मावलम्बिनः पत्युः सहवासान्ममेयं दशेत्याशयः॥

शत्रुहनने स्त्रीत्वं तावन्निरुणद्धि मामित्याह। स्त्रीणामिति।

**स्त्रीणां स्वतस्सिद्धमनन्यभोग्यं**
**यत्पारतन्त्र्यं निरुणद्धि तन्माम्।**
**नोचेत्तथा तीक्ष्णतरासिपाणिः**
**हन्यामहं दुर्जनमाजिभूमौ** ॥ २८ ॥

स्त्रीणां नारीणां अन्येन पतिव्यतिरिक्तपुरुषेण भोक्तुं अनुभवितुं योग्यं न भवतीत्यनन्यभोग्यं। असाधारणमिमि यावत्। यत् पारतन्त्र्यं पराधीनत्वं अस्वातन्त्र्यमित्यर्थः। तत् पारतन्त्र्यं मां स्त्रीरूपां मां। मामित्यनेन पराक्रमविषये तावत् पुरुषादपि प्रबलास्मीति सूच्यते। निरुणद्धि। तदेवाह। नो चेदिति। तथा पूर्वोक्तरीत्या नो चेत् न स्यां यदि स्वतन्त्रा चेदित्यर्थः। अहं पूर्वोक्तप्रकारेण शत्रुपीडिताहं तीक्ष्णतरासिः निशिततरकरवालः पाणौ हस्ते यस्यास्सा। आजिभूमौ रणक्षेत्रे दुर्जनं अकृत्यैकलम्पटं जनं हन्यां यमलोकं नयेयमित्यर्थः।

अहं तावद्वीरसूरस्मीत्याह। कुर्वन्त्विति।

**कुर्वन्तु मैव प्रथनं पृथायाः**
**पुत्रा ममैते तनुजाः प्रवीराः।**
**प्रत्यर्थिरक्तैर्निजमार्गणानां**
**सौहित्यमापादयितुं समर्थाः** ॥ २९ ॥

पृथायाः कुन्त्याः पुत्राः पञ्चपाण्डवाः। अत्र मम पतय इति वक्तव्ये पृथायाः पुत्रा इत्युक्त्या पाणिगृहीतामप्युपेक्षितवद्भिः पतिभिः किं ममेत्यौदास्यं सूचितम्। प्रथनं युद्धं मैव कुर्वन्तु। धर्मो धर्म इति शान्तिमवलम्ब्यैव तिष्ठन्त्वित्यर्थः। तर्हि केन ते क्लेशाः परिह्रियन्ते इति चेदाह। ममेति। मम पतिदेवताया मम प्रवीराः प्रकृष्टवीर्यदसाः एते तनुजाः पञ्चपुत्राः प्रत्यर्थिरक्तैः शत्रुरुधिरैः निजमार्गणानां स्वबाणानां सौहित्यं तृप्तिं

आपादयितुं समर्थाः दक्षाः भविष्यन्तीति शेषः। अत्र मार्गणश्लेषेण पुत्राणां वदान्यत्वञ्च सूचितं भवति। मम पुत्रा एव क्षत्रियवंशोचितं युद्धं कृत्वा शत्रून्विजित्य मत्क्लेशं परिहरिष्यन्तीत्याशयः।

सम्प्रति भवत्सान्निध्यं साफल्यमीयादित्याह। भीमेति।

**भीमप्रतिज्ञा सफला यथा स्यात्**
**गाण्डीविशौर्यं प्रथितं यथा च।**
**धम्मिल्लतां मच्चिकुरो यथेयात्**
**तथाचर प्राप्य कुरून्मुकुन्द ॥ ३० ॥**

हे मुकुन्द, इहपरसौख्यप्रद। भीमप्रतिज्ञा वृकोदरस्य प्रतिज्ञा दुश्शासनोरःकवाटविदारण-दुर्योधनोरुभञ्जनरूपा प्रतिज्ञा सफला सती फलविशिष्टा सती यथा स्यात्। गाण्डीविशौर्यं च करगृहीतगाण्डीवकोदण्डस्यार्जुनस्य शूरत्वमपि शत्रुहननसामर्थ्यमपि प्रथितं सत् जगद्विख्यातं सत् यथा स्यात्। मच्चिकुरः वेणीभूतो मम केशपाशः धम्मिल्लतां संयततां यथेयात् यथा प्राप्नुयात्। कुरून् कौरवमुख्यान् दुर्योधनादीनित्यर्थः। प्राप्य उपसृत्य तथा पूर्वोक्तप्रकारेण आचर प्रवर्तयेत्यर्थः। अयमाशयः एतत्त्रयमपि युद्धं विना न भवति। अतः कथमपि युद्धमेव प्रवर्तय। न तु सन्धिमिति।

उपसंहरति। इतीति।

**इत्यम्बुजाक्षाय निवेद्य साश्रु**
**लम्बालकाल्याकुलकेशहस्ता।**
**विनम्रशीर्षा चरणाग्रदत्त-**
**नीलोत्पलाक्षी विरराम दीना ॥ ३१ ॥**

इति पूर्वोक्तप्रकारेण अम्बुजाक्षाय सद्यः प्रफुल्लपुण्डरीकायतलोचनाय वासुदेवायेत्यर्थः। साश्रु यथा तथा गलद्बाष्पाकुललोचनं यथा तथा। निवेद्य विज्ञाप्य दीना दुर्गता द्रौपदी अलकानां चूर्णकुन्तलानां आलिः श्रेणिः लम्बा संस्काराभावाद्विलुलितेत्यर्थः या अलकालिः तया आकुलः अव्यवस्थितः यः केशः कचः सः हस्ते यस्यास्सा। यद्वा आकुलकेशसमूहेत्यर्थः। विनम्रशीर्षा शोकातिरेकेणावनतमस्तका सती चरणाग्रं प्रपदं तस्मिन्दत्तनीलोत्पलाक्षी निश्चलविनिहितकुवलयलोचना सती विरराम मौनमङ्गीचकार। एतत्सर्वं शोककार्यं।

सम्प्रति द्रौपदीसमुदीरितवचश्श्रवणसमनन्तरं कृष्णस्यावस्थामाह । उदीरितमिति ।

**उदीरितं यज्ञभुवा निशम्य**
**पद्मायताक्षः क्षणमात्तमौनः ।**
**दुःखाश्रुबिन्दुग्रथिताक्षिपक्ष्मा**
**बभूव नम्रोज्वलरत्नमौलिः ॥ ३२ ॥**

यज्ञभुवा यज्ञवेदिसम्भूतया अयोनिजया द्रौपद्या । एतेन पावकाज्जाताया अपि दुश्शासनप्रभृतिदुर्जनकृतकर्षणादिपरीभावोऽतिदुस्सह इति सूच्यते । उदीरितं अभिहितं वचः निशम्य श्रुत्वा पद्मायताक्षः पुण्डरीकाक्षः कृष्णः क्षणं क्षणकालं आत्तमौनस्सन् शोकातिरेकेण किमपि वक्तुमशक्ततया अङ्गीकृतमूकभावस्सन् । दुःखेन ये अश्रुबिन्दवः तैः ग्रथितानि प्रोतानि अक्ष्णोः पक्ष्माणि निमेषलोमानि यस्य स तथोक्तस्सन् । नम्रोज्वलरत्नमौलिस्सन् अवनतभासुरमणिमयकिरीटालङ्कृतमस्तकस्सन् बभूव । अयमाशयः । गम्भीरप्रकृतिर्भगवान्वासुदेवोपि द्रौपद्याः क्लेशपरम्पराभावनया निरतिशयशोकाकुलः बाष्पनिरुद्धकंठः सान्त्ववचनमपि वक्तुमशक्नुवन् मौनी नतमस्तकः मनुष्यसाधारण इव दुःखपरवशो नैसर्गिकं निजगाम्भीर्यमपि समुज्झितवानिति ।

एवमापन्नावस्थः कृष्णो वक्तुमारभतेत्याह । अथेति ।

**अथाभ्रगम्भीररवेण कृष्णः**
**सगद्गदं साधुगणोपलाल्यम् ।**
**पाञ्चालिकासान्त्वनसक्तभावं**
**वचो जगादाश्रुपरिप्लुताक्षः ॥ ३३ ॥**

अथ मौनावस्थानन्तरं कृष्णः वासुदेवः । कृष्ण इत्यनेन मनोनयनाकर्षणेन स्वायत्तीकरणं सूच्यते । अश्रुपरिप्लुताक्षस्सन् बाष्पकलुषितायतस्पृहणीयलोचनस्सन् । अभ्रगम्भीररवेण गम्भीरस्तनितनिभेन ध्वनिना सगद्गदं यथा तथा बाष्परुद्धकण्ठं यथा तथा । एतेन असह्यदुःखश्रवणक्लेशकृच्छ्रोच्चारणं सूच्यते । साधुगणोपलाल्यं सत्पुरुषसंश्लाघनीयं पाञ्चालिकायाः द्रौपद्याः सान्त्वने मनश्शान्तिकरणे सक्तः सम्बद्धः भावः अभिप्रायः यस्य तत् वचः जगाद अब्रवीत् ।

तदुक्तिप्रकारमाह ॥ वाणीति ॥

**वाणी न मे निस्सरतीह वक्त्रात्**
**पाञ्चालिकाऽनिर्वचनीयशोकम् ।**
**निशम्य तद्भावनयाऽधुनाहं**
**तदात्मकत्वं परवान्गतोऽस्मि ॥ ३४ ॥**

पाञ्चालिकायाः पुत्रिकाकल्पाया द्रौपद्याः । अत्यन्तदुःखभाजनतया इतिकर्तव्यतामूढा सा पुत्रिकाकल्पा जातेति भावः । अनिर्वचनीयः वाचा वर्णयितुमशक्यः यः शोकः तं निशाम्य श्रुत्वा तद्भावनया तादृशशोकानुध्यानेन अधुना अहं गम्भीरप्रकृतिरप्यहं परवान् तच्छोकपरवशस्सन् तदात्मकत्वं शोकमयत्वं गतस्सन् अस्मि । अत एव इह द्रौपदी-पुरत इत्यर्थः । मे भक्तवत्सलस्य मम वक्त्रात् वदनात् वाणी वाक् न निस्सरति । वक्तुमेव न प्रभवामीत्यर्थः । अत्र स्वसजातीयस्त्रीशोकश्रवणपीडिता हृदयकुहरगता तां द्रष्टुमशक्ततया वाण्याख्या स्त्री वदनवर्त्मना बहिर्न निर्गच्छतीति सूच्यते ।

आत्मनः शोकातिशयमेव विशदयति । गोविन्देति ।

**गोविन्दनामग्रहणेन यन्मां**
**चक्रन्द दूरे निवसन्तमेषा ।**
**अद्यापि तच्छल्यमिवाहिनस्ति**
**नक्तं दिवं मे हृदयं प्रविश्य ॥ ३५ ॥**

एषा द्रौपदी गोविन्दनामग्रहणेन गोविन्देति नाम्ना दूरे निवसन्तं शत्रुनिषूदनार्थं क्वापि गतमित्यर्थः । मां चक्रन्देति यत् आह्वयामासेति यत् । तत् अद्यापि मे अरक्षित-शरणागतस्य ममेत्यर्थः । हृदयं हृत्कमलं प्रविश्य हृदिस्थितं सदित्यर्थः । न विस्मृतमिति यावत् । नक्तं दिवं रात्रंदिवम् । अनवरतमिति यावत् । शल्यमिव शस्त्रविशेष इव आहिनस्ति आसमन्तान्मां पीडयति । गोविन्देति मन्त्रान्नैव सा रक्षिता । न तु मयेति भावः । अत एव कर्तव्यलुप्तं मां पीडयतीति यावत् ।

वध्या अपि पाण्डवाः द्रौपद्यर्थं रक्षिता इत्याह । यदेति ।

**यदा नृशंसेन कचे विकृष्टा-**
**प्युदासितेयं पतिभिस्सभायाम् ।**
**तदैव वध्या अपि ते विमुक्ताः**
**पाञ्चालिकामङ्गलसूत्रदृष्ट्या ॥ ३६ ॥**

यदा दुरोदरावसानावसरे । नृशंसेन क्रूरेण स्त्रीधर्मिणीचेलपरिकर्षणेपि अपराङ्मुखत्वा-न्नृशंसेनेत्युक्तम् । दुश्शासनेन कचे केशपाशे गृहीत्वेत्यर्थः । विकृष्टापि विशेषेण बलात्कृष्टापि । इयं इदानीं दैन्येन मम पुरतो वर्तमाना द्रौपदी । सभायां ज्ञानवृद्धैः वयोवृद्धैश्च सान्द्रायां संसदि पतिभिः जगद्विख्यातशौर्यैः पञ्चसङ्ख्याकैः पाण्डवैः उदासिता औदासीन्येन दृष्टा । यद्वा औदासीन्येनानवलोकितेत्यर्थः । तदैव तत्क्षणमेव वध्या अपि वधार्हा अपि । ते पाण्डवाः पाञ्चालिकायाः द्रौपद्याः मङ्गलसूत्रं सौमङ्गल्यमित्यर्थः । तद्दृष्ट्या तत्स्थैर्यबुध्या विमुक्ताः वर्जिताः । मया हताः पाण्डवा यदि भवेयुः । तदा मद्भक्ता द्रौपदी विधवा भविष्यति । अतः द्रौपदीमङ्गलसूत्रस्थिरीकरणार्थं सापराधानामपि पाण्डवानां हन्ता नाभवमित्याशयः ।

दुश्शासनस्याकृत्यकरणे तावदपराङ्मुखत्वमाह । दुश्शासनेति ।

**दुश्शासनोपात्तमदोऽग्रजस्य**
**दुश्शासनो मन्दमतिर्न वेद ।**
**स्त्रीचेलकृष्टिं निजपौरुषस्य**
**काष्ठां विजानन्जगतोपि निन्दाम् ॥ ३७ ॥**

अग्रजस्य दुर्योधनस्य दुश्शासनोपात्तमदः दुष्टशासनेन उपात्तः लब्धः मदः येन सतथोक्तः । अत एव मन्दमतिः अल्पप्रज्ञः दुश्शासनः । स्त्रीचेलकृष्टिं नारीवस्त्राकर्षणं निजपौरुषस्य आत्मनः पराक्रमस्य काष्ठां सतीं सीमाभूमिं सतीं विजानन्सन् मन्वानस्सन् जगतः सर्वस्य जनस्येत्यर्थः । निन्दां न वेद न ज्ञातवान् । अयमाशयः । निजज्येष्ठभ्रातुः शासननिर्वहणमेव परमपुरुषार्थं मन्वानः लोकगर्हिते कर्मणि प्रवृत्त इति ।

सम्प्रति पद्यद्वयेन द्रौपद्या भावमनूद्य तत्परिहरति । अधर्मेति ।

**अधर्मधर्मावविमृश्य कृष्णे**
**सुयोधनस्साधनसम्परीतः ।**
**बभूव राजा मम वल्लभास्तु**
**वनेचरास्सौख्यबहिष्कृताश्च ॥ ३८ ॥**

हे कृष्णे, हे द्रौपदि, सुयोधनः दुर्योधनः अधर्मधर्मौ वेदनिषिद्धवेदविहितकर्मणी अविमृश्य अविचार्य अलक्ष्यीकृत्येति यावत् । साधनसम्परीतस्सन् चतुरङ्गबलपरिवृतस्सन् राजा प्रजारञ्जनैकतत्परः प्रभुस्सन् । बभूव । मम वल्लभास्तु पाण्डवास्तु । तुस्तु भेदे । तुकारेण तेषां धर्मविमर्शनैकतत्परत्वं सूच्यते । वनेचराः अरण्यपर्यटनैकशीलाः अत एव

सौख्यबहिष्कृताश्च क्लेशैकभाजनानिच बभूवुः । अधर्मपराणामेवैहिकसौख्यं न तु धर्मपराणामित्याशयः ।

अत इति ।

**अतश्च धर्मो न हि रक्षणे स्या-**
**द्दक्षः कदापीत्ययि मावमंस्थाः ।**
**सद्यस्त्वधर्मः प्रकटीकरोति**
**सम्पत्समृद्धिं न तथाहि धर्मः ॥ ३९ ॥**

अतश्च तस्मात्कारणात् धर्मः वेदविहितं कर्म कदापि रक्षणे स्वानुष्ठातुः परिपालने न दक्षस्स्याद्धि न समर्थो भवेद्धि। हीति प्रसिद्धौ। धर्मानुष्ठातारस्सर्वेपि क्लेशभाजनानीति प्रसिद्धमेवेत्याशयः। इति एवं रीत्या अयि द्रौपदि मावमंस्थाः माजानीहि। अधर्मस्तु वेदनिषिद्धं कर्म तु सम्पत्समृद्धिं धनकनकादिमहर्द्धिं सद्यः तत्क्षणं अधर्माचरणकाल एवेत्यर्थः। प्रकटीकरोति। स्वप्ने धनकनकसमृद्धिमिव प्रकाशयति। अचिरादेव नाशयतीत्यर्थः। धर्मः वेदविहितं कर्म तथा पूर्वोक्तप्रकारेण न हि। अयमाशयः। अधर्मनिष्ठस्य सम्पत्समृद्धिस्स्वप्नप्रपञ्च इवाहमहमिकया प्रवर्धते। अचिरादेव नश्यति च। धर्मनिष्ठस्य तु धर्मः रुग्णस्य भेषजमिव सद्यः क्लेशजनकोपि उत्तरत्र सौख्यं जनयिष्यतीति ।

परलोकदत्तदृष्टिरिह श्रमी भवति। सुखैकलम्पटस्तु नास्तिको भवतीत्याह। यस्येति ।

**यस्यास्ति लोके परलोकदृष्टिः**
**स धर्मसक्तः श्रमभाजनं स्यात् ।**
**यो नास्तिको वित्तपरस्सुखी च**
**दुर्धर्षदुर्वृत्तरतो भवेत्सः ॥ ४० ॥**

लोके कर्मभूमौ यस्य परलोकदृष्टिः स्वर्गादिपुण्यलोकप्राप्तिज्ञानं अस्ति। सः पुमान् धर्मसक्तस्सन् पुण्यकर्मनिरतस्सन् अत एव श्रमभाजनं सन् क्लेशपात्रं सन् स्यात्। यः इह लोके वित्तपरः यथाकथञ्चिद्द्रविणार्जनसक्तः। अत एव सः सुखी च सुखैकसक्त इत्यर्थः। दुर्धर्षदुर्वृत्तरतस्सन् सद्बोधनेनाप्यनिवार्याकृत्यकरणासक्तस्सन् नास्तिकस्सन् तिरस्कृतपुण्यकर्मप्रवृत्तिस्सन् भवेत्। यद्वा यः नास्तिकः सः वित्तपरः सुखी च। दुर्धर्षदुर्वृत्तरतश्च भवेदित्यन्वयः। अयमाशयः। दुष्टानामेवेह लोके सुखं न तु सत्पुरुषाणामिति ।

दुरालोचनेन धार्तराष्ट्रेण कृतं सर्वमप्युपकारायेति जानीहीत्याह । कृतेति ।

**कृतोपकारन्तु सुयोधनं त-**
**मवेहि यत्तापससङ्घसेवा ।**
**तीर्थाटनं क्षेत्रनिवाससौख्यं**
**युष्माभिरेतत्सकलञ्च लब्धम् ॥ ४१ ॥**

तं युष्मभ्यः द्रुह्यन्तं तं सुयोधनन्तु । तुस्त्ववधारणे । कृतोपकारं सन्तं पुण्यार्जनसहायं सन्तमित्यर्थः । अवेहि जानीहि । यत् यस्मात्कारणात् । यद्वा सुयोधनसकाशादित्यर्थः । तापसानां ज्ञानिमूर्धन्यानां तपोधनानां यः सङ्घः समूहः तस्य सेवा शुश्रूषा । तीर्थाटनं गङ्गापुष्करादिपुण्यतीर्थगमनं । क्षेत्रेषु पुण्यस्थलेषु निवासः स्थितिः तस्मात्सौख्यं आनन्दविशेषः । एतत्सकलञ्च सकलमित्यनेन एकैकस्यापि प्रायो भाग्यविशेषाल्लभ्यतया साकल्येनैतत्प्राप्तिः निरतिशयभाग्यवतामेवेति सूच्यते । युष्माभिः लब्धं प्राप्तं । युष्माकं भाग्यवत्वं न तावन्ममापीत्याशयः ।

सुयोधनोपकारमेव शंसति । प्रासादेति ।

**प्रासादवासैकरतस्य राज्ञो**
**वनेचराणां मृगपक्षिणां यत् ।**
**विचेष्टितं हर्षभयादिजन्यं**
**तद्द्रष्टुमेवं समयो भवेत्किम् ॥ ४२ ॥**

प्रासादवासैकरतस्य केवलमात्मनः भवन एव स्थितस्येत्यर्थः । राज्ञः केवलप्रकृतिरञ्जनैकतानस्य नृपतेः वनेचराणां अरण्यसञ्चारशीलानां मृगपक्षिणां कुरङ्गादीनां पक्षिविशेषाणाञ्च हर्षभयादिजन्यं सन्तोषसाध्वसावसरक्रियमाणं यद्विचेष्टितं विकारविशेषः । तत् विकारविशेषं एवं युष्मदनुभवप्रकारेण द्रष्टुं निरन्तरायमीक्षितुं समयः अवसरः अवकाश इति यावत् । भवेत्किं नभवेदेवेत्याशयः । तादृशजन्तुस्वभावानुभवाय दापितस्सुयोधनेनावकाश इत्यभिप्रायः ।

किञ्चेति ।

**किञ्चातिभोग्यान्बहुवर्णकान्तैः**
**खगैर्लतागुल्मतरूपगूढान् ।**
**गुहागभीरान्विविधान्महीध्रान्**
**द्रष्टुं किमेवं समयो भवेद्वा ॥ ४३ ॥**

किञ्च अपिच। बहुवर्णकान्तैः नानावर्णचित्रिततया मनोहरैः खगैः पक्षिभिः अतिभोग्यान् अनुभवितुं योग्यान् लतागुल्मतरूपगूढान् प्रतानन्युलपवृक्षपिहितान् गुहागभीरान् दरीभिर्गम्भीरान् विविधान् नानाकारानित्यर्थः। महीध्रान् पर्वतान् एवं भवदनुभव-प्रकारेण द्रष्टुं विलोकितुं समयः अवकाशः भवेत्किं वा न भवेदेवेत्यर्थः।

एतदवलोकनेन किं प्रयोजनमिति नोदासितव्यमित्याह। अनेनेति।

**अनेन किंवेति कदापि कृष्णे**
**नोदासितव्या भगवद्विभूतिः।**
**एतद्विलोकेन समाहितात्मा**
**तत्सर्वशक्तत्वमवैति धीमान् ॥ ४४ ॥**

हे कृष्णे, हे द्रौपदि अनेन पूर्वोक्तखगमृगादि दर्शनेन किं वा प्रयोजनं इति एवं रीत्या कदापि भगवतः सत्यसङ्कल्पस्य नारायणस्य विभूतिः लीलाविभूतिः ऐश्वर्यमिति यावत्। नोदासितव्या निरादरता न प्रदर्शितव्येत्यर्थः। कुत इति चेत्। तदनुभवप्रयोजनमाह। एतदिति। धीमान् वस्तुतत्वज्ञः एतद्विलोकेन प्रपञ्चावलोकनेन समाहितात्मा सन् समीकृतसुखदुःखचित्तस्सन्। तत्सर्वशक्तत्वं भगवतः अनिर्वचनीयापरिच्छेद्यशक्ति-विशिष्टत्वं अवैति जानाति। विचित्रजगदवलोकनेनापि भगवद्वैभवमनुभूय सुखदुःखे समे कृत्वा ज्ञानी शान्तात्मा भवतीत्याशयः।

जगदवलोकनं ज्ञानं जनयति धीमत इत्याह। द्वन्द्वेति।

**द्वन्द्वात्मकं वीक्ष्य च लोकमेनं**
**पुराकृतं कर्म फलाद्विदित्वा।**
**सत्कर्म कर्तुं प्रयतेत धीमा-**
**न्विचित्ररूपा हि जगत्प्रसूतिः ॥ ४५ ॥**

च किञ्चेत्यर्थः। धीमान् विवेकज्ञानवान् द्वन्द्वात्मकं शीतोष्णसुखदुःखाद्यात्मकं एनं परिदृश्यमानं लोकं भुवनं वीक्ष्य फलात् सुखदुःखादिरूपात्फलात् हेतोः। पुराकृतं जन्मान्तरविरचितं कर्म पुण्यपापरूपं कर्म विदित्वा ज्ञात्वा सत्कर्म, पुण्यकर्म, कर्तुं अनुष्ठातुं प्रयतेत इह जन्मनि प्रयत्नवान्भवेदित्यर्थः। सम्भावनायां लिङ्। हि यस्मात्कारणात् जगत्प्रसूतिः चेतनसमुत्पत्तिरित्यर्थः। विचित्ररूपा नानाविधशरीरदर्शनीया भवतीति शेषः। अयमाशयः सुखदुःखादिद्वन्द्वान्दोलितं प्राणिवर्गमवलोक्य अनुमानेन तत्प्राचीन-

पुण्यपापरूपं कर्म पुण्यस्य फलमिदं पापस्य फलमिदमिति सुखापेक्षायां पुण्यकर्म कर्तव्यमितीह जन्मनि वा प्रवर्तेत। जगदनुभवाभावे तु एतादृशप्रयत्नस्यापि नावकाश इति।

सम्प्रति भगवतस्सर्वान्तर्यामितया सर्वशक्तत्वमाह। लीलेति।

लीलाविभूतौ ननु भूतसङ्घ-
वैचित्र्यमत्यद्भुतदर्शनीयम्।
विष्णुः प्रविश्याखिलचिद्गणान्तः
प्रवर्तयत्येवमतस्स शक्तः ॥ ४६ ॥

नन्विति सम्बुद्धौ। लीलाविभूतौ ब्रह्माण्ड इत्यर्थः। भूतानां चेतनानां पृथिव्यादिपञ्चभूतानाञ्च यः सङ्घः समूहः तस्य वैचित्र्यं नानाविधत्वमित्यर्थः। अत्यद्भुतदर्शनीयं विस्मयापन्नहृदयं यथा तथा द्रष्टुं योग्यं। यद्वा अत्यद्भुतदर्शनीयं नन्विति सम्बन्धः। विष्णुः सर्वव्यापी नारायणः। अत्र विष्णुशब्देन जीवात्मान्तर्यामित्वमुपादेयम्, "यस्यात्मा शरीरं इति श्रुतेः। यच्च किञ्चिज्जगत्यस्मिन् इत्यादि श्रुतेश्च"। तदेवोपपादयति। अखिलेत्यादिना। अखिलचिद्गणान्तः असंख्येयजीवात्मसमूहाभ्यन्तरमित्यर्थः। प्रविश्य एवं पूर्वोक्तप्रकारेण नानाविधत्वं प्रवर्तयति। तत्तत्कर्मानुगुणं सृजतीत्यर्थः। अतः तस्मात्कारणात् सः नारायणः शक्तः सर्वशक्तिविशिष्टः। एतादृशशक्तिविशिष्टत्वं नान्यासां देवतानामित्याशयः।

एवं सर्वशक्तत्वमभिधाय भगवतस्सर्वज्ञत्वमाह। क्वापीति।

क्वापि स्थितानामपि जन्मिनां त-
त्कर्मानुरूपं परिकल्प्य भिस्साम्।
यतोभिरक्षत्यखिलान्सुधीभि-
स्ततस्स सर्वज्ञ इतीर्यते च ॥ ४७ ॥

यतः यस्मात्कारणात् क्वापि यत्र कुत्रापि स्थितानां वर्तमानानां जन्मिनामपि प्राणिसामान्यानामपीत्यर्थः। एतेन औपाधिकरक्षकाभावेपि जीविका प्रचलतीति सूच्यते। तत्कर्मानुरूपं तत्तत्प्राचीनपुण्यपापरूपकर्मानुगुणं यथा तथा भिस्सां अन्नं परिकल्प्य परितः समुत्पाद्य अखिलान् समस्तचेतनान् अभिरक्षति अभितः अवति। ततः तस्मात्कारणात् सुधीभिः ज्ञानिभिः सः नारायणः साकल्येन सर्वं जानातीति सर्वज्ञ इति ईर्यते च अभिधीयते चेत्यर्थः। सर्वज्ञत्वमन्तरा पूर्वोक्तप्रकारेण जगद्रक्षणं न सम्भवतीत्याशयः।

इदानीं भगवद्वैभवमाह । चिदिति ।

चिदन्तरात्मत्वमवेत्य विष्णोः
ज्ञानैकरूपात्मशरीरभेदान् ।
विचिन्त्य कोवा भगवत्पदाब्जे
भक्तिं दृढां कर्तुमवाङ्मुखस्स्यात् ॥ ४८ ॥

विष्णोः सर्वत्र व्यापनशीलस्य भगवतः चिदन्तरात्मत्वं अणुतरजीवान्तर्यामित्वं । अणोरणीयानिति श्रुतेः । अवेत्य ज्ञात्वा ज्ञानैकरूपाणां केवलज्ञानस्वरूपाणां आत्मनां जीवात्मनां यानि सुरनरतिर्यक्प्रभृतीनि शरीराणि तेषां भेदान् विचिन्त्य विवेकज्ञानेन चिन्तयित्वा को वा कोपीत्यनेन मनुष्यसामान्यं सूच्यते । भगवतः षाड्गुण्यपरिपूर्णस्य नारायणस्य पदाब्जे भोग्यतरचरणारविन्दे दृढां निश्चलां भक्तिं परमभक्तिं कर्तुं अवाङ्मुखस्सन् विमुखस्सन् स्यात् । न कोपि भवेदित्यर्थः । भगवतः विचित्रवैभवं ज्ञानैकस्वरूपाणां जीवात्मनां प्राचीनकर्मानुगुणविविधक्लेशभाजनशरीरभेदांश्च सम्यग्विचार्य दुःखमयसंसारसागरतरणाय समाश्रितभगवत्पादारविन्दस्सर्वोपि मनुष्यः भवेदेवेत्याशयः ।

तर्हि कुतस्सर्वेपि भगवच्चरणारविन्दप्रवणा न भवन्तीति चेदाह । तथापीति ।

तथापि सर्वेश्वरमाययैव
विस्मृत्य धीमानपि तद्गुणौघान् ।
कामादिदोषाभिहतान्तरात्मा
द्रुह्यत्यजस्रं निजबन्धुतायै ॥ ४९ ॥

तथापि एवं सत्यपि धीमानपि अधीतशास्त्रः पण्डितोपि । अपिर्विरोधे । सर्वेश्वरस्य अनन्तब्रह्माण्डनियामकस्य भगवतो नारायणस्य माययैव । मम माया दुरत्यया इति श्रुतेः । तस्य सर्वेश्वरस्य गुणौघान् सत्यकामत्व सत्यसङ्कल्पत्व वीर्यशौर्यादि कल्याणगुणगणान् विस्मृत्य मनसाप्यचिन्तयित्वा, कामादिदोषैः अरिषड्वर्गैः अभिहतः आन्दोलितः अन्तरात्मा हृदयं यस्य स तथोक्तस्सन् । अजस्रं अनवरतमपि निजबन्धुतायै आत्मनः रक्तसम्बन्धात् प्रीतिविषयाय बन्धुसमूहाय द्रुह्यति तत्स्वापहरणादिना द्रोहं करोति । भगवन्मायातिरोहितान्तरात्मा विद्वानपि आशापोषितहृदयस्सन् परद्रोहैकतानो भवतीत्याशयः ।

एवं भगवन्मायामाहात्म्यमभिधाय प्रकृतमाह । दुर्योधन इति ।

**दुर्योधनोप्येवमनन्यभोग्यं**
**राज्यं विजानन्निकृतिप्रगल्भैः ।**
**प्रोत्साहितो मन्त्रिभिरात्तमानः**
**प्रपीडयत्यल्पबलोपि युष्मान् ॥ ५० ॥**

एवं पूर्वोक्तप्रकारेण भगवन्मायातिरोहितान्तरात्मा दुर्योधनोपि । राज्यं अनन्यभोग्यं सत् आत्मैकभोग्यं सदित्यर्थः । विजानन्सन् अज्ञानेन मन्वानस्सन् निकृतिप्रगल्भैः वञ्चना-व्यापारसमर्थैः मन्त्रिभिः दुर्मन्त्रणशीलैश्शकुनिकर्णप्रभृतिभिः प्रोत्साहितस्सन् समुत्तेजित-स्सन् । अत एव आत्तमानस्सन् अधिगतनिरर्थकचित्तसमुन्नतिस्सन् अल्पबलोपि भवदपेक्षया दुर्बलोपीत्यर्थः । अशठान् युष्मान् प्रपीडयति प्रकर्षेण क्लेशयतीत्यर्थः ।

अथ जगतः सदृष्टान्तं भगवदधीनत्वमभिधाय स्वोक्तिमुपसंहरति । यत इति ।

**यतश्च नारायणमाययैवं**
**बुद्धिर्भवित्री किल मानवानाम् ।**
**तन्निघ्नमास्ते भुवनं तदेतत्**
**सत्सूत्रधारानुगुणा नटास्स्युः ॥ ५१ ॥**

यतश्च यस्मात्कारणात् नारायणमायया नारायणसङ्कल्पेन मानवानां मनुष्याणां एवं पूर्वोक्तप्रकारेण बुद्धिः मनीषा भवित्री किल । किलेति प्रसिद्धौ । बुद्धिः कर्मानुसारिणी इति हि प्रसिद्धिः । तत् तस्मात्कारणात् एतत् परिदृश्यमानं भुवनं जगत् तन्निघ्नं सत् भगवदधीनं सत् आस्ते वर्तत इत्यर्थः । दृष्टान्तमाह । सदिति । नटाः रामाद्यभि-नयनपटवः सत्सूत्रधारानुगुणास्सन्तः सुशिक्षितसूत्रधारानुवर्तिनस्सन्तः स्युः ।

इतीति ।

**इतीरितं चक्रधरेण कृष्णा**
**निशम्य मन्दस्मितफुल्लमल्ला ।**
**चेलाञ्चलेनाश्रुजलं प्रमृज्य**
**बद्धाञ्जलिर्मन्दमुवाच कृष्णम् ॥ ५२ ॥**

इति पूर्वोक्तप्रकारेण चक्रधरेण कृष्णेन ईरितं अभिहितं वचः निशम्य श्रुत्वा कृष्णा द्रौपदी मन्दस्मितफुल्लमल्ला सती मन्दहासविकसितगण्डस्थली सती । अत्र अज्ञत्वसगर्भ्य-

कृष्णोक्तिश्रवणजनितः मन्दहासः। चेलाञ्चलेन निजसिचयप्रान्तेन अश्रुजलं क्लेशजनितं बाष्पं प्रमृज्य सम्मार्ज्य बद्धाञ्जलिस्सती मन्दं सगम्भीरमित्यर्थः। कृष्णं वक्ष्यमाण-प्रकारेणोवाच।

उक्तिप्रकारमाह। नारायणादिति।

**नारायणाद्भिन्नतयैव तस्मात्**
**आत्मानमुक्त्वा मधुकैटभारे।**
**प्रतारयस्यद्य कृतप्रणामां**
**किं मां स एवासि कृतावतारः ॥ ५३ ॥**

हे मधुकैटभारे उत्तरत्र वक्ष्यमाणनारायणाभेदं सूचयितुमेवं सम्बोधनं कृतम्। तस्मात् श्रुतिप्रसिद्धात् नारायणात् भिन्नतयैव व्यतिरिक्ततयैव आत्मानं उक्त्वा प्रतिपाद्य अद्य अस्मिन्समये कृतप्रणामां शरणागतामित्यर्थः। मां दीनामबलां मां प्रतारयसि किं वञ्चयसि किं। स एव श्रुतिप्रसिद्धः नारायण एव कृतावतारस्सन् वसुदेवसुतत्वेनावतीर्णस्सन् असि। भवत्प्रतारणस्य नात्रावकाश इति भावः।

सर्वेति।

**सर्वान्तरात्मापि मदीयभाग्यात्**
**दृग्गोचरोसि श्रुतिशीर्षवेद्यः।**
**तवावतारं सफलीकुरुष्व**
**विनाश्य पापान्परिपाल्य साधून् ॥ ५४ ॥**

सर्वान्तरात्मापि समस्तचेतनाचेतनान्तर्याम्यपि दृष्ट्यगोचरोपीति यावत्। श्रुतिशीर्षवेद्योपि केवलशब्दप्रमाणसमधिगम्योपीत्यर्थः। मदीयभाग्यात् निर्हेतुकभवत्कटाक्षजनितात् मद्भाग्यविशेषात्। दृग्गोचरस्सन् चर्मचक्षुर्गोचरस्सन् असि। पूर्वोक्तहेतुना मत्प्रार्थना-मङ्गीकृत्य भवदवतारं सफलीकुर्वित्याह। तवेति। पापान् दुर्योधनप्रभृतीन् दुष्टान् विनाश्य साधून् पाण्डवप्रभृतीन् सुकृतिनः परिपाल्य तवावतारं वासुदेवत्वं सफलीकुरुष्व। ‘परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय सम्भवामि युगे युगे’ इति भवतैवोक्तं किलेत्याशयः।

इतीति ।

**इति यजनभुवा निवेदितं तत्**
**श्रुतिमधुरं मधुराधिपो निशम्य ।**
**स्मितमधुरमुवाच याज्ञसेनीं**
**भवतु तथेत्यथ विष्टराच्चचाल ॥ ५५ ॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणमहाकविविरचिते**
**अद्भुतदूताख्यकाव्यरत्ने**
**द्वितीयस्सर्गः ।**

इति पूर्वोक्तप्रकारेण यजनभुवा द्रौपद्या निवेदितं श्रुतिमधुरं श्रवणेन्द्रियमनोहरं वेदान्तसारार्थस्य प्रतिपादितत्वात् । वेदवन्मनोहरञ्च । तत् वचनं निशम्य श्रुत्वा मधुराधिपः श्रीकृष्णः याज्ञसेनीं द्रौपदीं स्मितेन मन्दहासेन मधुरं यथा तथा हृदयङ्गमं यथा तथा । गृहीतसारार्थतया स्मितेत्युक्तं । तथा भवदुक्तरीत्या भवतु इति उवाच अङ्गीचकारेत्यर्थः । अथ उक्त्यनन्तरं विष्टरात् आसनात् चचाल आसनं त्यक्त्वा उत्तस्थावित्यर्थः । एतेन द्रौपदीप्रार्थनानिर्वहणौत्सुक्यं सूचितम् ।

भगवता लक्ष्मीदासेन अनुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
द्वितीयस्सर्गः ।

॥ श्रीः ॥

# तृतीयस्सर्गः ।

कविरिदानीं महाभारतोक्तरीत्या हेमन्तसमयं वर्णयितुं तृतीयसर्गमारभते । अथेति ।

**अथ पाण्डवानुमतिमादराद्धरिः**
**प्रतिपद्य गन्तुमुपचक्रमे कुरून् ।**
**हिमवानृतुश्च शरदाभिचोदितो**
**भुवनभ्रमाय पदमादधे क्षितौ ॥ १ ॥**

अथ विष्टरादुत्थानानन्तरं हरिः श्रीकृष्णः पाण्डवानां धर्मराजप्रभृतीनां कुन्तीतनूजानां अनुमतिं निदेशं आदरात् प्रीतिपुरस्सरमित्यर्थः । एतेन परात्परस्यापि स्वस्याश्रितार्थं दौत्यकरणे तावदौदास्याभावस्सूचितः । प्रतिपद्य प्राप्य कुरून् दुर्योधनादीन्प्रति गन्तुमुपचक्रमे उपक्रान्तवान् । हिमवानृतुश्च हेमन्तसमयोपि शरदा शरत्कालेन अभिचोदितस्सन् अभितः प्रेरितस्सन् । शरदनन्तरं हेमन्तसमयः खलु । अत एव शरदा हेमन्तसमयस्य प्रेरितत्वमुक्तं । भुवनभ्रमाय जगति समन्ताद्व्यापनायेत्यर्थः । क्षितौ भूतले पदं स्वस्थितिमिति यावत् । आदधे न्यस्तवान् । कृतवानिति यावत् । श्रीकृष्णप्रस्थानोपक्रमे हेमन्तसमयः प्रादुरासीदित्यर्थः । उत्तरार्धे तावत् हेमन्तसमय-वृत्तान्तेन जगद्भ्रमणकुतुकस्य कस्यचित्पुरुषस्य वृत्तान्तो गम्यते ।

जगद्व्याप्तं तुहिनपटलं भगवद्यात्रोत्सवालङ्कारत्वेन वर्णयति । भगवदिति ।

**भगवत्प्रयाणविभवाय सादरं**
**तुहिनर्तुराशु तुहिनापदेशतः ।**
**अमलातिकोमलवितानमण्डलं**
**वितातान दिक्षु वियदन्तरेपि च ॥ २ ॥**

तुहिनर्तुः हेमन्तसमयः । भगवतः श्रीकृष्णस्य प्रयाणं सन्ध्यर्थं प्रस्थानं तस्य विभवाय आशु अतित्वरितम् । सादरं यथा तथा सप्रीत्यतिशयं यथा तथा । तुहिनापदेशतः हिमव्याजेन दिक्षु दशहरित्सु वियदन्तरेपि च गगनान्तरेपि च अमलञ्च शुभ्रञ्च कोमलञ्च मृदुलञ्च यद्वितानं उल्लोचः तस्य मण्डलं चक्रमित्यर्थः । वितातान विस्तारयामास । कैतवापह्नुत्य-लङ्कारः । अत्र तुहिनर्तुकर्तृकवितानरचनावर्णनेन कालस्यापि भगवदधीनतया भगव-त्कैङ्कर्यकौतुकं सूच्यते ।

हेमन्तकालीनसूर्योदयं वर्णयति । मिहिकेति ।

मिहिकातिपीडित इवालसश्शनैः
सविता प्रभातसमये नभोङ्कणम् ।
उदयाचलोच्चशिखराद्दिनेदिने
स्वकरं विकुंच्य परवानुपैत्यहो ॥ ३ ॥

सविता सूर्यः प्रभातसमये प्रातःकाले मिहिकातिपीडित इव हिमपटलैरत्यन्तक्लेशित इवेत्युत्प्रेक्षा । अत एव अलसस्सन् अपटुस्सन् दिनेदिने प्रतिदिनं स्वकरं निजकिरणनिकरं निजपाणिमित्यप्यर्थः विकुंच्य संकोच्य उदयाचलोच्चशिखरात् उदयपर्वतोदग्राग्रभागात् । उच्चशिखरादित्युक्तया तत्र हिमाधिक्यं सूच्यते । अत एव शनैरित्युक्तं । शनैः मन्दं मन्दं परवान्सन् भगवदाज्ञाधीनस्सन् । 'भीषोदेति सूर्यः' इति हि श्रुतिः । नभोङ्कणं गगनप्रदेशं उपैति आयातीत्यर्थः । अनेन सूर्योदयवृत्तान्तेन पराधीनस्य कार्यैकतत्परस्य सोढुमशक्यहिमबाधस्य कस्यचित्पुरुषस्य वृत्तान्तो गम्यते । अत्र उत्प्रेक्षासमासोक्ति सङ्करः । अलसस्वभावोक्तिरपि । अहो इत्याश्चर्ये ।

तदन्विति ।

तदनु प्रविश्य गगनाङ्कणं रविः
करनुन्नसान्द्रहिमसन्ततिः क्रमात् ।
निजतेजसैव भुवनं प्रतापयन्
अलसाय पाटवमितीव शंसति ॥ ४ ॥

तदनु उदयाचलादुपगमानन्तरं रविः सूर्यः गगनाङ्कणं आकाशप्रदेशं प्रविश्य अवगाह्य क्रमात् क्रमशः । क्रमादित्यनेन प्रथमं सन्निहितं हिमपटलं ततः दूरस्थं हिमपटलमिति सूच्यते । करैः किरणैः पाणिभिश्च नुन्ना दूरमुत्सारिता सान्द्रा निबिडा हिमानां सन्ततिः परम्परा येन स तथोक्तस्सन् । निजतेजसैव स्वप्रकाशेनैव निजपराभिभवनसामर्थ्येनैव च भुवनं जाड्यभूयिष्ठं लोकं प्रतापयन्सन् प्रकर्षेण सन्तापयन्सन् । अलसाय अपटवे । इति पूर्वोक्तप्रकारेण पाटवं पटुत्वं शंसतीव बोधयतीवेत्यर्थः । इवेत्युत्प्रेक्षा । निजक्रियया सदर्थबोधनरूपनिदर्शनालङ्कारश्च । सङ्करालङ्कारः ।

जडिमातिशयं वर्णयति । जडिमेति ।

जडिमातिरेकमसहिष्णु हैमनं
हिमकैतवेन पटगुण्ठितं जगत् ।

**तरुमर्मरोरुरदनारवं प्रगे**
**जनवत्तनोति मुहुरञ्जसा खलु ॥ ५ ॥**

जगत् भुवनं हैमनं हिमप्रयुक्तं हिमकरम्बितमिति यावत्। जडिमातिरेकं जाड्यातिशयं असहिष्णु सत् सोढुमसमर्थं सत्। अत एव हिमकैतवेन तुहिनव्याजेन पटगुण्ठितं सत् धवलराङ्कवाम्बरनिचोलितं सत् जनवत् जन इव मुहुः असकृत् अञ्जसा अतित्वरितं प्रगे प्रातःकाले। प्रगे इत्यनेन तदा सूर्यातपप्रसरणाभावात् हिमाधिक्यं तेन च जाड्यातिशयस्सूचितो भवति। तरूणां हिमकरम्बितमारुतकम्पितानां वृक्षाणां मर्मररूपं पर्णस्वनितरूपं उरुरदनारवं अत्यधिकदन्तपङ्क्तिपरस्परघट्टनजनितपटपटध्वनिं तनोति खलु। खल्विति प्रसिद्धौ। कैतवापह्नुत्युपमयोस्सङ्करः।

हेमन्तकालिकभूमिरामणीयकमाह। हिमेति।

**हिमचीनचेलकनिचोलविस्फुर-**
**न्नवशाद्वलातिहरितान्तरंशुका।**
**कलमातिकान्तकलधौतमञ्जुला**
**तरुणीव भूमिरुषसि प्रकाशते ॥ ६ ॥**

भूमिः वसुन्धरा हिममेव चीनचेलकं सूक्ष्मांशुकं। स्वार्थे कन्प्रत्ययः। तस्य निचोलः अवगुंठनं तेन विस्फुरत् प्रकाशमानं नवश्चासौ नूत्नश्चासौ शाद्वलश्च शादहरितप्रदेशश्च स एव हरितं हरिद्वर्णं अन्तरंशुकं अन्तःप्रदेशध्रियमाणवस्त्रं यस्यास्सा। अन्तर्हरितवस्त्रं धृत्वा तदुपरि धवलसूक्ष्मांशुकप्रावारितेति भावः। कलमान्येव शालिधान्यान्येव अतिकान्तानि अतिस्पृहणीयानि कलधौतानि कनकानि तैः मञ्जुला मनोहरा। स्वर्णमयाभरणमनोहरेत्याशयः। अत एव तरुणीव तारुण्यस्पृहणीया मनोहरवस्त्रालंकृता कनकाभरणभूषिता वनितेव उषसि उषःकाले प्रकाशते विराजते। उपमालङ्कारः। हेमन्तकाले सर्वजनचित्ताकर्षिणी क्षोणीत्याशयः।

हेमन्तकालिकवृक्षस्थितिमाह। अनिशमिति।

**अनिशं निशासु तरवो हिमोक्षिताः**
**जडमारुताभिनिहता विभान्ति हि।**
**अपिधानहीनतलसुस्थिता वने**
**नितरां रुदन्त इव साश्रु मर्मरैः ॥ ७ ॥**

निशासु रात्रिषु अनिशं निरन्तरं हिमोक्षिताः तुहिनवर्षार्द्रीकृता इत्यर्थः । जडमारुतेन शीतलहिमसहिततया जाड्यविशिष्टेन वातेन अभितः नितरां हताः पीडिता इत्यर्थः । तरवः वृक्षाः अपिधानेन आच्छादनेन हीनं विरहितं यत्तलं प्रदेशः तत्र सुस्थितास्सन्तः निश्चलतया स्थितास्सन्तः वने अरण्ये साश्रु यथा तथा सबाष्पं यथा तथा । मर्मरः पर्णरवैः नितरां अत्यधिकमित्यर्थः । रुदन्त इव विलपन्त इवेत्युत्प्रेक्षा । विभान्ति हि प्रकाशन्ते खलु । हीति प्रसिद्धौ । अत्र सारूप्यादप्रस्तुतदरिद्रवृत्तान्तस्य प्रतीयमानत्वात्समासोक्तिः ।

हेमन्तसमये काकानामवस्थामाह । पिकेति ।

**पिकवर्धनास्तु मिहिकोक्षिताङ्गकाः**
**विटपेषु पक्षपुटधूननोत्सुकाः ।**
**कटुदीनरावगृहसुप्तमानव-**
**प्रतिबोधनैकनिरता भवन्त्युषः ॥ ८ ॥**

पिकवर्धनास्तु काकास्तु । तुस्तु भेदे । तुकारेण इतरपक्षिवैलक्षण्यं सूच्यते । पक्ष्यन्तरापेक्षया प्रथममेव जागरणात् । मिहिकोक्षिताङ्गकास्सन्तः हिमार्द्रीकृतावयवास्सन्तः । अल्पार्थे कन्प्रत्ययः । तेन जाड्यासहिष्णुतया सङ्कुचितावयवत्वं सूच्यते । विटपेषु तरुशाखासु पक्षपुटयोः पुटाकारपक्षयोः धूननं उत्स्फोटनं तस्मिन् उत्सुकास्सन्तः आसक्तास्सन्तः तदेकताना इति यावत् । कटुश्च कर्कशश्च दीनश्च पीडासूचकदैन्यविशिष्टश्च यः रावः ध्वनिः तेन गृहे भवनाभ्यन्तरे सुप्ताः जाड्यातिशयेनालसतया श्रितशयनाः ये मानवाः मनुष्याः तेषां प्रतिबोधनैकनिरतास्सन्तः समुत्थापनैकतानास्सन्तः उषः उषःकालं । कालस्यात्यन्तसंयोगेद्वितीया भवति । काकानां कर्कशदीनरावमाकर्ण्यालसा अपि मानवाः प्रतिबुद्धा भवन्तीत्याशयः ।

काकप्रबोधानन्तरं इतरेषां पक्षिणां निद्रात्यागमाह । उषसीति ।

**उषसि प्रबुध्य विपिने हिमैः खगाः**
**पिहिताः कुलायजठरे स्थितां वधूम् ।**
**जडिमातिरेकगलितात्मपाटवां**
**प्रतिबोधयन्ति मधुरैर्मुहुस्स्वनैः ॥ ९ ॥**

विपिने अरण्ये उषसि उषःकाल एव। अरण्ये तावद्ग्रामनगरापेक्षया प्रागेवोषः परिदृश्यते। अत एव विपिने इत्युक्तं । प्रबुध्य निद्रां त्यक्त्वा हिमैः तुहिनैः पिहिताः व्याप्ता इत्यर्थः ।

खगाः पक्षिणः कुलायजठरे तरुकोटराभ्यन्तरे स्थितां जडिमातिरेकेण जाड्यातिशयेन गलितं नष्टं आत्मनः पाटवं पटुत्वं यस्यास्सा तां वधूं निजवल्लभां। मधुरैः मनोहरैः स्वनैः ध्वनिभिः मुहुः असकृत् प्रतिबोधयन्ति उत्थापयन्ति। निशं पक्षिणः निजकोटर-निकट एव बहिस्सुप्त्वोषसि प्रथमं प्रबुध्य कोटराभ्यन्तरसुप्तां निजप्रियां ध्वनिविशेषेण प्रतिबोधयन्तीत्याशयः। स्वभावोक्त्यलङ्कारः।

इतःपरं हेमन्तकालिकविरहिजनवर्णनायोपक्रमते। मदन इति।

**मदनस्सुधांशुरुचिनाशतो मना-**
**ग्विमना विचिन्त्य पथिकप्रमाथिनीः।**
**मिहिकाच्छलेन विससर्ज सर्वतो**
**वशकारिणीस्तु सितभस्मधूलिकाः ॥ १० ॥**

मदनस्तु मन्मथस्तु सुधांशोः चन्द्रस्य रुचिनाशतः कान्त्यपगमात्। सान्द्रहिमपटलपिहित-तया चन्द्रः मन्दकान्तिर्भवतीत्याशयः। मनाक् स्तोकमित्यर्थः। विमनास्सन् दुर्मना-स्सन् विचिन्त्य चन्द्रकान्त्यभावात् पथिकप्रमथनोपायं ध्यात्वेत्यर्थः। मिहिकाच्छलेन हिमकैतवेन पथिकप्रमाथिनीः विरहिजनहृदयोन्मथनकारिणीः वशकारिणीः वशीकार-समर्थाः सितभस्मधूलिकाः धवलभसितचूर्णपटलानि सर्वतः जगदभितः विससर्ज प्रेरयामास। उद्धूलयामासेति यावत्। हेमन्तसमये पथिकाः विरहार्दिता बभूवुरित्याशयः। अत्र अप्रस्तुतमान्त्रिकवृत्तान्तस्य गम्यमानत्वात् समासोक्तिः। कैतवापह्नुतिश्च सङ्करालङ्कारः।

पथिकेति।

**पथिकौघहृन्दि कुसुमेषुमार्गणैः**
**स्फुटितानि सान्द्रहिमवातबाधितैः।**
**दलितैस्सहैव चरणाधरादिभिः**
**बहुरक्तताश्च नितरामयासिषुः ॥ ११ ॥**

कुसुमेषुमार्गणैः मन्मथबाणैः स्फुटितानि विदलितानि पथिकौघहृन्दि पान्थसमूहहृदयानि सान्द्रं निबिडं यद्धिमं तत्सहितः यः वातः समीरः तेन बाधितैः पीडितैः अत एव दलितैः विशीर्णैः। चरणाधरादिभिः सहैव अङ्घ्रिरदनच्छदप्रभृतिभिस्सहैव नितरां अत्यधिकं बहुरक्ततां बह्वनुरागविशिष्टतां बहुरुधिरविशिष्टताञ्च अयासिषुः प्रापुः। हिमशीतवात-विशीर्णावयवाः पथिकाः निजदयितामनुचिन्त्य रागान्धा बभूवुरित्याशयः। सहोक्त्यलङ्कारः।

पथिकेति ।

पथिकस्त्रियस्तु रजनीधिया प्रगे
हिमसम्परीतमवलोक्य भास्करम् ।
गृहजालदत्तनयना विधुभ्रमात्
शयने प्रसुष्वपुरुपात्तराङ्कवाः ॥ १२ ॥

पथिकस्त्रियस्तु पतिविरहितकामिन्यस्तु । प्रगे प्रातःकाले गृहजालदत्तनयनास्सत्यः शयनागारवातायनप्रहितलोचनास्सत्यः हिमसम्परीतं तुहिनावृतं भास्करं सूर्यं अवलोक्य दृष्ट्वा विधुभ्रमात् चन्द्रभ्रान्त्यापन्नात्ज्ञानात् । रजनीधिया रात्रिबुद्धया उपात्तराङ्कवास्सत्यः अवगुण्ठितकम्बलास्सत्यः शयने तल्पे प्रसुष्वपुः स्वापपरा बभूवुरित्यर्थः । हिमाच्छादिततया मन्दतेजस्कं सूर्यमवलोक्य किरणानाहतचक्षुस्तया अयं विधुरिति भ्रान्त्या जडमारुतजनितालस्यतया च रजनीधिया प्रातरपि कामिन्यः शय्यामधिशिश्यिरे इति भावः । भ्रान्तिमदलङ्कारः ।

मनसेति ।

मनसानुभूतपतिसङ्गवैभवा
तुहिनातिरेकदलिताधरा वधूः ।
कृतसीत्कृतिश्च रतलक्ष्म कापि सु-
प्रकटीचकार विरहातुराप्यहो ॥ १३ ॥

कापि वधूः काचित्कामिनी मनसा पतिसम्भोगचिन्तयेत्यर्थः । अनुभूतपतिसङ्गवैभवा सती उपभुक्तनिजवल्लभसम्भोगातिशया सती तुहिनातिरेकेण हिमातिशयेन दलिताधरा सती विशीर्णाधरा सती क्षताधरेति यावत् । कृतसीत्कृतिश्च सती विरचितसीत्कारा सती विरहातुरापि दयितवियोगपीडितापि । अपिर्विरोधे । रतलक्ष्म पतिसम्भोगचिह्नं सुप्रकटीचकार सुष्ठु प्रकाशयामास । अहो आश्चर्यं । विरोधाभासालङ्कारः । विप्रलम्भशृङ्गारो व्यज्यते ।

विरहेणेति ।

विरहेण कापि सवितारमादरात्
रजनीमयूखमतितोऽसितेक्षणा ।
हिमचन्द्रिकासु तनुमर्पयन्त्यसु-
प्रजिहासयैव सखिहास्यतां ययौ ॥ १४ ॥

कापि काचित् असितेक्षणा नीलोत्पलसवर्णलोचना कामिनी विरहेण पतिवियोगेन सवितारं सूर्यं रजनीमयूखमतितः चन्द्रबुद्ध्या। संमन्यमानेति शेषः। आदरात् प्रीत्यतिशयात् असुप्रजिहासयैव निजप्राणपरित्यागेच्छयैव हिमचन्द्रिकासु हिमान्येव चन्द्रिकाः ज्योत्स्नाः तासु तनुं विरहक्षीणं शरीरं अर्पयन्ती सती लक्ष्यतया समर्पयन्ती सती सखिहास्यतां निजवयस्यापरिहास्यपात्रतां ययौ प्राप। काचित्कामिनी पतिविरहासहिष्णुतया निजशरीरजिहासया प्राणत्यागार्थं सूर्यमेव चन्द्र इति मत्वा जगद्व्यापनशीले हिमपटले ज्योत्स्नाधिया स्वशरीरं तत्रार्पयन्ती अयि मुग्धे नेदं चन्द्रिका किन्तु हिमं मुधा शरीरमर्पयसीति सख्याः परिहास्यास्पदं बभूवेत्याशयः। भ्रान्तिमदलङ्कारः।

दयितेति।

**दयितागमैकदिनलङ्घनात्प्रगे**
**गुरुभीतिमुक्तगृहदेहली वधूः।**
**सृतिदर्शनाय हिमपूर्णजालव-**
**द्गृहमध्यगैव समचूचुदन्मनः ॥ १५ ॥**

कापि वधूः दयितस्य देशान्तरगतस्य वल्लभस्य आगमः स्वस्थानागमनं तस्य एकदिनस्य एकवासरस्य लङ्घनात् अतिक्रमात् हेतोः। अस्मिन्दिनेहमागमिष्यामीति निर्दिष्टस्य दिनस्यातिक्रमात् इत्याशयः। प्रगे प्रातःकाले गुरुभ्यां श्वशुराभ्यां या भीतिः तया मुक्ता परिहृता गृहदेहली भवनद्वारशिलाप्रदेश इत्यर्थः। ययासा सती। बहिर्द्वारदेहलीस्थितौ सत्यां श्वशुरौ निन्दतः इति भीत्या परित्यक्तदेहली सतीत्यार्थः। सृतिदर्शनाय वल्लभागमनमार्गावलोकनाय हिमपूर्णजालवद्गृहमध्यगैव तुहिनावृतवातायनविशिष्टभवनाभ्यन्तरस्थितैव मनः निजहृदयं समचूचुदत् प्रेरयामासेत्यर्थः। निर्दिष्टदिवसे पत्युरनागमने सति विरहपीडिता काचिद्वधूः प्रातरेव गुरुजनभीत्या गृहदेहलीं विसृज्य गृहाभ्यन्तर एव स्थित्वा हिमपूर्णवातायनद्वारा तन्मार्गदर्शनाय निजमनः प्रेरयामासेत्याशयः। तन्मार्गं मनसा सस्मारेति यावत्।

जडेति।

**जडवात गच्छ सहसैव मामिव**
**प्रियमप्युपेत्य पथिकं प्रपीडय।**
**सुकृती भवेश्च दयितानुयोजना-**
**दिति कापि वायुमवदत्कृताञ्जलीः ॥ १६ ॥**

जड हिमजाड्यविशिष्ट मन्दप्रक्षेतिच हे वात, हे वायो। वायौ जडत्वोक्त्या विरहिहिंसानभिज्ञत्वं सूचितम्। सहसैव अतित्वरितमेव। सहसैवेत्यनेन वेगातिशयात्पतिसंयोजनपाटवं सूच्यते। गच्छ याहि। पथिकं प्रवासिनं प्रियमपि वल्लभमपि मामिव प्रपीडय प्रकर्षेण हिंसां कुरु। मां यथा पीडयसि तथा तमपि पीडयेत्याशयः। कुत इति चेत्। दयितानुयोजनात् वल्लभेन समाश्लेषजननात्। यद्वा दयिता च दयितश्च दयितौ तयोः परस्परं संयोजनादित्यर्थः। सुकृती सन् पुण्यवान्सन् भवेश्च। इति पूर्वोक्तप्रकारेण कापि काचनविरहिणी कृताञ्जलिस्सती बद्धाञ्जलिपुटा सती वायुं प्रति अवदत् प्रार्थयामासेत्यर्थः। काचिद्विरहिणी विरहासहिष्णुतया कृत्याकृत्यविवेकशून्या गत्यन्तराभावात्। शीतलवातप्रपीडनेन स्वयं क्षिप्रमागत्य मामाश्लिष्यतीति सदा सर्वत्र गमनशीलं शीतलं मारुतं प्रार्थयामासेत्याशयः।

ललनेति।

**ललना तु कापि गुरुवश्यतां गता**
**दयितं विलोक्य सुचिरप्रवासिनम्।**
**गृहमागतश्च झडिति प्रलोभिता**
**किलिकिञ्चितेन न जहौ स्वकर्म च ॥ १७ ॥**

कापि ललना काचित्कामिनी गुरुवश्यतां श्वशुरपराधीनतां गता सती प्राप्ता सती सुचिरप्रवासिनं चिरकालं परस्थलवासिनं गृहं आत्मनः भवनं आगतं च समायातं च दयितं वल्लभं विलोक्य दृष्ट्वा झडिति तत्क्षणमित्यर्थः। प्रलोभिता सती वञ्चिता सती किलिकिञ्चितेन हर्षातिशयाद्भयविस्मयादिसाङ्कर्येण उपलक्षिता सती। स्वकर्मच निजगृहकार्यमपि न जहौ न तत्याज। सुचिरं परस्थले उषित्वा अनिवेद्यैव गृहमागतस्य वल्लभस्य दर्शनेन क्रियमाणं गृहकार्यमपि विसृज्य हर्षातिशयात्तदाभाषणे कर्तव्ये गुरुजनाधीनतया समाश्रितमौना सती किलिकिञ्चिताकुला स्वगृहकार्यमेव चकारेत्याशयः।

सकृदिति।

**सकृदेव कापि पतिसङ्गता ह्रिया**
**नवसुन्दरी तु तदनु प्रवासिनम्।**
**दयितं विचिन्त्य गलदश्रुदृङ्ङ्गिजां**
**प्रतिकूलतां हि नितरां निनिन्द ताम् ॥ १८ ॥**

कापि काचित् नवसुन्दरी नवोढा सुन्दरी तरुणी । यद्वा नूत्नतया पतिसंश्लिष्टा तरुणीत्यर्थः । ह्रिया लज्जया सकृदेव एकवारमेव पतिसङ्गता सती अनुभूतपतिसम्भोगा सती । नूत्नतया लज्जाभिभूता कथमप्येकवारमेव सुरतसुखमनुभूतवतीति भावः । तदनु एवं पतिसङ्गमानन्तरदिन एवेत्यर्थः । प्रवासिनं परस्थलं प्रति गतं दयितं तु वल्लभमेव विचिन्त्य संस्मृत्य गलदश्रुदृक्सती प्रवहद्बाष्पपूर्णलोचना सती । निजां स्वकीयां तां पूर्वरात्रिकृतां प्रतिकूलतां लज्जाविशिष्टतया पतिसङ्गमाननुकूलतां नितरां अत्यर्थं निनिन्द हि उपालभतेत्यर्थः । इदंप्रथमतया पतिसङ्गता काचित्तरुणी लज्जाविशिष्टा पतिसम्भोगावसरे प्रतिकूला सती अपरेद्युरेव परस्थलं प्रति गतं पतिं विचिन्त्य धिङ्मां तदा मुधा प्रतिकूलाभवं इदानीं तादृशसमयः किमु समागच्छति । लज्जया वञ्चिताभवं इति निजप्रातिकूल्यनिन्दापरा पश्चात्तापसन्तप्ता च बभूवेत्याशयः ।

गृहेति ।

**गृहकार्यसक्तहृदया ह्युपह्वरे**
**तरुणी प्रियेण चरताशु सस्मितम् ।**
**अचिरागतेन धुरि भाषिता शनैः**
**विससर्ज बाष्पमपसृत्य मौनतः ॥ १९ ॥**

तरुणी काचिद्युवतिः गृहकार्यसक्तहृदया सती निजभवनकर्मकरणैकताना सती अचिरागतेन तदानीमेव परस्थलात्समायातेन आशु स्नानादि निर्वर्तनाय सत्वरं । चरता तत इतः पर्यटता प्रियेण वल्लभेन उपह्वरे गुरुजनविरहिते रहसि धुरि अर्गलीभूयाग्रतः स्थित्वेत्यर्थः । सस्मितं यथा तथा समन्दहासं यथा तथा । शनैः मन्दं भाषिता सती अपिकुशलमित्यादि पृष्टा सतीत्यर्थः । मौनतः जोषंभावेन अनुत्तरेति यावत् । अपसृत्य तत्स्थानादन्यतो गत्वा । यद्वा स्तोकमिव दूरतः स्थित्वेत्यर्थः । बाष्पं नयनजलं विससर्ज विसृष्टवती । अदत्तप्रत्युत्तरा । बाष्पेणैव अपि नाम ते स्मृतिपथमद्यापि वा समागताहं इत्यादिभावं प्रकाशयामासेति भावः ।

प्रतिनित्यवदिति ।

**प्रतिनित्यवच्च गुरुपार्श्वतल्पगा**
**निशि वेश्मभाजमितरस्थलात्प्रियम् ।**
**अवलोक्य तल्पमचिरात्स्वमन्दिरं**
**न शशाक नेतुमपरा ह्रिया वधूः ॥ २० ॥**

अपरा वधूः अन्या कामिनी प्रतिनित्यवच्च प्रतिदिनमिव गुरुपार्श्वतल्पगा सती निजश्वश्रूपार्श्वकल्पिते शयने शयाना सती । निशि निशीथे इत्यर्थः । इतरस्थलात् परस्थलात् वेश्मभाजं निजगृहमागतं प्रियं वल्लभं अवलोक्य दृष्ट्वा अचिरात् तत्क्षणमेव तल्पं गुरुपार्श्वकल्पितां शय्यां स्वमन्दिरं निजशयनागारं नेतुं प्रापयितुं ह्रिया लज्जया न शशाक समर्था न बभूव । असन्निहितपतितया प्रतिदिनमिव रात्रौ श्वश्रूपार्श्वे शयाना निशीथे समायातं वल्लभमवलोक्य सत्यामपि तत्क्षणमेव निजशयनागारजिगमिषायाम् । लज्जया तल्पमपि नाददे इत्याशयः ।

तुहिनेति ।

**तुहिनव्रणातिपरिबाधिताधरा**
**चिरसङ्गतापि सुदती रतोत्सवे ।**
**रदनाग्रदंशनविधानमन्तरा-**
**प्युररीचकार विवशैव सीत्कृतिम् ॥ २१ ॥**

सुदती स्पृहणीयदन्तविशिष्टा काचित्सुन्दरी तुहिनेन हिमेन जनितः यः व्रणः तेन अत्यन्तं परिबाधितः परिपीडितः अधरः यस्यास्सा सती । चिरसङ्गतापि चिरेण पत्या संश्लिष्टापि । पतिसङ्गतायाः व्यतीते सत्यपि काले इति यावत् । रतोत्सवे सुरतोत्सवसमये रदनाग्रेण पत्युः दन्ताग्रेण दंशनविधानं क्षतीकरणमित्यर्थः । तदन्तरापि तद्विनापि दन्तक्षताभावेपीति यावत् । विवशैव परवशैव अधरबाधाधीनेति यावत् । सीत्कृतिं सीत्कारं उररीचकार अङ्गीचकार । पत्याऽकृतेप्यधरक्षते तुहिनविशीर्णाधरा कापि चिरकालनिर्वर्तितसुरतापि सीत्कारं न मुमोचेत्याशयः । विभावनालङ्कारः ।

प्रथममिति ।

**प्रथमं वियोगविधुरा प्रियागमात्**
**न वदामि किञ्चिदिति या स्थिराऽभवत् ।**
**दयितं विलोक्य गृहमागतन्तु सा**
**दृढमालिलिङ्ग गतमानवैभवा ॥ २२ ॥**

वियोगविधुरा विरहक्लिष्टा या मानिनी प्रियागमात् प्रवासान्निजदयितागमनानन्तरमित्यर्थः । प्रथमं तद्भाषणात्पूर्वमित्यर्थः । किञ्चित् किमपि न वदामि न व्याहरामि । यद्वा न भाषयामीति णिच्कतया व्याख्येयम् । इति पूर्वोक्तप्रकारेण स्थिरा सती मानोत्कर्षेण कृतनिश्चया सती अभवत् । सातु कृतनिश्चया सैव गृहमागतं प्रवासाद्भवनमागतं दयितं

वल्लभं विलोक्य गतमानवैभवा सती विगलितचित्तसमुन्नत्यतिशया सती दृढं यथा तथा अविरलं यथा तथा। आलिलिङ्ग। मानातिरेकेण कापि मानिनी भवतु यद्यागच्छेन्मे प्रवासाद्वल्लभः तदा प्रथमतः नैव भाषयामीति कृतप्रतिज्ञा वल्लभदर्शनसमनन्तरमेवानन्दातिशयादितिकर्तव्यतामूढा सरभसं समाश्रितमौनैव तं दृढमालिलिङ्गेत्याशयः।

निशीति।

**निशि कापि मानपरिवर्तिताङ्गका**
**दयिते प्रसुप्तिमभिनीय शायिनि।**
**गृहसुप्तकीरपरिबोधतत्परा**
**हसताथ तेन दृढचुम्बिताऽभवत् ॥ २३ ॥**

कापि काचिन्मानवती निशि रात्रौ मानेन परिवर्तितं पराङ्मुखीकृतं अङ्गकं यया सा सती दयिते वल्लभे प्रसुप्तिं निद्रां अभिनीय शायिनि सति शयाने सति। गृहे निजशयनागारे सुप्तः पञ्जरे निद्रालुः यः कीरः शुकः तस्य परिबोधः प्रबोधनं तस्मिंस्तत्परा सती आसक्ता सती अथ समनन्तरं हसता मन्दहासं कुर्वता तेन वल्लभेन दृढं यथा तथा। चुम्बिता सती अभवत्। कापि मानवती मानेन पराङ्मुखी सती वल्लभ एव प्रथमं मामालिङ्गत्विति तूष्णीं शिश्ये। एवं सति सा मानवती प्रथमं स्वयमेव निजदयितप्रतिबोधने निजलाघवमनुचिन्त्य पञ्जरे शयानं शुकं प्रतिबोधयितुं मन्दमारेभे। तत्कार्यदर्शनजनितहासेन दयितेन ततश्च समालिङ्गिता चुम्बिता च बभूवेत्याशयः।

एवं प्रवासिनामवस्थां वर्णयित्वा वृद्धानामवस्थामाह। स्थविरास्त्विति।

**स्थविरास्तु राङ्कवकृतावगुण्ठनाः**
**अपि हैमनेन पवनेन बाधिताः।**
**तपनातपैकनिरताश्च वासरे**
**सदनाजिराणि कुतुकेन भेजिरे ॥ २४ ॥**

स्थविरास्तु वृद्धास्तु। तुस्तु भेदे। राङ्कवेन कम्बलेन कृतं अवगुण्ठनं निचोलनं यैस्ते एवं स्थिता अपि। हैमनेन हिमकरम्बितेन पवनेन समीरणेन बाधितास्सन्तः पीडितास्सन्तः वासरे दिवसे तपनस्य सूर्यस्य आतपैकनिरतास्सन्तः उद्योतैकसेवनासक्ताश्च सन्तः कुतुकेन कुतूहलेन सदनाजिराणि निजगृहाङ्कणानि तत्रातपस्य पातात्। भेजिरे सिषेविरे। कम्बलैरवगुण्ठिता अपि दुर्बलतया स्थविराः सूर्यातपसेवनार्थं दिवसं निजगृहाजिर एव निषण्णा बभूवुरित्याशयः।

कृतेति ।

**कृतजृम्भकाश्च विरदा वलित्वचः**
**चिबुकार्पितात्मतनुजानुपिण्डकाः ।**
**चलपाणिसारितमुखाक्षिमक्षिकाः**
**जरयातिभुग्नचरमाङ्गकीकसाः　　॥ २५ ॥**

च किञ्च । कृतजृम्भकाः असकृदारब्धजृम्भाः विरदाः दन्तशून्यवदनाः वलित्वचः वल्यः त्वचि येषां ते । चिबुके विनिहितनिजकृशपिण्डाकारजानुप्रदेशा इत्यर्थः । चलपाणिना कम्पमानकरेण सारिताः समुत्सारिताः मुखदेशे नयनप्रदेशे च डयमानाः यद्वा निषण्णाः मक्षिकाः येषां ते । जरया वार्धक्येन अत्यन्तं भुग्नः अवनतः चरमाङ्गस्य कीकसः अस्थिविशेषः येषां ते । स्थविरास्तु तपनातपैकनिरताः वासरे सदनाजिराणि कुतुकेन भेजिरे इति पूर्वेणान्वयः । स्वभावोक्तिः ।

सम्प्रति तापसानां कर्तव्यतत्परतामाह । उषसीति ।

**उषसि प्रबुध्य मृगचर्मतल्पतः**
**सरसीषु सान्द्रमिहिकासु तापसाः ।**
**जडवातचालितरदातिघट्टनाः**
**निजकर्म चक्रुरवगाह्य सादरम्　　॥ २६ ॥**

तापसाः तपोधनाः उषसि उषःकाल एव । मृगचर्मतल्पतः हरिणाजिनमेव तल्पं शय्या तस्मात् । एतेन सुखपराङ्मुखत्वं सूचितम् । प्रबुध्य उत्थायेति यावत् । सान्द्रमिहिकासु निबिडतरहिमपातासु । एतेन जलावगाहनस्यासह्यता सूचिता । सरसीषु सरोवरेषु अवगाह्य अवगाहनस्नानं कृत्वा । जडवातेन शीतलानिलेन चालिताः कम्पिताः ये रदाः दन्ताः तेषां अत्यन्तं घट्टनं येषां ते । सादरं यथा तथा सश्रद्धं यथा तथेत्यर्थः । निजकर्म ब्राह्मणविहितं सन्ध्यादिकर्म चक्रुः निर्वर्तयामासुः । एतेन इन्द्रियजयस्सूच्यते ।

सम्प्रति हेमन्तकालिकसरोवरान्वर्णयति । कमलेति ।

**कमलातिवानपृथुबीजमालिका-**
**परिवृत्तितत्परतरङ्गपाणयः ।**
**परिमीलितात्मसरसीरुहेक्षणाः**
**जपतत्परा इव सरोवरा बभुः　　॥ २७ ॥**

कमलानां अत्यन्तं वानानि शुष्काणि यानि पृथुबीजानि तेषां मालिका परम्परा मालाच तस्याः परिवृत्तिः परिवर्तनं गणनेति यावत्। तस्यां तत्परः आसक्तः तरङ्ग एव पाणिः येषां ते। आत्मनः सरसीरुहाण्येव ईक्षणानि लोचनानि परिमीलितानि निमीलितानि सरसीरुहेक्षणानि यैस्ते। सरोवराः सरांसि जपतत्परा इव जपासक्ता इवेत्युत्प्रेक्षा बभुः। हेमन्तसमये विशीर्णानां कमलानां परिपक्वतया बीजानि कोशाद्गलितानि सन्ति सलिले प्लवन्ते। तरङ्गैरभिहतानि तानि मालारूपेण भासमानानि सन्ति। अत एवोत्प्रेक्षते। जसार इवेति। एकदेशविवर्तिरूपकोत्प्रेक्षयोस्सङ्करः।

सम्प्रति हेमन्तसमयतया कमलानां नाशं वर्णयति। कमलानीति।

**कमलानि कृष्णनयनोपमेप्सया**
**सलिले तपांसि सुचिरं विरच्य च।**
**अनवाप्य साधु फलमल्पतेजसा**
**विमुखानि नाशमगमन्शुचेव हा ॥ २८ ॥**

कमलानि पङ्कजानि कृष्णस्य भगवतो वासुदेवस्य नयनाभ्यां उपमा सादृश्यं आप्तुमिच्छया। सलिले सुचिरं बहुकालं तपांसि विरच्य च कृत्वापि। साधुफलं कृष्णनयनसादृश्यरूपं फलं अनवाप्य अलब्ध्वा अल्पतेजसा स्वल्पकान्त्या उपलक्षितानि सन्ति। विमुखानि च सन्ति तपसः पराङ्मुखानि सन्ति अधोमुखानि च सन्ति यद्वा विगलमुखानि चेत्यर्थः। शुचेव शोकेनेव नाशं अदर्शनं अगमन् प्रापुः। हेतिखेदे। हेतूत्प्रेक्षा। प्रतीपालङ्कारो गम्यते।

हेमन्तसमये कोकिलानामवस्थामाह। अतिशीतेति।

**अतिशीतवातपरिबाधनादिव**
**प्रतिबद्धकण्ठसरसारवाः पिकाः।**
**धरणीरुहाग्रदलपुञ्जगूहिताः**
**त्रपयेव मौनमवलम्बिरे तदा ॥ २९ ॥**

तदा हेमन्तसमये पिकाः कोकिलाः अत्यन्तं शीतः यः वातः तस्य परिबाधनादिव परितः पीडनादिवेत्युत्प्रेक्षा। प्रतिबद्धः निरुद्धः यः कण्ठः तस्य सरसः माधुर्यविशिष्टः आरवः नादः येषां ते सन्तः। त्रपयेव लज्जयेव महीरुहाणां वृक्षाणां अग्रे शिखरे यानि दलानि पर्णानि तेषां पुञ्जेन गूहितास्सन्तः तिरोहितास्सन्तः मौनं मूकत्वं अवलम्बिरे आश्रयामासुः। अत्राप्रस्तुतगायकवृत्तान्तस्य परिस्फुरणात्समासोक्तिः। हेतूत्प्रेक्षासमासोक्त्योस्सङ्करः।

भ्रमराणामवस्थामाह । कमलेति ।

**कमलात्ययेन सरसी विहाय ताः**
**भ्रमरा विमुक्तहिमपूर्णपुष्पकाः ।**
**पटुनादसान्द्रगगनाङ्कणभ्रमाः**
**भ्रमरत्वमेव दिवसेऽवलम्बिरे ॥ ३० ॥**

भ्रमराः चञ्चरीकाः कमलात्ययेन पङ्कजानां नाशेन ताः पूर्वपरिचिताः सरसीः सरांसि विहाय त्यक्त्वा विमुक्तानि दूरं परिहृतानि हिमपूर्णानि अन्तस्तुहिनकरम्बितानि पुष्पाणि क्षुद्रकुसुमानि यैस्ते सन्तः । पटुनादेन झङ्कारेण सान्द्रं निबिडं यद्गगनाङ्कणं आकाशाजिरं तस्मिन् भ्रमाः डयनं येषान्ते सन्तः । दिवसे वासरे भ्रमरत्वमेव भ्रमणशीलत्वमेव अवलम्बिरे आश्रयामासुः । कमलानां नाशात् इतरक्षुद्रपुष्पाणां हिमपूरितत्वात् वासरे मधुलिप्सया सारावं भ्रमराः गगने बभ्रमुरित्याशयः ।

हेमन्तकालिकसूर्योदयक्रममाह । हरितेति ।

**हरितातिसान्द्रतृणकोटिनिस्तल-**
**स्फुरदच्छमौक्तिकरुचीनि भास्करः ।**
**तुहिनानि तस्कर इव प्रसारितैः**
**क्रमशो जहार धरणीतलात्करैः ॥ ३१ ॥**

भास्करः सूर्यः तस्कर इव चोर इव । क्रमशः क्रमेण सान्द्रतुहिनाच्छादितगगनतया आतपपातेन क्षीणे तुहिने सति सूर्यकिरणप्रसरणात् क्रमश इत्युक्तम् । चोरोप्येवं करोति । प्रसारितैः आभूतलं प्रेरितैरित्यर्थः । करैः किरणैः हस्ताभ्याञ्च । हस्तपक्षे बहुवचनमविवक्षितम् । हरितानि हरिद्वर्णानि सान्द्राणि अतिनिबिडानि यानि तृणानि शष्पाणि तेषां कोटिषु अग्रभागेषु निस्तलानि वर्तुलानि स्फुरन्ति प्रकाशमानानि अच्छ-मौक्तिकानि अमलमुक्ताफलानि तेषां रुचिरिव रुचिः येषां तानि तुहिनानि हिमानि धरणीतलात् क्षितिप्रदेशात् जहार अपहृतवान् । शाद्वलप्रदेशे तृणाग्रपतितानि हिमानि वर्तुलमौक्तिकभ्रमात् भास्करः चोर इवापहृतवानित्यर्थः । उपमालङ्कारः । भ्रान्तिमदलङ्कारो गम्यते ।

पारावतानामवस्थामाह । वलभाविति ।

**वलभौ कपोतयुगलीपरम्परा**
**प्रसरत्प्रधूमपरिधूम्रविग्रहा ।**

**मिहिकातिरेकपिहिता कलस्वनैः**
**अनुमेयतामुपजगाम च प्रगे ॥ ३२ ॥**

वलभौ वक्रदारुणि कपोतानां पारावतानां युगल्यः मिथुनानि तासां परम्परा पङ्क्तिरित्यर्थः। एतेन वक्रदारुविवरेषु कपोतमिथुनानां बाहुल्यं सूचितम्। प्रगे प्रातःकाले प्रसरन्तः ये प्रधूमाः अभ्यन्तरादूर्ध्वं प्रसृमरा धूमा इत्यर्थः। तैः परितो धूम्राः धूम्रवर्णविशिष्टाः विग्रहाः कायाः यस्यास्सा सती। मिहिकातिरेकेण हिमातिशयेन पिहिता सती कलस्वनैः निजवधूपुरःप्रदेशपरिभ्रमणावसरक्रियमाणकलरवैः अनुमेयतां नैतानि हिमानि किन्तु पारावताः कलरवविशिष्टत्वात् इत्यनुमेयत्वम्। उपजगाम प्राप। प्रातरेवाभ्यन्तरे सलिलतापनाय प्रज्वाल्यमानाग्नितयोर्ध्वं प्रसृमरधूमधूम्रवर्णाः हिमपिहिततया च कलरवैरेव पारावताः अनुमातुं योग्या बभूवुरित्याशयः। अत्र मीलितानुमानयोस्सङ्करः।

एतादृशप्रभातसमये भगवतो वासुदेवस्य कृत्यमाह। उषसीति।

**उषसि प्रबुध्य यदुनायकस्तदा**
**स्तुतिपाठकोक्तनुतिनन्दितो जनैः।**
**सुमचन्दनादिसुरभीकृतैर्जलै-**
**रभिषेचितश्च समलङ्कृतोऽभवत् ॥ ३३ ॥**

यदुनायकः श्रीकृष्णः स्तुतिपाठकैः वन्दिभिः उक्ता सम्यग्गीता या नुतिः स्तोत्रं तया नन्दितस्सन् सन्तोषितस्सन् उषसि उषःकाल एव प्रबुध्य तल्पादुत्थाय जनैः परिचारकैः कर्तृभिः परिमलहृदयङ्गमैः सुमैः चन्दनैश्च आदिपदेन उशीरकर्पूरादिर्गृह्यते। तैः सुरभीकृतैः वासितैः जलैः सलिलैः अभिषेचितश्च सन् कारिताभिषेकस्सन्। समलङ्कृतश्च सन् किरीटग्रैवेयककेयूरादिदिव्याभरणपरिमण्डितस्सन् अभवत्। यात्रार्थं सज्जो बभूवेत्यर्थः।

कुन्तीति।

**कुन्तीतनूजास्स्नपनादिशुद्धाः**
**सङ्कल्पसिद्धिप्रवणान्तरङ्गाः।**
**तदा मुदा प्राञ्जलयो मुकुन्दं**
**यात्रोन्मुखं तं परिवार्य तस्थुः ॥ ३४ ॥**

कुन्तीतनूजाः पाण्डवाः स्नपनादिशुद्धास्सन्तः स्नानादिना आदिपदेन सन्ध्यावन्दनादिकर्म गृह्यते। शुद्धास्सन्तः परिपूतास्सन्तः सङ्कल्पस्य सन्धिकरणरूपसङ्कल्पस्य सिद्धौ प्रवणान्त-

रङ्गास्सन्तः आसक्तमानसास्सन्तः मुदा कृष्णोद्यमदर्शनजन्यसंतोषेण प्राञ्जलयस्सन्तः बद्धाञ्जलिपुटास्सन्तः तदा तस्मिन्काले यात्रोन्मुखं प्रयाणाभिमुखं तं स्वसङ्कल्पनिर्वहणसज्जं मुकुन्दं श्रीकृष्णं परिवार्य तस्थुः ।

तदन्विति ।

**तदनु विविधरत्नैर्मण्डितं पक्षिराज-**
**ध्वजपटघटिताग्रं मौक्तिकाबद्धजालम् ।**
**प्रसृमरकनकत्विड्भासुरं दारुको द्रा-**
**ग्रथवरमुपनिन्ये द्वारमाचित्रिताङ्गम् ॥ ३५ ॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणमहाकविविरचिते**
**अद्भुतदूताख्यकाव्यरत्ने**
**तृतीयस्सर्गः ।**

तदनु अनन्तरं विविधरत्नैः नवविधरत्नैरित्यर्थः । मण्डितं अलङ्कृतं पक्षिराजः गरुडः तद्विशिष्टः ध्वजपटः तेन घटितं योजितं अग्रं शिखरं यस्य सः तं । मौक्तिकैः मुक्ताकलापैः आसमन्ताद्बद्धं जालं आनायः यस्य सः तं । प्रसृमरा सर्वतः प्रसरणशीला या कनकत्विट् चामीकरकान्तिः तया भासुरं उज्ज्वलं । आचित्रिताङ्गं आसमन्तात्सालभञ्जिकापत्रभङ्गादिभिः चित्रविशिष्टावयवं रथवरं स्यन्दनोत्तमं दारुकः तदाख्यस्सारथिः द्वारं कृष्णावासप्रतीहार-प्रदेशं उपनिन्ये आनीतवानित्यर्थः ।

भगवता लक्ष्मीदासेन अनुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
तृतीयस्सर्गः ।

॥ श्रीः ॥

# चतुर्थस्सर्गः ।

अथास्मिन्सर्गे सन्ध्यर्थं हास्तिनपुरं प्रति भगवद्यात्रां वर्णयति श्रीमानिति ।

**श्रीमानथ प्रकटयन्द्रुपदात्मजायाः**
**दुःखापनोदनधियं धुरि पाण्डवानाम् ।**
**निर्वर्तिताग्निहवनो द्विजवेदघोषा-**
**नाकर्णयन्यदुपतिस्ससुहृत्प्रतस्थे ॥ १ ॥**

अथ द्वारि रथस्थित्यनन्तरं श्रीमान् आभरणादिकान्तिविशिष्टः द्रुपदात्मजायाः स्वाश्रितायाः द्रौपद्याः दुःखस्य क्लेशस्य अपनोदनं परिहरणं तद्धियं तत्सङ्कल्पं । पाण्डवानां धुरि अग्रे प्रकटयन् प्रकाशयन् निर्वर्तितं अग्निहवनं वह्नौ होमः येन स तथोक्तः । यदुपतिः भगवान्वासुदेवः द्विजानां श्रोत्रियाणां वेदघोषान् स्वस्तिवाचनानि । आकर्णयन्सन् सादरं शृण्वन्सन् ससुहृत्सन् सात्यकिसमेतस्सन् । प्रतस्थे प्रयाणाभिमुखो बभूवेत्यर्थः ।

भगवत्प्रस्थानावसरे पञ्चपाण्डवानां कृत्यमाह । भीम इति ।

**भीमोंऽसपीठविनिविष्टगदोऽग्रयायी**
**पार्थः प्रसारितभुजस्सरणिप्रदर्शी ।**
**पार्श्वानुवर्तनपरो यमजोऽनुजग्मुः**
**माद्रीसुतौ करधृतामलचामरौ च ॥ २ ॥**

अंसपीठे पीवरभुजशिखरे विनिविष्टा विनिहिता गदा येन स तथोक्तः । भीमः वृकोदरः अग्रयायी सन् कृष्णाग्रगामी सन् । प्रसारितभुजः मार्गप्रदर्शनाय पुरस्कृतबाहुः पार्थः अर्जुनः सरणिप्रदर्शी सन् कृष्णस्य मार्गदर्शकस्सन् । यमजः धर्मराजः पार्श्वानुवर्तनपरस्सन् कृष्णपार्श्वे सविनयमनुगमनस्सन् । माद्रीसुतौ नकुलसहदेवौ करेण धृते गृहीते अमले च ते धवलतरे च ते चामरे च प्रकीर्णके च ययोस्तौ तथाभूतौ सन्तौ । अनुजग्मुः कृष्णमनुसृत्य-प्रतस्थिरे ।

कृष्ण इति ।

**कृष्णस्तु सात्यकिलसत्ततकोमलाच्छ-**
**कौशेयपाणिकृतदक्षिणपाणिपद्मः ।**

**अंसावसक्तपरिलम्बितपीतचेलो**
**मन्दं रथान्तिकमुपागमदब्जनेत्रः ॥ ३ ॥**

अब्जनेत्रः पुण्डरीकायताक्षः। एतेन शत्रूणामपि हृदयवशीकरणसामर्थ्यं सूचितम्। कृष्णस्तु सात्यकेः लसत् कान्तिमत् ततं विस्तृतं कोमलञ्च मृदुलञ्च अच्छञ्च निर्मलञ्च कौशेयं क्रिमिकोशाकल्पितं वस्त्रं यस्मिन्सः सचासौ पाणिश्च तस्मिन्कृतः निहितः दक्षिणपाणिपद्मः येन स तथोक्तस्सन्। अंसे भुजशिखरे अवसक्तं संलग्नं परिलम्बितञ्च आक्षितितलं डोलायमानञ्च पीतचेलं पीताम्बरं यस्य स तथोक्तस्सन्। मन्दं सगम्भीरमित्यर्थः। रथान्तिकं स्यन्दनसमीपं उपागमत् आजगाम।

प्रस्थानावसरे सूर्योदयक्रममाह। भास्वानिति।

**भास्वान्युगान्तरगतो नभसि प्रसर्प-**
**त्प्रालेयचीनपटगुण्ठितसर्वगात्रः।**
**मन्दं करेण परिनुद्य हिमं क्रमेण**
**बालातपप्रसवपुञ्जममुञ्चदुर्व्याम् ॥ ४ ॥**

भास्वान् सूर्यः नभसि आकाशे युगान्तरगतस्सन् युगपरिमितं ऊर्ध्वप्रदेशं प्राप्तस्सन् प्रसर्पत् समन्ताद्व्यापनशीलं यत् प्रालेयं हिमं तदेव चीनपटः सूक्ष्मांशुकं तेन अवगुण्ठितं तिरोहितं सर्वगात्रं सर्वशरीरं यस्य स तथोक्तस्सन्। मन्दं क्रमेण क्रमशः हिमं करेण किरणेन। जात्येकवचनम्। हस्तेन च परिनुद्य समुत्सार्य उर्व्यां भूमितले बालातपप्रसवपुञ्जं बालोद्योत एव प्रसवपुञ्जः कुसुमसमूहः तं। अमुञ्चत् किरति स्मेत्यर्थः। अत्र अप्रस्तुतसूत्रधारवृत्तान्तस्य प्रतीयमानत्वात् समासोक्तिः।

एवं सूर्योदयानन्तरं भूम्या अवस्थामाह। छायेति।

**छायामिषेण तरवो हरये सुदीर्घ-**
**दण्डप्रणाममवनौ नितरामकुर्वन्।**
**उद्बाष्पकैतवगलत्प्रमदाश्रुबिन्दू-**
**न्विश्वम्भराप्यसृजदात्मभरोज्जिहीर्षुः ॥ ५ ॥**

तरवः वृक्षाः छायामिषेण आत्मानातपव्याजेन हरये यात्रोन्मुखाय वासुदेवाय अवनौ क्षितौ सुदीर्घदण्डप्रणामं साष्टाङ्गनमस्कारं नितरां सम्यगित्यर्थः। अकुर्वन्। महात्मनां यात्रावसरे सर्वैरपि दण्डवत्प्रणामः कार्य इति समुदाचारः। विश्वम्भरापि भूमिरपि। अत्र

विश्वम्भराशब्दप्रयोगेण दुष्टानामपि वहनाद्भारविशिष्टत्वं सूच्यते। आत्मभरोज्जिहीर्षुः सती निजभारं परिहर्तुमिच्छुस्सती उद्बाष्पस्य सूर्यातपतापनात् ऊर्ध्वं प्रसृमरस्योष्मणः कैतवेन गलत् प्रसरत् यत्प्रमदाश्रु आनन्दबाष्पः तस्य बिन्दून् कणगणान् असृजत् अमुञ्च-दित्यर्थः। भगवतो वासुदेवस्य प्रस्थानात् मम भारः परिहृतो भविष्यतीत्यानन्दबाष्पं मुमोचेति भावः। कैतवापह्नुतिः।

भगवतः रथ्येषु वात्सल्यप्रदर्शनपूर्वकं रथाधिरोहणं वर्णयति। मार्तण्डेति।

**मार्तण्डघृष्टिनिकरप्रतिबिम्बचञ्च-**
**त्स्निग्धामलान्करतलेन मुहुस्स रथ्यान्।**
**आस्फाल्य दीप्तवपुषं रथमध्यरोह-**
**दारोप्य सात्यकिमपि प्रवरो यदूनाम् ॥ ६ ॥**

सः प्रसिद्धः यदूनां प्रवरः श्रीकृष्णः मार्तण्डस्य सूर्यस्य घृष्टयः मयूखाः तेषां निकरः समूहः तस्य प्रतिबिम्बः प्रतिफलनं तेन चञ्चन्तः कान्तिमन्तः स्निग्धाश्च मसृणाश्च अमलाश्च धवलवर्णाः तान् रथ्यान् रथयोजितान् अश्वान्। मुहुः असकृत् करतलेन पाणितलप्रदेशेन आस्फाल्य दीप्तवपुषं उज्वलगात्रं रथं सात्यकिं आरोप्य प्रथमतः समुपवेश्य अनन्तरं स्वयमध्यरोहत् आरुरोह।

रथारोहणानन्तरं कृष्णं प्रति बलरामोक्तिप्रकारमाह। विन्यस्येति।

**विन्यस्य कूर्परमथो रथसालशृङ्गे**
**सोपानदेशकृतवामपदो हली तु।**
**अन्तःप्रवेशितमुखः कथमप्युपेन्द्र**
**सन्धिं समर्थय तयोरिति मन्दमूचे ॥ ७ ॥**

अथो रथारोहणानन्तरं। हली तु बलरामस्तु रथस्य स्यन्दनस्य यः सालः वरणः तस्य शृङ्गे अग्रभागे कूर्परं कपोणिं विन्यस्य निधाय सोपानदेशे रथारोहणार्थं कृताल्पसोपानोपरि कृतं विनिहितं वामपदं सव्यांघ्रिः येन स तथोक्तस्सन् अन्तःप्रवेशितमुखस्सन् रथवातायना-भ्यन्तरविनिहितवदनस्सन्। हे उपेन्द्र, हे कृष्ण, कथमपि प्रयासेनापि। एतेन दुर्योधन-मौर्ख्यं सूचितम्। तस्मादेव कथमपीत्यस्य तच्छन्दानुरोधेनापीत्यर्थो वक्तव्यः। तयोः कौरवपाण्डवयोः सन्धिं सौहार्दरूपं सन्धिं समर्थय साधय। इति एवं प्रकारेण द्रौपदीश्रवणपरिहाराय मन्दमित्युक्तं। ऊचे निवेदयामास।

कृष्णप्रस्थानावसरे द्रौपद्या अवस्थामाह । पाञ्चालिकेति ।

**पाञ्चालिका करधृतायतलोलकेशा**
**बाष्पाकुलासितविलोलकटाक्षवीक्षा ।**
**सान्द्रालकालिकलुषामलनम्रवक्त्रा**
**तस्थौ रथान्तिकमुपेत्य समात्तमौना ॥ ८ ॥**

पाञ्चालिका द्रौपदी। करेण धृतः गृहीतः आयतश्चासौ लोलश्च विश्लथतया दीर्घः अत एव डोलायमानः केशः चिकुरकलापः यस्यास्सा । बाष्पैः अश्रुजलैः आकुलः प्लाव्यमान इत्यर्थः । असितः नीलोत्पलसवर्णः विलोलश्च स्वसङ्कल्पहानिभिया चञ्चलश्च यः कटाक्षः तस्य वीक्षा यस्यास्सा । नेत्रेणैव निजाशयं प्रकटयन्तीत्याशयः । सान्द्रा निबिडा अलकानां चूर्णकुन्तलानां आलिः पङ्क्तिः तया परिवृततया कलुषं अनच्छं तथापि अमलं नैसर्गिक-नैर्मल्यविशिष्टं नम्रं आनतं लज्जया शोकेन वा वक्त्रं आननं यस्यास्सा सती । रथान्तिकं श्रीकृष्णरथसमीपं उपेत्य उपसृत्य समात्तमौना सती निश्शब्दा सती। तस्थौ स्थितवती । मदवस्थां मा विस्मरेति मौनेनैव सूचयामासेत्याशयः ।

द्रौपदीदर्शनजन्यां कृष्णस्यावस्थामाह । भ्रातुरिति ।

**भ्रातुर्निशम्य वचनं द्रुपदात्मजाञ्च**
**संवीक्ष्य तार्क्ष्यकलशः क्षणमात्तमौनः ।**
**निःश्वस्य दीर्घमथ दारुकमब्रवीद्रा-**
**ग्रथ्यान्प्रचोदय सहे स्थितिमत्र नेति ॥ ९ ॥**

तार्क्ष्यः गरुडः कलशो ध्वजाग्रदेशे यस्य स तथोक्तः । कृष्णः भ्रातुः बलरामस्य वचनं कथमपि सन्धिं कल्पयेति वचः निशम्य श्रुत्वा द्रुपदात्मजां तादृशदुःस्थां द्रौपदीं संवीक्ष्य च सम्यगवलोक्य च क्षणं क्षणकालं इतिकर्तव्यतामूढतया आत्तमौनस्सन् अङ्गीकृत-मूकभावस्सन्। दुर्योधनादिदौष्ट्यानुचिन्तनेन दीर्घं निःश्वस्य। सन्तापकार्यं दीर्घनिश्वासः । अथ अनन्तरं द्राक् इदानीमेव रथ्यान् वाहान् प्रचोदय प्रकर्षेण धावयेत्यर्थः । अत्र अस्मिन्प्रदेशे स्थितिं अवस्थानं न सहे। सोढुमशक्य इत्यर्थः। इति एवं रीत्या दारुकं तन्नामकं स्वसारथिं अब्रवीत् आज्ञापयामास। निजाग्रजस्य दुर्योधने पक्षपातं द्रौपद्या दुरवस्थाञ्च विचिन्त्य क्षणमपि तत्र स्थातुं कृष्णः न सम्मेने इत्याशयः ।

दारुकचोदितानामश्वानां धावनप्रारम्भक्रममाह । सञ्चोदिता इति ।

**सञ्चोदितास्तु तुरगास्स्फुरिताधरोष्ठाः**
**सृक्कणत्प्रसृतफेनचलत्खलीनाः ।**

**अन्योन्यवल्गनविघर्षणवक्रदेहाः**
**धारातिघट्टितधरास्सहसा प्रजग्मुः ॥ १० ॥**

सञ्चोदिताः दारुकेण प्रेरिताः तुरगास्तु अश्वास्तु स्फुरितं स्पन्दितं अधरोष्ठं प्रोथप्रदेश इति यावत्। येषां ते सन्तः। सृक्कणोः तालुप्रान्तभागयोः क्वणन्तौ कणकणायमानौ प्रसृतफेनौ लिप्तसबुद्बुदलालाजलौ चलत्खलीनौ चञ्चलकविके येषां ते। अन्योन्यं परस्परं वल्गनेन उत्प्लवनेन यद्विघर्षणं परस्परदेहसम्मर्दनं तेन वक्रः मर्दनपरिहाराय कुटिलः देहः येषां ते। धाराभिः गतिविशेषैः अतिघट्टिता अत्यन्तं प्रहता धरा भूतलं यैस्ते सहसा सत्वरं प्रजग्मुः प्रकर्षेण निरगुः। स्वभावोक्त्यलङ्कारः।

रथगमनक्रममाह। धावत्स्विति।

**धावत्सु वाजिषु रथश्चलकिङ्किणीनां**
**नादच्छलात्किलकिलेति समुज्जहास।**
**तार्क्ष्योऽपि केतनगतः पटकैतवेन**
**धून्वन्पतत्रममुमूर्ध्वमिवाचकर्ष ॥ ११ ॥**

वाजिषु अश्वेषु धावत्सु सत्सु। रथः चलकिङ्किणीनां वल्गत्क्षुद्रघण्टानां नादच्छलात् कणकणात्कारशब्दव्याजात्। किलकिलेति हासरवानुकरणं। समुज्जहास हर्षातिशयाद्धास-मकरोत्। केतनगतः ध्वजपटस्थितः तार्क्ष्योऽपि गारुडोऽपि पटकैतवेन ध्वजांशुकव्याजेन पतत्रं पक्षपुटमित्यर्थः। धून्वन्सन् समुड्डयनाय मुमुत्कम्पयन्सन्। अमुं रथं ऊर्ध्वं आकाशमार्गं प्रति। आचकर्षेवेत्युत्प्रेक्षा।

दूरगतरथदशामाह। त इति।

**ते पाण्डवा गगनयानमिव प्रयान्तं**
**वेगाम्भसि प्लवनशीलमनल्पकान्तिम्।**
**संवीक्ष्य तं रथवरं नयनव्यतीतं**
**तस्मिन्क्रमेण विनिमग्नमिवागुरोकः ॥ १२ ॥**

ते कृष्णानुसरणशीलाः पाण्डवाः धर्मराजादयः। गगनयानमिव विमानमिवेत्युपमा। प्रयान्तं प्रकर्षेण धावन्तं वेगाम्भसि अतिशयितरयसलिले प्लवनशीलं सन्तरणशीलं अनल्पकान्तिं विसृत्वरसुवर्णप्रभाविशिष्टं। तस्मिन् वेगाम्भसि क्रमेण क्रमशः विनिमग्नमिव कृतावगाहमिवेत्युत्प्रेक्षा। नयनव्यतीतं दृष्ट्यगोचरं तं कृष्णालङ्कृतं रथवरं स्यन्दनसत्तमं

संवीक्ष्य तदेकतानतयाऽवलोक्येत्यर्थः । ओकः निजसदनं । अगुः प्रविविशुरित्यर्थः । स्वभावोक्त्युपमोत्प्रेक्षाणां सङ्करः ।

रथवेगं वर्णयति । नूत्नेति ।

**नूत्नप्रवाहनिभमायतमम्बुजाक्षो**
**मार्गं गिलन्तमिव यान्तमवेक्ष्य कृष्णः ।**
**मन्दं प्रचोदय रथं वनसन्निवेशो**
**द्रष्टव्य इत्यवददग्रगतं च सूतम् ॥ १३ ॥**

नूत्नप्रवाहनिभं अचिरवृष्टिसम्भृतशोणस्रोतस्सदृशं आयतं मार्गं गिलन्तमिव वदनाभ्यन्तरं पातयन्तमिवेत्युत्प्रेक्षा । यान्तं वेगेन गच्छन्तं रथं । अम्बुजाक्षः कमलदलायतलोचनः । एतेन रथवेगदर्शनजन्यमाश्चर्यं सूच्यते । कृष्णः अवेक्ष्य मन्दं प्रचोदय रथ्यान्प्रेरय । वनसन्निवेशः काननप्रदेशः द्रष्टव्यः अवेक्षणीयः । इति पूर्वोक्तप्रकारेण अग्रगतं निजपुरोवर्तिनं सूतं दारुकं । अवदत् अब्रवीत् ।

अथ रथमन्दीकरणक्रममाह । आकर्ण्येति ।

**आकर्ण्य कृष्णवचनं स तु दारुकोऽथ**
**यत्नेन रश्मिनिकरं परिगृह्य रथ्यान् ।**
**उत्पातिताग्रचरणान्परिधूतशीर्षान्**
**स्फीतेक्षणान्वृतमुखान्विततान मन्दान् ॥ १४ ॥**

सः रथवेगीकरणोत्सुकः । दारुकः कृष्णवचनं कृष्णस्य मन्दं प्रचोदयेति वचनं आकर्ण्य श्रुत्वा अथ अनन्तरं यत्नेन स्वप्रयत्नेन रश्मिनिकरं चतुर्णामप्यश्वानां प्रग्रहसमूहं परिगृह्य बलादाकृष्येत्यर्थः । रथ्यान् रथयोजितानश्वान् उत्पातिताग्रचरणान्सतः झडिति वेगमन्दीकरणात् समुत्क्षिप्तपादाग्रान्सतः परिधूतशीर्षान्सतः समुत्कम्पितमस्तकान्सतः स्फीतेक्षणान् प्रग्रहकर्षणात् विस्तृतनयनान्सतः विवृतमुखान् सरसनाचालनं व्यायतवक्त्रान्सतः मन्दान् मन्थरान्सतः । विततान चकारेत्यर्थः । स्वभावोक्त्यलङ्कारः ।

अश्वानां गतिनिरोधक्षणावस्थामाह । फूत्कारेति ।

**फूत्कारकीर्णसितफेनपृषत्प्रसिक्त-**
**प्रोथा विधूनितविधूस्रसुधौतवालाः ।**
**ग्रीवोद्धृतिप्रचलसान्द्रसटाश्च रथ्याः**
**वल्गत्पदाङ्गदझणत्कृतयो ववल्गुः ॥ १५ ॥**

रथ्याः अश्वाः । फूत्कारेण स्थित्यनुपदं फूत्कारो हयानां स्वभवः । कीर्णानि सर्वतो व्याप्तानि यानि सितफेनानां पृषन्ति तैः प्रसिक्तः आर्द्रीकृतः प्रोथः नासाप्रदेशः येषान्ते विधोः चन्द्रस्य उस्राः मयूखाः इव सुधौतं अत्यन्तशुभ्रं च तत् वालश्च विधूनितं प्रचालितं वालं यस्ते । ग्रीवाणां कन्धराणां उद्धतिः समुद्धरणं तेन प्रचलाः प्रकर्षेण चञ्चलाः सान्द्राः निबिडाः सटाः येषान्ते । वल्गन्ति कम्पमानानि यानि पदाङ्गदानि पादाभरणानि तेषां झणत्कृतिः झणझणात्कारः येषां ते सन्तः । ववल्गुः ननृतुः । स्वभावोक्त्यलङ्कारः ।

काननसरोदर्शनमाह । शीतेति ।

**शीतातिवातपरिकम्पितकन्धराणि**
**शैवालनीलदृढकम्बलगुण्ठितानि ।**
**भङ्गाकुलानि नितरामिव वार्धकानि**
**गच्छन्वने स हिमभाञ्जि सरांस्यपश्यत् ॥ १६ ॥**

सः श्रीकृष्णः वने गच्छन्सन् । शीतः जडिमविशिष्टः यः अतिवातः समन्तात्प्रसरणशीलो वायुः तेन परितः कम्पितं चालितं यत्कं जलं तद्धरन्तीति कन्धराणि तानि । वार्धकपक्षे शीतातिवातेन परिकम्पिता कन्धरा शिरोधिः येषां तानि । शैवालान्येव नीलदृढ-कम्बलानि तैः गुण्ठितानि निचोलितानि तानि । नितरां भङ्गैः तरङ्गैः वलिभिश्च आकुलानि व्याप्तानि हिमभाञ्जि तुहिनपूर्णानि तुहिनपीडितानि च । सरांसि वार्धकानीव वृद्धसङ्घानिव । अपश्यत् ददर्श । रूपकसङ्कीर्णेयमुपमा ।

लूतावितानगतहिमबिन्दून्वर्णयति ॥ वीरुदिति ।

**वीरुत्प्रतानकृतनिस्तलसान्द्रलूता-**
**चञ्चद्वितानहिमबिन्दुगणान्विशुद्धान् ।**
**सूर्यांशुसङ्क्रमलसत्सुरनाथचापान्**
**प्रादर्शयत्स सुहृदे नवरत्नकान्तीन् ॥ १७ ॥**

सः श्रीकृष्णः वीरुत्प्रतानेषु विततलतासन्ततिषु कृतं विरचितं निस्तलं वर्तुलं सान्द्रञ्च निबिडञ्च लूतानां ऊर्णनाभीनां यत् चञ्चद्वितानं सूक्ष्मजालरूपोल्लोचः तदुपरि निपतितान् हिमबिन्दुगणान् सुहृदे सात्यकये प्रादर्शयत् प्रदर्शयामास । कथंभूतान् विशुद्धान् अति-स्वच्छान् पुनः कीदृशान् सूर्यस्य अंशवः मयूखाः तेषां सङ्क्रमः सम्बन्धः तेन लसन्तः प्रकाशमानाः सुरनाथचापाः इन्द्रचापाः येषु ते तान् । अत एव नवरत्नानां कान्तिरिव

कान्तिः येषान्ते तान्। लूतावितानपतितेषु हिमबिन्दुषु सङ्क्रान्तरविकिरणतया वनप्रदेशः नानावर्णरञ्जितः नवरत्नालङ्कृत इव प्रतिभातीत्याशयः।

वनहरिणान्वर्णयति। घासानिति।

**घासान्विहाय रथनादविवर्तिताक्षाः**
**ग्रीवामुदस्य कृतहुंकृतयः कुरङ्गाः।**
**दृष्टिप्रभामिषविसृष्टकलिन्दपुत्री-**
**स्रोतोभिरम्बुजदृशं सिषिचुर्मुकुन्दम् ॥ १८ ॥**

कुरङ्गाः वनहरिणाः। घासान् बालतृणानि विहाय रथनादेन स्यन्दनध्वानश्रवणेनेत्यर्थः। विवर्तिताक्षास्सन्तः संवलितेक्षणास्सन्तः। ग्रीवां कन्धरां उदस्य समुद्धृत्य कृता हुंकृतिः हुंकारः यैस्ते। दृष्टीनां लोचनानां या प्रभा नीलकान्तिः तन्मिषेण तद्व्याजेन विसृष्टा प्रवर्तितेत्यर्थः। कलिन्दपुत्री यमुनानदी तस्याः स्रोतोभिः प्रवाहैः अम्बुजदृशं पुण्डरीकाक्षं मुकुन्दं श्रीकृष्णं। सिषिचुः अभ्यषिञ्चन्। कुरङ्गाः कृष्णं ददृशुरिति यावत्। अम्बुजदृशमित्यनेन कृष्णोपि तानपश्यदिति सूच्यते। स्वभावोक्तिः।

अकृत्रिमवनलतामण्डपान्वर्णयति। आवेष्टितेति।

**आवेष्टितोन्नतमहीरुहलम्बमान-**
**वीरुत्परस्परशिखाघटनाततानि।**
**आरामकल्पितलतागृहकान्तिहारी-**
**ण्यालोक्य मोदमगमत्सदनानि शौरिः ॥ १९ ॥**

शौरिः श्रीकृष्णः। आवेष्टिताः आसमन्ताद्वलयिताः अत एव उन्नतमहीरुहेषु उच्छ्रितवृक्षेषु लम्बमानाः डोलायमानाः याः वीरुधः लताः तासां परस्परशिखाघटनेन अन्योन्याग्रभागमेलनेन आसमन्तात्ततानि विस्तृतानि। आरामेषु नगरोद्यानेषु कल्पितानि जनैर्विरचितानि यानि लतागृहाणि तेषां कान्तिं सौभाग्यमित्यर्थः। हरन्तीति हारीणि सदनानि लतागृहाणि आलोक्य दृष्ट्वा मोदं आनन्दं। अगमत् प्राप। नगरोद्यानकृत्रिमलतागृहापेक्षया अकृत्रिमारण्यलतागृहाण्येव रमणीयानीति तुतोषेत्याशयः।

काननपक्षिविशेषान्वर्णयति। हारीतेति।

**हारीततित्तिरिशुकप्रमुखाः पतङ्गाः**
**स्वेच्छाविहारकलहोच्चविकूजितैश्च।**

**सन्दर्शितामितमुदो डयनाभिरामाः**
**श्रीवासुदेवहृदयञ्च समाचकर्षुः ॥ २० ॥**

हारीततित्तिरिशुकप्रमुखाः एतन्नामकपक्षिविशेषाः स्वेच्छया निर्बाधमित्यर्थः। विहारः क्रीडा कलहः परस्परतोदनपक्षताडनादिरूपः कलहः विकूजितं विशेषेण विविधध्वननं एतैः सन्दर्शिता प्रकटीकृता अमितमुत् अपरिमितसन्तोषः यैस्ते। डयनेन गगनगमनेन अभिरामाः दर्शनीया इत्यर्थः। श्रीवासुदेवहृदयञ्च श्रीकृष्णचित्तमपि। अत्र चकारेण सर्वज्ञस्य अत एव अनुभूतसर्वविषयस्यापीति सूच्यते। समाचकर्षुः आह्लादयामासुरित्यर्थः।

वनगजचेष्टामाह आस्फोटितेति।

**आस्फोटितायतकरा रथघोषरुष्टाः**
**चीत्कारिणो दलितदीर्घतरुप्रकाण्डाः।**
**दूरं प्रधाव्य गहनान्तरितात्मगात्राः**
**स्तम्बेरमा ददृशुरेनमकम्पगात्राः ॥ २१ ॥**

स्तम्बेरमाः वनगजाः। रथस्य श्रीकृष्णस्यन्दनस्य घोषेण चक्रनेमिध्वनिना रुष्टास्सन्तः कुपितास्सन्तः। अत एव चीत्कारिणस्सन्तः चीत्कारं कुर्वन्तस्सन्तः आस्फोटिताः रोषवशाद्विधुताः आयतकराः दीर्घतरशुण्डाः यैस्ते। दलिताः दन्तनिखातेन भेदिताः दीर्घाः समुच्छ्रिताः तरूणां वृक्षाणां प्रकाण्डाः स्कन्धदेशाः यैस्ते। दूरं सुदूरं प्रधाव्य प्रकर्षेण धावित्वा गहनेषु निरन्तरप्ररूढवृक्षषण्डेषु अन्तरितानि निगूहितानि आत्मगात्राणि स्थूलनिजशरीराणि यैस्ते। अकम्पकर्णास्सन्तः निश्चलश्रवणपुटास्सन्तः। एनं श्रीकृष्णं ददृशुः। अत्र गजानां भयक्रोधस्वभावो वर्णितः।

वनमहिषदशां वर्णयति स्निग्धेति।

**स्निग्धातिसान्द्रघननीलरुचो लुलायाः**
**निःश्वासनामितकठोरशिरोधिपीठाः।**
**उत्पक्ष्मशोणनयनाः खुरताडितात्म-**
**मूत्रा विलोक्य रथमारुरुवुस्सुदूरे ॥ २२ ॥**

लुलायाः वनमहिषाः रथं विलोक्य सुदूरे बहुदूरं परिधाव्य तत्र स्थिता इति यावत्। अत एव दूरवर्तित्वात् स्निग्धाः मसृणाः अतिसान्द्राश्च अत्यन्तं निबिडाश्च ये घनाः मेघाः तेषां नीलरुगिव असितकान्तिरिव रुक् येषां ते। रोषवशात् निःश्वसेन फूत्कारेण नामितं

प्रह्वीकृतं कठोरशिरोधिपीठं पीठकल्पायतकठिनतरग्रीवा यैस्ते। उत्पक्ष्माणि उन्मुखीकृतनयनलोमानि शोणनयनानि रक्तवर्णचक्षूंषि येषान्ते। खुरेण निजाग्रपादाग्रेण ताडितं ग्रह्वितं आत्मन एव मूत्रं यैस्ते सन्तः। आरुरुवुः उच्चैराक्रोशन्नित्यर्थः। स्वभावोक्तिः।

मृगेन्द्राणामवस्थामाह सुप्ता इति।

**सुप्ता गुहासु रथनेमिरवं निशम्य**
**नासातलं रसनया परिलिह्य रुष्टाः**
**सिंह्मा उरोंसकटिचंक्रमणैश्च नित्यं**
**अस्मान्विडम्बयति सोयमितीव नेदुः ॥ २३ ॥**

गुहासु पर्वतकन्दरेषु सुप्ताः निद्रालवः सिंह्माः रथस्य नेमिरवं चक्रप्रान्तपट्टिकानादं निशम्य श्रुत्वा रसनया जिह्वया नासातलं नासिकाप्रान्तमित्यर्थः। परिलिह्य परितो लीढ्वा रुष्टास्सन्तः अमर्षितास्सन्तः। उरसा वक्षस्स्थलेन अंसेन भुजशिखरेण कट्या अवलम्बेन चंक्रमणेन च गमनेन च एतैः सोयं प्रसिद्धः इदानीमस्मत्पुरोवर्तमानः श्रीकृष्णः नित्यं प्रतिदिनमपि। नित्यमित्यनेन श्रीकृष्णयौवनावस्थापरिणामस्य मान्द्यं सूचितम्। अस्मान् विडम्बयति अनुकरोति। इति एवं प्रकारेण नेदुरिव जगर्जुरिवेत्युत्प्रेक्षा। स्वभावोक्तिश्च।

ऋक्षाणामवस्थामाह। सूर्येति।

**सूर्यातपैककुतुकोपि रथाङ्गघोषात्**
**भीतस्तरक्षुनिवहः परिधाव्य गुल्मे।**
**प्रालेयभाजि विनिगूह्य चकार शश्वत्**
**अम्बूकृतानि बहिरर्पितलोलवक्त्रः ॥ २४ ॥**

सूर्यातपैककुतुकोपि दिवाकरोद्योतसेवनाकुतूहलविशिष्टोपि। रथाङ्गानां रथचक्राणां घोषात् शब्दात् भीतः भयविशिष्टः तरक्षुनिवहः ऋक्षसमूहः परिधाव्य प्रालेयभाजि हिमशीतले गुल्मे लतापटले विनिगूह्य तिरोहितो भूत्वा बहिः गुल्माद्बहिः अर्पितं प्रसारितं लोलवक्त्रं चञ्चलवदनं येन स तथोक्तस्सन्। शश्वत् असकृत् अम्बूकृतानि सनिष्ठीवशब्दविशेषान् चकार। तरक्षवः सनिष्ठीवं सशब्दं च निजाग्रपादतलं लिहन्ति। स्वभावोक्तिः।

कपीनामवस्थामाह। शाखामृगा इति।

**शाखामृगाः किचकिचेति रथं विलोक्य**
**संप्लुत्य वृक्षशिखरं परिचाल्य शाखाः।**

**नानाविधानि कुसुमानि ववर्षुरस्य**
**मूर्ध्नि प्रसक्तहिमबिन्दुकरम्बितानि ॥ २५ ॥**

शाखामृगाः कपयः। रथं विलोक्य किचकिचेति शब्दं कुर्वन्त इत्यर्थः। वृक्षशिखरं तरुशृङ्गं प्रति संप्लुत्य उल्लंघ्य आरुह्येति यावत्। शाखाः तरुविटपान् परिचाल्य वल्गनेन परितः कम्पयित्वा अस्य श्रीकृष्णस्य मूर्ध्नि मस्तके नानाविधानि समारूढविविधवृक्षतया, बहुवर्णानीत्यर्थः। यद्वा बहुप्रकाराणि प्रकर्षेण सक्तैः पतितानां हिमानां बिन्दुभिः करम्बितानि व्याप्तानि कुसुमानि पुष्पाणि ववर्षुः पातयामासुः। स्वभावोक्तिः।

गवयानां दशामाह। दूरमिति।

**दूरं प्रधाव्य समुदञ्चितवालशृङ्गाः**
**त्रासायतासितदृशः परिभुग्नकर्णाः।**
**हुंकारगर्भसमुदग्रशिरोधिभागाः**
**स्थित्वा चिरं मुररिपुं गवयास्त्वपश्यन् ॥ २६ ॥**

गवयास्तु गोसदृशाः पशुविशेषास्तु। दूरं प्रधाव्य रथावलोकनभयात्सुदूरं धावंधावं। समुदञ्चितं उन्मुखीकृतं वालशृङ्गं लाङ्गूलाग्रं यैस्ते सन्तः। त्रासेन भयेन आयते विशाले असितदृशौ नीललोचने येषान्ते सन्तः। परिभुग्नौ प्रह्वीभूतौ कर्णौ येषान्ते सन्तः। हुंकारगर्भसमुदग्रशिरोधिभागाः सहुंकारसुन्नमितकन्धराप्रदेशास्सन्तः। चिरं चिरकालं स्थित्वा रथतिरोधानपर्यन्तं स्थित्वेत्यर्थः। मुररिपुं श्रीकृष्णं अपश्यन् ददृशुः। स्वभावोक्तिः।

सर्पाणामाहारक्रममाह। शाखेति।

**शाखाप्रवेष्टिततनूंस्तरुकोटरान्तः-**
**न्यस्ताननानुदरगाण्डजिहीर्षयाऽऽशु।**
**चीत्कारिभिश्च पतगैः डयनेन शश्व-**
**त्सन्त्रासितान्विषधरान्स जहास वीक्ष्य ॥ २७ ॥**

सः श्रीकृष्णः। शाखायां विटपे प्रवेष्टिता वलयीकृता तनुः भोगः यैस्ते तान्। उदरगानां अभ्यन्तरविनिहितानां अण्डानां पेशीनां जिहीर्षया हर्तुमिच्छया आशु क्षिप्रं तरूणां वृक्षाणां कोटरान्तः निष्कुहाभ्यन्तरे न्यस्ताननान् प्रवेशितवक्त्रान्। चीत्कारिभिः सदीनरावैरित्यर्थः। पतगैः प्रसूताण्डैः पक्षिभिः डयनेन कोटरनिकटपर्यटनेन शश्वत् मुहुर्मुहुः सन्त्रासितान् भीषितान् विषधरान् सर्पान् वीक्ष्य सकुतूहलमवलोक्य जहास हासमकरोत्। सर्पाणां चातुर्यावलोकनेन हासः।

गच्छन्निति ।

गच्छन्गदी विपिनवर्त्मनि सत्वसङ्घान्
एवं समीक्ष्य विविधान्रमणीयचेष्टान् ।
लीलाविभूतिवचनातिगवैभवाय
साक्षात्स्वयं स्पृहयति स्म मुदात्मकोपि ॥ २८ ॥

गदी गदायुधः श्रीकृष्णः । विपिनवर्त्मनि कान्तारदुर्गममार्गे गच्छन्सन् विविधान् नाना-जातीयान् रमणीयचेष्टान् तत्तज्जातिस्वभावानुगुणदर्शनीयचेष्टानित्यर्थः । सत्वसङ्घान् वन्यप्राणिसमूहान् । एवं पूर्वोक्तप्रकारेण समीक्ष्य सम्यगवलोक्य साक्षात्स्वयं मुदात्मकोपि आनन्दमयोपि । एतेन आरोपितानन्दानपेक्षत्वं सूचितम् । लीलाविभूतेः आब्रह्मकीट-पर्यन्तचराचरात्मकप्रपञ्चस्य वचनातिगवैभवाय वाचामगोचरवैभवाय स्पृहयति स्म । ब्रह्माण्डान्तर्गतचेतनवर्गचेष्टावैचित्र्यं द्रष्टुमपेक्षते स्मेति यावत् ।

दूरात्तरुषण्डदर्शनमाह आश्यानेति ।

आश्यानबद्धततवल्कलनम्रशाखान्
धूमालिकल्पितविधूम्रकपोतशङ्कान् ।
आकाशमार्गपरिचालितशीर्षरुद्ध-
सूर्यातपांस्तरुवरान्स ददर्श दूरात् ॥ २९ ॥

सः श्रीकृष्णः आश्यानाय आतपे शोषणाय बद्धैः शाखाग्रसंयतैः ततवल्कलैः विस्तृतच्चीरांशुकैः नम्राः आर्द्रवल्कलभारादानताः शाखाः विटपाः येषान्ते तान् । धूमालिभिः होमार्थं सन्धुक्ष्यमाणानां जातवेदसां धूमपरम्पराभिः कल्पिता उत्पादिता विधूम्राणां कपोतानां पारावतानां शङ्का येषु ते तान् । आकाशमार्गे परिचालितं डोलायितमित्यर्थः । शीर्षं शिखरदेशः तेन रुद्धः निवारितः सूर्यातपः येषां ते तान् । तरुवरान् वृक्षश्रेष्टान् दूराद्ददर्श । एतेन तपोधनानामावासस्थानमिति सूच्यते ।

तपोधनानां दर्शनमाह । स्तोकमिति ।

स्तोकं व्रजन्पुरत एव ददर्श मार्गे
वृक्षानिव क्रमविक्लृप्त निजस्थितीन्सः ।
त्वग्वाससो जटिललम्बजटांश्च पञ्च-
शाखात्तपुष्पसुफलान्विनतान्मुनीन्द्रान् ॥ ३० ॥

सः श्रीकृष्णः स्तोकं स्वल्पदूरमेवेत्यर्थः । व्रजन्सन् गच्छन्सन् मार्गे पुरत एव अग्रभाग एव वृक्षानिव तरूनिव मुनीन्द्रान् तापसश्रेष्ठान् ददर्श । किं भूतान् क्रमविक्लृप्तनिजस्थितीन् पंक्तिशः स्थितानित्यर्थः । वृक्षपक्षेप्येवमेव । त्वग्वाससः । मुनिपक्षे संस्कारविहीनतया परस्पराश्लिष्टलम्बमानजटान् । वृक्षपक्षे । परस्पराश्लिष्टलम्बमानप्ररोहान् । मुनिपक्षे । पञ्चशाखाभ्यां पाणिभ्यां आत्तानि गृहीतानि पुष्पाणि भोग्यफलानि च येषां ते तान् । वृक्षपक्षे । पञ्चशाखासु विशालविटपेषु आत्तानि प्ररूढानीत्यर्थः । पुष्पाणि भोग्यफलानि च येषान्ते तान् । विनतान् नैच्येन नम्रान् फलभारेण नम्रांश्च । कृष्णागमनश्रवणात् तद्दिदृक्षया करगृहीतफलपुष्पसम्भाराः तापसाः तदागमनमार्गे पंक्तिशः वृक्षा इव तस्थुरित्याशयः । उपमालङ्कारः ।

मुनीन्प्रति कृष्णकुशलप्रश्नक्रममाह । मन्दमिति ।

**मन्दं समीपमुपगम्य रथावतीर्णो**
**बद्धाञ्जलिस्स्मितमनोज्ञमुखाम्बुजोऽयम् ।**
**युष्माकमप्यनुदिनं कुशलं तपश्च**
**निर्विघ्नमग्निरपि हव्यभुगित्यपृच्छत् ॥ ३१ ॥**

अयं श्रीकृष्णः । मन्दं मन्दमित्यनेन तापसदर्शनसमनन्तरमेव मन्दीकृतरथवेगो बभूवेति सूच्यते । समीपं तापसोपकण्ठं उपगम्य अनुसृत्य रथात् अवतीर्णस्सन् क्षितितले स्थितस्सन् । बद्धाञ्जलिस्सन् स्मितेन तापसदर्शनजन्यमन्दहासेन मनोज्ञं उत्फुल्लकपोलतया विकसितनयनतया च मनोहरं मुखं अम्बुजमिव कमलमिव मुखाम्बुजं यस्य स तथोक्तस्सन् । युष्माकं अपि कुशलं अनुदिनं प्रतिदिनं तपश्च निर्विघ्नं अन्तरायरहितं सत् प्रचलतीति शेषः । अग्निरपि हव्यभुक् भवद्भिः प्रदत्तं हव्यं सादरमादत्ते । अथवा अप्यादत्ते इति पूर्वोक्तप्रकारेण अपृच्छत् प्रश्नमकरोत् ।

तापसानां कृष्णकृतप्रश्नस्योत्तरक्रममाह । यज्ञ इति ।

**यज्ञोसि यज्ञभुगसि प्रथितप्रभाव**
**विप्रप्रियोसि सकलान्तरनुप्रविष्टः ।**
**सर्वेश्वरोसि निरवद्यगुणाकरोसि**
**सर्वं भवत्करुणया प्रचलत्यतो नः ॥ ३२ ॥**

हे प्रथितप्रभाव श्रुत्यादिषु विख्यातमहिमातिशय हे भगवन् । भवदाराधनसम्पद्विरहितानां तदपेक्षिणां त्वमेव यज्ञोसि । यज्ञभुगसि तान्भुङ्क्ते भोजयति वेति यज्ञभुगसि । विप्रप्रियोसि

वेदाधिकारिणो ब्राह्मणाः प्रियाः यस्य स तथोक्तस्सन्नसि । किञ्च ब्राह्मणानां प्रियोसि । सकलान्तरनुप्रविष्टोसि चिदचिदात्मकजगच्छरीरकोसीत्यर्थः । "यः पृथिव्यां तिष्ठन्नित्यारभ्य य आत्मनि तिष्ठन् आत्मान्तर्याम्यमृतः इत्यादि श्रुतेः । सर्वेश्वरोसि साकल्यार्थकसर्वशब्देन ब्रह्मरुद्रादीनामपि शेषी भवानित्यर्थः । निरवद्यगुणाकरोसि हेयगुणप्रतिभटः कल्याणगुणाकरो भवानित्यर्थः । अतः तस्मात्कारणात् नः सर्वं अस्मत्क्रियमाणं सर्वं । अत्रापि सर्वशब्द-प्रयोगेण भवदाराधनमारभ्य देहयात्रापर्यन्तं सकलमपीत्यर्थो वक्तव्यः । भवत्करुणया भवन्निर्हेतुककृपामात्रेणेत्यर्थः । प्रचलति निर्विघ्नं प्रकर्षेण चलति । कुशलप्रश्नपूर्वकमविघ्न-यज्ञादिकार्यानुयोगस्य कृष्णकृतत्वात् सर्वमित्युक्तम् ।

अस्मिन्पद्ये कृष्णस्य भक्तपराधीनत्वमाह । इत्थमिति ।

**इत्थं मुकुन्दमभिवन्द्य सुमस्रजस्ते**
**कण्ठे समर्प्य मधुराणि फलानि कन्दान् ।**
**भक्त्या ददुः तदखिलं सुहृदा स भुक्त्वा**
**रामत्वमस्मरदरण्यनिवाससक्तम् ॥ ३३ ॥**

इत्थं पूर्वोक्तप्रकारेण स्तुत्वेति शेषः । मुकुन्दं भुक्तिमुक्तिप्रदं श्रीकृष्णं अभिवन्द्य प्रणम्य ते तपोधनाः सुमस्रजः आगमिष्यते कृष्णायेतानीति निजारामापचितानां पुष्पाणां मालाः कण्ठे कृष्णकन्धरायां समर्प्य भक्त्या मधुराणि कृष्णार्थमन्विष्यान्विष्य सङ्गृहीतानि अत एव स्वादूनि फलानि कन्दांश्च ददुः कृष्णाय समर्पयामासुः । सः श्रीकृष्णः तदखिलं तपोधनसमर्पितं तत्सर्वमपि सुहृदा सात्यकिना समं भुक्त्वा अरण्यनिवाससक्तं दण्डकारण्य-प्रान्तवासैकरतमित्यर्थः । एतेन शबर्या भक्तिसमर्पितफलमूलभोक्तृत्वं सूचितम् । रामत्वं दशरथतनूजत्वं अस्मरत् सस्मार । रामत्वे शबर्याप्येवमेव दत्तं फलमूलादिकं सलक्ष्मणेन मया भुक्तमित्यस्मरदित्याशयः । एतेन पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति इत्यादि गीतार्थः प्रकाशितः । स्मृतिमदलङ्कारः ।

तपोधनसमर्पितफलाद्यङ्गीकरणानन्तरं पुनः कृष्णस्य प्रस्थानमाह । आरुह्येति ।

**आरुह्य पीतवसनो रथमादरेण**
**बद्धाञ्जलीन्मुनिवरान्विनिवर्त्य भक्तान् ।**
**प्रस्पन्दमानकुटिलालककान्तवक्त्रः**
**मन्दं जगाम विपिनान्तरदत्तदृष्टिः ॥ ३४ ॥**

पीतवसनः पीताम्बरधारी श्रीकृष्णः । रथं आरुह्य आदरेण प्रीत्यतिशयेन बद्धाञ्जलीन् भक्तान् सर्वदा तद्गतमानसान् मुनिवरान् तापसान् विनिवर्त्य गच्छन्तु भवन्तः प्रीतोस्मीति

स्वस्थानं प्रति परावर्त्य प्रस्पन्दमानैः मन्दमारुतकम्प्यमानैरित्यर्थः । कुटिलालकैः भङ्गुरचूर्णकुन्तलैः कान्तं स्पृहणीयं वक्त्रं यस्य स तथोक्तस्सन् । अन्यद्विपिनं विपिनान्तरं तस्मिन् दत्ता प्रेरितेत्यर्थः । दृष्टिः लोचनं येन स तथोक्तस्सन् मन्दं जगाम ।

गोपदर्शनमाह । उष्णीषेति ।

**उष्णीषकच्चरपटच्चरशोणचेलान्**
**कक्षावसक्तलगुडान्पृथुकम्बलांसान् ।**
**पर्यन्तभूमितलचारितगोव्रजांस्तान्**
**गोपान्ददर्श निजबाल्यमनुस्मरन्सः ॥ ३५ ॥**

सः श्रीकृष्णः । उष्णीषं शिरस्त्राणमिति यावत् । कच्चरं मलाविलं पटच्चरं जीर्णं च शोणं रक्तवर्णविशिष्टं च चेलं येषान्ते । तान् । कक्षे अवसक्तः लग्नः लगुडः दण्डः येषान्ते तान् । पृथुकम्बलं स्थूलकम्बलं अंसे भुजशिखरे येषान्ते तान् । पर्यन्तभूमितले निज-घोषोपकण्ठभूसमस्थले चारितः गोव्रजः गोसमूहः यैस्ते तान् । चारितेत्यत्र चरगतिभक्षण-योरित्यनेन भक्षणार्थकत्वं गत्यर्थकत्वं च । तान् स्वेच्छाचारिणः गोपान् निजबाल्यं आत्मनः शैशवं अनुस्मरन्सन् ददर्श । गोकुले व्रजवासिभिः क्रीडासक्तं गोप्रचारासक्तं च यशोदातनयत्वं सस्मारेत्याशयः । स्मृतिमत्स्वभावोक्त्योस्सङ्करः ।

व्रजवासिनीनां वृषलीनां दशामाह । केदारेति ।

**केदारशालिलवनैकरता वृषल्यः**
**तारुण्यपीनकुचकुम्भभरावनम्राः ।**
**कृच्छ्रानुधावनसमुच्छ्वसितातिखिन्नाः**
**तस्थू रथस्थमधुसूदनदत्तनेत्राः ॥ ३६ ॥**

केदारे निजक्षेत्रे शालीनां कलमानां लवनैकरताः छेदनैकतत्पराः वृषल्यः शूद्रस्त्रियः तारुण्येन यौवनेन पीनौ स्फीतौ यौ कुचकुम्भौ कलशाकारस्तनौ तयोः भारेण नम्राः नतपूर्वकाया इत्यर्थः । अत एव कृच्छ्रानुधावनेन क्लेशेनानुसृत्य धावनेन समुच्छ्वसितं उच्छ्वासः तेन अतिखिन्नास्सत्यः अत्यधिकखेदविशिष्टास्सत्यः । रथस्थः रथोपविष्टः यः मधुसूदनः श्रीकृष्णः तस्मिन् दत्तनेत्रास्सत्यः विनिहितनयनास्सत्यः । तस्थुः तिष्ठन्ति स्म । शालिलवनमप्युत्सृज्य पीनस्तनभारनम्रा अपि कृष्णदिदृक्षया बलादनुधाव्य वृषल्यः तमेव निर्निमेषं सकुतूहलं पश्यन्त्यः लिखिता इव तस्थुरित्याशयः ।

तासां प्रेमातिशयमाह । ग्राम्येति ।

**ग्राम्योचितप्रणतयः प्रचुरत्रपास्ताः**
**तस्मै ददुः कलममञ्जरिकाः कराभ्याम् ।**
**आदाय ताः करपुटेन समन्दहासं**
**आपृच्छ्य सर्वकुशलं स ययौ रथेन　　॥ ३७ ॥**

ताः वृषल्यः ग्राम्याणां ग्रामवासिनां उचिता योग्या प्रणतिः प्रणामः यासां ताः । क्षितितलं हस्ताग्राभ्यां स्पृष्ट्वा प्रणामकरणं ग्राम्योचितम् । प्रचुरा अत्यधिका त्रपा लज्जा यासां ताः । एतेन तत्सौन्दर्यदर्शनजन्यकामविकारस्सूचितः । कराभ्यां कलममञ्जरिकाः शालिगुच्छान् । तस्मै श्रीकृष्णाय ददुः । अर्पयामासुः । सः श्रीकृष्णः ताः कलममञ्जरिकाः करपुटेन हस्तद्वयं प्रसार्येत्यर्थः । आदाय समन्दहासं यथा तथा तासां स्थित्यवलोकनेन मन्दहास उक्तः । यद्वा निजबाल्यानुभूतगोपस्त्रीजनस्मरणेन मन्दहासः । सर्वकुशलं सर्वासां कुशलं यद्वा ग्रामस्थपतिपश्वादीनां कुशलं आपृच्छ्य आदरातिशयेन पृष्ट्वा रथेन ययौ प्रतस्थे ।

हय्यङ्गवीनेति ।

**हय्यङ्गवीननवनीतपयोमधूनि**
**प्रीत्यार्पितानि परिभुज्य स गोपवृद्धैः ।**
**बाल्ये व्रजे विरचितं निजचौर्यमुक्त्वा**
**तेभ्यो जगाद सुलभान्यधुनेति कृष्णः　　॥ ३८ ॥**

सः श्रीकृष्णः गोपवृद्धैः प्रीत्या अर्पितानि हय्यङ्गवीनं सद्योघृतं नवनीतं नवोद्धृतं पयः क्षीरं मधु माक्षिकं एतानि परिभुज्य बाल्ये शैशवे व्रजे गोकुले विरचितं निजचौर्यं । एतदर्थं मया चोरकृत्यमाश्रितमिति तेभ्यः गोपवृद्धेभ्यः उक्त्वा निवेद्य अधुना प्रीत्या भवद्भिरर्पिततया सुलभानीति जगाद । इष्टतया क्लेशलभ्यतया च मया बाल्ये यान्यपहृतानि तानीदानीं सुलभतया समुपनतानीत्याशयः । मदिष्टं भवद्भिर्दत्तमिति यावत् ।

सायंसन्ध्या समुपनतेत्याह । सप्तेति ।

**सप्तातिवेगतुरगैकरथाधिरूढः**
**कृष्णावलोकनधियेव गभस्तिमाली ।**
**आरुह्य सत्पथमतीतविशालमार्गः**
**संहृत्य रश्मिगणमाप दिशं प्रतीचीम्　　॥ ३९ ॥**

गभस्तिमाली सूर्यः । सप्त सप्ताख्यः अत्यन्तवेगविशिष्टः तुरगैकः यस्य सः स चासौ रथश्च तमधिरूढस्सन् । एकोऽश्वो वहति सप्तनामा इति श्रुतेः । कृष्णावलोकनधियेव श्रीकृष्ण-दर्शनकुतूहलेनेवेत्युत्प्रेक्षा । सत्पथं आकाशं सन्मार्गं च । आरुह्य अतीतः अतिक्रान्तः विशालमार्गः आयतमार्गः येन सः । विशालमार्ग इत्यनेन भवमार्ग इत्यपि सूच्यते । रश्मिगणं किरणसमूहं प्रग्रहगणं च । रश्मिगणमित्यनेन इन्द्रियग्राममपीति सूच्यते । संहृत्य उपसंहृत्य सङ्कोच्य आकृष्य च प्रतीचीं दिशं पश्चिमदिग्भागं आप । हेतूत्प्रेक्षा । भगवद्दिदृक्षोः नियमवतः सत्पुरुषस्य वृत्तान्तपरिस्फूर्त्या समासोक्तिश्च ।

वृकप्रस्थप्राप्तिमाह कृष्ण इति ।

**कृष्णोप्युपस्थितमवेक्ष्य वृकाभिधानं**
**प्रस्थं रविश्च चरमाचलशृङ्गभाजम् ।**
**संस्थाप्य तत्र रथमभ्युपयातविप्र-**
**नन्द्योऽथ सस्मितमवातरदम्बुजाक्षः ॥ ४० ॥**

अम्बुजाक्षः पुण्डरीकायताक्षः कृष्णोपि । अत्रापिना सूर्यस्य चरमाचलप्राप्तिस्समुच्चीयते । उपस्थितं सन्निहितं वृकाभिधानं प्रस्थं वृकप्रस्थमित्यर्थः । चरमाचलशृङ्गभाजं पश्चिमपर्वत-शिखरगतं रविश्च । अवेक्ष्य दृष्ट्वा तत्र वृकस्थले रथं संस्थाप्य अभ्युपयातैः प्रत्युद्गतैः विप्रैः ब्राह्मणोत्तमैः नन्द्यस्सन् अभिनन्दनीयस्सन् । अथ अनन्तरं सस्मितं यथा तथा अभ्युपगत-ब्राह्मणदर्शनजन्यानन्दातिशयात्सस्मितमित्युक्तम् । अवातरत् रथादवततार ।

वृकप्रस्थप्रवेशमाह । सात्यकीति ।

**सात्यकिप्रदर्श्यमानमार्ग एष माधवो**
**भूसुराभिनन्द्यमानमानसोऽथ मन्थरः ।**
**प्राविशत्पुरं प्रजाभिरादरेण सत्कृतः**
**कौतुकेन सुन्दरीभिरीक्ष्यमाणविग्रहः ॥ ४१ ॥**

अथ अवतरणानन्तरं । प्रजाभिः पौरैः आदरेण प्रीत्यतिशयेन सत्कृतस्सन् पूजितस्सन् । एष माधवः श्रीकृष्णः सात्यकिना प्रदर्श्यमानः पुरःप्रसारितेन बाहुयुगलेन इत इत इति प्रदर्श्यमानः मार्गः यस्य स तथोक्तस्सन् । भूसुरैः ब्राह्मणैः अभिनन्द्यमानं स्तोत्रादिभि-स्सन्तोष्यमाणं मानसं यस्य स तथोक्तस्सन् । मन्थरः मन्दगामी गजगमन इति यावत् । कौतुकेन कुतूहलेन सुन्दरीभिः ईक्ष्यमाणविग्रहस्सन् पुरं वृकप्रस्थं । प्राविशत् प्रविवेश ।

तत्र स्थितिमाह । कुरुवरेति ।

कुरुवरमणिनिर्मितन्तु सौधं
हरिरयमपहाय विप्रवर्यैः ।
निवसनमुपदर्शितं प्रविश्य
न्यवसदपास्तपरिश्रमस्त्रियामाम् ॥ ४२ ॥

**इति श्रीयदुशैलवासि वालधन्वि जग्गूवकुलभूषणमहाकविविरचिते
अद्भुतदूताख्यकाव्यरत्ने
चतुर्थस्सर्गः ।**

अयं कृतपुरप्रवेशः हरिः श्रीकृष्णः । कुरुवरेण दुर्योधनेन मणिभिः रत्नैः निर्मितं निर्मापितमित्यर्थः । सौधं तु प्रासादं तु अपहाय त्यक्त्वा । विप्रवर्यैः ब्राह्मणोत्तमैः उपदर्शितं तत्समीप एव प्रदर्शितं निवसनं गृहं प्रविश्य अपास्तपरिश्रमस्सन् विश्रान्तस्सन् त्रियामां रात्रिं । न्यवसत् उवास । कालात्यन्तसंयोगात्त्रियामामित्युक्तम् ।

भगवता लक्ष्मीदासेन अनुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
चतुर्थस्सर्गः ।

॥ श्रीः ॥

# पञ्चमस्सर्गः ।

कविरिदानीं वृकप्रस्थवासिनां ब्राह्मणानां आराधनक्रमं पञ्चमसर्गे वर्णयति । अस्मिन्पद्ये सूर्यास्तं वर्णयति । हरीति ।

**हरितिरोधिमवेक्ष्य हरिस्स्वयं**
**चरमशैलतटान्तरितोऽभवत् ।**
**प्रियजनानवलोकनविक्लबः**
**चरति गूढतनुर्ननु मानवः ॥ १ ॥**

हरिः सूर्यः हरितिरोधिं श्रीकृष्णस्य तिरोधानं गृहान्तरप्रविष्टत्वात्तिरोधिमित्युक्तम् । अवेक्ष्य स्वयं चरमशैलस्य अस्तगिरेः तटेन सानुप्रदेशेन अन्तरितस्सन् निगूहितस्सन् अभवत् । विशेषं सामान्येन समर्थयति । प्रियेति । प्रियजनस्य इष्टजनस्य अनवलोकनेन अदर्शनेन विक्लबः खिन्नमानसः मानवः गूढतनुस्सन् विरहदुःखेन गुप्तशरीरस्सन् चरति ननु । नामैक्यात् तदनवलोकनदुःखादिव तिरोबभूवेत्युत्प्रेक्षा व्यज्यते । अर्थान्तरन्यासालङ्कारः ।

विगलितेति ।

**विगलितारुणकान्तितयोद्भव-**
**त्तिमिरपंक्तिरुदञ्चिततारका ।**
**दिगपरा धृतनीलतरांशुका**
**विलसति स्म वधूरिव लोलदृक् ॥ २ ॥**

अपरा दिक् पश्चिमदिक् विगलिता स्रस्ता नष्टेति यावत् । अरुणस्य अनूरोः यद्वा सूर्यस्य अथवा सान्ध्यरक्तवर्णस्य कान्तिः रुचिः यस्यास्सा । तस्याः भावः कान्तिता तया हेतोः । तिमिराणां तमसां पंक्तिः परम्परा उद्भवन्ती तिमिरपंक्तिः यस्यास्सा सती । उदञ्चिताः समुद्भूताः तारकाः नक्षत्राणि यस्यास्सा सती । धृतं नीलतरांशुकं अत्यन्तनीलवस्त्रं यया सा लोलदृक् चञ्चलाक्षी वधूरिव कामिनीव विलसति स्म रराज । उपमालङ्कारः ।

मुररिपुरिति ।

**मुररिपुः कृतसान्ध्यविधिस्तदा**
**द्विजसभाजनमात्मनि चिन्तयन् ।**

**मधुरसूपरसोदनभक्ष्यका-**
**द्यखिलपाककृते युयुजे गुणान्** ॥ ३ ॥

मुररिपुः श्रीकृष्णः। तदा तस्मिन्समये कृतसान्ध्यविधिस्सन् निर्वर्तितसन्ध्यावन्दनादि-विधिस्सन्। आत्मनि मनसि द्विजानां श्रोत्रियाणां सभाजनं सन्तर्पणं चिन्तयन्सन्। मधुर-सूपरसोदनभक्ष्यकाद्यखिलपाककृते एतेषां पाककरणाय गुणान् सूदान्। युयुजे योजयामास।

सूदानां कार्यमाह। कतिचनेति।

**कतिचनेन्धनबन्धुरकन्धराः**
**कतिपये जलकुम्भभरानताः।**
**कतिच भाजनदन्तुरितान्तिका-**
**ज्वलनफूत्कृतिसङ्कुचिताधराः** ॥ ४ ॥

कतिचन केचित्कर्मरताः इन्धनैः काष्ठैः बन्धुरा भारोद्वहनेन स्थूलेत्यर्थः। कन्धरा शिरोधिः येषां ते। यथा कन्धरा कुब्जा भवेत् तथेन्धनभारमुदवहन्निति यावत्। कतिपये अन्ये केचित्कर्मरताः जलकुम्भस्य सलिलपूर्णस्थूलकलशस्य भारेण आनताः स्कन्धारोपित-बृहज्जलकुम्भतया सम्यङ्नतपूर्वकाया इत्यर्थः। कतिच अपरे केचित्कर्मरताः भाजनैः पाकानुकूलपृथुलपात्रैः दन्तुरिता व्याप्ता या अन्तिका चुल्लिः तस्याः ज्वलनः अग्निः तस्य फूत्कृतिः सन्धुक्षणार्थं वदनफूत्कारः तेन सङ्कुचितः अधरः दशनवासः येषान्ते। बभूवुरिति शेषः। स्वभावोक्तिः।

महानसीयशब्दविशेषानाह। त्वरितेति।

**त्वरितकूपजलोद्धृतियन्त्रजैः**
**पृथुलभाजनपूरणनीरजैः।**
**अचिरपेषणकुट्टनसम्भवैः**
**मुखरितं ध्वनिभिश्च महानसम्** ॥ ५ ॥

त्वरितेन अतिवेगेन कूपात् प्रहेः जलोद्धृतिः सलिलसमुद्धरणं तदर्थं यन्त्रविशेषः तस्माज्जैः समुत्पन्नैः कैङ्कारैरित्यर्थः। पृथुलानि बृहन्ति यानि भाजनानि तेषां पूरणं तत्समये पात्यमानान्नीरात् सलिलात् जैः समुत्पन्नैः कलशावर्जितसलिलपातसमुत्पन्नैः इत्यर्थः। अचिरं अतित्वरितं पेषणं शिलोलूखलादिषु पदार्थसम्मर्दनं तथा कुट्टनं मुसलादिना अवघातादिकं एताभ्यां सम्भवैः समुत्पन्नैः ध्वनिभिः विविधशब्दैः महानसं च पाकशालापि मुखरितं शब्दायमानमभूत्। स्वभावोक्तिः।

महानसीयसौरभविशेषानाह । मरिचेति ।

**मरिचसर्षपहिङ्गुविलोडन-**
**प्रसृतसौरभकृष्टनृनासिकम् ।**
**ततमृजीषघृतोद्गतसौरभै-**
**रभवदङ्कणमावसथस्य च ॥ ६ ॥**

मरिचस्य ऊषणस्य सर्षपस्य तन्तुभस्य हिङ्गुनः रामठस्य च विलोडनं तैलभाजने अवलोडनं तेन प्रसृतैः समन्ताद्व्याप्तैः सौरभैः गन्धविशेषैः कृष्टा परवशीकृता नृनासिका मनुष्यघोणा यस्य तत्तथोक्तम् । ऋजीषस्य पिष्टपचनभाजनस्य घृतात् उद्गतसौरभैः प्रसृमरगन्धविशेषैः आवथस्य गृहस्य अङ्कणं अजिरं ततं व्याप्तं सत् । अभवत् ।

अथ ब्राह्मणानयनमाह । तदन्विति ।

**तदनु चक्रधरो रचिताञ्जलिः**
**विनयनम्रतनुर्द्विजपुङ्गवान् ।**
**अनयदात्मनिकेतनमादरा-**
**त्तनयदारमुखैस्सह बन्धुभिः ॥ ७ ॥**

तदनु पाकानन्तरं चक्रधरः श्रीकृष्णः रचिताञ्जलिस्सन् विनयेन नम्रतनुस्सन् नतपूर्वकायस्सन् । द्विजपुङ्गवान् ब्राह्मणोत्तमान् तनयदारमुखैः पुत्रकलत्रप्रमुखैः बन्धुभिस्सह । आदरात् प्रीत्यतिशयात् आत्मनिकेतनं निजावासगृहं । अनयत् आमन्त्रणेन प्रापयामास ।

ब्राह्मणानां स्वभावमाह । अथेति ।

**अथ वयःक्रमपंक्तिजुषो द्विजाः**
**कतिपये बुधमध्यपरीप्सवः ।**
**अनुपलब्धतदन्तरखेदिताः**
**स्वपद एव निषेदुरनिच्छया ॥ ८ ॥**

अथ ब्राह्मणागमनानन्तरं । द्विजाः ब्राह्मणाः वयःक्रमेण स्वस्ववयसामानुगुण्येन पंक्तिं जुषन्तीति पंक्तिजुषस्सन्तः पंक्तावुपविष्टा इति यावत् । बभूवुरिति शेषः । कतिपये अलब्धपण्डितपंक्तिमध्याः केचन पण्डिता ब्राह्मणाः बुधानां पण्डितानां मध्यपरीप्सवस्सन्तः पंक्तिमध्यापेक्षिणस्सन्तः अनुपलब्धं अप्राप्तं यत्तदन्तरं पण्डितपंक्त्यवकाशः तस्मात्खेदिताः क्लेशितास्सन्तः । अनिच्छया अनभिमत्या । स्वपद एव स्वनियमितस्थान एव निषेदुः उपविष्टा बभूवुः ।

क्रमेति ।

**क्रमवितीर्णहरित्कदलीदल-**
**प्रविलसत्स्वपुरस्थलिका द्विजाः ।**
**विततपङ्कजपत्रतटस्थिताः**
**सितगरुद्विहगा इव रेजिरे** ॥ ९ ॥

क्रमेण पंक्तिक्रमेण वितीर्णानि आस्तीर्णानि यानि हरित्कदलीदलानि हरिद्वर्णकदलीपत्राणि । हरिदित्यनेन नूतनत्वं द्योत्यते । तैः प्रकर्षेण विलसन्ती स्वेषां पुरस्थलिका पुरोभागक्षितितलं येषान्ते । अल्पार्थे कन्प्रत्ययः । एतेन पुरोभागस्थलमात्रं गृह्यते । द्विजाः ब्राह्मणाः विततानि आयतानि च तानि पङ्कजपत्राणि च कमलदलानि च तेषां तटे स्थिताः सितगरुद्विहगा इव हंसा इव । रेजिरे व्यलसन् । अनेनोपमानेन ब्राह्मणानामन्तर्बहिश्च परिशुद्धत्वं सूचितम् । उपमालङ्कारः ।

परिवेषणशैघ्र्यमाह । सुपरिवेषणेति ।

**सुपरिवेषणपाणिचमत्कृति-**
**प्रभवशीघ्रगतागतिभिर्गुणैः ।**
**प्रकटिता इव माधवमायया**
**दलतलेऽभ्यवहार्यगणाः कृताः** ॥ १० ॥

सुष्ठु परिवेषणं कदलीदलतले पदार्थविन्यासः तस्मिन् पाणिचमत्कृतिः हस्तलाघवं तया प्रभवा समुत्पन्ना शीघ्रगतागतिः त्वरितगतागतं येषान्ते तैः । गुणैः सूदैः माधवस्य श्रीकृष्णस्य मायया प्रकटिता इव समुद्भाविता इवेत्युत्प्रेक्षा । दलतले कदलीपत्रतले अभ्यवहार्याणां भक्ष्यभोज्यान्नादीनां गणाः परम्पराः कृताः अर्पिता इत्यर्थः ।

विविधेति ।

**विविधशाकसुसंस्कृतभक्ष्यकं**
**ततदलास्तरणं विततं तलम् ।**
**उपवनाद्भुतवर्णसुमावलि-**
**प्रचुरशाद्वलकल्पमभूत्तदा** ॥ ११ ॥

विविधानि नानावर्णानि बहुप्रकाराणि शाकसुसंस्कृतभक्ष्यकानि शाकः फलपत्रपुष्पकाण्डादिकं सुसंस्कृतं कृतसर्षपादिसंस्कारविशिष्टमन्नं भक्ष्यकं अपूपादिकं एतानि यस्मिंस्तत्तथोक्तम् ।

ततदलास्तरणं आस्तृतायतकदलीदलमित्यर्थः । तलं भोजनभूभागः । उपवनस्य आरामस्य अद्भुतवर्णानां विचित्रवर्णानां सुमानां पुष्पाणां आवलिभिः पंक्तिभिः प्रचुरः यः शाद्वलः शादहरितप्रदेशः तत्कल्पं तत्सदृशं । तदा तस्मिन्समये अभूत् । उपमालङ्कारः । नानाविध-पदार्थपरिवेषणसमलङ्कृता सा भूमिः विविधकुसुमसमलङ्कृतारामशाद्वलभूमिसमाना चकाशे इत्याशयः ।

अथापोचनतीर्थग्रहणमाह । अथेति ।

**अथ पुरः प्रविसारितदक्षिणो-**
**च्चुलुकपंक्तिरनल्पपरम्परा ।**
**उदकसङ्ग्रहणाय तदा बभौ**
**कमलकोरकतोरणपंक्तिवत् ॥ १२ ॥**

अथ परिवेषणानन्तरं । उदकसङ्ग्रहणाय आपोचनतीर्थग्रहणाय । अनल्पपरम्परा क्रमोपविष्टा-नेकब्राह्मणपंक्तित्वात् अनल्पा अत्यधिका परम्परा यस्यास्सा । पुरः अग्रभागे प्रकर्षेण विशेषेण च सारिताः ये दक्षिणोच्चलुकाः दक्षिणपाण्युन्मुखचुलुकाः तेषां पंक्तिः राजिः । तदा तस्मिन्काले कमलानां ये कोरकाः कलिकाः तेषां तोरणपंक्तिवत् वन्दनमालाराजिरिव आबभौ आसमन्ताद्रराज । उपमालङ्कारः ।

अथ भोजनसम्भ्रममाह । अथेति ।

**अथ नतोन्नतमस्तकपङ्कज-**
**च्छदगणं प्रचलत्करवीचिकम् ।**
**अदनजातकलस्वनमाबभौ**
**सर इवायतमावसथं हरेः ॥ १३ ॥**

अथ तीर्थग्रहणानन्तरं हरेः । श्रीकृष्णस्य आयतं विशालं आवसथं गृहं नतोन्नताः नमनो-न्नमनशीलाः कबलग्रहणावसरे नताः चर्वणावसरे उन्नताश्च मस्तकाः शिरांसि त एव पङ्कजच्छदाः कमलपलाशानि । शिरसामसितत्वात् कमलपलाशत्वेन निरूपणं कृतम् । छदानां गणः समूहः यस्मिंस्तत् । करा एव वीचयः प्रचलन्त्यः चलाचलाः करवीचयः यस्मिं-स्तत् । अदनावसरे जातः कलस्वनः कलकलनादः यस्मिंस्तत् । आयतं सर इवाबभौ विललास । उपमालङ्कारः ।

ब्राह्मणसन्तर्पणाद्भगवतस्सौहित्यमाह । वितरेति ।

**वितर साधु यथेप्सितमित्यसौ**
**विविधभक्ष्यगणान्परिदापयन् ।**

**सुहितभूसुरपंक्तिविलोकना-**
**त्स्वयमभूत्सुहितो यदुनायकः ॥ १४ ॥**

असौ यदुनायकः एवं ब्राह्मणसमाराधनतत्परः श्रीकृष्णः। यथेप्सितं यथाभिलषितं तत्तदाशयानुगुणमिति यावत्। साधु सम्यक् वितर समर्पय। इति एवं रीत्या विविधभक्ष्यगणान् लड्डुकपूर्यादिभक्ष्यसमूहान् परिदापयन्सन् सूदानां हस्तैः परितः दापयन्सन्। सुहिताः सम्यग्भोजनेन तृप्ताः ये भूसुराः ब्राह्मणाः तेषां पंक्तिविलोकनात् आवलिदर्शनात् स्वयं सुहितस्सन् तृप्तस्सन् अभूत्। दृष्ट्वा तृप्यति खलु भगवान्। किञ्च भक्तानां जिह्वाद्वारा खल्वत्ति सर्वमपि भगवान्। तस्मादेव एवमुक्तं।

ब्राह्मणभोजनदर्शनादेव सुहितोऽभूद्भगवानित्युक्तम्। तदेव साधयति। यदिति।

**यदयमात्मनिरन्तरभक्तिभा-**
**ग्जनहृदम्बुजवासमुपेयिवान्।**
**तदुचितं परभोजनतोऽपि य-**
**त्सुहिततेति न चैतदिहाद्भुतम् ॥ १५ ॥**

यत् यस्मात्कारणात्। अयं श्रीकृष्णः आत्मनि स्वस्मिन् निरन्तरा अविच्छिन्ना या भक्तिः प्रीतिविशेषः तां भजन्तीति भक्तिभाजः भाजश्च ते जनाश्च भक्ता इत्यर्थः। तेषां हृदम्बुजेषु हृत्पुण्डरीकेषु वासं स्थितिं उपेयिवान् अधिगतवान्। तत् तस्मात्कारणात् परेषां भक्तानां भोजनतः भोजनात् अस्य श्रीकृष्णस्य सुहिततेति यत् तृप्तिरिति यत्। तदुचितं न्याय्यं। इह अस्मिन् श्रीकृष्णविषये एतत् सुहितत्वं न चाद्भुतं नैवाश्चर्यं। सर्वान्तर्यामित्वात् तत्रापि भक्तहृदयेषु सान्निध्यबाहुल्याच्च परभोजतोऽस्य तृप्तिरुचितेत्याशयः।

सम्प्रति भोजनावसरे ललनानां चित्तवैकल्यमाह। गरुडेति।

**गरुडकेतनरूपविलोकन-**
**प्रहितनीलसरोजदृशोऽङ्गनाः।**
**प्रकृतभोजनजातकुतूहला**
**अपि समीहितमेव विसस्मरुः ॥ १६ ॥**

अङ्गनाः अनङ्गपरवशास्तरुण्यः। गरुडः केतने ध्वजे यस्य तस्य श्रीकृष्णस्य यद्रूपं स्पृहणीयसौन्दर्यं तस्य विलोकनार्थं प्रहिताः प्रेरिताः नीलसरोजवत् नीलोत्पलवत् दृशः लोचनानि याभिस्तास्तत्यः। प्रकृते यद्भोजनं तस्मिन् जातं समुत्पन्नं कुतूहलं इच्छाविशेषः यासां ता

पि । अपिर्विरोधे । समीहितमेव अपेक्षितं भोजनमेव विसस्मरुः विस्मृतवत्यः बभूवुः। कृष्णसौन्दर्यपरवशचित्ततया प्रकृतकर्तव्यकर्मपराङ्मुख्यो बभूवुरित्याशयः । एतेन ग्यतमान्नपानादिकं सर्वमपि श्रीकृष्ण एवेति व्यज्यते ।

रुचिरेति ।

**रुचिरदीपरुचिप्रकटीकृत-**
**प्रचुरभूषणतारमरीचिभिः ।**
**युवतयः परिवेषणतत्परां-**
**श्चलदृशो विमुखान्समरीरचन् ॥ १७ ॥**

ातयः तरुण्यः । रुचिरा प्रकाशमाना या दीपानां रुचिः कान्तिः तया प्रकटीकृताश्च ताः ुरभूषणानां सर्वावयवाभरणानां मरीचयश्च मयूखाश्च ताभिः करणैः परिवेषणे जनपदार्थविनियोगे तत्परान् आसक्तान् सूदान् औदनिकान् चलदृशस्सतः मरीचि- ेहततया तरललोचनान्सतः । अत एव विमुखांश्च सतः पराङ्मुखांश्च सतः । समरीरचन् कुर्वन् । आभरणकिरणप्रतिहतनयनास्सूदाः परिवेषणकार्यं कर्तुमपि नाशक्नुवन् ाशयः । उदात्तालङ्कारः ।

कबलेति ।

**कबलपाणिरचञ्चललोचना**
**मुखमुदस्य च कापि नितम्बिनी ।**
**विलिखितेव ददर्श गतत्रपा**
**मसृणनीलघनद्युतिमच्युतम् ॥ १८ ॥**

पि नितम्बिनी पृथुलनितम्बस्पृहणीया तरुणी कबलपाणिस्सती करनिहितान्नकबला ोत्यर्थः । मुखं आत्मवदनं उदस्य उद्यम्य उन्मुखीभूत्वेति यावत् । अचञ्चललोचना ो परित्यक्तनैसर्गिकचाञ्चल्यनयना सती । गतत्रपा सती स्वयमेव गलितस्वाभाविकलज्जा ोत्यर्थः । मसृणः स्निग्धः यः नीलघनः जलभरितमेघः तस्य द्युतिरिव द्युतिः कान्तिः य स तथोक्तः तम् । अच्युतं आश्रितरक्षकं श्रीकृष्णं विलिखितेव चित्रार्पितेवेत्युत्प्रेक्षा । र्श । भोजनार्थं गृहीतं कबलमपि विस्मृत्य श्रीकृष्णसौन्दर्यदत्तदृष्टिरभूदित्याशयः । ेन भगवति सौन्दर्यातिशयेन चेतनविषयपराङ्मुखीकरणसामर्थ्यं सूचितम् । प्रलयाख्यो वश्च प्रदर्शितः ।

कस्याश्चित्तद्दर्शनानन्दितहृदयाया उक्तिमाह । नन्विति ।

**ननु विलोकय सिंहगतिं गल-**
**त्कनकचेलममुं कमलेक्षणम् ।**
**कृतवती सुकृतं खलु रुक्मिणी-**
**त्यवददिन्दुमुखी स्वसखीं शनैः　　॥ १९ ॥**

नन्विति सम्बोधनम् । ननु हे सखि सिंहस्य गतिरिव गतिः गमनं यस्य स तथोक्तः तम् । गम्भीरपदक्रममिति यावत् । गलत् ब्राह्मणभोजनव्यग्रचित्ततया अकृतोद्धरणं अत एव स्रंसनशीलं कनकचेलं पीताम्बरं यस्य स तथोक्तः तम् । एतेन पीताम्बरस्य मसृणत्वं सूचितम् । कमलेक्षणं परितो दत्तदृष्टितया सद्योविकसितपुण्डरीकस्पृहणीयनयनमित्यर्थः । अमुं अग्रतः पर्यटन्तं श्रीकृष्णं विलोकय सम्यक्पश्य । रुक्मिणी सुकृतं पुण्यं कृतवती खलु । खल्विति प्रसिद्धौ । पुण्यशालिन्येवेत्यर्थः । एतादृशपतिलाभात् इति एवं रीत्या इन्दुमुखी चन्द्रवन्मनोहरवदना । एतेन तदवलोकनाय उत्तानितमुखत्वं सूचितम् । स्वसखीं निजपार्श्वनिषण्णां सखीं प्रति शनैः मन्दं अन्यश्रवणानिष्पतनाय शनैरित्युक्तम् । अवदत् ।

अन्यस्या अवस्थामाह । यदुकुलेति ।

**यदुकुलाम्बुधिकौस्तुभ जीवनं**
**वितर मेऽद्य तृषा महती प्रभो ।**
**इति सलज्जमयाचत काप्यपः**
**स्मितमुखी तृषितेव रमाप्रियम्　　॥ २० ॥**

हे यदुकुलाम्बुधिकौस्तुभ, अविच्छिन्नयदुवंश एव समुद्रः तस्मात्समुत्पन्नरत्नश्रेष्ठ । अत्र कौस्तुभत्वोक्त्या जीवाधिदेवतात्वं सूचितम् । हे प्रभो, हे मत्स्वामिन् । तदनुभवाभिलाषशंसनाय प्रभो इत्युक्तम् । मे भवदधीनचित्तायै मह्यं जीवनं तीर्थोदकं प्राणधारणं च वितर देहि । अद्य भवद्दर्शनावसरे मे मम महती बलवती तृषा पिपासा आशा च वर्तते इति शेषः । इति एवंरीत्या स्मितमुखी मन्दस्मितभव्यवदना श्लेषभङ्ग्या । निजाशयप्रकाशनात् स्मितमुखीत्युक्तम् । कापि वधूः सलज्जं यथा तथा तृषितेव पिपासापीडितेवेत्युत्प्रेक्षा । एतेन पिपासाविडम्बनं सूचितम् । रमाप्रियं श्रीकृष्णम् । एतेन सौभाग्यवैशिष्ट्यं सूचितम् । अपः तीर्थोदकानि अयाचत प्रार्थयामास । भवत्संश्लेषणमन्तरा भवदेकचित्ताया मम प्राणधारणमशक्यमित्याशयः । पयःप्रार्थनाव्याजेन श्लेषमूलप्राणधारणरूपकैतवापह्नुतिर्व्यज्यते ।

अन्यस्या अवस्थामाह । यद्विति ।

**यदुपतिस्मितभाषितलज्जिता**
**विनतमौलिरपाङ्गविलोकनैः ।**
**स्मितमुखी तमयाचत मन्दवा-**
**गमृतमेव न किञ्चिदितीप्सितम् ॥ २१ ॥**

यदुपतेः श्रीकृष्णस्य स्मितभाषितेन मन्दहासपूर्वकवाचा । किमपेक्षितमित्याकारकवाचेति यावत् । लज्जिता लज्जाविशिष्टा अत एव विनतमौलिः नम्रमस्तका स्मितमुखी मन्दहासविशिष्टा अपाङ्गविलोकनैः कटाक्षैः तं श्रीकृष्णं अमृतमेव तीर्थोदकमेव मोक्ष एव । ईप्सितं अभिलषितं न किञ्चित् किमप्यन्यन्नापेक्षितमिति व्याहरन्तीति शेषः । अयाचत प्रार्थयामास । भवद्दर्शनानन्तरमैहिकं भोगादिकं किमपि मास्तु । मोक्षमेव देहीत्ययाचतेत्याशयः । अत्र विशेषणानां स्वारस्यात् अमृतं कृष्णस्याधरामृतं अयाचते-त्यप्यर्थः । रूपकातिशयोक्त्यलङ्कारः ।

दधीति ।

**दधि शरद्विधुसन्निभमङ्गना**
**करतले विनिवेश्य मुरद्विषः ।**
**मधुरशैशवचेष्टितमस्मर-**
**द्व्रजजुषो भयचञ्चलचक्षुषः ॥ २२ ॥**

काचिदङ्गना । शरद्विधुसन्निभं शरत्कालचन्द्रवद्धवलं दधि करतले आत्मनः पाणितले विनिवेश्य निक्षिप्य । व्रजजुषः गोकुलगतस्य भयचञ्चलचक्षुषः गोपीभ्यः यद्भयं तेन चञ्चले तरले चक्षुषी यस्य स तथोक्तः तस्य । मुरद्विषः श्रीकृष्णस्य मधुरशैशवचेष्टितं मनोहरबाल्यचौर्यचेष्टितं । अस्मरत् । एतादृशगम्भीरप्रकृतिः श्रीकृष्णः पुरा गोकुले निजबाल्ये गोकुलवासिभ्यो भीतः एतदर्थं चोरवृत्तिमाश्रितवानिति कृष्णस्य शैशवचेष्टित-मस्मरदित्याशयः ।

काञ्चिज्जरतीं वर्णयति । तदन्विति ।

**तदनु कापि जराविलविग्रहा**
**पलितजिह्मकचोच्चसिराचिता ।**
**चलशिरश्चिबुका तिलकाङ्किता**
**रदनहीनमुखी निजगाद तम् ॥ २३ ॥**

तदनु जरया आविलः लावण्यविहीन इत्यर्थः विग्रहः शरीरं यस्यास्सा। पलितः धवलीभूतः जिह्मश्च ह्रस्वतया वक्रश्च कचः केशकलापः यस्यास्सा। उच्चसिराभिः उन्नतधमनिभिः आसमन्तात् चिता व्याप्ता चलशिरश्चिबुका कम्पमानमस्तकचिबुकप्रदेशा तिलकैः कृष्णवर्णबिन्दुविशेषैः अङ्किता कृतचिह्ना रदनैः दन्तैः हीनं विरहितं मुखं वक्त्रं यस्यास्सा। कापि योषित् तं श्रीकृष्णं प्रति। निजगाद वक्ष्यमाणप्रकारेणोवाच। स्वभावोक्त्यलङ्कारः।

उक्तिप्रकारमाह। नन्विति।

**ननु भवान्गजराट्परिरक्षको**
**द्रुपदजाद्भुतचेलकुविन्दकः।**
**शकटकेशिबकाघविमर्दनः**
**सुरभिगोपनपाणिधृताचलः ॥ २४ ॥**

गजराट्परिरक्षकः गजेन्द्रत्राता भवान्ननु त्वमेव खलु। द्रुपदजायाः अनन्यपरायणायाः द्रौपद्याः अद्भुतानि आश्चर्यकराणि यानि चेलानि विविधवस्त्राणि तेषां कुविन्दकः निर्मातेत्यर्थः। भवान्ननु त्वमेव खलु। शकटकेशिबकाख्यानां असुराणां विमर्दनः नाशकः भवान्ननु त्वमेव खलु। सुरभीणां गवां गोपनाय रक्षणाय पाणिना एकेन हस्तेन धृतः उद्धृतः अचलः गोवर्धनगिरिः येन स तथोक्तः। भवान्ननु त्वमेव खलु।

श्रवणत इति।

**श्रवणतश्श्रुतमद्य निरर्गलं**
**समवलोक्य भवन्तमहं दृशा।**
**ननु भवामि च धन्यतमा क्षणं**
**पुरत एह्युपदर्शय ते मुखम् ॥ २५ ॥**

मया श्रवणतः श्रोत्राभ्यां श्रुतं आकर्णितम्। किंवदन्त्या केवलमाकर्णितमित्याशयः। अद्य इदानीं निरर्गलं यथातथा अहं भवद्दर्शनकुतूहलीनी वृद्धाहं। दृशा अनेन चर्मचक्षुषा भवन्तं तादृशातिमानुषचेष्टितं त्वां। समवलोक्य साक्षाद्दृष्ट्वा धन्यतमा सुकृतिष्वग्रगण्या यद्वा योगिभ्योप्युत्कृष्टेत्यर्थः। भवामि च भवाम्येवेत्यर्थः। ननु हे कृष्ण, क्षणं क्षणकालं पुरतः मदग्रभागं प्रति। एहि आयाहि। ते तादृशमहामहिम्नस्तव मुखं जगदाकर्षणक्षमं मुखकमलं उपदर्शय समीपे दर्शय। एतेन श्रवणमनननिदिध्यासादिना भगवतः साक्षात्कार इति सूच्यते।

इतीति ।

इति निगद्य दृगूर्ध्वतटार्पित-
प्रविचलद्वलभीकृतपाणिका ।
चिरमवेक्ष्य यदूत्तममग्रतः
परमवाप तदा प्रमदं मुहुः ॥ २६ ॥

इति पूर्वोक्तप्रकारेण निगद्य सम्प्रार्थ्य दृशः लोचनस्य ऊर्ध्वतटे भ्रूदेशे अर्पितः विनिहितः प्रविचलंश्चासौ प्रकम्पमानश्चासौ वलभीकृतश्च विटङ्कीकृतश्च चुलकीकृत इति यावत् । दर्शनसौकर्यापादनायैवं क्रियते । पाणिकः ह्रस्वकरः यया सा । अल्पार्थे कन्प्रत्ययः । अग्रतः पुरोभागे यदूत्तमं यदुवंशे समुत्पन्नं श्रीमन्नारायणं । चिरं अवेक्ष्य मुहुः असकृत् नवंनवं इति यावत् । तदा तस्मिन्समये परं प्रमदं ब्रह्मानुभवसदृशं परमानन्दं अवाप लब्धमोक्षानन्दा बभूवेत्याशयः । स्वभावोक्तिः ।

कस्याश्चिन्मध्याया उक्तिमाह । नन्विति ।

ननु कुचेलसमर्पितमादरा-
त्समुपभुज्य मुदा पृथुकं पुरा ।
कमलया सह चक्रधरोऽकरो-
त्तमयमिभ्यमिति प्रमदाऽवदत् ॥ २७ ॥

नन्विति सखीसम्बोधनं हे सखि ! पुरा अयं अग्रतः पर्यटन् चक्रधरः श्रीकृष्णः कुचेलेन समर्पितं पृथुकं चिपुटकं मुदा सन्तोषेण आदरात् अदृष्टाश्चर्यकरपदार्थदर्शनादिव आभिमुख्यात् कमलया सह रुक्मिण्या समं समुपभुज्य आस्वादनपूर्वकं भुक्त्वा । तं प्रदत्त-पृथुकं कुचेलं इभ्यं सन्तं धनिनं सन्तं अकरोत् । इति पूर्वोक्तप्रकारेण प्रमदा काचिन्मध्यमा अवदत् । केवलमेकमुष्टिपृथुकार्पणेन तृप्तः दुर्गताय तस्मै कुचेलाय सर्वैश्वर्यं प्रायच्छत् । महदाश्चर्यकरमस्यौदार्यमित्याशयः ।

भोजनानन्तरकार्यमाह । अथेति ।

अथ पयःपरिशोधितपाणयः
क्रमततासनपंक्तिजुषो द्विजाः ।
उदरभारसमुच्छ्वसनाकुलाः
परिनिषेदुरिलाहितपाणयः ॥ २८ ॥

अथ भोजनानन्तरं । द्विजाः ब्राह्मणाः पयसा जलेन परिशोधितः निर्णिक्तः पाणिः करः यैस्ते सन्तः । क्रमेण पंक्तिश इत्यर्थः । ततानि विस्तृतानि यान्यासनानि तेषु पंक्तिं जुषन्तीति पंक्तिजुषस्सन्तः । उदरस्य भोजनाधिक्यात् यः भारः तेन समुच्छ्वसनः उच्छ्वास इत्यर्थः । तेन आकुलास्सन्तः पीडितास्सन्तः । अत एव इलायां भूमौ आहितः अवष्टम्भतया विनिहितः पाणिः हस्ततलं यैस्ते सन्तः । परिनिषेदुः परितो निषण्णा बभूवुः । स्वभावोक्तिः ।

कतिपय इति ।

**कतिपये परिवेषणचातुरीं**
**कतिच संस्कृततेमनवैखरीम् ।**
**कतिच लड्डुकपूरिसुमाधुरीं**
**निजगदुर्मुदिता द्विजपुङ्गवाः ॥ २९ ॥**

कतिपये केचन द्विजपुङ्गवाः मुदितास्सन्तः सन्तुष्टास्सन्तः । परिवेषणचातुरीं पक्वपदार्थविनियोगचमत्कारं । कतिच अन्ये केचन द्विजाः संस्कृततेमनस्य हिङ्गुसर्षपादिसंस्कारविशिष्टदधिकृतरसविशेषस्य वैखरीं स्वादुतातिशयं । कतिच अन्ये केचन द्विजाः लड्डुकपूरिसुमाधुरीं भक्ष्यविशेषमाधुर्यातिशयं च । निजगदुः वर्णयामासुः । तच्छ्लाघापरा बभूवुरित्याशयः ।

हरितेति ।

**हरितनागलतामृदुपल्लवैः**
**सघनसारलवङ्गकपूगकैः ।**
**परिलसत्कलधौतघटा द्रुतं**
**परिजना यदुनाथमनीनयन् ॥ ३० ॥**

घनसारः हिमवालुका कर्पूरविशेषः लवङ्गकानि देवकुसुमानि कन्प्रत्ययेन शकलीकृतत्वं सूचितम् । पूगकं क्रमुकं । अत्रापि कन्प्रत्ययेन शकलीकृतत्वं सूचितम् । एतैस्सह वर्तन्त इति सघनसारलवङ्गकपूगकाः तः । हरितैः शुकपक्षसदृशहरिद्वर्णैः नागलतामृदुपल्लवैः मृदुलताम्बूलकिसलयैः । एतेन भोग्यत्वं सूचितम् । परिलसन्तीः परितः प्रकाशमानाः कलधौतघटाः सुवर्णभाजनविशेषान् । परीत्यनेन ताम्बूलदलानां चक्राकारविन्यसनं सूचितम् । परिजनाः परिचारकजनाः यदुनाथं श्रीकृष्णं द्रुतं सत्वरं अनीनयन् प्रापयामासुः । ताम्बूलघटाः क्षिप्रमानीय कृष्णहस्ते न्यक्षिपन्नित्याशयः ।

तांम्बूलवितरणमाह । क्षितीति ।

**क्षितिसुरेरितसुस्वरमञ्जुल-**
**श्रुतिनिनादगभीरतरे गृहे ।**
**यदुपतिस्स्वयमेव करे धटां**
**दधददाद्द्विजवर्यगणाय तत् ॥ ३१ ॥**

यदुपतिः श्रीकृष्णः। क्षितिसुरैः श्रोत्रियैः ईरिता उच्चैः प्रोक्ता सुस्वरैः शास्त्रानुगुणमुदात्तानुदात्तादिस्वरैः मञ्जुला च सुश्राव्या च या श्रुतिः वेदः तस्याः निनादः घोषः तेन गभीरतरे संगुम्भिते सम्पूर्णे इति यावत् । गृहे स्वयमेव साक्षात् करे पाणौ धटां ताम्बूलभाजनं दधत्सन् गृह्णन्सन् । द्विजवर्यगणाय ब्राह्मणोत्तमसमूहाय । तत् ताम्बूलं अदात् अर्पयामास । अत्र स्वयमेवेत्यनेन कृष्णस्य ब्राह्मणाराधने तावदादरातिशयस्सूचितः । एतेन ब्राह्मणप्रियत्वमुक्तं भवति ।

अथ श्रोत्रियाणामाशीःप्राप्तिमाह । अथेति ।

**अथ यदूत्तम एष ससम्मदं**
**द्विजकरार्पितमन्त्रवराक्षतः ।**
**प्रणतिपूर्वमवाप तदाशिषो**
**विजय जीव शतं शरदामिति ॥ ३२ ॥**

अथ ताम्बूलार्पणानन्तरं । एष यदूत्तमः अयं श्रीकृष्णः प्रणतिपूर्वं प्रमाणपूर्वकं ससम्मदं ससन्तोषं द्विजानां श्रोत्रियाणां करैः पाणिभिः अर्पिताः मन्त्रेण श्रौतमन्त्रेण वराक्षताः श्रेष्ठाक्षताः यस्मै स तथोक्तस्सन् । विजय विजयीभव शरदां संवत्सराणां शतं जीव बहुतिथं कालं जीवेत्यर्थः । इति एवं प्रकारेण तदाशिषः श्रोत्रियाशीर्वचनानि अवाप ।

तदन्विति ।

**तदनु कोपि जरंश्चिरकुट्टनैः**
**अरुणनागकिसालयपिण्डकम् ।**
**विरदने विनिवेश्य मुखे शनैः**
**लगुडपाणिरुवाच समुत्थितः ॥ ३३ ॥**

तदनु आशीर्वादानन्तरं । कोपि जरन् वृद्धः चिरकुट्टनैः चिरकालं संघट्टनैः अरुणनागकिसालयस्य रक्तताम्बूलपल्लवस्य पिण्डकं घुटिकां । विरदने दन्तशून्ये मुखे वक्त्रकुहरे

विनिवेश्य निक्षिप्य लगुडपाणिस्सन् दण्डावष्टम्भस्सन् । शनैः मन्दं समुत्थितस्सन् उवाच वक्ष्यमाणप्रकारेणावोचत् । स्वभावोक्तिः ।

उक्तिप्रकारमाह । किम्विति ।

**किमु वदेयमहं द्विजपूजने**
**मुररिपोः कुतुकं महदद्भुतम् ।**
**न हि मया श्रुतपूर्वमपीदृशं**
**बत विलोकितमद्य दृशाऽर्चनम्** ॥ ३४ ॥

अहं अनुभूतसमाराधनोऽहं । द्विजपूजने ब्राह्मणसन्तर्पणविषये मुररिपोः श्रीकृष्णस्य कुतुकं कुतूहलं किमु कथंत्वेन वदेयं निवेदयेयम् । निवेदयितुमेवाशक्यं वाचामगोचरमिति यावत् । किन्तु इत्थंत्वेन वक्तुं शक्येत । कथमिति चेत् । महदद्भुतं अत्याश्चर्यकरं मथा वयोवृद्धेन मया ईदृशं आराधनं श्रुतपूर्वं पूर्वं श्रुतं न हि । श्रवणपथमपि नायातमित्यर्थः दर्शनं तावद्दूरापास्तमिति यावत् । अद्य इदानीं अर्चनं तादृशब्राह्मणसमाराधनं दृशा अनेन चक्षुषा अवलोकितं साक्षाद्दृष्टं । अनुभूतमिति यावत् । बत अत्याश्चर्यम् ।

भगवतो ब्राह्मणप्रियत्वमाह । मधुरिमेति ।

**मधुरिमा मधुराधिपकारिते-**
**ष्वखिलभोज्यगणेषु हि शंसति ।**
**द्विजवरेषु यदूत्तमचेतसो**
**विमलभक्तिमकुण्ठितवैभवाम्** ॥ ३५ ॥

मधुराधिपकारितेषु श्रीकृष्णनिर्वर्तितेषु अखिलभोज्यगणेषु सर्वविधभक्ष्यान्नपानादिषु मधुरिमा माधुर्यातिशयः । द्विजवरेषु ब्राह्मणोत्तमेषु विषये यदूत्तमचेतसः श्रीकृष्णमनसः अकुण्ठितवैभवां निरर्गलप्रसरां विमलभक्तिं परिशुद्धप्रीत्यतिशयं अकपटप्रीतिमिति यावत् । शंसति हि सूचयति हि । पक्वपदार्थभोग्यतातिशय एव श्रीकृष्णस्य ब्राह्मणेषु प्रीत्यतिशयं प्रकाशयतीत्याशयः ।

इतीति ।

**इति निगद्य निषेदुषि भूसुरे**
**सति मनीषिवरोऽप्यपरस्ततः ।**
**सदसि साधु जगाद समुत्थितः**
**श्रुतिशिरोगदितार्थमनुत्तमम्** ॥ ३६ ॥

इति पूर्वोक्तप्रकारेण निगद्य उक्त्वा । भूसुरे वृद्धे ब्राह्मणे निषेदुषि सति उपविष्टे सति । ततः अनन्तरं । अपरः अन्यः मनीषिवरोपि पण्डितश्रेष्ठोपि समुत्थितस्सन् सदसि तस्यां सभायां अनुत्तमं श्रेष्ठतमं सारतममिति यावत् । श्रुतिशिरोगदितार्थं वेदान्तप्रतिपादितार्थं साधु सुष्ठु । जगाद उक्तवान् ।

तदुक्तिप्रकारमाह । मनुजेति ।

**मनुजरूपममुं यदुपुङ्गवं**
**किमिति यूयममंध्वमिह स्थितम् ।**
**द्विजवराश्शृणुताद्य वदाम्यहं**
**श्रुतिशिरोपि न वेत्त्यमुमन्ततः ॥ ३७ ॥**

यदुपुङ्गवं यदुकुले साधुपरित्राणायावतीर्णं मनुजरूपं मानुषीं तनुमाश्रितं इह अस्मद्भाग्यविशेषाद्भूकस्थले स्थितं कृतावासं अमुं अस्मदृग्गोचरं श्रीकृष्णं । यूयं किमिति किं रूपेण कथमिति यावत् । अमंध्वं अजानत । अस्मत्सदृशः कश्चन मनुष्यसाधारणः इति वा । उत अस्मदपेक्षया यत्किञ्चित् वैभवविशिष्टः कश्चन पुरुषविशेषः इति वा । आहोस्वित् अस्मदपेक्षया हीनगोपकुले लब्धजन्मेति वा इति । किमित्यस्यार्थः । हे द्विजवराः, अद्य इदानीं । अहं लब्धावसरोहं वदामि निष्कृष्टार्थं कथयामि । शृणुत, अवहितमनसो भवन्तश्शृण्वन्तु । श्रुतिशिरोपि वेदान्तोपि अमुं अस्मदग्रस्थितं श्रीकृष्णं अन्ततः साकल्येनेत्यर्थः । न वेत्ति न जानाति । तादृशवैभवः पुरुषोत्तमोयमित्याशयः ।

निरतिशयवैभवविशिष्टत्वमेवोपपादयति । अण्विति ।

**अणुतरोऽयमणोरपि तत्सदा**
**वसति जीवमनुप्रविशन्मुदा ।**
**अथ महान्महतोऽपि ततस्स्वयं**
**धृतविराड्विभवो भुवनान्यधात् ॥ ३८ ॥**

अयं श्रीकृष्णः अणोरपि अणुस्वरूपजीवात्मनोपि अणुतरः अत्यन्ताणुः । अत एव सदा निरन्तरमपि जीवं जीवात्मानं अनुप्रविशन्सन् अनुप्रवेशं कुर्वन्सन् मुदा सन्तोषेण न तु क्लेशेन । वसति । अथ पक्षान्तरे । महतोपि कुलाचलादिस्थूलवस्तुनोपि महान् बृहत्तरः । ततः तस्मात्कारणात् स्वयं धृतविराड्विभवस्सन् विराड्रूपी सन्नित्यर्थः । भुवनानि ब्रह्माण्डानित्यर्थः । अधात् धृतवान् । अन्तर्व्याप्त्या बहिर्व्याप्त्या च धारकपोषकोयमित्याशयः । अणोरणीयानित्यादि श्रुतयोत्रानुसन्धेयाः ।

भगवतः पारम्यमाह । कमलेति ।

**कमलयोनिमुखैर्विबुधैर्मुहुः**
**महति दुग्धपयोधितटे स्तुतः ।**
**मृदुगिरा प्रतिवक्त्ययमात्मनः**
**प्रकटयेन्न हि रूपमपीदृशम् ॥ ३९ ॥**

कमलयोनिमुखैः चतुर्मुखप्रभृतिभिः विबुधैः देवैः मुहुः असकृत् महति अत्यायते दुग्धपयोधितटे क्षीरसमुद्रतीरे स्तुतः वेदैः कल्याणगुणप्रतिपादकदिव्यस्तोत्रैश्च । अभिष्टुतः अयं अद्यास्मद्दृष्टिगोचरोयं श्रीकृष्णः मृदुगिरा मृदुमधुरवाचा केवलं । अशरीरिण्या वाण्येति यावत् । प्रतिवक्ति प्रत्युत्तरं ददाति । आत्मनः स्वस्य ईदृशं अद्य परिदृश्यमानं रूपमपि विग्रहमपि न प्रकटयेद्धि न दर्शयेद्धि । हीति प्रसिद्धौ । वयमेव देवेभ्योपि धन्यतमाः । यतः एवमस्मद्दृष्टिगोचरोयमित्याशयः ।

जगदिति ।

**जगदिदं सचराचरमस्य य-**
**ज्जठरगं वसति प्रलये ततम् ।**
**यदयमप्यखिलेषु वसन्सदा**
**न खलु कस्यचिदक्षिपथं गतः ॥ ४० ॥**

यत् यस्मात्कारणात् सचराचरं स्थावरजङ्गमात्मकं इदं परिदृश्यमानं जगत् विष्टपं । अस्य श्रीकृष्णस्य जठरगं उदरं प्रविष्टं सत् । प्रलये प्रलयकाले ततं सत् निस्सम्बाधं सत् । वसति यत् यस्मात्कारणात् अयं श्रीकृष्णः अखिलेषु सर्वेषु स्थावरजङ्गमेषु सदा निरन्तरमपि वसन्नपि अन्तः प्रविश्य वासं कुर्वन्नपि । कस्यचित् कस्यापि अक्षिपथं लोचनमार्गं न गतः खलु । न चक्षुषा पश्यति कश्चिदेनमिति हि श्रूयते । एतेन सर्वशक्तत्वं सर्वव्यापकत्वं जगद्रक्षणशीलत्वञ्च सूच्यन्ते । तस्मात् मृदुगिरा प्रतिवक्तीति पूर्वेणान्वयः ।

सृजतीति ।

**सृजति सर्गकृते चतुराननं**
**प्रथमतो निजनाभिसरोजतः ।**
**उपदिशत्यथ वेदचतुष्टयं**
**यदवलोक्य विधिर्भुवनं सृजेत् ॥ ४१ ॥**

सर्गकृते सृष्ट्यर्थं प्रथमतः प्रपञ्चसृष्टेः प्राक् निजनाभिसरोजतः आत्मनाभिकमलात् चतुराननं चतुर्मुखं सृजति । अथ चतुर्मुखसृष्ट्यनन्तरं वेदचतुष्टयं ऋग्यजुस्सामाथर्वाख्य चतुर्विधान्वेदान् उपदिशति । तस्मै चतुर्मुखायेति शेषः । यत् पूर्वोक्तं वेदचतुष्टयं अवलोक्य सावधानं वीक्ष्य विधिः लब्धवेदचतुष्टयश्चतुर्मुखः भुवनं चराचरात्मकं प्रपञ्चं सृजेत् तदुक्तरीत्या समुत्पादयेत् । एतेन सर्वजगत्कारणत्वं भगवतः श्रीकृष्णस्यैव न तु चतुर्मुखस्येति सूचितम् ।

अधिगतेति ।

**अधिगताखिलकामतया न किं-**
**चिदपि कामयते जनतस्स्वयम् ।**
**अपितु भक्तिमनन्यपरायणा-**
**मसदृशीमभिकांक्षति सादरम् ॥ ४२ ॥**

स्वयं अधिगताखिलकामतया अवाप्तसमस्तकामतया । जनतः मनुजसकाशात् किञ्चिदपि सुलभं सलिलमपीत्याशयः । न कामयते नापेक्षते । अपितु किन्तु अनन्यपरायणां अस्पृष्टदेवतान्तरामित्यर्थः । भगवदेकनिष्ठामिति यावत् । असदृशीं भक्तिं परमभक्ति-मिति यावत् । सादरं प्रीतिपुरस्सरं अभिकांक्षति आभिमुख्येनापेक्षते । अवाप्तव्याभावात् । भक्तिमेकामपेक्षते । भक्तस्य दुर्लभत्वादित्याशयः ।

भगवतो भक्तिक्रीतत्वमाह । परमेति ।

**परमभक्तिपुरस्सरमर्पितं**
**कुसुममम्बु फलं दलमप्ययम् ।**
**करयुगेन ससादरमुन्मुखः**
**समभिगृह्य समत्त्यविचारयन् ॥ ४३ ॥**

अयं श्रीकृष्णः परमभक्तिपुरस्सरं तत्संश्लेषमन्तरा जीवितधारणमशक्यमिति तप्यमानेन भक्तेन प्रीतिपूर्वकं अर्पितं निवेदितं कुसुमं पुष्पं अम्बु जलं फलं दलमपि पत्रमपि ससादरं भक्तप्रदर्शितप्रीत्यपेक्षया साधिकप्रीत्यतिशयमित्यर्थः । उन्मुखस्सन् अभि-मुखस्सन् सन्निहितस्सन्निति यावत् । करयुगेन पुरःप्रसारितेन पाणियुगलेन समभिगृह्य सम्यगाभिमुख्येनादाय अविचारयन्सन् भक्ष्याभक्ष्यविचारमकुर्वन्सन् । समत्ति सम्यगश्नाति। भोग्यतया अश्नातीति यावत् ।

अखिलेति ।

**अखिलहेयगुणैः परिवर्जितः**
**बहुशुभंयुगुणाकरतां गतः ।**
**सगुणनिर्गुणताश्रुतियुग्मम-**
**प्ययमहो सफलीकुरुते प्रभुः** ॥ ४४ ॥

अयं प्रभुः अस्मत्स्वामी श्रीकृष्णः । अखिलहेयगुणैः परिवर्जितः हेयगुणप्रतिभट इत्यर्थः । बहुशुभंयुगुणाकरतां गतः अनन्तकल्याणगुणाकर इत्यर्थः । सगुणनिर्गुणताश्रुतियुग्ममपि कल्याणगुणाकरत्वेन सगुणश्रुतिमपि हेयप्रतिभटत्वेन निर्गुणश्रुतिमपि । सफलीकुरुते श्रुति-द्वयस्यापि साफल्यं प्रदर्शयतीति यावत् । एतेन श्रुतिसामान्यस्य प्रामाण्यमङ्गीकरणीय-मित्युक्तं भवति ।

भगवतस्सौलभ्यमाह । परमेति ।

**परमपूरुष एष दयानिधिः**
**नयनगोचरतामधिगत्य नः ।**
**अमितभाग्यवशादिति मन्महे**
**लसति सम्प्रति मानुषरूपभाक्** ॥ ४५ ॥

परमपूरुषः पुरुषोत्तम इत्यर्थः । दयानिधिः कारुण्याकरः । अत एव परदुःखदुखित्वादेव सम्प्रति इदानीं मानुषरूपभाक्सन् मानुषीं तनुमाश्रितस्सन् । नः अस्माकं अमितभाग्य-वशात् अपरिमितसुकृतविशेषात् । नयनगोचरतां चर्मचक्षुर्विषयतां अधिगत्य प्राप्य लसति प्रकाशते । इति मन्महे जानीमः । अन्यथा " न चक्षुषा पश्यति कश्चिदेनं । एवं रीत्या को वा तावदेवमेनं द्रष्टुं शक्नुयात् । एवमस्मद्दृष्टिगोचरत्वं तावद्दयाकार्यमित्याशयः ।

इतीति ।

**इति निवेद्य स पण्डितसत्तमो**
**विरचिताञ्जलिरासनमाप तत् ।**
**अथ समुन्नतबाहुयुगा द्विजाः**
**विजयतां हरिरित्यवदन्मुहुः** ॥ ४६ ॥

इति पूर्वोक्तप्रकारेण निवेद्य श्रीकृष्णमहिमातिशयं प्रकाश्य सः पण्डितसत्तमः ज्ञानिषु श्रेष्ठः ब्राह्मणः विरचिताञ्जलिस्सन् । तदासनं स्वकीयमासनं आप उपविवेशेत्यर्थः । अथ

अनन्तरं द्विजाः सर्वे श्रोत्रियाः समुन्नतबाहुयुगास्सन्तः ऊर्ध्वमुत्क्षिप्तभुजयुगास्सन्तः हरिः अयं श्रीकृष्णः विजयतां सर्वोत्कर्षेण वर्ततां। इति मुहुः असकृत्। अवदन् उच्चैर्निजगदुः।

ब्राह्मणप्रेषणमाह। तदन्विति।

**तदनु शौरिरयं रचिताञ्जलिः**
**विनयनम्रशिराः कृतकृत्यताम्।**
**पिशुनयन्ननुगम्य महीसुरान्**
**व्यसृजदुत्स्मितफुल्लकपोलकः ॥ ४७ ॥**

तदनु ब्राह्मणस्तुत्यनन्तरं अयं शौरिः श्रीकृष्णः रचिताञ्जलिस्सन् विनयेन आनतमस्तकस्सन्। कृतं निर्वर्तितं कृत्यं ब्राह्मणसमाराधनरूपकर्तव्यं कर्म येन स तथोक्तः तस्य भावः कृतकृत्यता तां। पिशुनयन्सन् प्रह्वभावेन अञ्जलिना च सूचयन्सन्। अत एव उत्स्मितेन धन्यतासूचकस्मितेन फुल्लः विकसितः कपोलः यस्य स तथोक्तस्सन् अनुगम्य आद्वारमनुसृत्य गत्वा महीसुरान् ब्राह्मणान्। व्यसृजत् स्वस्वगृहं प्रति प्रेषयामास।

अथेति।

**अथ हरिस्स्वयमप्युपभुज्य तत्**
**परिगृहीतमनोहरविष्टरः।**
**क्रमुकनागलतादलपल्लवान्**
**सममदन्सुहृदा समुपाविशत् ॥ ४८ ॥**

अथ ब्राह्मणप्रेषणानन्तरं हरिः श्रीकृष्णः स्वयमपि तत् ब्राह्मणभुक्तावशिष्टं अन्नं उपभुज्य भुक्त्वा परिगृहीतमनोहरविष्टरस्सन् अङ्गीकृतस्पृहणीयासनस्सन्। सुहृदा समं सात्यकिना सह क्रमुकनागलतादलपल्लवान् पूगमृदुलताम्बूलानि समदन्सन्। समुपाविशत् निषसाद। सुहृदा सममुपभुज्येत्यप्यन्वयः।

तदन्विति।

**तदनु भुक्तवति प्रियदारुके**
**करतलेन शताङ्गहयान्मुहुः।**
**परिमृशन्स्वयमेव हरिस्तृणा-**
**न्यवकिरन्पुरतस्स्थितवान्क्षणम् ॥ ४९ ॥**

तदनु प्रियदारुके प्रेमैकभाजने सारथौ भुक्तवति सति निर्वर्तितभोजने सति। हरिः श्रीकृष्णः स्वयमेव साक्षात् तृणानि घासान् पुरतः पुरःप्रदेशे विकिरन्सन् करतलेन पाणितलेन शताङ्गहवान् रथाश्वान् मुहुः असकृत् परिमृशन्सन् परामृशन्सन्। क्षणं क्षणकालं स्थितवान् तस्थौ। एतेन सारथौ रथाश्वेषु च श्रीकृष्णस्य प्रेमातिशयस्सूचितः। आश्रितरक्षकत्वं च।

भगवतस्संवेशमाह। अथेति।

**अथ श्रीमान्कृष्णश्शयनभवने सात्यकिकृते**
**स्वपार्श्वेऽन्यां शय्यां सपदि परिकल्प्य स्वयमपि।**
**मृदु स्वच्छं तल्पं रचितधवलोल्लोचसुभगं**
**पयोब्धौ शेषं वा सफणमधिशिश्ये स्वसुहृदा॥ ५०॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणमहाकविविरचिते**
**अद्भुतदूताख्यकाव्यरत्ने**
**पञ्चमस्सर्गः।**

अथ अनन्तरं श्रीमान् ब्राह्मणाराधनेन कान्तिविशिष्टः कृष्णः। शयनभवने शय्यागृहे सात्यकिकृते सात्यक्यर्थं स्वपार्श्वे निजपार्श्वपर्यङ्के अन्यां शय्यां मृदुतरतल्पं सपदि परिकल्प्य कारयित्वेत्यर्थः। स्वयमपि मृदु कोमलं स्वच्छं शुभ्रतरं रचितः उपरि बद्धः यः धवलोल्लोचः शुभ्रवितानं तेन सुभगं मनोहरं तल्पं शय्यां। पयोब्धौ क्षीरसमुद्रे सफणं फणासहस्रसहितं शेषं वा अनन्तमिव स्वसुहृदा सात्यकिना सह। अधिशिश्ये सुष्वाप। उपमालङ्कारः। एतेन सौगन्ध्यसौकुमार्यधावल्यादिशय्यागुणाः कथिताः।

भगवता लक्ष्मीदासेन अनुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
पञ्चमस्सर्गः।

॥ श्रीः ॥

## षष्ठस्सर्गः ।

अस्मिन्सर्गे हास्तिनपुरवृत्तान्तं वक्तुमारभते । ज्ञातेति ।

**ज्ञातकृष्णागमोदन्तो धृतराष्ट्रो महीपतिः ।**
**तस्यामेव विभावर्यां कल्पयामास संसदम् ॥ १ ॥**

ज्ञातकृष्णागमोदन्तः विदितश्रीकृष्णस्वपुरागमनवार्तः महीपतिः राजा धृतराष्ट्रः । तस्यामेव वृकस्थले श्रीकृष्णकृतस्थितावेव विभावर्यां रात्रौ संसदं सभां । कल्पयामास योजयामासेत्यर्थः।

सभां प्रति विदुरागमनमाह । भीष्मादीति ।

**भीष्मादिषूपविष्टेषु कर्णदुर्योधनादिभिः ।**
**विदुरस्सुदुराचारकुठारोप्याविशत्सभाम् ॥ २ ॥**

भीष्मादिषु आदिपदेन द्रोणादयो गृह्यन्ते । कर्णदुर्योधनादिभिस्सह अत्रादिपदेन दुश्शासनादयो गृह्यन्ते । उपविष्टेषु सत्सु स्वस्वविष्टरेषु निषण्णेषु सत्सु । सुदुराचाराणां दुष्टशीलानां यद्वा शास्त्रविरुद्धानामाचाराणां कुठारः छेदकः स्वयं सुशीलः दुष्टाचारद्वेषीति यावत् । विदुरोपि सभामाविशत् । एकदेशविवर्तिरूपकं ।

पार्श्वे इति ।

**पार्श्वे एवोपवेश्याथ विदुरं सादरं प्रभुः ।**
**सद्यः कर्तव्यकार्यन्तु वक्तुं समुपचक्रमे ॥ ३ ॥**

प्रभुः धृतराष्ट्रः विदुरं सादरं सप्रीत्यतिशयं पार्श्वे एव पार्श्वगतपीठ एव । उपवेश्य सद्यः प्रकृते कर्तव्यकार्यं तु कृष्णागमनानुगुणं अत्यवश्यकरणीयं कार्यं एव । तुस्त्ववधारणे । वक्तुं समुपचक्रमे प्रारभत ।

वचनप्रकारमाह । अस्माकमिति ।

**अस्माकं पाण्डवानाञ्च कथञ्चित्सन्धिकांक्षया ।**
**आगमिष्यति दूतस्सन्श्वश्शौरिरिति चारवाक् ॥ ४ ॥**

शौरिः श्रीकृष्णः अस्माकं पाण्डवानाञ्च कथञ्चित् प्रयासेन अनुनयेन वेत्यर्थः । सन्धिकांक्षया परस्परसौहार्दकल्पनेच्छया । दूतस्सन् अङ्गीकृतलोकगर्हितदौत्यस्सन् श्वः आगमिष्यतीति । चारवाक् गूढचारैरुक्तमित्यर्थः ।

तदिति ।

**तदद्य कथयाम्यत्र मत्सङ्कल्पं भवन्मतम् ।**
**जिज्ञासुर्नहि कर्तव्यमेकेन बहुदूषितम् ॥ ५ ॥**

तत् तस्मात्कारणात् अद्य अस्मिन्समये । अत्र वयोवृद्धैः ज्ञानवृद्धैः अलङ्कृतायामस्यां सभायां । भवतां मतं अभिप्रायं जिज्ञासुस्सन् मत्सङ्कल्पं मदीयमभिप्रायं कथयामि निवेदयामि । हि यस्मात्कारणात् । एकेन पुंसा बहुभिः जनैः दूषितं निराकृतमित्यर्थः । कार्यं न कर्तव्यम् ।

कृष्णेति ।

**कृष्णद्वैपायनेनापि पुरा प्रोक्तं मदन्तिके ।**
**साक्षान्नारायणश्श्रीमान्कृष्ण इत्यसकृद्रहः ॥ ६ ॥**

कृष्णद्वैपायनेनापि व्यासेनापि । अत्रापिना नारदादयो गृह्यन्ते । पुरा रहः उपह्वरे मदन्तिके मत्समीपे । एतेन स्वयमेवागतवानिति सूचितम् । श्रीमान् रुक्मिणीरूपया श्रिया नित्ययुक्तः कृष्णः अस्मद्दृष्टिगोचरः वसुदेवसूनुः साक्षान्नारायणः । इति एवं प्रकारेण असकृत् मुहुः प्रोक्तं प्रकर्षेणोक्तम् ।

तदिति ।

**तत्प्रवेशे च यद्योग्यं तत्कर्तव्यं मयाऽधुना ।**
**मद्भाग्यवशतश्श्रीमान्मद्गृहानागमिष्यति ॥ ७ ॥**

तत्प्रवेशे तादृशकृष्णस्य अस्मत्पुरप्रवेशे यद्योग्यं यदर्हं तत् कार्यं । अधुना अद्यैव मया अन्येन मया कर्तव्यं च करणीयमेव । कुत इति चेत् श्रीमान् श्रिया नित्ययुक्तः कृष्णः मद्भाग्यवशतः पुराकृतमत्सुकृतवशात् मद्गृहान् मदीयं भवनं । आगमिष्यति । सुकृतविशेषमन्तरा तदागमनं दुर्लभमित्याशयः ।

सुगमेति ।

**सुगमा सरणिः कार्या नगरीयं गरीयसी ।**
**माकन्दपल्लवैः पुष्पैः भूष्या केतुभिरञ्जसा ॥ ८ ॥**

सरणिः राजमार्गः यद्वा तदागमनमार्गः सुगमा सुखेनागन्तुं योग्या सती कार्या कर्तव्या । इयं मदीया गरीयसी श्लाघ्यरूपा नगरी राजधानी माकन्दपल्लवैः चूतकिसलयैः पुष्पैः नानाविधकुसुमैः केतुभिश्च ध्वजैश्च अञ्जसा क्षिप्रमेव भूष्या अलङ्करणीया ।

श्रृङ्गाटकानीति ।

**श्रृङ्गाटकानि कार्याणि कारुभिः कुशलैर्द्रुतम् ।**
**पत्रभङ्गसुगम्भीरैर्मण्डपैर्मण्डितानि च ॥ ९ ॥**

श्रृङ्गाटकानि चतुष्पथप्रदेशाः । द्रुतं क्षिप्रं कुशलैः आलस्यविनिर्मुक्तैः पटुभिः कारुभिः शिल्पिभिः । पत्रभङ्गैः लतादिचित्रविशेषैः सुगम्भीरैः सुष्ठु पूर्णैरित्यर्थः । पूर्णस्यैव गाम्भीर्यं नैसर्गिकमिति कृत्वा सुगम्भीरैरित्युक्तम् । मण्डपैः जनाश्रयैः मण्डितानि च अलङ्कृतानि च कार्याणि ।

पंक्तीति ।

**पंक्तिखातोच्छ्रितस्तम्भबद्धरम्भानिरन्तराः ।**
**मार्गा यन्त्रजलासिक्ताः क्रियन्तां कर्मकोविदैः ॥ १० ॥**

मार्गाः कृष्णागमनपद्धतयः । पंक्तिशः खाताः ये उच्छ्रितस्तम्भाः उदग्रदारुमयस्तम्भाः तेषु बद्धाः नियन्त्रिताः याः रम्भाः कदलीकाण्डाः ताभिर्निरन्तराः सान्द्रास्सन्तः । यन्त्रजलैः जलप्रकिरणसाधनविशेषैः विप्रकीर्णैस्सलिलैः सिक्तास्सन्तः । कर्मकोविदैः कर्मनिष्णातैः क्रियन्ताम् ।

तत्रेति ।

**तत्र तत्र विशालैश्च कायमानैः परिष्कृतैः ।**
**विमानैरिव सङ्कीर्णा करणीया पुरी मम ॥ ११ ॥**

मम मदीया पुरी राजधानी । तत्र तत्र मध्ये मध्ये विशालैः परिष्कृतैः चित्रकुसुमपल्लवादिभिरलङ्कृतैः कायमानैश्च चतुस्तम्भसम्भृताच्छादनविशेषैश्च । विमानैरिव व्योमयानैरिव सङ्कीर्णा सती व्याप्ता सती करणीया । उपमालङ्कारः ।

गणिकेति ।

**गणिका गणनातीतरत्नाढ्याः क्षौमसंवृताः ।**
**मूर्तिमत्योऽभियान्तु श्वो नगर्य इव जङ्गमाः ॥ १२ ॥**

गणिकाः वेश्याः गणनातीतरत्नाढ्यास्सत्यः अपरिमितरत्नाभरणालङ्कृतास्सत्यः । नगरीपक्षे । अपरिमितामूल्यश्रेष्ठवस्तुपूर्णास्सत्यः । क्षौमसंवृतास्सत्यः धवलदुकूलालङ्कृतास्सत्यः । नगरीपक्षे । प्राकारावृतास्सत्यः । अत एव मूर्तिमत्यः स्त्रीरूपिण्यः जङ्गमाः सञ्चरणशीलाः नगर्य इव । श्वः अभियान्तु आभिमुख्येन यान्तु । उपमालङ्कारः ।

पुरन्ध्य्र इति ।

**पुरन्ध्य्रः फलपुष्पौघैस्सुभगङ्करपल्लवाः ।**
**चलद्भ्रमरका यान्तु लता इव च जङ्गमाः ॥ १३ ॥**

पुरन्ध्य्रः ललनाः । फलपुष्पौघैः फलकुसुमसमूहैः सुभगं यथा तथा मनोहरं यथा तथा करः पल्लव इव यासां तास्सत्यः । लतापक्षे । स्पृहणीयकिसलयास्सत्यः । चलन्तः भ्रमरकाः चूर्णकुन्तलाः यासां तास्सत्यः । लतापक्षे । चलन्तः परिसरे भ्रमन्तः भ्रमरा एव भ्रमरकाः । स्वार्थे कन्प्रत्ययः । यासां तास्सत्यः । जङ्गमाः सञ्चरणशीलाः लता इव वल्य इव । लतोपमानेन तासां कृशाङ्गित्वं सुकुमारत्वं विभ्रमशीलत्वं च सूच्यन्ते। यान्तु च । उपमालङ्कारः ।

पौरा इति ।

**पौरा अपि प्रयान्तु श्वस्सिताभ्ररुचिराम्बराः ।**
**शरच्चन्द्रा इव स्वच्छाः कृष्णपक्षोन्मुखा अपि ॥ १४ ॥**

पौरा अपि पुरवासिनो जना अपि । कृष्णपक्षे बहुलपक्षे उन्मुखा अपि आसक्ता अपीति विरोधः । तत्परिहारस्तु श्रीकृष्णपक्षे विषये उन्मुखाः अभिमुखा इति । सिताभ्रवत् धवलमेघवत् । यद्वा सिताभ्रेण हिमवालुकया रुचिरं मनोहरं अम्बरं वसनं येषान्ते सन्तः । चन्द्रपक्षे । सिताभ्रैः धवलमेघैः रुचिरं स्पृहणीयं अम्बरं गगनं येषान्ते । स्वच्छाः उभयत्रापि निर्मलास्सन्तः । शरच्चन्द्रा इव शरत्कालिकसुधांशव इव श्वः प्रयान्तु। उपमालङ्कारः । चन्द्रसादृश्येन पौराणां सकलजनमनोनयनाकर्षकत्वं सूचितम् ।

शातकुम्भेति ।

**शातकुम्भमयौ कुम्भाविभकुम्भेऽम्बुसम्भृतौ ।**
**गजोपविष्टौ भूदेवौ यातामादाय भासुरौ ॥ १५ ॥**

गजोपविष्टौ गजोपरि निषण्णौ भूदेवौ ब्राह्मणौ । भासुरौ तेजोमयौ अम्बुसम्भृतौ उदकपूर्णौ शातकुम्भमयौ सुवर्णमयौ कुम्भौ कलशौ । इभकुम्भे गजस्य कुम्भस्थले आदाय यातां गच्छताम् । भासुराविति भूदेवविशेषणं वा ।

वृषभा इति ।

**वृषभा धवलास्स्निग्धा विषाणप्रोतभूषणाः ।**
**हेमघण्टारणत्कण्ठा यान्तु क्षौमावृताङ्गकाः । ॥ १६ ॥**

धवलाः चन्द्रवर्णाः स्निग्धाः मसृणाः । एतेन मांसलत्वं सूचितं । विषाणेषु शृङ्गेषु प्रोतानि भूषणानि सुवर्णाभरणानि येषान्ते । कनककोशालङ्कृतशृङ्गा इति यावत् । हेमघण्टाभिः रणन् शब्दायमानः कण्ठः येषान्ते । क्षौमावृताङ्गकाः दुकूलाच्छादिताङ्गकाः । कन्प्रत्ययेन चरमाङ्गं सूच्यते । वृषभाः । यान्तु प्रत्युद्गच्छन्तु ।

आतोद्यानीति ।

**आतोद्यान्यनवद्यानि हृद्यान्यद्यतनानि च ।**
**तत्कोविदास्समादाय वादयन्तोऽभियान्तु तम् ॥ १७ ॥**

अनवद्यानि निर्दुष्टानि हृद्यानि आकारतः नादतश्च हृदयङ्गमानि । अत एव अद्यतनानि नूत्नतया समुत्पादितानि । आतोद्यानि चतुर्विधवाद्यानि तत्कोविदाः वाद्यवादननिष्णाताः समादाय साकल्येनादाय वादयन्तस्सन्तः । तं श्रीकृष्णं अभियान्तु ।

गच्छतेति ।

**गच्छत स्यन्दनैर्यूयं राजभूषोज्वला हरिम् ।**
**ससैन्यास्सादरं नम्रास्समानयत माधवम् ॥ १८ ॥**

यूयं राजयोग्यभूषणोज्वलास्सन्तः । सैन्यसमेतास्सन्तः । स्यन्दनैः रथैः हरिं प्रति श्रीकृष्णं प्रति गच्छत । गत्वा च नम्रास्सन्तः विनयानतास्सन्तः । माधवं श्रियः पतिं सादरं यथा तथा सप्रेमातिशयं यथा तथा । समानयत मन्नगरीं प्रापयतेत्यर्थः । राजभूषोज्वला इत्यनेन निजवैभवप्रदर्शनार्थं न । किन्तु सनैच्यं इदन्तु वैभवं भवदनुग्रहाधीनमिति सूचनार्थमिति सूच्यते ।

इतीति ।

**इत्युक्त्वा विरते राज्ञि क्रोधताम्रायतेक्षणः ।**
**कर्णाभिचोदितो मानी तातं दुर्योधनोऽब्रवीत् ॥ १९ ॥**

इति पूर्वोक्तप्रकारेण । उक्त्वा निजाशयं प्रकाश्य राज्ञि धृतराष्ट्रे विरते सति अङ्गीकृतमौने सति । स्वतः मानी चित्तसमुन्नतिविशिष्टः दुर्योधनः कर्णेन अभितः चोदितस्सन् प्रेरितस्सन् अत एव क्रोधेन कृष्णस्तोत्रकन्दलितेन कोपेन ताम्रायतेक्षणः रक्तविततलोचनस्सन् । तातं कृष्णपक्षपातिनं धृतराष्ट्रं प्रति । अब्रवीत् वक्ष्यमाणप्रकारेणोवाच ।

उक्तिप्रकारमाह । प्रारब्धेति ।

**प्रारब्धा पुनरप्यत्र स्तुतिस्तस्य दुरात्मनः ।**
**त्वत्सहाया जरन्तोऽमी वयोविक्लबमानसाः ॥ २० ॥**

अत्र अस्मत्सभायां। तस्य दुरात्मनः इत्यनेन श्रीकृष्णनामग्रहणमप्यसह्यमिति सूच्यते। स्तुतिः असम्भवद्गुणकथनमित्यर्थः। पुनरपि प्रारब्धा उपक्रान्ता। पुनरपीत्यनेन पूर्वमस्मद्बलात्कारेण निरुद्धा इदानीं प्रारब्धेति सूच्यते। एवं तन्नुतिकरणे अमी अस्मत्सभां प्रवेशिताः वयसा वार्धक्येन विक्लबमानसाः अस्वस्थमनसः जरन्तः अशक्ताः वृद्धाः त्वत्सहायाः भवत्प्रोत्साहका इत्यर्थः।

व्यासेति।

**व्यासादयो वयोवृद्धास्तत्सौन्दर्यवशीकृताः।**
**जानन्ति नैव तच्चेष्टा लोकगर्हितवञ्चनाः ॥ २१ ॥**

वयोवृद्धाः केवलं वयसैव वृद्धाः न तु ज्ञानेनेत्यर्थः। अत एव तस्य कृष्णस्य सौन्दर्येण रूपमात्रेण वशीकृताः अपहृतहृदया इत्यर्थः। व्यासादयः आदिपदेन इतरे मुनयो गृह्यन्ते। लोकगर्हितवञ्चनाः जगन्निन्दितशाठ्या इत्यर्थः। तच्चेष्टाः कृष्णव्यापारान् न जानन्त्येव। सूक्ष्मबुद्ध्यभावात्। यद्वा अनरालप्रकृतित्वात्।

दिवौक इति।

**दिवौकःपक्षपातेन भक्तमप्यसुरं बलिम्।**
**निर्दयो विप्रलब्धं स पातालं प्रापयत्पदा ॥ २२ ॥**

सः कृष्णः। भक्तमपि कृष्णैकावलम्बनमपीत्यर्थः। असुरं असुरत्वादेवेत्यर्थः। विप्रलब्धं वामनरूपेण वञ्चितं बलिं त्रिलोकाधिपतिं बलिचक्रवर्तिनं। दिवौकःपक्षपातेन देवेषु प्रीत्या निर्दयस्सन् दयाशून्यहृदयस्सन् पातालं अधोलोकं। पदा चरणेन प्रापयत् अनयत्। एतादृशं दयानिधिरिति मायाविरहित इति च व्यासादयस्तुवन्ति। महदिदमाश्चर्यमित्याशयः।

गतेति।

**गतानुगतिको लोकः पारमार्थ्यं न कस्यचित्**
**अस्तौषीज्जरठः कोपि लोकस्तमनुवर्तते ॥ २३ ॥**

लोकः जनः गतानुगतिकः विवेकशून्य इत्यर्थः। स्वबुद्धिर्नैवास्तीत्याशयः। केनचिदविवेकिनानुष्ठितं कर्म समीचीनमसमीचीनं वा विवेकविकलो जनः स्वयमपि कर्तुं यतते न विचारपरो भवति। तदेवाह। कस्यचित् पारमार्थ्यं परमार्थता नास्ति। कोपि अव्यपदिष्टः जरठः वयोवृद्धत्वाद्विवेकविकलस्सन्। अस्तौषीत् स्तोत्रयामास। लोकः जनः मौढ्यात् तं जरठं अनुवर्तते। एवं गतानुगतिकतया जनैरभिष्टुतः विचारपराणान्तु तत्र न कोपि महिमातिशयः इत्याशयः।

गतानुगतिकत्वमेवोपपादयति । जरदिति ।

**जरद्द्रुभङ्गो वातेन तदैतद्गमनञ्च यत् ।**
**तदेतत्काकतालीयं द्रुभङ्क्तेत्यस्य तु प्रथा ॥ २४ ॥**

वातेन चण्डमारुतेन जरद्द्रुभङ्गः भङ्गुरजीर्णतरुभङ्गः । तदा तस्मिन्समये एतस्य कृष्णस्य गमनं चेति यत् । तदेतत् काकागमनमिव तालपतनमिव चाभूत् । अस्य तु कृष्णस्य तु द्रुभंक्ता यमलार्जुनतरुभंक्ता । इति प्रथा प्रसिद्धिः । कृष्णेन नैव पातितौ वृक्षौ । गतानुगतिकत्वेन लोकप्रथा केवलं तस्येत्याशयः ।

केनेति ।

**केन वा धृयते लोके न शिला पुण्यतो यशः ।**
**गोवर्धनगिरेर्वोढेत्यस्य कीर्तिर्महत्तरा ॥ २५ ॥**

लोके इह जगति । केन वा मनुष्यमात्रेणेत्यर्थः । शिला लोष्टकल्पा दृषत् न धृयते सर्वैरपि धृयत एवेत्यर्थः । अस्य कृष्णस्य गोवर्धनगिरेः गोवर्धनाख्यपर्वतस्य वोढेति कीर्तिः यशः महत्तरा दिगन्तविश्रान्ता । अत एव पुण्यतः सुकृतविशेषात् यशः प्राप्यते इति शेषः । पुण्यैर्यशोलभ्यते हीत्याशयः ।

अलगर्द इति ।

**अलगर्दः पदा नुन्नस्तावता किं महद्यशः ।**
**कालीयमर्दनश्श्रीमानिति मौढ्यमहो नृणाम् ॥ २६ ॥**

अलगर्दः जलव्यालः । पदा चरणेन नुन्नः उत्सारितः । तावता तावन्मात्रेण महत् अद्भुततरं यशः किं । यद्वा किं कीदृशमित्यर्थः । न किमपि यश इत्याशयः । तथापि कालीयमर्दनः कालीयाख्यसर्पदर्पनियन्तेति च । अत एव श्रीमान् आश्चर्यरूपश्रीविशिष्ट इति च । जनाः वदन्तीति शेषः । नृणां जनानां मौढ्यं विवेकशून्यता अहो आश्चर्यम् ।

मत्स्येति ।

**मत्स्यादानात्तनैष्पन्द्यो लोष्टपातेन कानने ।**
**हतस्तेन बकः कश्चित्किमत्र महदद्भुतम् ॥ २७ ॥**

मत्स्यस्य मीनस्य आदानाय ग्रहणाय आत्तं अङ्गीकृतं नैष्पन्द्यं निश्चाञ्चल्यं येन स तथोक्तः । कश्चन बकः कानने निर्जनप्रदेशे वने । तेन कृष्णेन लोष्टपातेन मृत्पिण्डपातमात्रेण हतः मारितः । अत्र अस्मिन्विषये किं कीदृशं महदद्भुतं अत्याश्चर्यं । न किमपीत्यर्थः । एवं सत्यपि बकहन्तेति प्रतीतिः ।

पितृभ्यामिति ।

**पितृभ्यां वर्जितो बाल्ये कुग्रामे गोधनार्भकैः ।**
**लोकतन्त्रानभिज्ञोऽयं गोमयोद्धरणे पटुः ॥ २८ ॥**

बाल्ये शैशवे । पितृभ्यां मातापितृभ्यां वर्जितः दूरे त्यक्तः । अत एव कुग्रामे अत्यन्ततुच्छ-ग्रामे गोधनार्भकैः वृषलबालकैस्सह । अयं कृष्णः लोकतन्त्रानभिज्ञस्सन् लोकव्यवहारमजा-नन्सन् गोमयस्य उद्धरणे पटुः समर्थः ।

गोरक्षणायेति ।

**गोरक्षणाय दण्डेन चारयन्गा महावने ।**
**आतपासितगात्रोऽयं मेघश्याम इतीरितः ॥ २९ ॥**

अयं कृष्णः । गोरक्षणाय गवां पालनाय दण्डेन लगुडेन महावने अरण्यान्यां । गाः चारय-न्सन् सञ्चारयन्सन् । अत एव आतपेन सूर्योद्योतेन असितं नीलं गात्रं यस्य स तथोक्तस्सन् मेघश्यामः नीलमेघश्यामः इति ईरितः स्तुतः । अस्य श्यामलिमा न निसर्गजः किन्त्वातपेनेति भावः ।

संस्कार इति ।

**संस्कारः प्रबलो लोके तद्वत्कर्मानुवर्तते ।**
**बाल्ये चौर्यप्रवृत्तोऽयं रुक्मिणीमप्यचूचुरत् ॥ ३० ॥**

लोके संस्कारः चिरानुवृत्तवासना प्रबलः बलवान् । तद्वत् वासनानुगुणमित्यर्थः । कर्म चेष्टा अनुवर्तते स्वयमेवानुसृत्य भवति । बाल्ये शैशवे । अयं कृष्णः चौर्यप्रवृत्तः नवनी-ताद्यपहरणे सक्तः । अत एव रुक्मिणीमपि नवनीतकल्पां शिशुपालाय निश्चितां परदारान् रुक्मिणीमपि । अचूचुरत् अपहृतवान् । एतेन जारत्वं चोरत्वञ्च दृढीकृते भवतः ।

राज्येति ।

**राज्याधिकारहीनस्य गोरक्षणपरस्य च ।**
**तस्य पूजा कथं कार्या न तत्सम्मतिरत्र मे ॥ ३१ ॥**

राज्याधिकारहीनस्य राजत्वविरहितस्य गोरक्षणपरस्य च पांसुलपादवत् गोप्रचारासक्तस्य च तस्य कृष्णस्य । पूजा सपर्या कथं कार्या निर्वर्तनीया । पूजां कर्तुमेव नावकाश इति भावः । तत् तस्मात्कारणात् । अत्र कृष्णपूजाविषये मे चक्रवर्तिनः मम । सम्मतिः अभिप्रायः नास्ति । चक्रवर्तिनो ममानर्हपूजाविधौ सम्मतिरेव नास्तीत्याशयः ।

इतीति ।

**इत्युक्त्वा वलितग्रीवो धार्तराष्ट्रस्सुहृन्मुखम् ।**
**समन्दहासं पश्यंस्तत्स्कन्धबाहुरुपाविशत् ॥ ३२ ॥**

इति पूर्वोक्तप्रकारेण । उक्त्वा धार्तराष्ट्रः निजपितृमताभिज्ञो दुर्योधनः । वलितग्रीवस्सन् परावर्तितकन्धरस्सन् । समन्दहासं यथा तथा निजोक्तिवैचित्र्यसूचनागर्भमन्दहासपूर्वकमित्यर्थः । सुहृन्मुखं कर्णस्य मुखं पश्यन्सन् । तस्य कर्णस्य स्कन्धे भुजशिखरे बाहुः यस्य स तथोक्तस्सन् । उपाविशत् निषसाद ।

अथ विदुरोक्तिमाह । अमर्षेति ।

**अमर्षधुतचित्तोपि स्मयमानोऽथ कोविदः ।**
**सान्त्वपूर्वमुवाचेदमुत्थाय विदुरोऽदरम् ॥ ३३ ॥**

अथ दुर्योधनोक्त्यनन्तरं । विदुरः अमर्षेण क्रोधेन धुतं कम्पितं चित्तं यस्य स तथोक्तस्सन्नपि कोविदः पण्डितः । अत एव स्मयमानस्सन् स्मितविशिष्टस्सन् उत्थाय अदरं यथा तथा निर्भयं यथा तथा । सान्त्वपूर्वं यथा तथा समाधानोक्तिपुरस्सरं यथा तथा । इदं वक्ष्यमाणं वचः। उवाच निजगाद । कोपकलुषितहृदयोपि विदुरः पाण्डित्येन शान्तात्मा सन् सान्त्वोक्तिमेवावोचदित्याशयः ।

उक्तिप्रकारमाह । आत्मेति ।

**आत्मदोषेण गृह्णाति सितानप्यन्यथा गुणान् ।**
**पित्तदोषेण शङ्खस्थं शौक्ल्यं पीततयेव ना ॥ ३४ ॥**

ना मनुष्यः । आत्मदोषेण हेतुना दौर्जन्येनेति यावत् । सितानपि धवलानपि गुणान् तत्तद्वस्तुगतान्सद्गुणान् इति यावत् । अन्यथा तद्विरुद्धतया दोषरूपेणेति यावत् । गृह्णाति जानाति । पित्तदोषेण शङ्खस्थं शौक्ल्यं धवलरूपं पीततयेव पीतवर्णविशिष्टतयेव गृह्णातीत्यर्थः ।

द्विचन्द्रेति ।

**द्विचन्द्रज्ञानतो लोके दुष्टचक्षुर्ब्रवीति ना ।**
**तत्वार्थवेदितारं च द्वौ चन्द्राविति निर्भयः ॥ ३५ ॥**

लोके दुष्टचक्षुः तिमिरावृतनयनः ना मनुष्यः । द्विचन्द्रज्ञानतः असत्यचन्द्रद्वयज्ञानात् निर्भयस्सन् शङ्कारहितस्सन् । तत्वार्थवेदितारं च एक एव चन्द्र इति दृढज्ञानविशिष्टमपीत्यर्थः । द्वौ चन्द्राविति ब्रवीति । भवानेवाज्ञः अहन्तु चन्द्रद्वयं पश्यामि तत्तदेव सत्यमिति साधयति । न पुनस्स्वदोषं प्रत्येति । तद्वद्भवानपीत्याशयः ।

सम्प्रति दुर्योधनदोषमाह भवतेति ।

**भवता द्यूतकृत्येन परस्वमपहृत्य तत् ।**
**यच्चानुभूयते तद्धि शूरकृत्यमनिन्दितम् ॥ ३६ ॥**

भवता मानिना त्वया । द्यूतकृत्येन दुरोदरव्यापारेण परस्वं पाण्डवानां राज्यमित्यर्थः । अपहृत्य वञ्चनया स्वायत्तीकृत्य । तत् राज्यं अनुभूयते इति यत् । तत् अनिन्दितं श्लाघनीयं शूरकृत्यं हि । व्यतिरेकविधया दुर्बलस्त्रीजनेनाप्यननुष्ठितं कर्म कृतवानसि इति सूचितं भवति ।

शिलोच्चयेति ।

**शिलोच्चयबकव्यालादिषु यत्कर्म शौरिणा ।**
**बाल्ये कृतं न तच्चित्रं नापि श्लाघ्यं न सम्मतम् ॥ ३७ ॥**

शिलोच्चयः गोवर्धनपर्वतः बकः बकाख्यासुरः व्यालः कालीयसर्पः आदिना केश्यादयो गृह्यन्ते । एतेषु बाल्ये शैशवे । शौरिणा कृष्णेन यत्कर्म वधरूपं कर्म कृतं । तत् न चित्रं काक्वा चित्रमेवेत्याशयः । अश्चर्यकरं । नापि सर्वश्लाघ्यं न साधुसम्मतं च सर्वत्र काकुरेव । एतादृशं कर्म प्रौढेन वा भवता तावदेकं वा कृतं किमित्याशयः ।

दुर्योधनस्य तामसाचारत्वमाह । तेजस इति ।

**तेजसे महते लोके दुर्जनो द्रुह्यति स्वयम् ।**
**पेचकस्तामसाचारो भास्वतो महसे यथा ॥ ३८ ॥**

दुर्जनः मात्सर्यविशिष्ट इत्यर्थः । स्वयमित्यनेन निष्कारणद्वेषीति सूच्यते । लोके महते तेजसे प्राज्याय पराभिभवनसामर्थ्याय दीप्तये च । तामसाचारः अन्धकारे सञ्चारशीलः तामसप्रकृतिकश्च । पेचकः घूकः भास्वतः सूर्यस्य महसे तेजसे यथा द्रुह्यति । तथेत्यर्थः । घूकतुल्यो भवान् तामसाचारः लोकवन्द्याय तेजसे निर्निमित्तं द्रुह्यतीति भावः । उपमालङ्कारः ।

कर्मणां फलमवश्यंभावीत्याह । कृतमिति ।

**कृतन्तु गतमेवाशु तत्कर्मफलसन्ततिः ।**
**कालानुपालनव्यग्रा कर्मिणं नैव मुञ्चति ॥ ३९ ॥**

मनुष्येण कृतं अनुष्ठितं पुण्यपापरूपं कर्म । तुस्त्ववधारणे । आशु अनुपदमेवेत्यर्थः । गतमेव प्रचलितमेव । कर्म तावच्चिरं न तिष्ठतीति यावत् । तच्च तत् कर्म च । तस्य

लानि सुखदुःखरूपाणि फलानि तेषां सन्ततिः परम्परा कालस्य अनुपालनं निरीक्षणं सिन् व्यग्रा सती दत्तदृष्टिस्सतीत्यर्थः । कर्मिणं कर्मकर्तारं मनुजं नैव मुञ्चति त्यजत्येव । अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभं इत्याशयः ।

तव दुष्कर्मणां फलकालस्समुपनत इत्याह । त्वदिति ।

**त्वत्कर्मशाखिनां पूर्वं पुष्पोद्गम इवाच्युतः ।**
**आगमिष्यत्यथ क्षिप्रं फलं प्रादुर्भविष्यति ॥ ४० ॥**

र्वं प्रथमं तव कर्माण्येव दुष्कृत्यान्येव शाखिनः वृक्षाः तेषां पुष्पोद्गम इव कुसुमादुर्भाव इव। अच्युतः श्रीकृष्णः आगमिष्यति । अथ तदागमनानन्तरं क्षिप्रं अचिरादेव लं दुःखरूपं फलं प्रादुर्भविष्यति। फलप्रादुर्भावात्पूर्वं पुष्पोद्गम इवाच्युतागमनमित्याशयः। यद्वा पुष्पोद्गमः यथा फलप्रादुर्भावं सूचयति तथेत्याशयः । त्वत्कर्मपरिपाककालस्समुपनत इति यावत् । रूपकानुप्राणितोयमुपमालङ्कारः ।

दुर्योधनस्य कर्तव्यमाह । निवेदयामीति ।

**निवेदयाम्यहं तस्माच्छरण्यशरणाभिधम् ।**
**दोहदं परिकल्प्याथ सत्फलं भोक्तुमर्हसि ॥ ४१ ॥**

तस्मात् पूर्वोक्तकारणात् अहं कृष्णमहिमाभिज्ञोहं। निवेदयामि बोधयामीत्यर्थः । बोधनाक्रममाह । शरण्येति । शरण्यशरणाभिधं शरणागतरक्षकाख्यं । एतेन अपराधिनमपि शरणागतं रक्षतीति सूच्यते । दोहदं वृक्षसंस्कारविशेषं परिकल्प्य सम्यग्विधाय अथ दोहदानन्तरं सत्फलं दोहदमहिमातिशयेन स्वादुफलं पुण्यफलमिति यावत् । भोक्तुं अनुभवितुं अर्हसि समर्थो भवसि । शरणागतवत्सलं श्रीकृष्णमेव शरणं प्राप्य राज्यसौख्यमनुभव । तथा नोचेत् चिरकृतानां फलमेव राज्यभ्रंशरूपमनुभविष्यसीत्याशयः ।

दुस्सहवासदोषमाह । राधेय इति ।

**राधेयस्त्वविधेयोऽयं त्वत्सुहृद्भावमाश्रितः ।**
**पातयिष्यत्यधस्त्वां यत्तद्दूरीकुरु तं द्रुतम् ॥ ४२ ॥**

अयं भवत्पार्श्वे समुपविष्टः राधेयः परपुष्टः कर्णः । अत एव अविधेयः स्वतंत्र इत्यर्थः निरङ्कुश इति यावत् । त्वत्सुहृद्भावं भवन्मैत्रीं आश्रितस्सन् प्राप्तस्सन् । यत् यस्मात्कारणात् त्वां कथमपि सत्पथप्रवर्तितबुद्धिमपि भवन्तं अधः नरककूपे इत्यर्थः । यद्वा उच्चस्थानादध इत्यर्थः । पातयिष्यति भ्रष्टं करिष्यतीत्यर्थः । तत् तस्मात्कारणात् तं कर्णं द्रुतं इदानीमेव । दूरीकुरु परित्यज भवतः क्षेमार्थं तत्परित्यागः कार्यः इत्याशयः ।

इतीति ।

**इत्युक्तवति तस्मिंस्तु सर्पो विप्रकृतो यथा ।**
**झडित्युत्थाय राधेयः क्रोधादूचेऽतिनिष्ठुरम् ॥ ४३ ॥**

तस्मिंस्तु विदुरे तु । इति पूर्वोक्तप्रकारेण उक्तवति सति । विप्रकृतः तिरस्कृतः सर्पो यथा भुजग इव झडिति तत्क्षणमेव क्रोधात् रोषावेशात् उत्थाय राधेयः कर्णः अतिनिष्ठुरं यथा तथा । ऊचे वक्ष्यमाणप्रकारेणोवाच । विप्रकृतसर्पोपमानेन शत्रुहननमन्तरा स्वस्थितिर्दुश्शकेति सूच्यते । उपमालङ्कारः ।

न मयाधःपात्यते महाराजः । किन्तु भवद्भिरेवेत्याह । युष्माकमिति ।

**युष्माकं जरतां वाचं शृणुयाद्यदि नः प्रभुः ।**
**अयं सुयोधनश्श्रीमानधः पतति निश्चितम् ॥ ४४ ॥**

अयं मद्वचश्श्रोता नः अस्माकं प्रभुः स्वामी । श्रीमान् सर्वसम्पत्सम्पन्नः सुयोधनः सुष्ठु युद्धाभिज्ञः । जरतां दुर्बलानां गलितवयस्कतया विवेकविकलानां युष्माकं वाचं हितरहितं सद्यः प्रियकरं वचः शृणुयाद्यदि श्रवणे पातयेच्चेत् । अधः पतति राज्यभ्रष्टो भवति । निश्चितं सत्यमित्यर्थः । नायं मद्वचश्श्रवणादधःपतति । किन्तु चक्रवर्ती वर्तते । भवद्वचनश्रवणादेवाधःपततीत्याशयः ।

तदेवोपपादयति । कौन्तेयेति ।

**कौन्तेयपक्षपातेन बोधयन्तस्सुयोधनम् ।**
**यूयं युक्त्या यतध्वेद्य तन्निपाताय वञ्चकाः ॥ ४५ ॥**

वञ्चकाः परप्रतारणशीलाः यूयं । कौन्तेयेषु कुन्तीपुत्रेषु । अत्र कौन्तेयत्वोक्त्या पाण्डुपुत्रत्वं निराकृतं भवति । पक्षपातेन प्रीत्यतिशयेन सुयोधनं युद्धदक्षं अस्मत्प्रभुं प्रति बोधयन्तस्सन्तः शूराः पाण्डवाः तस्माद्युद्धे पराजितो भविष्यसीत्यादिबिभीषिकोक्तिं कथयन्तस्सन्तः युक्त्या तन्निपाताय सुयोधनाधःपातनाय । यतध्वे यत्नवन्तो भवथ ।

मदिति ।

**मद्वचश्श्रवणादेव सम्राड्भूत्वा सुयोधनः ।**
**अनुभुंक्ते हि साम्राज्यं निष्प्रत्यूहं नृपार्चितः ॥ ४६ ॥**

सुयोधनः मद्वचश्श्रवणादेव मम हितोक्तिश्रवणादेव । सम्राट् चक्रवर्ती सन् भूत्वा अत एव नृपार्चितस्सन् सर्वैरपि राजभिः पूजितस्सन् । साम्राज्यं निष्प्रत्यूहं यथा तथा

निरातङ्कमिति यावत्। अनुभुंक्ते हि। हीति प्रसिद्धौ। भवद्भिरेव साक्षादधुना तस्य सार्वभौमत्वं वीक्ष्यते। न परोक्षमिति प्रसिद्धेरर्थः।

कृष्णस्याल्पत्वमाह। वच इति।

**वचःप्रगल्भः कुर्याद्धि वाचैवाणुञ्च पर्वतम्।**
**मनुष्याङ्कूरमात्रं तं कृष्णं वदथ सत्तमम् ॥ ४७ ॥**

वचःप्रगल्भः वाग्मी। वाचैव केवलवचोवैखरीविजृम्भणेनेत्यर्थः। न तु कार्यतः। अणुं च लवमपि पर्वतं सन्तं महत्तरं सन्तं कुर्यात् कर्तुं शक्नुयात्। प्रकृतेप्येवमेव। मनुष्याङ्कूरमात्रं मनुष्येष्वप्यल्पतमं तं पूर्वोक्तं कृष्णं सत्तमं सन्तं पुरुषोत्तमं सन्तं वदथ। वचःप्रगल्भैर्भवद्भिः वाचैव केवलं स तु गोपः श्रेष्ठतां प्रापित इति भावः।

नाहमिति।

**नाहं पश्यामि नुत्यर्हं पाण्डवैरपि यत्कृतम्।**
**न भेतव्यं ततस्तेभ्यः प्रभुणानेन साम्प्रतम् ॥ ४८ ॥**

अहं पाण्डवैः अर्जुनादिभिः। यत् वीर्यकर्म कृतं आचरितं। तदपि कर्म नुत्यर्हं सत् स्तोत्रार्हं सत् न पश्यामि। स्तोतव्यं कर्म तैर्नकिमपि कृतमित्याशयः। ततः तस्मात्कारणात् अनेन प्रभुणा अस्मत्स्वामिना। साम्प्रतं इदानीं तेभ्यः पाण्डवेभ्यः न भेतव्यम्।

भवता न भेतव्यमित्युक्तम्। तर्हि तत्प्रतिभटनसामर्थ्यं न तवास्तीति चेदाह। एक इति।

**एकोऽहमेव धूर्तांस्तान्नयाम्यन्तकमन्दिरम्।**
**न कापि भीतिस्तदलं त्वद्विभीषिकयाऽनया ॥ ४९ ॥**

अहं प्रतिपक्षविक्षोभनदक्षोहं एक एव निस्सहाय एवेत्यर्थः। धूर्तान् कितवान् तान् पाण्डवान्। अन्तकमन्दिरं यमालयं नयामि प्रापयामि। तत् तस्मात्कारणात्। यद्वा तस्मात् पाण्डवात् कापि भीतिः युद्धभयं नास्ति। अनया अद्य वाचोपपादितया त्वद्विभीषिकया अलं। बिभीषिकोक्त्या विरम्यतामित्याशयः।

पाण्डवानां दौर्बल्यमाह। दूतेति।

**दूतभावेन सन्ध्यर्थं प्राहिण्वन्पाण्डवा यदा।**
**शौरिमसत्समीकाद्भीस्तदैव प्रकटीकृता ॥ ५० ॥**

पाण्डवाः सन्ध्यर्थं सन्धिमुद्दिश्य । शौरिं कृष्णं दूतभावेन यदा प्राहिण्वन् प्रेषयामासुः । तदैव पाण्डवैरिति शेषः । असत्समीकात् अस्माभिर्युद्धात् भीः भीतिः प्रकटीकृता प्रकाशिता । भीत्रेत्यादिना पञ्चमी । पाण्डवानामेव युद्धभीतिः । अत एव अस्माभिर्मैत्री-सम्पादनाय कृष्णः प्रेषित इत्याशयः ।

इतीति ।

**इति कर्णेरितां वाचं कर्णान्तर्नीरसन्निभाम् ।**
**आकर्ण्य भीष्मस्सामर्षमब्रवीत्कम्पयन्शिरः ॥ ५१ ॥**

इति पूर्वोक्तप्रकारेण कर्णान्तर्नीरसन्निभां श्रवणान्तःप्रविष्टसलिलवदरुन्तुदां कर्णेरितां कर्णप्रोक्तां वाचं आकर्ण्य भीष्मः सामर्षं यथा तथा सक्रोधं यथा तथा । शिरः मस्तकं कम्पयन्सन् अमर्षकार्यमेतत् । अब्रवीत् वक्ष्यमाणप्रकारेणोवाच ।

वचनप्रकारमाह । कुलेति ।

**कुलानुरूपं वचनं निस्सरत्यनिवारितम् ।**
**रथकारसुतो वेत्ति कथं समिति गौरवम् ॥ ५२ ॥**

कुलानुरूपं निजवंशानुगुणं वचनं अनिवारितं यथा तथा निरर्गलं यथा तथा । निस्सरति । रथकारसुतः सूतपुत्रः समिति गौरवं सभागौरवं युद्धगौरवं च । कथं वेत्ति न जानात्येवेत्यर्थः । राजवंशसमुत्पन्नश्चेत् सभोचितं सगम्भीरं कथयति । युद्धसाहसं च जानाति । सूतपुत्रस्य तादृशसामर्थ्यं कथं वा भवेदित्याशयः ।

वीणेति ।

**वीणावेणुकलाभाजां बाणावलिविमर्दितः ।**
**यदधावत्पुरा तत्तु विस्मृतं शूरमानिना ॥ ५३ ॥**

वीणावेणुकलाभाजां गन्धर्वाणामित्यर्थः । एतेन तेषां धनुर्वेदानभिज्ञत्वं सूचितम् । बाणानां शराणां आवलिभिः परम्पराभिः विमर्दितस्सन् विशेषेण पीडितस्सन् । पुरा घोषयात्रावसरे अधावदिति यत् अबलावत्प्राणरक्षणार्थं क्वाप्यपलायतेति यत् । तत् कर्म शूरमानिना अहमेव शूराग्रणीरित्यहंकारविशिष्टेनानेन विस्मृतम् । तद्यदि स्मृतिपथे वर्तेत तदा नैतादृशी वाणी वदनान्निस्सरेत् । केवलगायकैरभिभूतः प्राणत्राणाय पलायनपरो बभूवेत्याशयः ।

गोप्रेप्सयेति ।

**गोप्रेप्सया गतो मत्स्यं गाण्डीविशरमोहितः ।**
**न्यवर्तत विवस्त्रोऽयमिति यत्को न वेत्ति तत् ॥ ५४ ॥**

अयं विकत्थनपरः कर्णः। गोप्रेप्सया विराटगोधनं प्राप्तुमिच्छया मत्स्यं विराटनगरं गतस्सन् गाण्डीविनः अर्जुनस्य शरेण बाणेन मोहितस्सन् मोहं प्रापितस्सन्। विवस्त्रस्सन् उत्तरापहृतवस्त्रतया विगतपरिधानस्सन्। न्यवर्ततेति यत् निजनगरं प्रति परावर्ततेति यत्। तत् अस्य तच्चरितं को न वेत्ति लोकस्सर्वोपि जानातीत्यर्थः।

भंग्यन्तरेणार्जुनपराक्रममाह। नेति।

**न तारतम्यं मृद्राशिनाक्वोराकारतस्तयोः।**
**एकस्मिन्वसति व्यालो नान्यत्राज्ञास्समं विदुः ॥ ५५ ॥**

मृद्राशिनाक्वोः मृत्तिकाकूटवल्मीकयोः आकारतः रूपेण तारतम्यं व्यत्यासः। वैलक्षण्यमिति यावत्। नास्ति। उभयमप्येकरूपं वर्तते इत्याशयः। तयोः मृद्राशिवल्मीकयोर्मध्ये एकस्मिन् वल्मीके व्यालः सर्पः वसति। अन्यत्र मृद्राशौ न वसति। अज्ञाः मूढाः द्वयमपि समं वल्मीकमपि मृदाशिसमानमेव विदुः। वल्मीककल्पोयमर्जुन इत्यभिप्रायः।

वृक्षेति।

**वृक्षसाधारणो लोके भासते हि शमीतरुः।**
**स तूद्वमति तेजस्स्वमान्तरं घर्षणाद्बहिः ॥ ५६ ॥**

लोके शमीतरुः अग्निगर्भो वृक्षविशेषः। वृक्षसाधारणस्सन् इतरवृक्षसमानरूपस्सन् भासते हि प्रकाशते हि। हीति प्रसिद्धौ। एवं सत्यपि इतरवृक्षापेक्षया वैलक्षण्यमाह। सत्विति। सतु शमीवृक्षस्तु। तुस्तु भेदे। घर्षणात् मथनात् आन्तरं अन्तर्गतं स्वं स्वकीयं तेजः अग्निं बहिः उद्वमति प्रकटयतीत्यर्थः। अर्जुनः मनुष्यसाधारणोपि युद्धप्रसङ्गे परघर्षणान्निजतेजः बहिः प्रकटयतीत्याशयः। व्यतिरेकालङ्कारः।

इतीति।

**इत्युदीर्णं वचश्श्रुत्वा धृतराष्ट्रो विचिन्त्य च।**
**अब्रवीत्सान्त्वयन्पुत्रं कर्तव्यकृतनिश्चयः ॥ ५७ ॥**

इसि पूर्वोक्तप्रकारेण उदीर्णं भीष्मेणोक्तं वचः श्रुत्वा धृतराष्ट्रः। विचिन्त्य च इदानीं पुत्रमतानुवर्तनमनुचितं विदुरभीष्ममतानुयायिना मया भवितव्यमिति विचिन्त्य च। कर्तव्ये सपर्यया श्रीकृष्णानयनरूपे कर्तव्ये कर्मणि। कृतनिश्चयस्सन् कृतनिर्धारणस्सन्नित्यर्थः। अत एव पुत्रं क्रुद्धं दुर्योधनं सान्त्वयन्सन्। अब्रवीत् वक्ष्यमाणप्रकारेणोवाच।

उक्तिप्रकारमाह। बह्विति।

**बहुश्रुता महान्तो हि शास्त्रविश्वासशालिनः।**
**हितं वदन्ति श्रोतव्यं तस्मादस्माभिरादरात् ॥ ५८ ॥**

हि यस्मात्कारणात् । बहुश्रुताः सर्वशास्त्रवेत्तारः शास्त्रविश्वासशालिनः अभ्यस्तशास्त्ररीत्या अनुष्ठातार इत्यर्थः । अत एव महान्तः लोकपूज्याः । हितं उत्तरत्र सुखफलप्रदं वचः वदन्ति उपदिशन्तीत्यर्थः । तस्मात्कारणात् अस्माभिः अज्ञैरस्माभिः । आदरात् प्रीतिपूर्वकं सौत्सुक्यमिति यावत् । श्रोतव्यम् । तेषां वचनश्रवणादेवास्माकमभ्युदय इत्याशयः ।

तर्हि इदानीं किंकरणीयमिति चेत्तदाह । कारुभिरिति ।

**कारुभिः कारयाद्यैव दर्शनीयां पुरीमिमाम् ।**
**पौरास्सज्जा भवन्तु श्व इति घोषय सर्वतः ॥ ५९ ॥**

अद्यैव अस्यां रजन्यामेवेत्यर्थः । कारुभिः शिल्पिभिः इमां मदीयां पुरीं हास्तिननगरीं दर्शनीयां सतीं विविधविचित्रालङ्कारैः दृगासेचकरूपां सतीं । कारय । श्वः प्रभातसमय एवेत्यर्थः । पौराः पुरवासिन्यः प्रजाः सज्जास्सन्तः यात्रानुगुणवेषभूषादिभिस्सिद्धास्सन्तः भवन्तु । विध्यर्थे लोट् । इति एवंरीत्या सर्वतः । राजधान्यां सर्वत्र घोषय प्रकटयेत्यर्थः ।

तदन्विति ।

**तदनु तदनुयायी बन्धुमित्रादिबृन्दैः**
**भव सविनयमाराद्दर्शितोदारभक्तिः ।**
**गृहमुपनय कृष्णं मामकं वाद्यघोषैः**
**अहमपि कृतकृत्यस्स्यां तदाराधनेन ॥ ६० ॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणमहाकविविरचिते**
**अद्भुतदूताख्यकाव्यरत्ने**
**षष्ठस्सर्गः ।**

तदनु सर्वसज्जीकरणानन्तरं । बन्धुमित्रादिबृन्दैः बन्धवः अनुजमातुलादयः मित्रं कर्णः आदिपदेन गुरुप्रमुखाः सर्वपरिकराः गृह्यन्ते । एतेषां बृन्दैः समूहैः उपलक्षितस्सन् आरात् दूरात् । दर्शितोदारभक्तिस्सन् प्रकाशितामितप्रीतिस्सन् । सविनयं प्रह्वभावेन तत् कृष्णं अनुसृत्य यातीति तदनुयायी सन् भव । प्रह्वभावेन कृष्णमनुवर्तस्व मा प्रकाशय भवतो मानमित्याशयः । वाद्यघोषैस्सह मङ्गलवादित्रैस्समं कृष्णं । मामकं मदीयं गृहम् । सौधमिति वक्तव्ये स्वनैच्यप्रदर्शनाय गृहमित्युक्तम् । उपनय आनयेत्यर्थः । अहमपि तद्दर्शनासमर्थोऽहमपि तदाराधनेन श्रीकृष्णाराधनेन कृतकृत्यस्सन् निर्वर्तितकर्तव्यकर्मा सन् धन्यस्सन्निति यावत् । स्यां भवेयम् । श्रीकृष्णाराधनेनैव धन्यता नान्यथेत्याशयः ।

भगवता लक्ष्मीदासेन अनुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
षष्ठस्सर्गः ।

॥ श्रीः ॥

# सप्तमस्सर्गः ।

कविरिदानीं वृकस्थलात् हास्तिनपुरं प्रति कृष्णयात्रां वर्णयितुं सप्तमं सर्गमारभते । प्रथमं तावदुषःकालं वर्णयति । पूर्वेति ।

**पूर्वदिग्गरुडपूर्वजाञ्चिता**
**दूरसारिततमिस्रकुन्तला ।**
**आबभौ हरिदिदृक्षया चल-**
**त्तारकेव वनिता सयावका ॥ १ ॥**

गरुडपूर्वजेन अरुणेन अञ्चिता अलङ्कृता । अत एव दूरं सारितं प्रणुन्नं यत्तमिस्रं तमः तदेव कुन्तलः अलकः यया सा । पूर्वदिक् प्राची हरित् । चलत्तारका सती विगलन्नक्षत्रा सती चञ्चलकृष्णकनीनिका सती च । हरिदिदृक्षया यात्रोन्मुखकृष्णदर्शनेच्छया सयावका लाक्षा-रसालङ्कृता वनितेव ललनेव । आबभौ आसमन्ताच्चकाशे । रूपकसङ्कीर्णोयमुपमालङ्कारः ।

तात्कालिकपरभागमाह । मन्देति ।

**मन्दमन्दमपयातरक्तिमा**
**भास्वदुस्रधवलायितान्तरा ।**
**यौवनव्यतिकरेण केरली-**
**गण्डभित्तिरिव सा हरिद्बभौ ॥ २ ॥**

मन्दमन्दं क्रमक्रमशः । अपयातरक्तिमा विगलितारुणकान्तिः । भास्वतः सूर्यस्य उस्रैः किरणैः धवलायितं धवलवदाचरितं अन्तरं मध्यप्रदेशः यस्यास्सा । सा प्राची हरित् दिक् यौवनव्यतिकरेण तारुण्यसम्बन्धेन । केरल्याः केरलदेशजायाः मुग्धायाः गण्डभित्ति-रिव कपोलस्थलीव । बभौ प्राकाशत । क्रमविगलदारुण्या सूर्योदयात्प्राक् ऊर्ध्वप्रसरणशीलैः किरणैर्धवलायमाना प्राचीदिक् केरलमुग्धाकपोलस्थलीव व्यलसदित्याशयः । उपमालङ्कारः ।

क्रमशस्तमोविगलनमाह । भूरुहा इति ।

**भूरुहाः प्रकटितात्मशाखिकाः**
**स्रस्तसान्द्रतिमिरा लसद्दलाः ।**
**व्यक्ततामुपगता इवाबभुः**
**रेखया विलिखितास्तु वर्णकैः ॥ ३ ॥**

स्रस्तसान्द्रतिमिराः विगलितनिबिडतरतमसः । अत एव प्रकटिताः प्रकाशिताः आत्मनां शाखिकाः क्षुद्रशाखाः यैस्ते । लसद्दलाः व्यक्तीभूतपत्राः भूरुहास्तु वृक्षास्तु । रेखया रेखामात्रेण विलिखिताः वर्णकैः तत्तत्स्थानानुगुणवर्णविशेषैः व्यक्ततां स्फुटतां उपगता इव कारिता इवेत्युत्प्रेक्षा । आबभुः आसमन्ताच्चकाशिरे । क्रमक्रमगलिततमिस्रतया क्रमशो व्यक्तीभूताः वृक्षाः रङ्गाजीवेन प्रथमं रेखामात्रविन्यस्ताः ततः वर्णविशेषैः स्फुटीकृता इव चकाशिरे इत्याशयः ।

नीलेति ।

**नीलचेलपरिगुण्ठनं क्रमा-**
**त्सम्प्रणुद्य परिदर्शिता इव ।**
**सान्द्रनीलतिमिरौघनिर्गमा-**
**द्रेजिरे गिरिवरास्समन्ततः** ॥ ४ ॥

क्रमात् नीलचेलपरिगुण्ठनं असितवर्णवस्त्रेण परितः स्थगनं । सम्प्रणुद्य सम्यगुद्धाट्य परिदर्शिता इव परितः प्रकटिता इवेत्युत्प्रेक्षा। सान्द्राणि निबिडानि यानि नीलतिमिराणि तेषामोघः तस्य निर्गमः अपगमः तस्माद्धेतोः । समन्ततः काष्ठाचतुष्टयभागेष्वपीत्यर्थः। गिरिवराः पर्वतश्रेष्ठाः रेजिरे । नीलपटावगुण्ठिताः पदार्थाः अवगुण्ठनोद्धाटनेन यथा सुस्पष्टं दृष्टिगोचरा भवन्ति । तथा तिमिरापनयात्पर्वताः दृष्टिगोचरा बभूवुरित्याशयः।

उद्धृतेति ।

**उद्धृतेव तिमिराम्बुमज्जिता**
**नक्तदैत्यपतिना वसुन्धरा ।**
**प्रातराख्यकिटिना बभौ क्रमा-**
**द्व्यक्तशैलनगरीसरोवना** ॥ ५ ॥

नक्तदैत्यपतिना रात्रिरेवासुरः तेन तिमिरमेवाम्बु समुद्रजलं तस्मिन् मज्जिता वसुन्धरा भूमिः । प्रातराख्यकिटिना प्रभाताभिधादिवराहेण उद्धृतेव अन्धकाराख्यजलोदरात् समुद्धृतेवेत्युत्प्रेक्षा । क्रमात् व्यक्तशैलनगरीसरोवना सती विविच्य परिदृष्टगिरिनगरसरोवरारण्या सती बभौ । सलिले मग्नं वस्तु तस्मादुत्थानावसरे यथा क्रमशः अग्रभागान्मूलपर्यन्तं दृश्यते । तथा तिमिरापगमे वसुन्धरा दृष्टेत्याशयः । रूपकसङ्कीर्णेयमुत्प्रेक्षा ।

हैमनेनेति ।

हैमनेन पवनेन बाधिताः
पक्षिणोप्यलसतामुपाश्रिताः ।
कोटराद्बहिरुपागताः क्षणं
भूरुहां विटपमेव भेजिरे ॥ ६ ॥

हैमनेन हिमकरम्बितेन पवनेन वायुना । बाधिताः पीडिताः पक्षिणोपि पतगा अपि अलसतां आलस्यं जाड्यमिति यावत् । उपाश्रितास्सन्तः प्राप्तास्सन्तः । कोटरात् स्वस्वनीडात् बहिः उपागताः । क्षणं क्षणकालं भूरुहां वृक्षाणां विटपमेव शाखामेव । भेजिरे सिषेविरे । प्रबुद्धाः पक्षिणोपि जडपवनबाधिताः समुड्डयनेप्यलसाः क्षणकालं शाखास्वेव निषेदुरित्याशयः ।

भास्कर इति ।

भास्करः करमुखेन सारय-
न्शैलशृङ्गहिमसन्ततिं शनैः ।
उत्पपात गगनं हिमोद्भवां
पादतः परिहरन्निव व्यथाम् ॥ ७ ॥

भास्करः सूर्यः । करमुखेन किरणाग्रेण पाण्यग्रेण शैलशृङ्गे पर्वताग्रे यानि हिमानि तेषां सन्ततिं परस्परां । सारयन्सन् दूरमुत्सारयन्सन् हिमोद्भवां तुहिनजनितां व्यथां पीडां पादतः किरणैः चरणाभ्यां च । परिहरन्निव अपनुदन्निवेत्युत्प्रेक्षा । गगनं आकाशं शनैः मन्दं उत्पपात उदलंघयत् । यथा जनः पथि पतितं कण्टकजालं पाणिभ्यामुत्सारयन् चरणतो व्यथां परिहरंश्च समुत्पतति । तथेत्याशयः । एतादृशाप्रस्तुतवृत्तान्तस्य स्फुरणात्समासोक्तिः । उत्प्रेक्षासमासोक्त्योस्सङ्करः ।

अथ श्रीकृष्णस्य प्रबोधमाह । वन्दीति ।

वन्दिबृन्दगदितेन सुस्वरं
बोधितस्तुतिशतेन माधवः ।
पाणिना परिमृजन्स्वचक्षुषी
तल्पतस्समुदतिष्ठदञ्जसा ॥ ८ ॥

माधवः श्रियःपतिः कृष्णः। अत्र माधवत्वोक्त्या शयनावसरे लक्ष्मीसान्निध्यं सूचितम्। सुस्वरं यथा तथा मधुरगानं यथा तथा। वन्दिबृन्दैः स्तुतिपाठकसमूहैः गदितेन प्रोक्तेन स्तुतिशतेन नानाविधस्तोत्रेण बोधितस्सन् प्रतिबोधितस्सन्। स्वचक्षुषी निजनयनपुण्डरीकद्वयं पाणिना करतलेन परितः मृजन्सन् मर्दयन्सन्नित्यर्थः। अञ्जसा समुदतिष्ठत् उत्तस्थौ। स्वभावोक्तिः।

समुत्थानानन्तरकार्यमाह। इन्द्रेति।

**इन्द्रनीलमणिपट्टसन्निभे**
**लम्बमानमलिके सुकुन्तलम्।**
**पाणिपङ्कजदलैस्समुन्नय-**
**मुद्बबन्ध घनकेशसञ्चयम् ॥ ९ ॥**

माधवः इति शेषः। इन्द्रनीलमणिः मरकतरत्नं तस्य पट्टः फलक इत्यर्थः। तत्सन्निभे तत्सदृशे अलिके ललाटे लम्बमानं डोलायमानं सुकुन्तलं भङ्गुरालकं। पाणिपङ्कजदलैः कमलदलसदृशकराङ्गुलिभिः। समुन्नयन्सन् ऊर्ध्वदेशमुत्सारयन्सन् घनकेशसञ्चयं निबिडतरचिकुरकलापं। यद्वा घनवन्नीलस्निग्धशिथिलचिकुरकलापं। उद्बबन्ध उत्तम्भयामास। स्वभावोक्तिः।

धारागेहप्रवेशमाह। साङ्गेति।

**साङ्गभङ्गपरिजृम्भणं शनैः**
**सात्यकिं च परिबोध्य चालयन्।**
**शौरिराशु शयनालयान्मुदा**
**स्नानगेहमविशत्सुहृद्युतः ॥ १० ॥**

शौरिः श्रीकृष्णः। शनैः मन्दं अङ्गभङ्गेन जृम्भणेन च सहितं यथा तथा। सात्यकिं च शनैः मन्दं चालयन्सन् परिबोध्य मुदा सुहृद्युतस्सन् सात्यकिसहितस्सन्। शयनालयात् शय्यागारात् स्नानगेहं आशु त्वरिततरं। भाविकार्यदृष्ट्या त्वरितातिशयः। अविशत्।

तत्र मुखकमलप्रक्षालनमाह। भृत्येति।

**भृत्यवर्गपरिकल्पिते ततो**
**विष्टरे समुपविश्य केशवः।**

**कोष्णनीरपरिधाविताननः**
**स्नानवेदिमधितिष्ठति स्म सः ॥ ११ ॥**

ततः स्नानगेहप्रवेशानन्तरं । सः सुहृद्युतः केशवः प्रशस्तकेशश्श्रीकृष्णः । भृत्यवर्गेण परिचारकगणेन परिकल्पिते कृष्णयोग्यतया सज्जीकृते विष्टरे पीठे समुपविश्य । कोष्णनीरेण उपभोगानुकूलमन्दोष्णसलिलेन परिधावितं प्रक्षालितं आननं मुखकमलं येन स तथोक्तस्सन् । अत्र दन्तधावनमपि विवक्षितं । स्नानवेदिं स्नानार्थं परिकल्पितां वेदिकां अधितिष्ठति स्म उपविवेशेति यावत् ।

कृष्णाभिषेकमाह । तत्रेति ।

**तत्र कुङ्कुमपटीरचूर्णकै-**
**र्मेलितेन सदुशीरमिश्रितैः ।**
**पाथसा परिजनैर्गदाधरः**
**स्नापितो व्यलसदिन्द्रनीलवत् ॥ १२ ॥**

तत्र स्नानगृहे । यद्वा तस्मिन्पीठे । गदाधरः श्रीकृष्णः सदुशीरमिश्रितैः परिमलविशिष्टतृणविशेषसङ्कलितैः कुङ्कुमपटीरचूर्णकैः काश्मीरजन्मचन्दनक्षोदैः । मेलितेन मिश्रितेन पाथसा तीर्थेन परिजनैः परिचारकजनैः कर्तृभिः । स्नापितस्सन् अभिषेचितस्सन् । इन्द्रनीलवत् मरकतमणिरिवोज्ज्वलदिव्यमङ्गलविग्रहस्सन् । रराज । उपमालङ्कारः ।

स्नानानन्तरं तदलङ्कारानाह । पीतेति ।

**पीतचेलपरिधानभासुरः**
**फालमञ्जुमृगनाभिचित्रकः ।**
**गन्धबन्धुरपटीरचर्चितः**
**पुष्पमाल्यकमनीयकन्धरः ॥ १३ ॥**

कृष्णः पीतचेलमेव पीताम्बरमेव परिधानं अधोंशुकं तेन भासुरः उज्वलस्सन् । फाले ललाटे मञ्जु यथा तथा मनोहरं यथा तथा मृगनाभिचित्रकं कस्तूरीतिलकं यस्य स तथोक्तस्सन् । गन्धबन्धुरपटीरचर्चितः परिमलभरितचन्दनानुलिप्तस्सन् । पुष्पमाल्येन मनोहरकुसुममालया कमनीया स्पृहणीया कन्धरा यस्य स तथोक्तस्सन् । बभाविति शेषः ।

अलङ्कारानन्तरं नित्यकर्मानुष्ठानमाह । नित्येति ।

**नित्यकर्म स विधाय सर्पिषा**
**जातवेदसमुपास्य भक्तितः ।**
**भूसुरान्निगमपारदृश्वनो**
**माधवः प्रणिपपात सस्मितम्** ॥ १४ ॥

सः निर्वर्तितस्नानः माधवः । नित्यकर्म सन्ध्यावन्दनादिकं विधाय निर्वर्त्य । सर्पिषा आज्येन जातवेदसं अग्निं भक्तितः भक्तिपुरस्सरं उपास्य आराध्य । निगमपारदृश्वनः वेदपारङ्गतान् भूसुरान् श्रोत्रियान् सस्मितं यथा तथा मन्दहासपूर्वकमित्यर्थः । प्रणिपपात नमश्चक्रे ।

अनन्तरं फलाहारमाह । पीतनेति ।

**पीतनाच्छहिमवालुकैलका-**
**शर्करामधुरकोष्णदुग्धकम् ।**
**स्वादु पक्वकदलीफलं मुदा**
**प्राग्रहीत्स सुहृदा समन्ततः** ॥ १५ ॥

ततः पूज्यपूजानन्तरं । सः श्रीकृष्णः सुहृदासमं सात्यकिना सह पीतनं काश्मीरजन्म अच्छहिमवालुका शुभ्रतरघनसारः एलका एलाक्षोदः शर्करा सिता एताभिः मधुरं स्वादुतरं कोष्णं च उपभोगार्हमन्दोष्णं च दुग्धं क्षीरं यस्य तत्तथोक्तं । यद्वा कोष्णं च तत् दुग्धं च इति कर्मधारयः । स्वादु रसभरितं पक्वकदलीफलं स्वयं पक्वकदलीफलं । मुदा प्राग्रहीत् अङ्गीचकार । बुभुजे इति यावत् ।

अभ्यवहारानन्तरं यात्रार्थं रथानयनमाह । दारुक इति ।

**दारुको रथवरं कनज्झण-**
**त्किङ्किणीगणपताकिकाञ्चितम् ।**
**शेषभोगमसृणाच्छवाजिनं**
**द्वारदेशमनयत्खगध्वजम्** ॥ १६ ॥

दारुकः दारुकाख्यस्सारथिः । कनज्झणत्किङ्किणीगणपताकिकाञ्चितं दीप्तझणत्कारविशिष्ट-क्षुद्रघण्टिकासमूहैः क्षुद्रपताकाभिश्च अलङ्कृतं । शेषभोगवत् आदिशेषशरीरवत् मसृणाः स्निग्धाः अच्छाश्च धवलाश्च वाजिनः अश्वाः यस्य स तथोक्तः तं । रथवरं रथोत्तमं द्वारदेशं द्वारस्य पुरोभागं । अनयत् प्रापयामास ।

सङ्घश इति ।

**सङ्घशः पुरजना रथान्तिकं**
**प्राप्य विस्मयकुतूहलाकुलाः ।**
**निर्निमेषनयना विलोक्य तं**
**प्रोचुरेवमवशाः परस्परम् ॥ १७ ॥**

पुरजनाः वृकप्रस्थवासिनो जनाः । सङ्घशः सङ्घीभूयेत्यर्थः । रथान्तिकं स्यन्दनसमीपं प्राप्य उपेत्य । विस्मयकुतूहलाकुलास्सन्तः आश्चर्यकौतुकाक्रान्तास्सन्तः । अत एव निर्निमेषनयनास्सन्तः उत्फुल्ललोचनास्सन्तः । तं रथवरं विलोक्य अवशास्सन्तः तत्सौन्दर्यमग्नहृदयास्सन्तः । परस्परं एवं वक्ष्यमाणरीत्या । प्रोचुः निजगदुः ।

सप्तभिः पद्यैः पौरमुखेन रथं वर्णयति । पश्येति ।

**पश्य हेमकलशोऽस्य मस्तके**
**पद्मरागहरिताश्मरञ्जितः ।**
**भाति कान्तिसलिलोदरोद्गतः**
**पङ्कजस्य मुकुलो यथोन्मुखः ॥ १८ ॥**

पद्मरागहरिताश्मरञ्जितः माणिक्यमरकतरागविशिष्टः हेमकलशः स्वर्णमयकलशः । अस्य रथस्य मस्तके शिरोभागे । कान्तिरेव सलिलं तस्योदरात् अन्तःप्रदेशात् उद्गतः समुत्पन्नः उन्मुखः ऊर्ध्वमुखः । पङ्कजस्य कमलस्य मुकुलो यथा कोरक इव भाति । पश्य तमवलोकय । मरकतखचिताधःप्रदेशतया । प्रत्युप्तपद्मरागमयोर्ध्वप्रदेशतया च कुड्मलाकारतया च कमलकोरकसादृश्यमभिहितम् । उपमालङ्कारः ।

हन्तेति ।

**हन्त पश्य गरुडः पुमानिव**
**स्वर्णवर्णरमणीयविग्रहः ।**
**विस्तृतायतगरुद्विराजते**
**डीयमान इव वायुना ध्वजे ॥ १९ ॥**

पुमानिव पुरुषसदृशः । दिव्यपुरुषाकार इति यावत् । स्वर्णवर्णरमणीयविग्रहः सुवर्णकान्तिमनोहरशरीरः गरुडः । ध्वजे केतुपटे विस्तृतायतगरुत्सन् विततविशालपक्षपुटस्सन् वायुना हेतुना । डीयमान इव डयनतत्पर इवेत्युत्प्रेक्षा । विराजते । तं पश्य ।

हन्तेत्याश्चर्ये । दिव्यपुरुषाकारो गरुडः विस्तृतपक्षः वायुना चालितध्वजपटतया दीप्यमान इव दृश्यते इत्याशयः ।

शातकुम्भेति ।

**शातकुम्भमयपुष्पतोरणं**
**स्थूलमौक्तिककलापमञ्जुलम् ।**
**हेमचित्रितविटङ्कमस्य यत्**
**छादनं लसति तद्विलोकय ॥ २० ॥**

शातकुम्भमयानि कनकनिर्मितानीति यावत् यानि पुष्पाणि तेषां तोरणं वन्दनमालिका यस्य तत् । यद्वा शातकुम्भमयः पुष्पतोरणः यस्य तत्तथोक्तं । स्थूलानि यानि मौक्तिकानि मुक्ताफलानि तेषां कलापः गुच्छ इत्यर्थः । तेन मञ्जुलं दर्शनीयं हेमचित्रितं कनकेन पत्रभङ्गादिरूपेण चित्रीकृतं विटङ्कं कपोतपालिका यस्य तत्तथोक्तं । अस्य रथस्य यच्छादनं उर्ध्वप्रदेशस्वर्णमयावगुण्ठनं । लसति प्रकाशते । तत् आच्छादनं विलोकय।

हाटकेति ।

**हाटकोज्वलरसालपल्लवः**
**पत्रभङ्गसुभगाश्रिशोभितः ।**
**हेमनिर्मितविनम्ररम्भकः**
**स्तम्भ एष नयनं विकर्षति ॥ २१ ॥**

हाटकेन सुवर्णेन उज्वलाः दीप्ताः रसालपल्लवाः चूतकिसलयानि यस्य स तथोक्तः । पत्रभङ्गैः विविधलतादिरूपचित्रविशेषैः सुभगाश्रिभिः मनोहरकोणप्रदेशसन्निवेशैः शोभितः । हेम्ना कनकेन निर्मिता विनम्रा च रम्भका क्षुद्ररम्भास्तम्भः यस्य स तथोक्तः । एषः पुरोदृश्यमानः स्तम्भः । नयनं विकर्षति स्वाधीनं करोति । तत्र लग्नं नयनं सौन्दर्यातिशयेन नान्यत्र गच्छतीत्याशयः ।

नीलेति ।

**नीलजालपरिगुण्ठिताङ्गकाः**
**शेषभोगविमला हया इमे ।**
**अन्तरप्रसृतचन्द्रघृष्टयो**
**भान्ति मेचकघना इवोज्वलाः ॥ २२ ॥**

नीलजालैः असिततन्तुरचितसूक्ष्मजालिकाभिः परिगुण्ठितानि परितः निचोलितानि अङ्गकानि स्वार्थे कन्। येषान्ते। शेषभोगवत् आदिशेषशरीरवत् विमलाः धवलाः इमे रथयोजिताः हयाः। अन्तरप्रसृताः अभ्यन्तरप्रविष्टाः चन्द्रघृष्टयः चन्द्रमयूखाः येषान्ते। अत एव उज्वलाः दीप्ताः मेचकघना इव नीलमेघा इव। भान्ति। स्वभावतः चन्द्रकिरणवत् रुचिरधवलगात्राः नीलजालिकावगुण्ठिततया चन्द्रकिरणकरम्बिताः नीलमेघा इव हयाः प्रकाशन्ते इत्याशयः। उपमालङ्कारः।

पीठमिति।

**पीठमत्र मृदुहंसतूलिका-**
**तल्पजुष्टमुपधानमण्डितम्।**
**सिह्मपादधृतमच्छछत्रकं**
**मध्यभाक्कथमिवाभिशोभते ॥ २३ ॥**

अत्र रथे। मृदुहंसतूलिकातल्पजुष्टं कोमलहंसतूलिकाकृतास्तरणरूपतल्पोपेतमित्यर्थः। उपधानेन चरमाङ्गसाचीकरणानुकूलताद्दशोपबर्हेण मण्डितं अलङ्कृतं। सिह्मपादचतुष्टयेन धृतं। सिह्मपादचतुष्टयविशिष्टमिति यावत्। अच्छछत्रकं अनतिविततश्वेतच्छत्रपरिष्कृतं। मध्यभाक् रथाभ्यन्तरमध्यदेशे प्रतिष्ठापितं पीठं आसनं। सिह्मासनमिति यावत्। कथमिवाभिशोभते अनिर्वचनीयशोभाविशिष्टमिति यावत्।

भावेति।

**भावभङ्गिपरिभङ्गुराङ्गक-**
**स्फीतनृत्यपटुपुत्रिकागणम्।**
**स्यन्दनस्य तलकाञ्चनाञ्चलं**
**कस्य वा न जनयेच्च विस्मयम् ॥ २४ ॥**

भावभङ्गिभिः आशयाविष्करणरीतिभिः भङ्गुराणि वक्राणि यान्यङ्गानि नेत्रभुजाद्यवयवाः तेषां स्फीतनृत्यं सुस्पष्टाभिनय इत्यर्थः। तस्मिन् पटुः चतुरः पुत्रिकाणां पाञ्चालिकानां गणः समूहः पङ्क्तिरिति यावत् यस्मिंस्तत्। स्यन्दनस्य रथस्य यत्तलं सिह्मासनाधारभूतमधस्स्थलं तस्य काञ्चनाञ्चलं कनकमयपर्यन्तप्रदेशः। कस्य वा मनुष्यस्य विस्मयं आश्चर्यं न जनयेच्च सर्वस्यापि विस्मयं जनयेदेवेत्यर्थः। विविधविचित्रनर्तनपरपाञ्चालिकापङ्क्तिपरिष्कृतः रथतलपर्यन्तप्रदेशः विस्मयावह इत्याशयः।

इतीति ।

**इत्युदीर्य मनुजाः परस्परं**
**वीक्ष्य वीक्ष्य नहि तृप्तिमाययुः ।**
**दारुकोऽथ विनयेन तान्शनैः**
**दूरतस्समपसारयन्स्थितः ॥ २५ ॥**

मनुजाः । इति पूर्वोक्तप्रकारेण परस्परं उदीर्य निर्दिश्य निर्दिश्योक्त्वा । वीक्ष्य वीक्ष्य पौनः-पुन्येन विलोक्य तृप्तिं अलप्रत्ययं नाययुर्हि नैवापुरित्यर्थः । अथ दारुकः विनयेन तान् दर्शनकुतूहलिनो जनान् । शनैः मन्दंमन्दं दूरतः समपसारयन्सन् उत्सारयन्सन् । स्थितः । प्रयाणकालस्सन्निहितः दूरे भवन्तु भवन्तः इति विनयेन तान्दूरतः स्थापयामसेत्याशयः ।

वाद्येति ।

**वाद्यघोषमुखरीकृतं ततो**
**द्वारदेशमधितस्थिवत्सु च ।**
**भूसुरेषु विनयेन सादरं**
**सात्यकिस्तु हरये न्यवेदयत् ॥ २६ ॥**

ततः अनन्तरं । वाद्यघोषैः प्रयाणसूचकमङ्गलवादित्रघोषैः मुखरीकृतं शब्दापितं । द्वारदेशं भवनप्रतीहारप्रदेशं भूसुरेषु ब्राह्मणेषु । सादरं यथा तथा प्रीतिपुरस्सरं यथा तथा अधितस्थिवत्सु सत्सु च उपगतेषु सत्सु । सात्यकिस्तु विनयेन हरये श्रीकृष्णाय न्यवेदयत् विज्ञापयामास ।

द्वारीति ।

**द्वारि तिष्ठति रथोत्तमः प्रभो**
**गन्तुमर्हसि शुभे मुहूर्तके ।**
**हास्तिनं पुरमिति प्रचोद्य तं**
**प्रह्वभावमवलम्ब्य तस्थिवान् ॥ २७ ॥**

हे प्रभो, हे स्वामिन् । रथोत्तमः द्वारि द्वाराङ्कणे तिष्ठति सज्जो वर्तते । शुभे मुहूर्तके गुणभूयिष्ठे मुहूर्ते । हास्तिनं पुरं प्रति गन्तुं अर्हसि । इति तं श्रीकृष्णं प्रचोद्य । प्रह्वभावं विनयं अवलम्ब्य आश्रित्य । तस्थिवान् तस्थौ ।

तत्क्षणमिति ।

**तत्क्षणं मधुरिपुस्समुत्थितो**
**दिव्यभूषणपरिष्कृतस्ततः ।**
**कण्ठलम्बितसमुज्ज्वलाम्बरः**
**पादुकाञ्चितपदो व्यराजत ॥ २८ ॥**

ततः सात्यकिनिवेदनानन्तरं । मधुरिपुः श्रीकृष्णः दिव्यभूषणपरिष्कृतस्सन् सर्वाङ्गीणाभरणस्सन् । कण्ठे लम्बितम् डोलायितं उज्ज्वलाम्बरं पीताम्बरं येन स तथोक्तस्सन् । पादुकाभ्यां अञ्चिते समलङ्कृते पदे यस्य स तथोक्तस्सन् । तत्क्षणं अनुपदमेव समुत्थितस्सन् । व्यराजत प्रयाणार्थं सज्जोऽभवत् ।

सात्यकेरिति ।

**सात्यकेर्मृदुलचेलगुण्ठिते**
**विस्तृते करयुगे पुरस्कृते ।**
**अङ्गुलीयकपरिष्कृतं करं**
**दक्षिणं स तु निधाय निर्गतः ॥ २९ ॥**

स तु श्रीकृष्णस्तु । सात्यकेः मृदुलचेलेन कौशेयेन गुण्ठिते निचोलिते विस्तृते विततीकृते पुरस्कृते पुरःप्रसारिते करयुगे । अङ्गुलीयकैः ऊर्मिकाभिः परिष्कृतं दक्षिणं करं । निधाय निर्गतः प्रतस्थे ।

निर्गत इति ।

**निर्गते च वनमालिनि प्रजाः**
**नाथ जीव शरदां शतं जय ।**
**इत्युदीर्य ददृशुस्तमादरा-**
**द्धर्षबाष्पनयनाः कृताञ्जलि ॥ ३० ॥**

वनमालिनि श्रीकृष्णे निर्गते च सति गृहाद्बहिरागते च सति । प्रजाः द्वारि स्थिता जनाः । नाथ जगद्रक्षणधुरंधर शारदां संवत्सराणां शतं जीव । जय विजयीभव । इति एवं प्रकारेण उदीर्य आदरात् प्रीत्यतिशयात् कृताञ्जलि यथातथा । हर्षेण बाष्पः अश्रुजलं नयने यासां तास्तथ्यः । तं श्रीकृष्णं ददृशुः ।

मन्देति ।

मन्दहासमधुराधरः कृत-
प्राञ्जलिश्च मधुराधिपः प्रजाः ।
पुण्डरीकनयनो विलोकय-
न्स्यन्दनोत्तममुपागमच्छनैः ॥ ३१ ॥

पुण्डरीकनयनः सद्योविकसितविमलाम्भःप्ररूढकमलाभविशालामलविलोचनः । एतेन सौन्दर्यातिशयः कृपाकटाक्षश्च सूच्येते । मधुराधिपः श्रीकृष्णः । मन्दहासेन मधुरः स्पृहणीयः अधरः यस्य स तथोक्तस्सन् । एतेन निजदर्शनार्थं स्थितानां प्रजानां दर्शनजन्यनिरतिशयानन्दस्सूचितः । कृतः प्राञ्जलिः येन स तथोक्तस्सन् । एतेन भक्ताधीनत्वं सूचितं । प्रजाः वृकप्रस्थवासिनो जनान् विलोकयन्सन् । एतेन तद्वियोगासहिष्णुत्वं सूचितं । शनैः मन्दं । एतेन गाम्भीर्यं सूचितं । स्यन्दनोत्तमं रथश्रेष्ठं उपागमत् उपससर्प ।

श्रीकृष्णस्य रथारोहणमाह । दर्शनायेति ।

दर्शनाय भवतामहं पुनः
प्राप्तुमस्मि कुतुकी वृकस्थलम् ।
श्रोत्रियानिति निगद्य भूसुरा-
नारुरोह रथमच्युतो मुदा ॥ ३२ ॥

अच्युतः आश्रितान्नच्यावयतीच्युतः श्रीकृष्णः । अहं इदानीं यात्रोन्मुखोऽहं भवतां मत्सान्निध्यकुतूहलिनां युष्माकं दर्शनाय । दर्शनमेव प्रयोजनं न तु कार्यान्तरमित्याशयः। पुनः वृकस्थलं प्राप्तुं कुतुकी सन् । अस्मि । इति एवंप्रकारेण श्रोत्रियान् वेदविहितकर्मतत्परान् ब्राह्मणान् मुदा निगद्य निवेद्य । रथमारुरोह ।

अधीति ।

अध्यरोहदथ सात्यकी रथं
स्यन्दनाग्रमधिरुह्य दारुकः ।
दक्षिणेन परिगृह्य पाणिना
प्रग्रहान्सकशपाणिराबभौ ॥ ३३ ॥

अथ अच्युतरथारोहणानन्तरं । सात्यकिः रथं श्रीकृष्णस्यन्दनं अध्यरोहत् । दारुकः स्यन्दनाग्रं कृष्णरथपुरोभागं अधिरुह्य । दक्षिणेन पाणिना प्रग्रहान् अश्वरश्मिगणान् परिगृह्य । कशया अश्वताडनदण्डेन सहितः सकशः पाणिः यस्य स तथोक्तस्सन् । आबभौ आसमन्ताच्चकाशे ।

ततः प्रस्थानाभ्यनुज्ञाभ्यर्थनामाह । स्यन्दन इति ।

**स्यन्दने चलति वल्गदङ्कके**
**किङ्किणीगणझणत्कृतिध्वनौ ।**
**वल्गितोन्मकरकुण्डलो नृणां**
**प्राप गत्यनुमतिं स साञ्जलिः ॥ ३४ ॥**

वल्गितानि स्पन्दितानि अङ्ककानि रथावयवविशेषाः यस्य स तथोक्तः तस्मिन् । अत एव किङ्किणीनां क्षुद्रघण्ठिकानां गणः परम्परेत्यर्थः । तस्य झणत्कृतिः झणझणा इति ध्वनिः यस्य स तथोक्तः तस्मिन् । स्यन्दने श्रीकृष्णरथे चलति सति प्रस्थिते सति । वल्गिते चालिते उन्मकरकुण्डले ऊर्ध्वमुखमकराकारकुण्डले यस्य स तथोक्तः । रथचलनात्कुण्डल-वलनमुक्तं । एतेन तस्य श्रवणयोरंसावलम्बित्वं सूचितं । सः श्रीकृष्णः साञ्जलिस्सन् नृणां तत्रत्यानां जनानां गत्यनुमतिं गमनाभ्यनुज्ञां प्राप । गमिष्यामि अपि नाम गमनाभ्यनुज्ञेति प्रार्थयामासेत्याशयः । स्वभावोक्तिः ।

अथ निर्गमनक्रममाह । मन्देति ।

**मन्दचोदिततुरङ्गमो रथः**
**कौतुकेन गृहणीभिरीक्षितः ।**
**पौरकिञ्चिदनुपातमन्थरो**
**ग्रामभूमिमपहाय निर्ययौ ॥ ३५ ॥**

मन्दं यथातथा चोदिताः प्रेरिताः तुरङ्गमाः अश्वाः यस्य स तथोक्तः । रथः कौतुकेन कुतूहलेन गृहणीभिः द्वारदेशमागताभिः गृहस्त्रीभिः ईक्षितस्सन् । पौराणां पुरवासिनां जनानां किञ्चिदनुपातः स्वल्पदूरमनुगमनं तेन हेतुना मन्थरः मन्दगामी सन् । ग्रामभूमिं वृक्षस्थलभूप्रदेशं अपहाय । निर्ययौ निर्जगाम ।

पौरेति ।

**पौरवर्गमनुयातमादरा-**
**त्प्राञ्जलिस्स विनिवर्त्य सस्मितम् ।**

**वेगिरथ्यपरिवल्गनोच्चल-**
**त्केतुतार्क्ष्यनटनं ययौ जवात्** ॥ ३६ ॥

सः श्रीकृष्णः। अनुयातं किञ्चिद्दूरमनुसृतं पौरवर्गं पुरवासिजनसमूहं। आदरात् प्रेमातिशयात् प्राञ्जलिस्सन् बद्धाञ्जलिपुटस्सन्। सस्मितं यथा तथा समन्दहासं यथा तथा विनिवर्त्य गच्छत यूयं निजावासं इति परावर्त्य। वेगिनः जवविशिष्टाः ये रथ्याः रथाश्वाः तेषां परितो वल्गनं विविधगमनं तेन उच्चलन् उद्वल्गन् यः केतुः ध्वजः तस्य तार्क्ष्यः गरुडः तस्य नटनं नर्तनं यस्मिन्कर्मणि तद्यथा भवति तथा। जवात् वेगात् ययौ।

द्वादशात्मेति ।

**द्वादशात्मविसरत्करोत्स्फुर-**
**त्स्यन्दनोर्ध्वकनकप्रभोर्मिभिः ।**
**काननान्तरतरूलपव्रजः**
**पीतवर्णशबलो व्यराजत** ॥ ३७ ॥

काननान्तरतरूलपव्रजः अरण्यमध्यगतवृक्षकुञ्जसमूहः। द्वादशात्मनः सूर्यस्य विसरन्तः प्रसरणशीलाः ये कराः मयूखाः तैः उत्स्फुरन्तः ऊर्ध्वमुखं भासमानाः स्यन्दनस्य रथस्य ऊर्ध्वकनकं उपरिभागकृतस्वर्णमयाच्छादनं तस्य प्रभाः पीतकान्तयः तासां ऊर्मिभिः तरङ्गैः परम्पराभिरिति यावत्। पीतवर्णेन शबलस्सन् वृक्षोलपानां हरितवर्णतया तदुपरि परिपतितकनकवर्णत्वात् पीतवर्णशबल इत्युक्तं। व्यराजत। तत्काननं कनकमरतककुट्टिममिवाभूदित्याशयः। उदात्तालङ्कारः।

रथस्य वेगातिशयमाह। स्यन्दन इति ।

**स्यन्दनो निजजवेन दूरगा-**
**न्भूरुहान्सपदि धावयन्निव ।**
**रथ्यतीक्ष्णखुरधूलिभिस्समं**
**द्राक्चकार निजपृष्ठवर्तिनः** ॥ ३८ ॥

स्यन्दनः रथः। निजजवेन आत्मवेगातिशयेन दूरगान् सुदूरवर्तिनः भूरुहान् वृक्षान् सपदि क्षिप्रमेव धावयन्निव निजपृष्ठदेशं प्रति कालयन्निवेत्युत्प्रेक्षा। रथ्यानां रथाश्वानां तीक्ष्णाः निशिताः ये खुराः तेषां धूलिभिस्समं रजोनिकरैस्सह। निजपृष्ठवर्तिनस्सतः द्राक् चकार। यथा रथाश्वखुरोत्थितधूलिवर्गोपि रथपृष्ठदेशे भवेत् तथा सुदूरे पुरोभागे स्थिता वृक्षाः रथपृष्ठदेशे भवेयुः। तथा रथो जवेनाधावदित्याशयः। सहोक्तिः।

हास्तिनपुरनैकट्यमाह । हास्तिनमिति ।

**हास्तिनं पुरमपि स्वयं ततः**
**कृष्णदर्शनकुतूहलादिव ।**
**उच्चशृङ्गलिखिताम्बराङ्कणं**
**धावदात्मपुरतोऽभ्यगादिव ॥ ३९ ॥**

ततः अनन्तरं । हास्तिनं पुरं कर्तृ । स्वयमपि कृष्णस्य दर्शनं अवलोकनं तस्मिन् कुतूहलादिव आशातिशयादिवेत्युत्प्रेक्षा । उच्चशृङ्गैः उन्नतशिखैरः लिखितं समुत्कीर्णं अम्बराङ्कणं आकाशप्रदेशः यस्य तत्तथोक्तं सत् । एतेन कृष्णावलोकनायोर्ध्वमुखत्वमुक्तं भवति । धावत्सत् त्वरितगमनं सत् आत्मपुरतः स्वस्याग्रभागे कृष्णपुरोभागे इति यावत् । अभ्यगादिव अभिमुखमाजगामेवेत्युत्प्रेक्षा । हास्तिनं पुरं सन्निहितमित्याशयः । अतिशयोक्त्युत्प्रेक्षयोस्सङ्करः ।

दूराद्धास्तिनपुरदर्शनमाह । दूरत इति ।

**दूरतस्तुहिनजालिकास्फुटं**
**खे हृतामलघनौघडम्बरम् ।**
**दर्शयन्सुहृदमाह सस्मितं**
**पश्य पूरपि समीपगेति सः ॥ ४० ॥**

तुहिनजालिकया आनायसमानहिमसमूहेनेत्यर्थः । अस्फुटं मलिनमलिनं । यद्वा तुहिनजालिकावत् मलिनमलिनमित्यर्थः । खे आकाशे हृतः तिरस्कृत इत्यर्थः । अमलघनौघानां धवलमेघसमूहानां डम्बरः परभागः येन तत्तथोक्तं । पुरं दूरतः दूरादेव दर्शयन् सात्यकये प्रदर्शयन् । सः श्रीकृष्णः सस्मितं समन्दहासं । क्षिप्रप्राप्त्या सस्मितमित्युक्तं । पूरपि हास्तिनपुरमपि समीपगा सन्निहिता पश्य । इति एवंप्रकारेण सुहृदं सात्यकिं प्रति आह । सुदूरादृष्टं नगरं हिमावृतमिव मलिनं गगनभागे शुभ्राभ्रसन्निभं च भासते इत्याशयः ।

अथ रथमन्दीकरणमाह । चक्रेति ।

**चक्रपाणिमततोऽथ सारथिः**
**प्रग्रहैस्सपदि सन्निगृह्य तान् ।**
**वेगिनो हयवरान्विवल्गिनो**
**मन्धरान्गमयति स्म सम्भ्रमात् ॥ ४१ ॥**

अथ अनन्तरं। सारथिः दारुकः। चक्रपाणेः श्रीकृष्णस्य मततः अभिप्रायानुगुणं। सपदि तत्क्षणमेव सम्भ्रमात् त्वरातिशयात् प्रग्रहैः रश्मिभिः वेगिनः जवविशिष्टान् तान् धावनशीलान् हयवरान् तुरगोत्तमान्। सन्निगृह्य स्वायत्तीकृत्य। अतएव वल्गिनः कृत-वल्गनान् मन्दरांश्च मन्दगामिनस्सतः। गमयति स्म प्रवर्तयामास। स्वभावोक्तिः।

मन्देति।

**मन्दमन्दमुपकण्ठमागते**
**स्यन्दने मधुरिपुर्ध्वजाश्रितम्।**
**नातिदूरगमनल्पमण्डनं**
**वीक्ष्य वाद्यमुखरीकृतं पुरम्** ॥ ४२ ॥

स्यन्दने श्रीकृष्णरथे। मन्दमन्दं तुरगवेगमन्दीकरणान्मन्दमन्दमित्युक्तं। उपकण्ठं नगर समीपं आगते सति। मधुरिपुः श्रीकृष्णः ध्वजाश्रितं पातकालिभिरलङ्कृतं नातिदूरं अत्यन्तसमीपस्थं। अत एव परिदृश्यमानतया अनल्पमण्डनं तोरणकायमानाद्यपरिमिता-लङ्कारविशिष्टं। वाद्यैः आतोद्यैः मुखरीकृतं शब्दापितं पुरं हास्तिननगरं वीक्ष्य। उत्तरश्लोके प्राहेत्यनेनान्वेति

उत्सव इति।

**उत्सवः प्रचलतीव दृश्यते**
**सात्यके पुरि विलोकयाग्रतः।**
**किंनिमित्तकमिदं भवेदिति**
**प्राह मित्रमभिदर्शयन्हरिः** ॥ ४३ ॥

हे सात्यके। पुरि हास्तिनपत्तने उत्सवः हर्षजनकव्यापारः प्रचलतीव प्रवर्तत इवेति सम्भावनायां। दृश्यते। अग्रतः पुरोभागे विलोकय सम्भ्रमातिशयं पश्येत्यर्थः। इदं अयमुत्सवः। कार्यसामान्यमुद्दिश्य इदमित्युक्तं। लोकेप्येवं व्यवह्रियते किल। किं निमित्तकं किंकारणकं भवेत्। इति एवंप्रकारेण हरिः श्रीकृष्णः। अभिदर्शयन्सन् अभितः प्रदर्शयन्सन्। मित्रं सात्यकिं प्रति प्राह।

श्रीकृष्णकृतप्रश्नस्य सात्यकिः प्रत्युत्तरमाह। द्रोणेति।

**द्रोणभीष्ममुखपूज्यचोदितः**
**त्वन्निमित्तमिदमिच्छया विना।**

**वैभवं प्रकटयन्सुयोधनः**
**कारयेदिति जगाद सात्यकिः ॥ ४४ ॥**

सुयोधनः दुर्योधनः । द्रोणभीष्मप्रभृतिपूज्यगुरुजनप्रेरितस्सन् । अत्र द्रोणस्य ब्राह्मणतया अभ्यर्हितत्वात् पूर्वमभिहितम् । इच्छया विना अनभिमतेनेत्यर्थः । त्वन्निमित्तं भवन्तमुद्दिश्य । वैभवं निजसम्पद्विशेषं प्रकटयन्सन् प्रदर्शयन्सन्नित्यर्थः । इदं पुरमण्डनादिकं कारयेत् । इति एवं प्रकारेण सात्यकिः । जगाद प्रत्युवाच । यद्यपि सुयोधनस्य इच्छैव नास्ति । तथापि गुरुजनप्रेरणया निजवैभवप्रदर्शनार्थमेव भवते तावदेतत्सर्वमपि तेन कारितं भवेदित्याशयः ।

गदितमिति ।

**गदितं सुहृदा निशम्य कृष्णः**
**स्मयमानोऽथ जगाद चिन्तयन्सः ।**
**विदितं भवता सखे तदन्तः-**
**करणं साध्विति मानयन्मुहुस्तम् ॥ ४५ ॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणमहाकविविरचिते**
**अद्भुतदूताख्यकाव्यरत्ने**
**सप्तमस्सर्गः ।**

सः कृष्णः । सुहृदा सात्यकिना गदितं अभिहितं निशम्य स्मयमानस्सन् चिन्तयन्सन् सात्यकिप्रोक्तं मनसि विचारयन्सन्नित्यर्थः । अथ चिन्तानन्तरं । हे सखे, भवता मर्मज्ञेन त्वया तदन्तःकरणं दुर्योधनाशय इत्यर्थः । साधु सम्यक् विदितं ज्ञातं । इति एवंप्रकारेण तं सात्यकिं मुहुः असकृत् मानयन्सन् पूजयन्सन् । जगाद प्रोवाच । सुयोधनाशययाथार्थ्यज्ञानात् सात्यकेर्माननमुक्तं ।

भगवता लक्ष्मीदासेन अनुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
सप्तमस्सर्गः ।

॥ श्रीः ॥

# अष्टमस्सर्गः ।

कविरिदानीं कृष्णाभ्युद्गमनाय ससैन्यस्य दुर्योधनस्य नगरात्प्रस्थानं वर्णयितुमष्टमसर्गमारभते । प्रथमं तावत् राजकुलद्वाराङ्कणे सुहृत्सम्मेलनमाह ।

अथेति ।

**अथ नृपतिनिदेशतस्सुहृत्सु-**
**प्रचुरविभूषणभूषितेषु शीघ्रम् ।**
**समधिगतरथेषु राजवेश्म**
**प्रविततकान्तपुरस्तलं विशत्सु ॥ १ ॥**

अथ अनन्तरं। नृपतेः दुर्योधनस्य निदेशतः आज्ञया। प्रचुराणि नानाविधानीत्यर्थः। यानि विभूषणानि आभरणानि तैः भूषितेषु अलङ्कृतेषु समधिगतरथेषु स्वस्वरथाधिरूढेषु सुहृत्सु मित्रबन्धुमण्डलेष्वित्यर्थः । शीघ्रं क्षिप्रं त्वरयेति यावत्। राजवेश्मनः सौधस्य प्रविततं विशालं कान्तं च समप्रदेशतया मनोहरं च पुरस्स्तलं अग्रभागचत्वरं विशत्सु सत्सु ।

ततः परिजनानामागमनमाह । परिजनेति ।

**परिजननिवहेषु राजयात्रा-**
**समुचितवेषमनोहरेषु तत्र ।**
**करधृतनृपगौरवाङ्कवस्तु-**
**ष्वचिरमुपागतवत्सु पङ्क्तिभाक्षु ॥ २ ॥**

तत्र सौधाग्रचत्वरे। राज्ञः दुर्योधनस्य यात्रा प्रस्थानं तस्याः समुचितः योग्यः यः वेषः राजकीयकवचाद्यलङ्कारः तेन मनोहरेषु दर्शनीयेषु। कराभ्यां धृतं गृहीतं नृपस्य दुर्योधनस्य गौरवाङ्कः गौरवसूचकमत्स्यमकरादिचिह्नविशेषः तद्विशिष्टं वस्तु ध्वजपताकादि येषान्ते। तेषु । पङ्क्तिभाक्षु आवलिक्रममनुसृतेषु । परिजननिवहेषु परिचारकजनवर्गेषु । अचिरं क्षिप्रमेव उपागतवत्सु सत्सु।

पुरजनानां कौतुकातिशयमाह । नरपतिरिति ।

**नरपतिरधुना हरिं दिदृक्षुः**
**व्रजति रथेन बलौघबन्धुबृन्दैः ।**

**इति परिधृतभूषणाश्च पौराः**
**नृपसरणिं कुतुकेन भेजिरे द्राक् ॥ ३ ॥**

अधुना नरपतिः दुर्योधनः । हरिं श्रीकृष्णं दिदृक्षुस्सन् द्रष्टुमिच्छुस्सन् । बलौघैः चतुरङ्ग-सैन्यैः बन्धुवृन्दैः शकुनिकर्णदुश्शासनप्रभृतिबन्धुसमूहैस्सह । रथेन रथे समुपविश्येत्यर्थः । व्रजति गच्छति । इति वदन्त इति शेषः । पौराः पुरवासिनो जनाश्च । परिधृतभूषणा-स्सन्तः अलङ्कारालङ्कृतास्सन्तः । कुतुकेन कुतूहलातिशयेन नृपसरणिं राजमार्गं द्राक् त्वरातिशयेन । भेजिरे सिषेविरे । राजमार्गे पङ्क्तिशः स्थिता इति यावत् ।

जनबाहुल्यं वर्णयति । कतिचनेत्यादिना ।

**कतिचन सहसा पुरस्थलीप्राक्-**
**क्रमणकुतूहलवेगिनः प्रधाव्य ।**
**निबिडतरजनौघमध्यभाजः**
**प्रपदसमुच्छ्रितकन्धरास्स्थितास्ते ॥ ४ ॥**

कतिचन कतिपये जनाः । सहसा पुरस्थल्याः सर्वजनापेक्षया पुरोभागप्रदेशस्य प्राक्क्रमणं प्रथममेव स्वायत्तीकरणं तस्मिन् कुतूहलं तस्माद्वेगिनस्सन्तः जवविशिष्टास्सन्तः । अत एव प्रधाव्य निबिडतरः अत्यन्तसान्द्रः यः जनौघः तस्य मध्यं कथञ्चित् भजन्तीति मध्य-भाजस्सन्तः । ते कुतूहलविशिष्टा जनाः । प्रपदेन पादाग्रस्थित्या समुच्छ्रिता बलादुन्नमिता कन्धरा ग्रीवा यैस्ते तथाभूतास्सन्तः । स्थिताः । प्रागेव जनसम्मर्दाकुलतया पुरस्थलाक्रमण-कुतूहलेन सहसागता अपि केचन जनाः जनसम्मर्दमध्यगतास्सन्तः कथमपि समुच्छ्रित-कन्धराः प्रपदेन स्थिता इत्याशयः ।

जनसम्मर्दनिबिडितस्य मार्गस्य दापनमाह । खुरेति ।

**खुरपुटपट्टघोषसार्यमाण-**
**प्रचुरजनावलिदापितावकाशाः ।**
**प्रजविहयवराधिरोहदृप्ताः**
**नरपतिवर्त्मनि सादिनो विचेरुः ॥ ५ ॥**

खुरपुटानां अश्वसम्पुटकल्पखुराणां पट्टघोषः प्रघट्टनजनितस्फुटरवः तेन सार्यमाणा दूर-मुत्सार्यमाणा प्रचुराः अत्यधिकाः ये जनाः तेषामावलिः परम्परा तया दापितः अवकाशः येषां ते । प्रजविनः अत्यन्तवेगविशिष्टाः ये हयवराः तुरगोत्तमाः तेषामुपरि अधिरोहः

तेन दृप्ताः गर्वविशिष्टाः । सादिनः अश्वारोहाः नरपतिवर्त्मनि राजमार्गे विचेरुः विशेषेणा-सकृत्परितश्चेरुः । सादिनः निजाश्वान्प्रधाव्य राजमार्गे अत्यन्तसान्द्रजनौघमुत्सारयामासुरित्याशयः ।

प्रथममग्रभागे प्रस्थितमश्वसैन्यं वर्णयति । असितेति ।

**असितमसृणवेगिवाजिसैन्यं**
**करधृतलोलपताकिकोच्चभल्लैः ।**
**लसदसिकटिसादिभिः प्रजुष्टं**
**विशदतनुत्रिभिरराययौ पुरस्तात्** ॥ ६ ॥

करेण दक्षिणपाणिना धृतं गृहीतं लोला चञ्चला पताकिका क्षुद्रध्वजपटः यस्मिंस्तत् उच्चभल्लं दीर्घतरभल्लायुधं यैस्ते तैः । विशदतनुत्रिभिः धृतधवलकवचैः लसन् लम्बित-कोशे प्रकाशमानः असिः खड्गः यस्यास्सा लसदसिः कटिः अवलग्नप्रदेशः येषां ते लसदसिकटयः ये सादिनः अश्वारोहाः तैः प्रजुष्टं संसेवितं असिताः कृष्णवर्णाः मसृणाः मांसलतया स्निग्धाः वेगिनः जवविशिष्टाः ये वाजिनः अश्वाः तेषां सैन्यं । पुरस्तात् पुरोभागे आययौ । प्रथमं श्यामलवर्णाः वाजिनः निर्जग्मुरित्याशयः ।

तदेव वर्णयति । प्रविततेति ।

**प्रविततयमुनातरङ्गशृङ्ग-**
**स्फुटनटदच्छमरालराजिकल्पम् ।**
**पुरजननिवहो विलोक्य सैन्यं**
**तदभवदद्भुतसिन्धुमग्नचित्तः** ॥ ७ ॥

पुरजननिवहः तद्दर्शनकुतूहलागतपुरवासिजनसमूहः । प्रवितता अतिविशाला । एतेन सैन्य-स्यानन्त्यं सूचितम् । या यमुना कालिन्दीनदी तस्याः तरङ्गाः ऊर्मयः तेषां शृङ्गेषु स्फुटं व्यक्तं यथा तथा नटन्तः नर्तनशीलाः ये अच्छमरालाः राजहंसाः तेषां राजिः तया कल्पं सदृशं । तत्सैन्यं श्यामलवर्णवाजिसैन्यं विलोक्य । अद्भुतसिन्धौ आश्चर्यसमुद्रे मग्नं चित्तं हृदयं यस्य स तथोक्तस्सन् । अभवत् । प्रचोदिततया वल्गनशीलाः श्यामलवर्णाः वाजिनः चञ्चलतरङ्गविशिष्टयमुनाप्रवाहकल्पाः गच्छन्ति । तदुपरि समुपविष्टाः सादिनः शुक्लकञ्चुकालङ्कृततया चञ्चलतरङ्गाग्रगतराजहंसकल्पा व्यलसन्नित्याशयः । उपमालङ्कारः ।

तत्पृष्ठभागे श्वेताश्वसैन्यनिष्क्रमणमाह । अथेति ।

**अथ कतिपयचित्रवाद्यघोषा**
**धवलतुरङ्गतरङ्गवाहिनी च ।**
**हरितकवचिसादिबृन्दजुष्टा**
**तरुगहना प्रययौ सुरापगेव ॥ ८ ॥**

अथ अनन्तरं। कतिपयचित्रवाद्यघोषा कतिचन नानाविधवादित्रघोषमुखरीकृतपुरोभागेत्यर्थः। हरितकवचिनः हरिद्वर्णकवचालङ्कृताः ये सादिनः अश्वारोहाः तेषां बृन्दं समूहः तेन जुष्टा सेविता। धवलतुरङ्गाः श्वेताश्वाः तेषां तरङ्गः परम्परा तद्रूपा वाहिनी च सैन्यमपि तरुगहना वृक्षैर्दुष्प्रवेशा सुरापगेव गङ्गेव। प्रययौ। समारूढहरितकवचालङ्कृतसादितया तुरगाणां धवलवर्णतया च तरुगहनमध्यप्रवहद्गङ्गासादृश्यमुक्तम्। एतेन सैन्यस्यापरिमितत्वं सूचितम्। उपमालङ्कारः ।

अनन्तरं गजसैन्यनिष्क्रमणमाह । तदन्विति ।

**तदनु गजघटा विचित्रभूषाः**
**पृथुलकुथाकृतहेमपीठरम्याः ।**
**कतिचन धृतभेरिकापताकाः**
**गिरय इव प्रययुर्विचित्रपुष्पाः ॥ ९ ॥**

तदनु तुरगसैन्यनिष्क्रमणानन्तरं। विचित्रभूषाः नानाविधकुम्भस्थलाद्यवयवालङ्कारालङ्कृताः पृथुलकुथा गजपृष्ठोपर्यारोप्यमाणस्थूलतल्पकल्पाच्छादनविशेषः तदुपरि कृतं निबद्धमित्यर्थः। यद्धेमपीठं तेन रम्याः दर्शनीयाः। तेषां मध्ये कतिचन कतिपये गजाः धृताः भेरिकापताकाः भेरीध्वजाः यैस्ते तथोक्ताः। गजघटाः गजसमूहाः बहुवचनेन गजघटानामानन्त्यमुक्तं भवति। विचित्रपुष्पाः नानावर्णकुसुमविशिष्टाः गिरय इव पर्वता इव प्रययुः प्रकर्षेण निश्चक्रमुः। गजानां नानाविधाभरणवस्त्रालङ्कृततया नानावर्णपुष्पविशिष्टपर्वतसादृश्यमुक्तम्। उपमालङ्कारः ।

गजसैन्यनिष्क्रमणानन्तरं पुनरपि शोणवर्णाश्वसैन्यनिष्क्रमणमाह । हरीति ।

**हरिहयकरसङ्क्रमात्प्रसर्प-**
**त्कनकरुचस्तुरगास्सुशोणकायाः ।**
**अरुणमृदुतनुत्रसादिबृन्दैः**
**करकलितासिभिरन्वगुः प्रणुन्नाः ॥ १० ॥**

हरिहरस्य सूर्यस्य ये कराः मयूखाः तेषां सङ्गमात् सम्पर्कात् प्रसर्पन्ती कनकस्य रुगिव रुक् कान्तिः येषां ते । शोणवर्णतया कनककान्तिविशिष्टदेहा इति यावत् । यद्वा प्रसर्पत्कनकाभरणकिरणकान्तिविशिष्टा इत्यर्थः । सुशोणकायाः सुष्ठु रक्तवर्णदेहाः । यद्वा शोभनमधुपाटलदेहाः दर्शनीयपाटलवर्णा इति यावत् । तुरगाः अरुणमृदुतनुत्रसादिबृन्दैः रक्तवर्णकोमलकवचालङ्कृताश्वारोहसमूहैः । करकलितासिभिः करधृतकोशावर्जितखड्गैस्सद्भिः । प्रणुन्नास्सन्तः प्रेरितास्सन्तः । अन्वगुः गजसैन्यमनुसृत्य जग्मुः ।

तदनन्तरं धनिनां निष्क्रमणमाह । कतिचनेति ।

**कतिचन धनिनो रथाधिरूढाः**
**नृपतिसहागमयोग्यवेषभूषाः ।**
**हयबलमनुसृत्य मन्दयानाः**
**पुरजनदत्तदृशो ययुस्सगर्वम्** ॥ ११ ॥

कतिचन राजात्यन्तप्रीतिभाजनमित्यर्थः । धनिनः विश्रुता आढ्याः । नृपतिना सह दुर्योधनेन समं आगमः यात्रा तस्य योग्याः अनुगुणाः वेषभूषाः वस्त्राभरणाद्यलङ्काराः येषां ते तथोक्ताः सन्तः । रथाधिरूढास्सन्तः यात्रायोग्यस्यन्दनोपविष्टास्सन्तः । हयबलं पुरःप्रस्थितं वाजिसैन्यं अनुसृत्य तत्पृष्ठत इति यावत् । मन्दयानास्सन्तः मन्दगतिविशिष्टवाहनास्सन्तः । पुरजनेषु यात्रादर्शनागतपुरवासिजनेषु दत्ता निक्षिप्ता दृक् लोचनं यैस्ते सन्तः । सगर्वं यथातथा साहङ्कारं यथा तथा । ययुः निर्जग्मुः । ईदृशमहाराजयात्रामहोत्सवे तावदस्माकमप्येवं समभागित्वमिति गर्वप्रदर्शनपूर्वकं तत्रत्यान्जनान्पश्यन्तः प्रतस्थिरे इत्याशयः ।

अनन्तरं सचिवानां निष्क्रमणमाह । नरेति ।

**नरपतिसचिवास्ततोनुजग्मुः**
**धृतबहुमूल्यतनुत्रभूषणाश्च ।**
**कनकरचितजालिकावगुण्ठां-**
**स्तुरगवरानधिरुह्य लम्बखड्गाः** ॥ १२ ॥

ततः धनिकनिर्गमनानन्तरं । नरपतिसचिवाः दुर्योधनस्यामात्याः । धृतबहुमूल्यतनुत्रभूषणास्सन्तः महाधनकवचाभरणाद्यलङ्कारालङ्कृतास्सन्तः । लम्बखड्गास्सन्तः अवलग्नबद्धपट्टिकालम्बितकोशनिहितकरवालास्सन्तः । कनकतन्तुभिः निर्मितया जालिकया अवगुण्ठितान् निचोलितान् तुरगवरान् । एतेन अश्वानां कुलीनत्वमुक्तं भवति । अधिरुह्य अनुजग्मुः धनिकबृन्दमनुसृत्य निर्जग्मुरित्यर्थः ।

सचिवनिष्क्रमणानन्तरं मङ्गलकरवृषभनिष्क्रमणमाह । पृथ्विति ।

**पृथुतरककुदो विधूस्रगौराः**
**चलमसृणांसलदेहबन्धकान्ताः ।**
**बहुविधमणिभूषणास्सुश्रृङ्गाः**
**वृषभवरास्तदनु प्रजग्मुरुच्चाः ॥ १३ ॥**

तु सचिवनिष्क्रमणानन्तरं । पृथुलककुदः स्थूलवल्गद्भुजशिखरपिण्डविशेषविशिष्टाः धूस्रगौराः चन्द्रकिरणवद्धवलाः । चलः वल्गन् मसृणश्च स्निग्धश्च अंसलः मांसपुष्टः यः : तस्य बन्धः संस्थानविशेषः तेन कान्ताः दर्शनीयाः । बहुविधमणिभूषणाः नानाविध- लङ्कारालङ्कृताः । सुश्रृङ्गाः कनककोशपरिशोभितविषाणाः । उच्चाः समुन्नताः वृषभवराः मेण जग्मुः । स्वभावोक्त्यलङ्कारः ।

मङ्गलार्थं वेश्यास्त्रीणां निष्क्रमणमाह । उडुरुचीति ।

**उडुरुचिमणिभूषणास्सुवेण्यः**
**धृतधवलांशुकधिक्कृतेन्दुभासः ।**
**सुरपतिगणिका इव प्रयाताः**
**सुमफलपाणिपुटाः क्रमेण वेश्याः ॥ १४ ॥**

डूनां नक्षत्राणां रुचिरिव कान्तिरिव रुचिः येषां ते ये मणयः रत्नानि तन्मयानि षणानि यासां ताः । सुवेण्यः सुगन्धितैलादिपरिष्कृततया शोभनवेणिकाविशिष्टाः । धृतं धवलांशुकं स्वच्छदुकूलं तेन धिक्कृता तिरस्कृता इन्दुभाः चन्द्रकान्तिः कौमुदीति वत् यासां ताः । सुमफलानि पाणिपुटे यासां ताः । वेश्याः वारनार्यः सुरपतिगणिका इव भाद्यप्सरस इव । क्रमेण पंक्तिशः प्रयाताः निर्ययुः ।

अनन्तरं गुरूणां निष्क्रमणमाह । अथेति ।

**अथ विबुधसरित्तनूजमुख्याः**
**प्रगुणगुणा गुरवो रथाधिरूढाः ।**
**यदुपतिचरणाम्बुजैकचित्ताः**
**प्रमदभरोत्पुलकाश्शनैः प्रयाताः ॥ १५ ॥**

थ वेश्यानिष्क्रमणानन्तरं । विबुधश्चासौ सरित्तनूजश्च ज्ञानिमूर्धन्यभीष्म इत्यर्थः । यद्वा बुधाः पण्डिताः भीष्मश्च । यद्वा विबुधसरित् देवगङ्गा तस्याः तनूजः एतत्प्रमुखाः

प्रगुणगुणाः सद्गुणप्रचुराः। गुरवः द्रोणादयः पूज्याः रथाधिरूढास्सन्तः स्वानुगुणस्यन्दनोप-विष्टास्सन्तः। यदुपतेः श्रीकृष्णस्य चरणाम्बुजयोः एकचित्ताः अनन्यमनस्कास्सन्तः तच्चरणारविन्ददर्शनकुतूहलाविष्टचित्ता इति यावत्। अत एव प्रमदभरेण अलभ्यलाभ-कन्दलितानन्दातिशयेन उत्पुलकास्सन्तः रोमाञ्चकवचितगात्रास्सन्तः। शनैः राजानुवर्त-नानुगुणं यथा तथा प्रयाताः।

ततः पूर्णकुम्भनिर्गमनमाह। धरणीति।

**धरणिसुरगृहीतशातकुम्भ-**
**प्रविततकुम्भयुगं गजोपरिस्थम्।**
**किसलयसुमनालिकेरगूढं**
**प्रविचलति स्म पयःप्रपूर्णमारात्** ॥ १६ ॥

किसलयैः सहकारपल्लवैः कुसुमैः धवलपुष्पैः नारिकेलफलेन च गूढं पिहितं सहकार-पल्लवान्वदनकुहरे विनिवेश्य कुसुममाल्या तत्कण्ठं बद्ध्वा नारिकेलफलेन वदनकुहरं पिधाय समलङ्कृतमिति यावत्। पयसा शुद्धोदकेन प्रकर्षेण पूर्णं आकण्ठं सम्पूर्णमित्यर्थः। गजोपरिस्थं गजपृष्ठे समारोपितं। धरणिसुराभ्यां ब्राह्मणोत्तमाभ्यां गृहीतं कराभ्यामविचलं यथा तथा धृतं शातकुम्भप्रविततकुम्भयुगं स्वर्णमयपृथुलकलशद्वयं। आरात् समीपे प्रचलति स्म।

अथ स्तुतिपाठकानां निष्क्रमणमाह। नृपेति।

**नृपकृतमपदानमुद्गिरन्तः**
**बिरुदततिं तपनीयरत्नचित्राम्।**
**कनकरुचिरदण्डशृङ्गभाजं**
**ययुरथ वन्दिजनाः करे दधानाः** ॥ १७ ॥

अथ पूर्णकुम्भनिष्क्रमणानन्तरं। नृपकृतं दुर्योधनविरचितं पूर्ववृत्ताद्भुतचरितं। उद्गिरन्तः उच्चैः व्याहरन्तः। अप्रयत्ननिस्सरणसूचनार्थमुद्गिरन्त इत्युक्तम्। तपनीयेन कनकेन रत्नैश्च चित्रां स्पृहणीयां कनकेन रुचिराः मनोहराः ये दण्डाः तेषां शृङ्गाणि शिखराणि भजतीति शृङ्गभाक् तां। बिरुदततिं बिरुदावलिं करे दधानाः वन्दिजनाः स्तुतिपाठकाः बिरुदबाहुल्यसूचनार्थं बहुवचनं प्रयुक्तम्। ययुः।

अथ षड्भिश्श्लोकैस्सुयोधनयात्रां वर्णयति । अतीति ।

**अतिनयनपथे बले पुरस्ता-**
**द्व्रजति ततो धृतराष्ट्रजोऽभिमानी ।**
**निजसहजगणैरथाधिरूढैः**
**परिवृतपार्श्वयुगो मनोज्ञरूपः ॥ १८ ॥**

ः स्तुतिपाठकनिष्क्रमणानन्तरं । अतिनयनपथे अतिक्रान्तलोचनमार्गे अपरिमिते इति वत् । बले पूर्वोक्तचतुरङ्गसैन्ये पुरस्तात् व्रजति सति गच्छति सति । अभिमानी न्योस्ति मत्सदृशश्चक्रवर्तीति गर्वसमुद्धतः धृतराष्ट्रजः दुर्योधनः । रथाधिरूढैः स्वस्वरथेषु षण्णैः निजसहजगणैः दुश्शासनप्रभृत्यात्मसहोदरसमूहैः परिवृतपार्श्वयुगस्सन् । मनोज्ञ-पस्सन् स्पृहणीयसौन्दर्यस्सन् । उत्तरत्र अभिययौ इत्यनेनान्वेति ।

मृगपतीति ।

**मृगपतिमुखमञ्जुलाग्रपार्श्वे**
**नवमणिकाञ्चनपत्रभङ्गभृङ्गे ।**
**मृदुलतरविवल्गदुच्चपीठे**
**स्फुरदुरुकोमलपाटलोपधाने ॥ १९ ॥**

तत्सर्वं उत्तरत्र वक्ष्यमाणस्य रथे इत्यस्य विशेषणम् । मृगपतिमुखे सिंहमुखे ताभ्यां ञ्जुलौ मनोहरौ अग्रपार्श्वौ पुरोभागोभयपार्श्वौ यस्य स तथोक्तः तस्मिन् । नवमणिभिः वरत्नैः उपलक्षितं काञ्चनं सुवर्णं तस्मिन्नुत्कीर्णाः पत्रभङ्गाः लतादिचित्रविशेषाः भृङ्गाश्च वर्णकुसुमोपरि विनिवेशितभ्रमराश्च यस्मिन्स तथोक्तः तस्मिन् । मृदुलतरं अत्यन्तसुखस्पर्शं वलात् वल्गनशीलं उच्चपीठं समुन्नतसिंहासनं यस्मिन्स तथोक्तः तस्मिन् । स्फुरत् सुवर्ण-न्तुकल्पितचित्रतया प्रकाशमानं उरुकोमलं अत्यन्तसुखस्पर्शं पाटलञ्च श्वेतरक्तवर्ण-शिष्टंच उपधानं साचीकरणयोग्यः उपबर्हः यस्मिन्स तथोक्तः तस्मिन् ।

अविरलेति ।

**अविरलचलमौक्तिकालिजाल-**
**प्रविततशुभ्रतरातपत्रदीप्ते ।**
**द्विरदपतिसुशोभितोच्चकेतौ**
**प्रजवितुरङ्गतरङ्गिताग्रभागे ॥ २० ॥**

मौक्तिकालीनां मुक्ताफलपरम्पराणां जालं आनायः अविरलं निबिडतरं चलं च होलायमानं च मौक्तिकालिजालं यस्मिंस्तत् यत् प्रविततं विस्तृतं शुभ्रतरातपत्रं श्वेतच्छत्रं तेन दीप्ते कान्तिविशिष्टे। द्विरदपतिना गजश्रेष्ठेन सुशोभितः उच्चकेतुः समुच्छ्रित-ध्वजपटः यस्मिन्स तथोक्तः तस्मिन्। प्रजविभिः वेगविशिष्टैः तुरगैः तरङ्गितः तरङ्गवत्कृतः अग्रभागः पुरोभागः यस्य स तथोक्तः तस्मिन्।

प्रियेति।

**प्रियतमसुहृदा रथे निषण्णः**
**सिततरचामरवीज्यमान एषः।**
**मुकुलितकरपङ्कजांस्तु पौरां-**
**स्ततनयनान्तनिरीक्षयानुगृह्णन्** ॥ २१ ॥

रथे पूर्वोक्तालङ्कारविशिष्टे स्यन्दने। प्रियतमसुहृदा सह अत्यन्तप्रीतिविशिष्टराधेयेन समम्। एतेन तदविनाभावस्सूचितः। निषण्णः उपविष्टः सिततरचामराभ्यां धवलोज्वलप्रकीर्णकाभ्यां वीज्यमानः मुकुलितकरपङ्कजान् कृताञ्जलिपुटान्। एतेन पङ्कजकोरकसमलङ्कृत-कल्पत्वं सूचितम्। पौरांस्तु पुरवासिनोपीत्यर्थः। अव्ययानामनेकार्थत्वात्। तते विस्तृते यद्वा विशाले ये नयने तयोः अन्तनिरीक्षया कटाक्षेणेत्यर्थः। अनुगृह्णन् पश्यन्निति यावत्। एषः कृष्णदर्शनाभिमुखः उत्तरत्र नरेन्द्रः इत्यत्रान्वेति।

मुखेति।

**मुखकमलगभीरभावहृद्यो**
**बहुबलकृष्ट इव व्रजन्नृपेन्द्रः।**
**गदिनमभिययौ विचित्रवाद्य-**
**श्रुतिमधुरध्वनिनादिताखिलाशः** ॥ २२ ॥

मुखकमलस्य गभीरभावः गाम्भीर्यं तेन हृद्यः हृदयङ्गमः। बहुबलकृष्ट इव अग्रप्रस्थिता-परिमितचतुरङ्गबलसमाकृष्ट इवेत्युत्प्रेक्षा। व्रजन् मन्दं गच्छन् नृपेन्द्रः नृपाणामपीन्द्रः चक्रवर्ती दुर्योधनः विचित्रवाद्यानां नानाविधवाद्यविशेषाणां श्रुतिमधुराः श्रवणेन्द्रिय-हृदयङ्गमाः ये ध्वनयः नादविशेषाः तैः नादिताः शब्दापिताः अखिलाशाः दशदिशः येन स तथोक्तस्सन्। गदिनं श्रीकृष्णं अभिययौ आभिमुख्येन ययौ।

सुरुचिरेति ।

सुरुचिरमणिभूषणः किरीटी
कनकतनुत्रमहाधनाञ्चिताङ्गः ।
नरपतितनुतामुपाश्रितोऽयं
कनकगिरिः किमिति व्यलोकि पौरैः ॥ २३ ॥

सुरुचिरमणिभूषणः अनर्घतेजोमयनवरत्नखचितालङ्कारालङ्कृत इत्यर्थः। किरीटी सार्वभौमत्व-सूचककिरीटविशिष्टः । कनकतनुत्रेण तपनीयकवचेन महाधनेन च बहुमूल्यवस्त्रेण च अञ्चिताङ्गः अलङ्कृताङ्गः । अयं दुर्योधनः नरपतितनुतां राजशरीरतां उपाश्रितः अधिगतः कनकगिरिः किं मेरुपर्वतः किमित्युत्प्रेक्षा । इति पौरैः पुरवासिभिः । व्यलोकि अदृश्यत ।

सुयोधनगमनानन्तरं पश्चात्पदातिप्रभृतिसैन्यनिर्गमनमाह । बह्विति ।

बहुविधवसनाञ्चिता भुजाग्रे
कृतनलिकाश्च पदातयोऽनुजग्मुः ।
तदनुययुरथ क्रमेलकाश्च
प्रचुरवराटकजिह्मदीर्घकण्ठाः ॥ २४ ॥

बहुविधवसनाञ्चिताः हरितपीतरक्तादिनानावर्णकवचोष्णीषादिवस्त्रालङ्कृताः।भुजाग्रे अंसदेशे कृतनलिकाश्च विनिहितनलिकाख्यायुधविशेषाश्च। पदातयः पादचारिणः योधाः। अनुजग्मुः सुयोधनमनुसृत्य जग्मुः । अथ पदातिनिर्गमनानन्तरं प्रचुरवराटकाः वराटकप्रायाभरण-विशिष्टाः जिह्माः वक्राः दीर्घाश्च कण्ठाः येषां ते । क्रमेलकाश्च उष्ट्राश्च । तत् पदातिसैन्यं अनुययुः अनुसृत्य जग्मुः ।

क्रमेति ।

क्रमनियमितदेशभाक्षु सैन्ये-
ष्वथ धृतराष्ट्रसुतो रथावतीर्णः ।
गुरुजनसुखबन्धुपूर्णपार्श्वः
समुपससर्प कृताञ्जलिर्मुकुन्दम् ॥ २५ ॥

सैन्येषु चतुरङ्गबलेषु । क्रमेण आदेशानुसारेणेत्यर्थः । नियमितः निर्दिष्टः यः देशः तं भाक्षु सत्सु तत्र स्थितेषु सत्सु इत्यर्थः । यद्वा क्रमेण अश्वगजादिक्रमेण नियमितदेश-भाक्षु सत्सु इत्यर्थः । अथ स्थित्यनन्तरं धृतराष्ट्रसुतः दुर्योधनः रथात् । अवतीर्णस्सन्

कृताञ्जलिः बद्धाञ्जलिपुटस्सन् । गुरुजनमुखबन्धुपूर्णपार्श्वस्सन् भीष्मद्रोणप्रभृतिगुरुजनैः दुश्शासनप्रभृतिबन्धुजनैश्च पूर्णोभयपार्श्वस्सन् । मुकुन्दं श्रीकृष्णं समुपससर्प । रथादवतीर्य पादाभ्यामेव कृष्णान्तिकं जगामेत्याशयः ।

क्षितीति ।

**क्षितितलगतसात्यकिप्रदत्त-**
**प्रविततपाणितलाहितात्मपाणिः ।**
**यदुपतिरवतीर्य नम्रकायः**
**स्वरथवरादुपतस्थिवान्पुरस्तात्** ॥ २६ ॥

यदुपतिः श्रीकृष्णः । क्षितितलगतेन प्रथमं रथादवतीर्य भूतले स्थितेन सात्यकिना प्रदत्तः पुरः प्रसारितः यः प्रविततपाणिः विस्तृतकरः तस्य तले आहितः विनिहितः पाणिः येन स तथोक्तस्सन् । नम्रकायस्सन् रथादवतरणावसरे अवनतपूर्वकायस्सन् । स्वरथवरात् अवतीर्य पुरस्तात् दुर्योधनाग्रभागे । उपतस्थिवान् तस्थौ ।

अथ श्रीकृष्णकण्ठे पुष्पमालार्पणमाह । परिमलेति ।

**परिमलपरिकृष्टचञ्चरीक-**
**भ्रमरवकैतवपृष्टसौख्ययात्राम् ।**
**स्रजमनुगुणपुष्पगुम्भकान्तां**
**कुरुपतिरार्पयदच्युतस्य कण्ठे** ॥ २७ ॥

परिमलेन परस्परविमर्दसमुत्थितेन गन्धविशेषेण परिकृष्टाः परितः समाकृष्टाः ये चञ्चरीकाः भ्रमराः तेषां भ्रमः समुड्डयनं तेन यः रवः झङ्कारः तस्य कैतवेन व्याजेन पृष्टा सौख्ययात्रा अपि सुखागमनमिति यावत् यया सा ताम् । अनुगुणानां सितहरितपीतादिवर्णरामणीयकसमुचितानां पुष्पाणां गुम्भः संघटनाविशेषः तेन कान्तां मनोहरां स्रजं मालां । कुरुपतिः दुर्योधनः अच्युतस्य श्रीकृष्णस्य कण्ठे । आर्पयत् समर्पयामास । कैतवापह्नुतिः ।

कृष्णकृतकुशलप्रश्नक्रममाह । द्विजेति ।

**द्विजवरकरसारितं पुरस्तात्**
**हरिरुदकुम्भमभिस्पृशन्कराभ्याम् ।**
**मधुरमधुरमन्दहासगर्भं**
**कुशलमपृच्छदनुक्रमं च तेषाम्** ॥ २८ ॥

हरिः श्रीकृष्णः। पुरस्तात् निजपुरोभागे द्विजवरकरसारितं श्रोत्रियहस्तप्रसारितं उदकुम्भं पूर्णकलशं कराभ्यां अभिस्पृशन्सन् आभिमुख्येन स्पृशन्सन्। मधुरमधुरमन्दहासगर्भं यथा तथा अत्यन्तमनोहरमन्दस्मितगर्भं यथा तथा। एतेन तत्रत्यानां सर्वेषां मनोनयनवशीकरणसामर्थ्यं सूचितम्। तेषां भीष्मप्रमुखानां तत्रत्यानां कुशलं अनुक्रमं भीष्मादिक्रमेणेत्यर्थः। अपृच्छत्।

तदन्विति।

**तदनु यदुकुलाब्धिपूर्णचन्द्रः**
**स्वकरगृहीतकुरूद्वहेशपाणिः।**
**अपि गमयति ते मतिस्सुनीतिः**
**जगदवनं त्विति पृच्छति स्म शौरिः ॥ २९ ॥**

तदनु कुशलप्रश्नानन्तरं। यदुकुलमेवाब्धिः समुद्रः तस्य पूर्णचन्द्रः वर्धक इत्यर्थः। एतेन कुरुवंश्यानामप्यविनाशाभिलाषस्सूचितः। शौरिः श्रीकृष्णः। स्वस्य करेण गृहीतः कुरूद्वहस्य दुर्योधनस्य पाणिः येन स तथोक्तस्सन्। ते तव मतिः बुद्धिः सुनीतिस्सती शोभननीतिविशिष्टा सती जगदवनं तु प्रजापरिपालनमेवेत्यर्थः। अपि गमयति अपि नाम प्रवर्तयति। इति एवं प्रकारेण पृच्छति स्म पप्रच्छ। नतावत्त्वं दुर्नीतिपरवशमतिः प्रजापरिपालनपराङ्मुखोसीत्याशयः।

श्रीकृष्णकृतप्रश्नस्य दुर्योधन उत्तरमाह। अथेति।

**अथ कुरुपतिरब्रवीत्सहासं**
**चलति भवद्दययैव राज्यरक्षा।**
**अखिलमपि मदीयसैन्यमेत-**
**न्नतु भवते विहितं मया मुदेति ॥ ३० ॥**

अथ कृष्णप्रश्नानन्तरं। कुरुपतिः दुर्योधनः सहासं सोल्लुण्ठनमित्यर्थः। अत्र सोल्लुण्ठनं तावत् राज्याधिकारहीनोयं गोपालः राजनीतिनिष्णातं मामेवं पृच्छतीति। तदेव विशदयति। राज्यरक्षा भुवनमण्डलरक्षणं भवद्दययैव न तु मदीयनीत्येत्याशयः। चलति स्वयमेव प्रवर्तते। स्यादेतत्। एतत् अत्र परिदृश्यमानं अखिलमपि चतुरङ्ग-विशिष्टमित्यर्थः। मदीयसैन्यं मद्भुजबलार्जितं सैन्यं। मया नत्वन्यप्रेरितेनेत्यर्थः। साक्षात्सार्वभौमेन मया मुदा सन्तोषेण न त्वनिच्छया। भवते सैन्यविहीनाय तुभ्यं त्वामुद्दिश्येति यावत्। विहितं ननु परिकल्पितं ननु। कदा वा भवता तावदेतादृश-

सैन्यसमुद्रः समवलोकितः। पश्य मे वैभवमित्यहङ्कारगर्भोक्तिरियम्। यद्वा व्याख्येयमेवं वा। अथ अनन्तरं कुरुपतिः दुर्योधनः सहासं समन्दस्मितं राज्यरक्षा राज्यपरिपालनं भवद्दयैव भवत्कृपाकटाक्षेणैव। मन्त्रीतिविभवस्तु ईषत्कर इत्याशयः। चलति। दैवबलमन्तरा मनुष्ययत्नसाध्यं न किमपीत्याशयः। एतदखिलमपि मदीयसैन्यं मदीयत्वाभिमानेन रक्षितं सैन्यमित्यर्थः। मया लब्धज्ञानेन मया मुदा भक्त्या भवते भवदर्थं विहितं ननु परिकल्पितमेवेत्यर्थः। इति एवंरीत्या अब्रवीत्।

अथ भीष्मोक्तिमाह। कृतेति।

**कृतनतिमुपसृत्य चक्रपाणिं**
**समधुरहासमुवाच तत्र भक्त्या।**
**ननु भवदनुयायिनो वयं च**
**प्रविश पुरं विजयी भवेति भीष्मः ॥ ३१ ॥**

तत्र तस्मिन्प्रदेशे। एतेन पूज्यप्रणामं प्रति देशकालानवलोकनं सूचितम्। कृतनतिं कृतप्रणामं चक्रपाणिं सर्वशत्रुनिबर्हणसमर्थं श्रीकृष्णं उपसृत्य भीष्मः शन्तनुपुत्रः। एतेन जितेन्द्रियस्य भीष्मस्य श्रीकृष्णमहिमातिशयवेदनं सूचितम्। अत एव भक्त्या प्रीत्यतिशयेन समधुरहासं यथा तथा मन्दहासपूर्वकमित्यर्थः। वयं च वयोवृद्धाः ज्ञानवृद्धा वयमपीत्यर्थः। भवदनुयायिनो ननु भवत्कैङ्कर्यपरा ननु। नन्विति प्रसिद्धौ। प्रसिद्धिश्च श्रुत्या। जीवात्मानस्सर्वेपि भवच्छेषभूता इति यावत्। पुरं हास्तिनपत्तनं प्रविश। विजयीभव सम्प्रत्यागमनकार्यनिर्वहणेन जयशीलो भव। इति पूर्वोक्तप्रकारेण उवाच।

कर्णं प्रति कृष्णोक्तिमाह। सत्विति।

**स तु करमुपगृह्य कर्णमूचे**
**ननु भवता कृतकृत्यता समात्ता।**
**यदनुदिनमपाकृतात्मसौख्यः**
**सुहृदभिवृद्धिमवेक्षसे सदेति ॥ ३२ ॥**

स तु कृष्णस्तु। करं राधेयहस्तं उपगृह्य। ननु हे कर्ण भवता दुर्योधनप्राणभूतेन त्वया कृतकृत्यता कृतं निर्वर्तितं कृत्यं कर्तव्यं कर्म येन स तथोक्तः। तस्य भावः धन्यतेति यावत्। आनृण्यमिति पिण्डितार्थः। समात्ता सम्यग्लब्धा। यत् तस्मात्कारणात् अनुदिनं प्रतिनित्यं सदा निरन्तरमपि अपाकृतात्मसौख्यस्सन् तिरस्कृतनिजसौख्यस्सन्

सुहृदः दुर्योधनस्य अभिवृद्धिं उत्कर्षं अवेक्षसे पश्यसि। लब्धावलम्बनेन भवता तावदिदानीमानृण्यं सम्पादितमित्याशयः।

अथ कर्णोक्तिमाह। सपदीति।

**सपदि तदवकर्ण्य कर्ण ऊचे**
**तदुपकृतेः किमहं करोमि नाथ।**
**कथमहमृणतो विमुक्तिमागा-**
**मिति सततं ननु चिन्तयामि दूये ॥ ३३ ॥**

कर्णः तत् कृष्णोक्तिं अवकर्ण्य। सपदि अनुपदमेव ऊचे प्रत्युत्तरमब्रवीत्। प्रत्युत्तरप्रकारमाह। तदित्यादिना। हे नाथ, हे जगत्स्वामिन्, तस्य दुर्योधनस्य उपकृतेः उपकारस्य-मात्रा निर्दयं परित्यक्तं मामानाय्य राज्यप्रदानाद्यनेकरूपोपकारस्येति यावत्। अहं मित्रान्नवर्धितोऽहं किं प्रत्युपकारं करोमि। न किमपि कर्तुं शक्यते। इयत्पर्यन्तं कृतं त्वल्पल्पमित्याशयः। अहं ऋणी अहं ऋणतः विमुक्तिं मोक्षं कथं केन प्रकारेण आगां प्राप्नुयां। इति एवं प्रकारेण सततं अनवरतमपि चिन्तयामि। दूये ननु। तदर्थं दुःखितो भवामि च।

अथ पुनः कृष्णस्य रथाधिरोहणमाह। अनुपमेति।

**अनुपममहिमा बतायमेवे-**
**त्यनुपदमात्मनि चिन्तयन्मुकुन्दः।**
**कुरुकुलविभवं विभावयन्स-**
**त्रथमधिरुह्य ससात्यकिर्निषण्णः ॥ ३४ ॥**

मुकुन्दः श्रीकृष्णः। अनुपदं कर्णवचनश्रवणसमनन्तरमेव। अयमेव कर्ण एव नान्य इत्यर्थः। अनुपममहिमा असदृशमाहात्म्यविशिष्टः। सुहृदर्थं स्वप्राणत्यागेप्यपराङ्मुखत्वात्। बत आश्चर्यं। इति आत्मनि मनस्येव चिन्तयन्सन् कुरुकुलस्य विभवं एतादृशसुहृत्सम्पत्समृद्धिं विशेषेण भावयन्सन् ससात्यकिः सात्यकिना सहितस्सन् रथं अधिरुह्य निषण्णः उपविष्टोऽभूत्।

करेति।

**करकृष्टखलीनरुद्धवेगा-**
**न्नमितोन्नामितकन्धरानुदंग्रीन्।**

**अधिरुह्य हयांस्तु सादिनोऽग्रे**
**क्रमशस्तस्थुरुदञ्चिताग्रभल्लाः ॥ ३५ ॥**

सादिनस्तु अश्वारोहास्तु । करेण समाकृष्टं यत्खलीनं प्रग्रहः तेन रुद्धः मन्दीकृतः वेगः यैस्ते तान् । नमिता अधःकृता उन्नमिता च ऊर्ध्वं कृता च कन्धरा ग्रीवा यैस्ते तान् । उदंग्रीन् ऊर्ध्वमुत्क्षिप्तपुरश्चरणान् हयान् अधिरुह्य उदञ्चिताग्रभल्लास्सन्तः समुत्क्षिप्तभल्लायुधास्सन्तः । अग्रे पुरोभागे क्रमशः यथापूर्वं पंक्तिशः तस्थुः । स्वभावोक्तिः ।

ससैन्यस्य कृष्णस्य पुरं प्रति प्रस्थानमाह । अथेति ।

**अथ जयरवसान्द्रैश्चित्रवादित्रघोषैः**
**सह नृपतिवरेण्या वाहनान्यध्यरोहन् ।**
**नगरमभिविविक्षुर्माधवस्सैन्यबृन्दैः**
**सलिलनिधिसमानैः प्रावृतस्सन्प्रतस्थे ॥ ३६ ॥**

**इति श्रीयदुशैलवासिबालधन्वि जग्गूवकुलभूषणविरचिते**
**अद्भुतदूतमहाकाव्ये**
**अष्टमस्सर्गः ।**

अथ अनन्तरं । जयरवसान्द्रैः जयघोषसम्मिश्रिततया अतिनिबिडैः चित्रवादित्रघोषैः सह नानाविधवाद्यविशेषनादैस्समं । नृपतिवरेण्याः राजश्रेष्ठाः वाहनानि स्वस्ववाहनानि अध्यरोहन् । नगरं हास्तिनपुरं अभिविविक्षुः अभिमुखं यथा तथा प्रवेष्टुमिच्छुः माधवः श्रीकृष्णः । सलिलनिधिसमानैः समुद्रवदपारैरित्यर्थः । सैन्यबृन्दैः चतुरङ्गबलैः प्रावृतस्सन् प्रकर्षेण परिवृतस्सन् प्रतस्थे ।

इति श्रीभगवल्लक्ष्मीदासानुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
अष्टमस्सर्गः समाप्तः ।

॥ श्रीः ॥

# नवमस्सर्गः ।

कविरिदानीं श्रीकृष्णपुरप्रवेशावसरे पौरनारीणां सम्भ्रमातिशयं वर्णयितुं नवमसर्गमारभते । प्रथमं पुरप्रवेशमाह । चलित इति ।

**चलिते चतुरङ्गबले क्रमशः**
**यदुवंशमणिर्मधुराधिपतिः ।**
**प्रविवेश पुरं परमात्मनिभः**
**प्रतिचेतनकर्मविलोकयिता ॥ १ ॥**

क्रमशः यथाक्रमं । चतुरङ्गबले गजरथतुरगपदातिरूपसैन्ये चलिते सति प्रस्थिते सति यदुवंश एव यदुकुलमेव वंशः वेणुविशेषः तस्य मणिः मुक्ताफलमित्यर्थः । मधुराधिपतिः सकलभोग्यवस्तुमधुरमधुराधीश्वरः श्रीकृष्णः । प्रतिचेतनकर्मविलोकयिता सर्वचेतनानां यत्कर्म पुण्यपापरूपं कर्म तद्द्रष्टा । अत्र कर्मशब्दो लाक्षणिकः । तस्य कर्मफलानुभवे तात्पर्यम् । एतेन पुण्यपापानुगुणसुखदुःखानुभवसक्तचेतनवर्गद्रष्टेत्यर्थः । तथाच श्रुतिः । द्वासुपर्णा सयुजा सखायावित्यादि । पक्षे पुरवासिनां चेष्टाद्रष्टेत्यर्थः । परमात्मनिभः अन्तर्यामिसदृशः । पुरं हास्तिनपुरं शरीरं च प्रविवेश । एतेन सर्वचेतनान्तःप्रवेशसत्त्वेपि भगवतः कर्मानुगुणसुखदुःखरूपफलभोक्तृत्वं नास्तीति सूचितम् । उपमालङ्कारः ।

श्रीकृष्णदर्शनार्थं पौरनारीणां निर्गमनक्रममाह । यदुनाथेति ।

**यदुनाथविलोकनकौतुकतः**
**प्रविमुक्तनिकेतनकार्यभराः ।**
**प्रययुर्गृहहर्म्यगवाक्षमुख-**
**स्थलिकाक्रमणैकरता ललनाः ॥ २ ॥**

ललनाः रमण्यः । यदुनाथस्य श्रीकृष्णस्य विलोकनं दर्शनं तस्मिन् कौतुकतः कुतूहलात् प्रविमुक्तः अत्यवश्यकर्तव्योपि परित्यक्त इत्यर्थः निकेतनस्य स्वस्वगृहस्य कार्यभरः कार्यातिशयः याभिस्ताः । अत्र भरशब्देन कार्याधिक्यं सूच्यते । गृहाणां यानि हर्म्याणि उपरिभागा इत्यर्थः । ये गवाक्षाः वातायनानि सावकाशप्रदेशा इति यावत् तेषां मुखस्थलिकाः पुरोभागप्रदेशाः तेषां आक्रमणैकरताः सत्यः प्रथमतो ग्रहणैकताना इत्यर्थः । प्रययुः प्रकर्षेण निर्जग्मुः । स्वभावोक्तिः । एतेन यो भगवद्दर्शनकुतूहली स तु त्यक्तैहिकव्यापारसङ्गो भवतीति सूच्यते । परमात्मनि यो रक्तो विरक्तस्सोऽपरमात्मनि । इतिह्युक्तम् ।

कतिचिदिति ।

कतिचिल्ललना गृहमध्यगताः
निजबालकमण्डनसक्ततया ।
असमाप्तनिजप्रतिकर्मकलाः
विनिनिन्दुरगारजकर्मचयम् ॥ ३ ॥

कतिचिल्ललनाः काश्चन नार्यः । निजबालकानां आत्मतनूजानां मण्डने उत्सवदर्शनसमुचितालङ्करणे सक्ततया व्यग्रतया असमाप्ता अपूरिता निजप्रतिकर्मकला आत्मनः प्रसाधननैपुणं याभिस्तास्सत्यः । गृहमध्यगतास्सत्यः गृहाभ्यन्तर एव स्थितास्सत्यः अगारजकर्मचयं गृहे तावदवश्यकर्तव्यकार्याधिक्यं । विनिनिन्दुः विशेषेण निनिन्दुः । गृहकार्यानन्तरं बालका मण्डनीयाः तदनन्तरमात्मनः प्रसाधनम् । हन्त, बहुलतया गृहकार्यमेवेयन्तं कालमासीत् । आत्ममण्डनायावसर एव न लब्धः धिगिति निनिन्दुरित्याशयः ।

बहिरिति ।

बहुरम्यपरिष्करणप्रचुर-
स्फुरदुज्वलरत्नमरीचिभिः ।
गगनं निचितं सुरचापगणै-
रिव सान्द्रविचित्रवितानमिव ॥ ४ ॥

बहूनि नानाविधानि यानि रम्यपरिष्करणानि स्पृहणीयाभरणानि तेषु प्रचुराणां अधिकानां स्फुरन्त्यः रविकिरणसम्पर्कात् समुद्गताः उज्वलरत्नानां स्वतस्तेजिष्ठमणीनां मरीचयः मयूखाः ताभिः । गगनं आकाशं सुरचापगणैः इन्द्रचापनिकरैः निचितमिव व्याप्तमिवेत्युत्प्रेक्षा । सान्द्रं निबिडतरं विचित्रवितानं नानावर्णशबलितोल्लोचः यस्मिन् तदिवेत्युत्प्रेक्षा । चकाशे । इति शेषः । एतेन तत्रत्यानां सम्पदाधिक्यं सूचितम् ।

बहिरिति ।

बहुवर्णवधूवसनैर्निचिता
पवनायनहर्म्यवितर्दिततिः ।
प्रविशद्यदुनाथमहोत्सवज-
प्रमदादृतचित्रपटीव बभौ ॥ ५ ॥

पवनायनानि गवाक्षाः हर्म्याणि भवनोर्ध्वदेशाः वितर्दयः वेदिकाः एतेषां ततिः समूहः बहुवर्णानि हरितपीतासितनीलकपिशादिनानावर्णानि यानि वधूनां दर्शनागतानां नारीणां वसनानि वासांसि तैः निचिता सती व्याप्ता सती । प्रविशन् नगराभ्यन्तरमागच्छन् । यः यदुनाथः श्रीकृष्णः तस्य महोत्सवः यात्रोत्सवः तस्माज्जः समुत्पन्नः यः प्रमदः सन्तोषातिशयः तस्माद्धेतोः धृतचित्रपटीव प्रावृतनानावर्णांशुकालङ्कृतेवेत्युत्प्रेक्षा । बभौ । अचेतनानामपि श्रीकृष्णहर्षजनकव्यापारे प्रवृत्तिरित्याशयः ।

प्रवीति ।

**प्रविमर्दपरस्परभीरुवधू-**
**कलकण्ठगलत्कलसान्द्ररवैः ।**
**मुखरीकृतसौधपरम्परिका**
**नगरी हसतीव किलेति मुदा ॥ ६ ॥**

नगरी हास्तिनपुरी । प्रविमर्दात् प्रकर्षेण परस्परसंघर्षणात् परस्परभीरवः अन्योन्यमावेगविशिष्टा इत्यर्थः । याः वध्वः तासां कलकण्ठगलत्सान्द्ररवैः अव्यक्तमधुरं यथा तथा प्रसरन्निबिडतरनादैः । मुखरीकृतसौधपरम्परिका सती शब्दायमानसमुन्नतभवनपंक्तिस्सती- मुदा श्रीकृष्णदर्शनसन्तोषेण किलेति किलकिलेत्यर्थः । हसतीवेत्युत्प्रेक्षा ।

कटीति ।

**कटिदेशगतं शिशुमप्यबला**
**हरिदर्शनकौतुकसम्भ्रमतः ।**
**निबिडौघवधूजनमध्यगता**
**परिपीडयति स्म विमर्दनतः ॥ ७ ॥**

अबला योषित् । अत्र अबलाशब्देन सम्मर्दप्रवेशानर्हत्वं सूचितम् । हरेः श्रीकृष्णस्य दर्शने यत्कौतुकं कुतूहलं तस्य सम्भ्रमतः त्वरातिशयात् निबिडः अत्यन्तसान्द्रः यः ओघः समूहरूपः यः वधूजनः तस्य मध्यगता सती मध्यप्रदेशं प्रविष्टा सती । विमर्दनतः परस्परसंघर्षणात् कटिदेशगतं अवलम्बलग्नं शिशुमपि निजार्भकमपि परिपीडयति स्म । न केवलं स्वयं पीडिता शिशुमपि पीडयतिस्मेत्यर्थः । एतेन कृष्णदर्शनकुतूहलविशिष्टायाः अत्यन्तप्रीतिपात्रे निजशिशावप्यनादरस्सूचितः ।

सुविमर्देति ।

**सुविमर्दवधूजनमध्यगता**
**तरुणी विवशा प्लवमानतनुः ।**
**समनीयत सा परिमुक्तधरा**
**स्वयमेव पुरो जनघर्षणतः ॥ ८ ॥**

सुविमर्दवधूजनमध्यगता अत्यन्तसम्मर्दाकुलस्त्रीजनमध्यवर्तिनी । काचित्तरुणी युवतिः विवशा सती अस्वाधीना सती। अत एव प्लवमानतनुस्सती क्वापि नीयमानशरीरा सती परिमुक्तधरा सती धरातलानिहितचरणा सती सा स्वयमेव प्रयत्नविहीनैवेत्यर्थः । जनघर्षणतः परस्परजनसम्मर्देन पुरः सौधपुरोभागं समनीयत प्रापितेत्यर्थः । प्रयत्नं विना जनसम्मर्देनैव नुन्ना सती सर्वापेक्षया पुरोभागे स्थितेत्याशयः ।

पुरत इति।

**पुरतो गमिताः कतिचिल्ललनाः**
**चरमातिविमर्दननुन्नपुराः ।**
**ततहर्म्यतटीवृतिसक्तकराः**
**स्थितिमापुरतिभ्रुकुटि प्रसभम् ॥ ९ ॥**

पुरतः सर्वापेक्षया पुरोभागं गमिताः विमर्देन प्रापिताः कतिचिल्ललनाः काश्चिन्नार्यः चरमे पृष्ठभागे अतिविमर्देनेन जनसम्बाधेन नुन्नं प्रेरितं पुरं शरीरं यासां तास्सत्यः । अत एव प्रसभं बलात्कारेण अतिभ्रुकुटि यथा तथा अत्यन्त भङ्गुर भ्रूतटं यथा तथा ततहर्म्यस्य विशालभवनाग्रदेशस्य तट्यां प्रान्तदशे या सृतिः सालः तत्र सक्तौ विनिहितौ करौ याभिस्तास्सत्यः। स्थितिं आपुः । एतेन हर्म्यतलेपि जनबाहुल्यं सूचितम्। स्वभावोक्तिः ।

सुखेति ।

**सुखपङ्कजपंक्तिसहस्रतया**
**नयनोत्पलमाल्यसमृद्धतया ।**
**समुदग्रसुधासितसौधततिः**
**कुसुमैरचितेव पुरे प्रबभौ ॥ १० ॥**

समुदग्राः समुन्नताः ये सुधासिताः सुधया धवलाः सौधाः धनिनां गृहाः तेषां ततिः परम्परा। मुखपङ्कजानां वधूमुखकमलानां पङ्क्तयः तासां सहस्रतया । नयनोत्पलानां वधू-

नेत्रनीलोत्पलानां माल्यानि परम्पराः तैः समृद्धतया पूर्णतया। कुसुमैः पुष्पैः रचितेव निर्मितेवेत्युत्प्रेक्षा। पुरे हास्तिननगरे प्रबभौ प्रकर्षेण चकाशे।

चलेति।

**चलकुन्तलसौरभसन्निहितैः**
**भ्रमरैर्निचिताननतामरसाः।**
**अतिमेचकजालिकया व्यलसन्**
**कृतगुण्ठनकान्तमुखा इव ताः ॥ ११ ॥**

ताः तत्रत्याः वध्वः। चलकुन्तलानां तरलालकानां सौरभेण परिमलविशिष्टचूर्णविशेषप्रसृमरगन्धेन सन्निहितैः समीपे परिभ्रमद्भिः भ्रमरैः चञ्चरीकैः निचिताननतामरसास्सत्यः व्याप्तमुखपङ्कजास्सत्यः। अतिमेचकजालिकया अत्यन्तनीलवर्णमुखगुण्ठनजालिकाविशेषेण कृतं गुण्ठनं निचोलनं तेन कान्तं मनोहरं मुखं यासां ता इवेत्युत्प्रेक्षा। व्यलसन् चकाशिरे। मत्तकाशिन्यः नीलजालिकया मुखमाच्छादयन्ति। एतेन तासां पद्मिनीजातित्वमुक्तं भवति।

क्रमश इति।

**क्रमशः प्रचलद्बलदर्शनतः**
**मुरवैरिरथप्रविलम्बनतः।**
**कति सैन्यगणास्सरिदोघनिभाः**
**इति कापि निनिन्द चिरोत्सुकिनी ॥ १२ ॥**

क्रमशः क्रमेण प्रचलद्बलदर्शनतः गच्छत्सैन्यावलोकनात्। मुरवैरिरथस्य श्रीकृष्णस्यन्दनस्य प्रविलम्बनतः चिरविलम्बनात्। कापि वधूः सरिदोघनिभाः नदीप्रवाहसदृशाः कति कतिसंख्याकाः सैन्यगणाः चतुरङ्गबलसमूहाः। इति एवं प्रकारेण चिरोत्सुकिनी सती चिरात् श्रीकृष्णदर्शनकुतूहलविशिष्टा सती। निनिन्द। कदा वा समागमिष्यति कृष्णः कदा तं द्रक्ष्यामि इति कुतूहलाक्रान्तचित्ता काचित् अपारसैन्यप्रचलनात् हन्त नाद्याप्यवसिता सेना कृष्णागमनाय चिरकालो भवेदिति सैन्यं निनिन्देत्याशयः।

तरुणीति।

**तरुणी कुचकुम्भमुखेन मुहुः**
**पुरतस्स्थितिगां व्यथयन्त्यबलाम्।**

**भ्रुकुटिभ्रमिताक्षितयातिरुषा**
**ददृशे परिवर्तितकन्धरया ॥ १३ ॥**

पुरतः अग्रभागे स्थितिगां स्थितवतीं अबलां योषां । कुचकुम्भमुखेन कुम्भसदृशस्तन-चूचुकेन । एतेन स्तनयोः अतिकाठिन्यं सूचितम् । मुहुः पृष्ठतो विमर्दादसकृत् व्यथयन्ती तोदनेन पीडयन्ती तरुणी युवतिः । भ्रुकुटिभ्रमिताक्षि यथा तथा भ्रूभङ्गभ्रामित-नयनं यथा तथा । परिवर्तितकन्धरया विवलितग्रीवया तया अबलया अतिरुषा अत्यन्त-कोपेन । ददृशे समालोक्यत । भवत्तारुण्यपराकाष्ठां मयि दर्शयसीति सूचयन्तीव तामपश्यदित्याशयः ।

नेति ।

**न कदापि गृहाद्बहिरागतव-**
**त्यधुनेयमहो सकलाक्षिपथम् ।**
**गमिता हरिणेत्यवदन्वनिताः**
**प्रसमीक्ष्य च कामपि नूत्नवधूम् ॥ १४ ॥**

कदापि गृहात् निजभवनात् बहिः प्रतोलीं नागतवती । इयं अधुना हरिणा श्रीकृष्णेन सकलाक्षिपथं सर्वेषां दृष्टिमार्गं गमिता प्रापिता । अहो आश्चर्यम् ! इति एवं प्रकारेण वनिताः तत्रत्या नार्यः । कामपि नूत्नवधूं नूतनतया पतिगृहमागतां वधूं प्रसमीक्ष्य सादर-मवलोक्य अवदन् ऊचुः । श्रीकृष्णदर्शनार्थं निजलज्जापि परित्यक्तेति सूच्यते ॥

उरस इति ।

**उरसश्च्युतचित्रपटात्वपरा**
**मणिभूषणजालमरीचिचये ।**
**सिचयभ्रमतः करमादधती**
**त्रपया स्वयमेव जहास भृशम् ॥ १५ ॥**

अपरा तु अन्या मत्तकाशिनी तु । उरसः निजवक्षस्थलात् च्युतः स्रस्तः चित्रपटः नाना वर्णशबलितचेलं यस्यास्सा तथोक्ता सती । मणिभूषणानां नवरत्नाभरणानां जालं समूहः यद्वा आनायसदृशः यः मरीचीनां किरणानां चयः समूहः तस्मिन् सिचयभ्रमतः उद्गमनीयभ्रान्त्या । करं निजपाणिं आदधती सती कुर्वती सती । त्रपया लज्जया स्वयमेव भृशं अत्यधिकं जहास । गलितवक्षश्चेला पुनः पिधानाय नानावर्णशबलितविभूषण-

मरीचिजाले वस्त्रभ्रान्त्या कृतहस्ता निजभ्रान्तिमननात् स्वयमेव जहासेत्याशयः। भ्रान्तिमदलङ्कारः ॥

मुकुर इति ॥

**मुकुरे प्रतिबिम्बमवेक्ष्य वधूः**
**अभियान्तमनल्पजवं सुमुखी।**
**स्वसखीति धिया प्रतिभाष्य ततः**
**त्रपया न किमप्यवदत्स्वसखीम् ॥ १६ ॥**

मुकुरे भित्तिघटितविशालदर्पणे। वधूः काचिन्मत्तकाशिनी। अभियान्तं निजाभिमुखमायान्तं अनल्पजवं निजवेगगमनात् अतिवेगविशिष्टं प्रतिबिम्बं आत्मन एव प्रतिच्छायां अवेक्ष्य दृष्ट्वा। सुमुखी सती मन्दहासविशिष्टमुखी सती स्वसखीति आत्मनस्सखीति धिया बुद्ध्या प्रतिभाष्य किं त्वमपि श्रीकृष्णदर्शनार्थं प्रस्थितासीति भाषयित्वा। ततः आत्मन एव प्रतिबिम्बोयमित्यवगमनानन्तरं त्रपया लज्जया स्वसखीं निजपार्श्वगतां सखीं प्रति। किमपि किञ्चिदपि नावदत् मूकेव बभूवेत्यर्थः। काचित्ससम्भ्रमं श्रीकृष्णदर्शनाय धावन्ती आत्मप्रतिबिम्बमेव स्वसखीति भ्रान्त्या समाभाष्य निश्चयज्ञानानन्तरं लज्जया आत्ममौढ्याप्रकाशनाय मूकेवाभूदित्याशयः। भ्रान्तिमदलङ्कारः।

अथ श्रीकृष्णरथदर्शनमाह। क्रमेति।

**क्रमसन्निहितं हरिदश्वकर-**
**प्रतिबिम्बसमुज्ज्वलरत्नरुचिम्।**
**सुरयाननिभं सुदृशो ददृशुः**
**रथमुच्चखगध्वजचित्तहरम् ॥ १७ ॥**

क्रमसन्निहितं सैन्यानुक्रमेण समीपगतं हरिदश्वस्य सूर्यस्य कराणां किरणानां प्रतिबिम्बेन सम्पर्केण समुज्ज्वला देदीप्यमाना रत्नानां रुचिः कान्तिः यस्य स तथोक्तः। तं सुरयाननिभं देवेन्द्ररथसदृशं उच्चखगध्वजेन समुन्नतगरुडकेतनेन चित्तहरं सर्वजनमनोनयनवशीकरणसौन्दर्यविशिष्टं रथं। सुदृशः तत्रत्या ललनाः ददृशुः। एतेन श्रीकृष्णरथस्य दिव्यत्वं सूचितम्।

सुदृशामिति।

**सुदृशां नयनोत्पलसन्ततिभिः**
**यमुनासलिलोर्मिपरीत इव।**

**ददृशे यदुनायकनीलमणिः**
**भुजगाशनचन्द्रकभूष इव ॥ १८ ॥**

सुदृशां स्पृहणीयनयनानां सुन्दरीणां नयनोत्पलसन्ततिभिः कुवलयसदृशलोचनपरम्पराभिः यदुनायकनीलमणिः श्रीकृष्णः। एतेन यदूनां मुक्तामालात्वं सूचितं श्रीकृष्णस्य तन्मध्यमणित्वञ्च। एतेन यदूनां कृष्णसम्बन्धात् परभागविशिष्टत्वं च सूचितं भवति। यमुनासलिलस्य कालिन्दीजलस्य ऊर्मिभिः तरङ्गैः परीत इव व्याप्त इवेत्युत्प्रेक्षा। भुजगाशनस्य मयूरस्य चन्द्रकाः मेचकाः त एव भूषाः आभरणानि यस्य स तथोक्त इवेत्युत्प्रेक्षा। जनैरिति शेषः। ददृशे अवलोकितः। एतेन तत्रत्यानां नारीणां सौन्दर्यातिशयस्सूचितः।

चामरयुगलं वर्णयति। यदुनाथेति।

**यदुनाथविभूषणचित्ररुचि**
**स्फुरितामलचामरयुग्ममपि।**
**हरिचापपरम्परयेव बभौ**
**हरिपार्श्वयुगे परिसङ्कलितम् ॥ १९ ॥**

यदुनाथस्य श्रीकृष्णस्य विभूषणानां किरीटहारकेयूरादिभूषणानां चित्ररुचिभिः नानावर्ण-कान्तिभिः स्फुरितं प्रकाशितं अमलयोः शुभ्रयोः चामरयोः युग्ममपि युगलमपि। अत्र परस्परसमुच्चयार्थकोपि शब्दः। हरिचापपरम्परया इन्द्रचापपंक्त्या परिसङ्कलितमिव शबलीकृतमिवेत्युत्प्रेक्षा। हरिपार्श्वयुगे श्रीकृष्णोभयपार्श्वयोः बभौ चकाशे। श्रीकृष्णा-भरणनवरत्नकान्तिशबलितं धवलचामरयुगलं दोधूयमानेन्द्रचापसदृशमभूदित्याशयः।

वनिता इति।

**वनिता जगदुस्तमवेक्ष्य मुदा**
**विवशीकृतमानसवृत्तितया।**
**स्वपनोद्भवदृश्यगणा इव ताः**
**सुरलोकविभूतिकृतस्मरणाः ॥ २० ॥**

ताः श्रीकृष्णदर्शनानन्दिताः वनिताः अङ्गनाः। तं श्रीकृष्णं अवेक्ष्य मुदा सन्तोषातिशयेन विवशीकृतमानसवृत्तितया परवशीकृतमनोवृत्तितया। तदैकतानचित्ततयेति यावत्। सुरलोकस्य स्वर्गस्य विभूतिः ऐश्वर्यं तस्मिन् कृतं स्मरणं याभिस्तास्तथोक्ताः। श्रुतं स्वर्गलोक-

वैभवं स्मृतवत्यस्सत्य इति यावत् । स्वपने स्वप्ने उद्भवाः समुत्पन्नाः दृश्यानां विविध-विचित्रादृष्टपूर्वपदार्थानां गणा इव समूहा इवेत्युत्प्रेक्षा । जगदुः वक्ष्यमाणप्रकारेणोचुः ।

ध्वजेति ।

**ध्वजमध्यगतो गरुडो गणय-**
**न्निव भाति जनान्क्रमशः प्रचलन् ।**
**अवलोकय नीलविशाललल-**
**न्नयने ध्वजमुच्छ्रितमब्जमुखि ॥ २१ ॥**

हे, नीलविशाललसन्नयने नीलोत्पलवत्प्रकशमानविशाललोचने । एतेन सुन्दरनयनवैशाल्यस्य इदानीं सार्थक्यं सूचितम् । अब्जमुखि कमलसदृशवदने । एतेन तद्दर्शनात् मुखविकास-स्सूचितः । सखि ध्वजमध्यगतः केतुमध्ये प्रकाशमानः गरुडः प्रचलन्सन् ध्वजपटस्य चाञ्चल्यात् स्वयमपि चञ्चलः । क्रमशः रथगमनानुक्रमेण जनान् श्रीकृष्णदर्शनार्थमागता-न्मनुजान् गणयन्निव कत्यागता जनाः इति संख्यागणनां कुर्वन्निवेत्युत्प्रेक्षा । भाति प्रकाशते । उच्छ्रितं समुन्नतं ध्वजं अवलोकय पश्य ।

मणीति ।

**मणिकुण्डलकान्तिचितान्ततया**
**यदुनाथकपोलतलं लसति ।**
**भुजवीररमामुखनीररुह-**
**प्रतिदर्शनकल्पितदर्पणवत् ॥ २२ ॥**

मणिकुण्डलयोः रत्नमयकर्णवेष्टनयोः कान्त्या प्रभया चितान्ततया व्याप्तप्रान्तप्रदेशतया यदुनाथस्य श्रीकृष्णस्य कपोलतलं । भुजयोः बाह्वोः या वीररमा वीरलक्ष्मीः तस्याः मुखसरोरुहं वदनकमलं तस्य प्रविदर्शनं प्रकर्षेणावलोकनं तदर्थं कल्पितदर्पणवत् निर्मित-मुकुरकल्पं सत् । विलसति प्रकाशते । एतेन कपोलयोर्लावण्यातिशयस्सूचितः । उपमालङ्कारः ।

उरसीति ।

**उरसि प्रतिभाति हरेर्नितरां**
**रुचिरस्सतु कौस्तुभदिव्यमणिः ।**
**सततं निवसत्कमलातिमुदे**
**ज्वलितोच्चशिखो ननु दीप इव ॥ २३ ॥**

ननु हे सखि। हरेः श्रीकृष्णस्य उरसि वक्षस्स्थले नितरां रुचिरः अत्यन्तं भासुरः। यद्वा अतिमनोहरः स तु प्रसिद्धः कौस्तुभदिव्यमणिः कौस्तुभाख्यं दिव्यरत्नं। सततं निरन्तरमपि निवसत्कमलातिमुदे अविरहितवक्षस्स्थलायाः लक्ष्म्यास्सन्तोषार्थं। ज्वलितोच्चशिखः समुद्दीपितोर्ध्वज्वालः दीप इव मङ्गलप्रदीप इव। प्रतिभाति प्रकाशते। एतेन लक्ष्म्याः मङ्गलदीपे महती प्रीतिरिति सूचितम्। उपमालङ्कारः।

असित इति।

**असितः किमयं धवलस्त्वपरः**
**ननु पश्य चिरात्सखि शंखयुगम्।**
**अवकर्ण्य सहासमुवाच परा**
**ननु कृष्णगलोऽयमिति स्वसखीम्** ॥ २४ ॥

ननु सखि। अयं परिदृश्यमानः एकः किं किमर्थं असितः कृष्णवर्णः। अपरस्तु तत्पार्श्वे विद्यमानः अन्यस्तु धवलः शुक्लवर्णः चिरात् सम्यगित्यर्थः। पश्य अवलोकय। शंखयुगं कम्बुद्वयं वर्तते। एवं कस्याश्चिद्भ्रान्तायाः वचनमवकर्ण्य अपरा सखी सहासं यथा तथा। अत्र भ्रान्तिनिबन्धनोयं हासः। अयं असितः कृष्णगलः श्रीकृष्णस्य कण्ठो ननु। इति स्वसखीं प्रति उवाच। कम्बुग्रीवोयमित्यर्थः। अपह्नुतिविशेषः।

सुनसेति।

**सुनसोच्छ्रितसेतुनिरुद्धतया**
**ततलोचनकान्तिजलप्रवहः।**
**प्रसरन्निव चोभयधा नितरां**
**विशति श्रवणद्वयरन्ध्रपुटम्** ॥ २५ ॥

शोभननासिकैव उच्छ्रितसेतुः तेन निरुद्धतया कृतनिरोधतया। ततलोचनयोः विशालनयनयोः कान्त्याख्यजलप्रवाहः। उभयथा द्विप्रकारेण द्वैधीभूयेति यावत्। नितरां प्रसरन् प्रसरणशीलस्सन् श्रवणद्वयरन्ध्रपुटं उभयपार्श्वनिकटस्थितश्रोत्रद्वयस्य रन्ध्रपुटं विवरमित्यर्थः विशतीव प्रविशतीत्युत्प्रेक्षा। स्रवन्त्यास्सेतुबन्धेन जलप्रवाहः द्वैधीभूय यत्र रन्ध्रं तत्र प्रविशतीत्यनुभवसिद्धम्। एतेन श्रीकृष्णस्य नासिकायाः समुन्नतत्वं विशाललोचनयोः कान्तिपूर्णत्वं श्रोत्रपर्यन्तव्यापित्वञ्च वर्णितानि। रूपकसङ्कीर्णेयमुत्प्रेक्षा।

असितेति ।

**असितप्रभया वलयीकृतव-**
**त्कुटिलालकमण्डलसंवलितम् ।**
**हरिनीलमणिप्रभमुच्चतलं**
**लसतीन्दुनिभं हि ललाटतटम्** ॥ २६ ॥

असितप्रभया नीलकान्त्या वलयीकृतवत् वर्तुलीकृतवत् कुटिलाः वक्राः ये अलकाः चूर्णकुन्तलाः तेषां मण्डलं समूहः तेन संवलितं व्याप्तम् । यद्वा परिवृतप्रान्तं । हरिनीलमणिप्रभं इन्द्रनीलमणिकान्तिविशिष्टं । उच्चतलं उन्नतमध्यप्रदेशं ललाटतटं अलिकदेशः इन्दुनिभं सत् अर्धचन्द्रसदृशं सत् । लसति प्रकाशते । उपमालङ्कारः ।

रजनीति ।

**रजनीकरभास्करयोरुपरि**
**प्रसरत्परिवेषकले इव ते ।**
**नयनोपरि मन्मथचापनिभे**
**तनुलोमपरम्परिके लसतः** ॥ २७ ॥

रजनीकरभास्करयोः सूर्याचन्द्रमसोः उपरि ऊर्ध्वदेशे प्रसरन्तौ यौ परिवेषौ परिधी तयोः कले इव रेखे इव नयनोपरि नेत्रोर्ध्वदेशे मन्मथचापनिभे स्मरधनुस्सदृशे ते प्रसिद्धे तनुलोमपरम्परिके भ्रुवौ लसतः प्रकाशेते । एतेन श्रीकृष्णनयनयोः चन्द्रसूर्यत्वमुक्तं भवति । किञ्च परिवेषकलासादृश्येन नैल्यं मन्मथचापसादृश्येन च सौन्दर्यं च प्रतिपादितम् । उपमालङ्कारः ।

बहिति ।

**बहुवत्सलता हृदये विधृता**
**बहिरप्यचिरात्प्रसृतेव सखि ।**
**तदुरस्यवलोकय वत्स इति**
**प्रतिभाति च लांछनमिन्दुमुखि** ॥ २८ ॥

इन्दुमुखि, चन्द्रवदने, हे सखि, हृदये अन्तर्हृदये विधृता पूर्णा बहुवत्सलता अत्यधिकवात्सल्यं दोषभोग्यत्वमित्यर्थः । वत्साख्यलता च । बहिरपि बाह्ये वक्षस्स्थलेपि अचिरात् क्षिप्रमेव प्रसृतेव प्ररूढेव वत्स इति श्रीवत्साभिधं लांछनं चिह्नं तदुरसि

श्रीकृष्णवक्षस्स्थले प्रतिभाति । अवलोकय । दोषभोग्यत्वरूपवात्सल्यमेव वत्साख्यलता श्रीकृष्णहृदयालवाले निरन्तरा निरवकाशतया बहिरपि समुद्गतेव श्रीवत्साख्यं लक्ष्म वक्षस्स्थले प्रकाशते । पश्येत्याशयः ।

हृदीति ।

**हृदि सद्गुणगोपनसङ्घटितं**
**नवनीलमणीरितमुच्चदृढम् ।**
**स्तनशङ्कुयुगाश्चितमस्य मह-**
**त्तदुरः प्रतिभाति कवाटमिव ॥ २९ ॥**

हृदि मानसे सद्गुणगोपनसंघटितं विद्यमानकल्याणगुणाख्यरत्नरक्षणार्थं संयोजितं नवनील-मणीरितं नूतनीलरत्नफलककल्पितं उच्चदृढं समुन्नतं चाभेद्यं च स्तनाख्यशङ्कुयुगेन अश्चितं अलङ्कृतं । महत् स्फीतं तत् जगद्विख्यातं। अस्य श्रीकृष्णस्य उरः वक्षस्स्थलं कवाटमिव प्रतिभाति प्रकाशते । उपमालङ्कारः ।

मणीति ।

**मणिहारपरम्परया तदुरः**
**विलसत्यमलायतमब्जमुखि ।**
**निशि चित्रपरिस्फुरितोडुगणं**
**गगनाङ्कणमच्छमिव प्रततम् ॥ ३० ॥**

हे अब्जमुखि, कमलवत्स्पृहणीयसौरभविशिष्टवदने सखि। अमलायतं निर्णिक्तनीलमणि-फलकविशालं तदुरः श्रीकृष्णस्य वक्षस्स्थलं। मणिहारपरम्परया नवरत्नमालापंक्त्या निशि रात्रौ चित्रपरिस्फुरितोडुगणं ग्रहनक्षत्रतारामण्डलविशिष्टं अच्छं निर्मलं प्रततं विशालं गगनाङ्कणमिव । विलसति प्रकाशते । उपमालङ्कारः ।

तन्विति ।

**तनुकान्तिजलोदरमग्नमिदं**
**श्रुतिपाशविकर्षणविस्फुरितम् ।**
**मणिकुण्डलकैतवबद्धवपुः**
**मकरद्वयमस्य विभाति तराम् ॥ ३१ ॥**

तनोः शरीरस्य कान्तिः नीलसुषुमैव जलं तस्योदरे अभ्यन्तरे मग्नं इदं परिदृश्यमानं अस्य श्रीकृष्णस्य मकरद्वयं कर्णवेष्टनयुगलं। श्रुतिपाशावेव कर्णपाशावेव पाशौ बडिशे ताभ्यां विकर्षणेन बहिस्समुद्धरणेन विस्फुरितं सत् स्फुरणविशिष्टं सत् कान्तिविशिष्टं च सत्। मणिकुण्डलकैतवेन रत्नमयकर्णवेष्टनव्याजेन बद्धवपुः येन तत् सत्। विभाति तरां अत्यधिकं प्रकाशते। रूपकापह्नुत्योस्सङ्करः।

स्फुटेति।

**स्फुटदाडिमपुष्पसमानरुचिः**
**चुबुकोपरि भात्यधरो मधुरः।**
**चितविद्रुमनीलमणिप्रचयः**
**कमलाचषकोऽमृतपूर्ण इव ॥ ३२ ॥**

स्फुटं विकसितं यद्दाडिमपुष्पं तेन समाना सदृशी रुचिः कान्तिः यस्य स तथोक्तः अरुणवर्ण इति यावत्। चुबुकस्य उपरि ऊर्ध्वभागे मधुरः स्पृहणीयः अधरः। चितः खचितः विद्रुमः प्रवालं यस्मिन्स तथोक्तः। नीलमणिः इन्द्रनीलरत्नं तत्प्रचयः तन्मय इत्यर्थः। अमृतपूर्णः कमलायाः लक्ष्म्याः चषक इव पानपात्रमिव भाति। उपमालङ्कारः।

कनकेति।

**कनकाम्बरमस्य तनुद्युतितः**
**कलितं कदलीवनषण्डगतम्।**
**उदयद्दिननाथकरप्रसृतं**
**कमनीयतरातपकूटमिव ॥ ३३ ॥**

अस्य श्रीकृष्णस्य तनुद्युतितः शरीरकान्त्या कलितं मिश्रितं कनकाम्बरं पीताम्बरं। कदलीनां वनं तस्य षण्डे समूहे गतं पतितं उदयन् आविर्भवन् यः दिननाथः सूर्यः तस्य करेभ्यः किरणेभ्यः प्रसृतं प्रसरणशीलं कमनीयतरः अत्यन्तमनोहरः यः आतपः बालातपः तस्य कूटमिव बृन्दमिव। भातीति शेषः। उपमालङ्कारः।

दयितेति।

**दयिताननदर्शनकौतुकतः**
**तदुरस्स्थितमाप्रहिताक्षिरुचिः।**
**अलिके तनुरेखिकया तिलक-**
**च्छलतो मिषतीव सरोजमुखि ॥ ३४ ॥**

हे सरोजमुखि, कमलवदने। दयितस्य वल्लभस्य श्रीकृष्णस्य आननस्य मुखकमलस्य दर्शनं अवलोकनं तस्मिन् कौतुकतः कुतूहलात् । तस्य श्रीकृष्णस्य उरसि वक्षस्स्थले स्थिता निषण्णा या मा लक्ष्मीः तया प्रहितं प्रेषितं यदक्षि नयनं तस्य रुचिः नीलकान्तिः अलिके ललाटमध्ये तिलकच्छलतः मृगमदतिलकव्याजेन । तनुरेखिकया सूक्ष्मरेखारूपेण मिषतीव प्रकाशत इवेत्युत्प्रेक्षा । उत्प्रेक्षापह्नुत्योस्सङ्करः ।

भुजेति ।

**भुजवीररमापदनूपुरतां**
**भजदङ्गदमादधदिन्दुमुखि ।**
**भुजगप्रभुभोगनिभं सुभगं**
**भुजयुग्ममिदं नयने हरति ॥ ३५ ॥**

हे इन्दुमुखि। भुजयोः श्रीकृष्णबाह्वोः वीररमायाः वीरलक्ष्म्याः । वीर्यलक्ष्म्या इति यावत् अत्र भावप्रधानो निर्देशः । पदनूपुरतां पादाङ्गदतां । भजत् सेवमानं अङ्गदं केयूरं आदधत् बिभ्रत् भुजगप्रभुः आदिशेषः तस्य भोगः कायः तेन निभं सदृशं भुजगेशभोगवत् स्फीतवर्तुलमृदुलमसृणदीर्घत्वादिगुणविशिष्टमित्यर्थः । अत एव सुभगं दर्शनीयं इदं परिदृश्यमानं भुजयुग्मं बाहुयुगलं । 'नयने अस्मल्लोचने हरति आकर्षति । तल्लीने करोतीत्याशयः ।

धवला इति ।

**धवलास्तुरगाः पुरतो गमय-**
**न्त्यचिराद्रथमच्युतकान्ततमम् ।**
**पिदधासि मुधा नयने त्रपया**
**ननु पश्य चिरादुपयान्तममुम् ॥ ३६ ॥**

ननु हे सखि। धवलाः श्वेतवर्णाः। एतेन तुरगाणामेव दर्शनीयत्वमुक्तं भवति । तुरगाः रथनियुक्ता अश्वाः। पुरतः अग्रभागे अच्युतेन श्रीकृष्णेन कान्ततमं अत्यन्त-मनोहरम्। रथ एव केवलं स्पृहणीयः तत्रापि श्रीकृष्णसान्निध्यात् दृगासेचकरूप इत्याशयः। रथं अचिरात् शीघ्रमेव गमयन्ति नयन्ति। मन्दं न प्रयान्तीत्याशयः । त्रपया लज्जया मुधा नयने पिदधासि । नयनयोर्जन्म न सार्थयसीत्यर्थः। चिरात् बहुकालात् उपयान्तं समीपे आगच्छन्तं अमुं अवश्यदर्शनीयं श्रीकृष्णं पश्य अवलोकय। चिरादभिलषितोयमिदानीं दिष्ट्या समुपनतः। तन्मा प्रतारय त्रपया त्वन्नयने इत्याशयः ।

किलेति ।

किलकिञ्चितकुञ्चितमञ्जुमुखि
प्रियमक्षियुगस्य जहासि मुधा ।
मुखपद्मविवर्णकतैव तव
प्रकटीकुरुते हृदयं हि भृशम् ॥ ३७ ॥

किलकिञ्चितेन अश्रुहर्षलज्जाभयादिसाङ्कर्येण कुञ्चितं अवनामितं अत एव मञ्जु मनोहरं मुखं यस्यास्सा तस्यास्सम्बुद्धिः । अक्षियुगस्य नयनयुगलस्य प्रियं इष्टतमं श्रीकृष्णमित्यर्थः । मुधा शृङ्गारचेष्टाप्रदर्शनेन वृथा जहासि त्यजसि । कथमवगतं भवत्येति चेत् । मुखपद्मस्य वदनकमलस्य विवर्णकतैव वैवर्ण्यमेव । तव रागाविष्टायास्तव हृदयं श्रीकृष्णविषयकानुरागपरवशीकृतं मनः । भृशं अत्यधिकं प्रकटीकुरुते हि सुव्यक्तं प्रकाशयति किल ।

नन्विति ।

ननु रुक्मिसहोदरिका तु तपः
कृतवत्यमितं बत कीदृगमुम् ।
दयितं समवाप्य निरन्तरम-
प्युपभोगभवं लभते प्रमदम् ॥ ३८ ॥

ननु हे सखि । रुक्मिसहोदरिका तु रुक्मिणी तु । तुस्तु भेदे । अत्र कन्प्रत्ययेन तस्याः नित्यतारुण्यसम्बन्धस्सूच्यते । अमितं वाचा वक्तुमशक्यं कीदृक् तपः कायक्लेशव्रतादिकं कृतवती पुरा चकार । बत आश्चर्यम् । अथवा बतेति हर्षे । अमुं एतादृशसौन्दर्यादिगुणभूयिष्ठं श्रीकृष्णं दयितं सन्तं बल्लभं सन्तं । समवाप्य सम्यक् अविरहिततया प्राप्य । एतेन नित्यानपायित्वं सूचितम् । निरन्तरमपि अविनाभावेनेत्यर्थः । उपभोगभवं एतदनुभवजनितं प्रमदं आनन्दं । लभते प्राप्नोति । सैव धन्येत्याशयः । अयन्तु तपसैव लब्धुं शक्यः इति भावः ।

यदुनाथेति ।

यदुनाथमुखप्रहिताक्षियुगे
क्व गतं हृदयं त्विति सम्भ्रमतः ।
उरसि स्वकरं विनिवेश्य जडा
प्रतिमेव चिरात्स्थितवत्यसि किम् ॥ ३९ ॥

हे यदुनाथमुखप्रहिताक्षियुगे, श्रीकृष्णमुखकमलदर्शनेनातृप्ततया तत्रैव विनिहितनिश्चल-लोचनयुगले सखि। हृदयन्तु मनस्तु क्व गतं श्रीकृष्णसमीपमेव प्रस्थितं उत अत्रैव वर्तते वा। इति एवं प्रकारेण सम्भ्रमतः त्वरातिशयात्। यद्वा सम्यग्भ्रमात्। यद्वा आवेगातिशयात् उरसि स्ववक्षस्स्थले स्वकरं आत्मपाणिं विनिवेश्य आधाय जडा सती इतिकर्तव्यतामूढा सती। चिरात् दीर्घकालं प्रतिमेव पाञ्चालिकेव स्थितवती सती असि किम्। एतेन सात्विकभावस्सूचितः।

कुतुकमिति।

**कुतुकं धिगिदं हरिदर्शनजं**<br>**जननीमृगितैकरतो निवहे।**<br>**शिशुरश्रुमुखोयमितो हि मया**<br>**मृगिता भवती च चिरात्सशिशु ॥ ४० ॥**

हरिदर्शनजं श्रीकृष्णावलोकनसम्भूतं इदं कुतुकं एतादृशं कौतूहलं धिक् गर्हितमित्यर्थः। निवहे जनसम्मर्दे जनन्याः मातुः मृगितैकरतः अन्वेषणैकतानः। तदलाभात् अश्रुमुखः शोकबाष्पाविलवदनः अयं शिशुः। मया तत्रत्यया मया इतो हि अतर्कितं प्राप्तोहीत्यर्थः। चिरात् सशिशु यथा तथा अर्भकसहितं यथा तथा भवती च त्वमपि मया मृगिता अन्विष्टा। चिरादिदानीं समुपनतेत्याशयः। आत्मशिशावप्यौदास्यजनकं अत एव कृष्णदर्शनकुतूहलं धिगित्याशयः।

स्फुरितेति।

**स्फुरिताधरमुत्तरलाक्षियुगं**<br>**भ्रुकुटिच्युतचित्रकमुत्पुलकम्।**<br>**चलचूचुकमत्र मुरारिरतिं**<br>**चिरभावनया गमितासि सखि ॥ ४१ ॥**

हे सखि, स्फुरिताधरं यथा तथा परिस्पन्दमानाधरं यथा तथा। उत्तरलाक्षियुग्मं उन्मुखचाञ्चल्यविशिष्टनयनं यथा तथा। भ्रुकुटिच्युतचित्रकं भ्रूभङ्गस्खलिततिलकं यथा तथा। उत्पुलकं उद्भिन्नरोमाञ्चं यथा तथा। चलचूचुकं तरलकुचाग्रं यथा तथा। अत्र अस्मिन्प्रदेश एव चिरभावनया केवलचिरकालभावनामात्रेणैव मुरारिरतिं श्रीकृष्णसंश्लेषसौख्यं गमिता सती प्रापिता सती। असि। त्वत्तनुविकार एव श्रीकृष्णविषयकभावनात्मकरतिं सूचयतीत्याशयः।

पुरत इति ।

**पुरतश्चलिते क्रमशश्च रथे**
**क्षणभङ्गुरवारिददृश्यमिव ।**
**क्रमदूरगतिस्फुटताविरहात्**
**ननु सैन्यमिदं मलिनीभवति ॥ ४२ ॥**

रथे च श्रीकृष्णस्यन्दनेपि । क्रमशः अग्रगामिसैन्यानुगमनक्रमेण । पुरतः अग्रे चलिते सति गते सति । क्षणेन भङ्गुरः विशकलितः यः वारिदः मेघः तस्य दृश्यमिव क्रमेण दूरगतिः सुदूरगमनं तेन स्फुटताविरहात् स्पष्टताभावात् । इदं सैन्यं मलिनीभवति ननु मालिन्यमधिगच्छति ननु । स्वभावोक्तिः ।

चलेति ।

**चलकेतुपटच्छलतस्स रथो**
**बहुदूरगतो व्रजत स्वगृहान् ।**
**इति नः क्रमशः पुरतः प्रचल-**
**न्निजपृष्ठगता नुदतीव बलात् ॥ ४३ ॥**

स रथः श्रीकृष्णरथः । चलः चञ्चलः यः केतोः ध्वजस्य पटः वस्त्रं तस्य छलतः व्याजात् बहुदूरगतः सुदूरं प्रचलितः रथः । यूयं स्वगृहान् स्वस्वभवनानि व्रजत गच्छत । इति एवं प्रकारेण क्रमशः मन्दं मन्दं क्रमेण पुरतः अग्रतः प्रचलन्सन् गच्छन्सन् निजपृष्ठगताः आत्मपृष्ठभागवर्तिनीः नः अस्मान् । बलात् अनिच्छन्तीरपि बलात्कारेणेत्यर्थः । नुदतीव प्रेरयतीवेत्युत्प्रेक्षा ।

इतीति ।

**इति पौरवधूजनवर्णनया**
**विनुतो भगवान्रथमध्यगतः ।**
**पुरयात्रिकया जनचित्तदृशः**
**कलयन्सफलाः प्रययौ विभवैः ॥ ४४ ॥**

इति पूर्वोक्तप्रकारेण पौरवधूजनवर्णनया पुरस्त्रीवर्णनातिशयेन विनुतः स्तुतः भगवान् षाड्गुण्यपरिपूर्णः श्रीकृष्णः । रथमध्यगतस्सन् स्यन्दनमध्ये निषण्णस्सन् । पुरयात्रिकया पुरप्रवेशमहोत्सवेन जनचित्तदृशः पौरजनहृदयनयनानि सफलास्सतीः सार्थक्यविशिष्टास्सतीः । कलयन्सन् कुर्वन्सन् विभवैः सर्वसम्पत्समृद्धिभिस्सह । प्रययौ प्रचलतिस्म ।

सुमेति ।

सुमपल्लवमौक्तिकहारचितं
पृथुकाञ्चनपूर्णकनत्कलशम् ।
नलिकांसतलाचलरक्षिगणं
समवाप हरिस्ततसौधमुखम् ॥ ४५ ॥

हरिः श्रीकृष्णः । सुमैः नानाविधकुसुमैः पल्लवैः चूतकिसलयैः मौक्तिकहारैश्च मुक्तामालाभिश्च चितं व्याप्तं पृथू स्फीतौ काञ्चनपूर्णकनत्कलशौ स्वर्णमयदीप्रपूर्णकुम्भौ यस्मिंस्तत्तथोक्तम् । नलिकाः आयुधविशेषाः अंसतले भुजशिखरे येषान्ते नलिकांसतलाः अचलाः परिस्पन्दरहिताश्च रक्षिगणाः रक्षणशीलवीरपुरुषसमूहाः यस्मिंस्तत्तथोक्तम् । ततसौधमुखं विशालराजसदनचत्वरं । राजकुलद्वारदेशमिति यावत् । समवाप आससाद ।

स्तुतीति ।

स्तुतिपाठकतारजयध्वनिभिः
स्फुटवाद्यरवैर्ध्वनिते वियति ।
अवतीर्य रथाद्यदुवंशमणिः
कृतसात्यकिपाणिकरस्थितवान् ॥ ४६ ॥

वियति आकाशे स्तुतिपाठकानां वन्दिनां तारजयध्वनिभिः अत्युच्चजयध्वनिभिः स्फुटवाद्यरवैः स्पष्टतरातोद्यनादैश्च ध्वनिते सति । शब्दापिते सति यदुवंशमणिः यदुकुलश्रेष्ठः श्रीकृष्णः रथात् अवतीर्य कृतः विनिहितः सात्यकेः पाणौ करः येन स तथोक्तस्सन् । स्थितवान् भूतले तस्थौ ।

अथेति ।

अथ कञ्चुकिभिः करवेत्रलता-
चलनैः प्रविदापितमार्गतया ।
व्यलसद्धरिपादतलाहितदो-
रिव साधु स सौधवरो नृपतेः ॥ ४७ ॥

अथ श्रीकृष्णस्थित्यनन्तरं । कञ्चुकिभिः सौविदल्लैः करवेत्रलताचलनैः करगृहीतलतासन्निभवेत्रयष्टिचालनैः प्रविदापितः प्रकर्षेण दापितः मार्गः वर्त्म यस्य तस्य भावः प्रविदापितमार्गता तया हेतोः । नृपतेः धृतराष्ट्रस्य सौधवरः प्रासादः हरेः श्रीकृष्णस्य पादतले

चरणारविन्दप्रदेशे आहितः विनिहितः दोः भुजः येन स तथोक्तस्सन्निवेत्युत्प्रेक्षा । साधु सम्यक् व्यलसत् चकाशे । वेत्रलताप्रचालनेन कञ्चुकिभिः दूरमुत्सारिते जनसम्मर्दे आप्रासादात् श्रीकृष्णचरणारविन्दपर्यन्तं विविक्तदीर्घमार्गतया बाहुं प्रसार्य सौधः श्रीकृष्णचरणौ स्पृशतीवादृश्यतेति भावः ।

धृतराष्ट्रेति ।

**धृतराष्ट्रसुतप्रमुखैः प्रवरैः**
**परदृष्टिनिपातजदोषहरे ।**
**विविधे रचिते विधिवच्च विधौ**
**प्रविवेश हरिर्नृपसौधवरम् ॥ ४८ ॥**

धृतराष्ट्रसुतप्रमुखैः दुर्योधनप्रभृतिभिः प्रवरैः व्यपदिष्टैरधिकारिभिः । परेषां सर्वपौरजनानां यद्वा अमित्राणां दृष्टिनिपातजः चक्षुष्पातजनितः यः दोषः पापाभिसन्धिरूपदोषः तं हरति परिहरतीति दोषहरः तस्मिन् । परदृष्टिदोषनिवारके इति यावत् । विविधे नानाप्रकारे विधौ नीराजनादिविधौ । विधिवत् यथाशास्त्रं रचिते च सति निर्वर्तिते च सति । हरिः श्रीकृष्णः नृपसौधवरं धृतराष्ट्रप्रासादोत्तमं प्रविवेश ।

एतावता कालेन सायमभूदित्याह । यदुनाथेति ।

**यदुनाथमहोत्सवजं प्रमदं**
**वरुणाय निवेदयितुं किल तम् ।**
**चरमाचलतो जलधिं भगवान्**
**खरघृष्टिरपि प्रविवेश जवात् ॥ ४९ ॥**

यदुनाथस्य श्रीकृष्णस्य महोत्सवजं हर्षजनकव्यापारजनितं तं अनिर्वचनीयं प्रमदं आनन्दं वरुणाय समुद्रराजाय निवेदयितुं किल वक्तुमिवेत्युत्प्रेक्षा । भगवान् पूज्यः खरघृष्टिरपि सूर्योपि । अत्रापिना श्रीकृष्णस्य सौधाभ्यन्तरप्रवेशस्समुच्चीयते । चरमाचलतः अस्त-पर्वतात् । जलधिं समुद्रं जवात् वेगात् क्षिप्रमिति यावत् प्रविवेश । सन्ध्यर्थं हास्तिनपुरं व्रजतश्श्रीकृष्णस्य तत्र कापि भवेदवमाननेति शङ्काकुलस्य कर्मसाक्षिणस्सूर्यस्यापि यात्रोत्सवदर्शनेन महान्प्रमोदस्समजायतेत्याशयः ।

सौधाभ्यन्तरदीपावलिं वर्णयति । प्रविशदिति ।

**प्रविशन्मुरवैरिविलोकनतः**
**प्रकटीकृतहर्ष इवोत्पुलकः ।**

**मणिदीपपरम्परया नृपतेः**
**निलयस्स्मयमान इव व्यलसत् ॥ ५० ॥**

नृपतेः धृतराष्ट्रस्य निलयः प्रासादः । प्रविशन्मुरवैरिविलोकनतः अभ्यन्तरमागच्छच्छ्रीकृष्णदर्शनात् मणिदीपपरम्परया रत्नमयदीपपंक्त्या उत्पुलकः उद्गच्छद्रोमाञ्चः प्रकटीकृतहर्ष इव प्रकाशितप्रीत्यतिशय इवेत्युत्प्रेक्षा । किञ्च मणिदीपपरम्परया स्मयमान इव मन्दं हसन्निवेत्युत्प्रेक्षा । व्यलसत् चकाशे । सर्वाङ्गीणदीपपंक्तितया उद्गच्छद्रोमाञ्च इवेत्युत्प्रेक्षितम् । क्वचित्पंक्तिशस्स्थापितमणिदीपतया रदनपंक्तिसादृश्यात् स्मयमान इवेत्युत्प्रेक्षितम् । एतेन श्रीकृष्णागमनं तावदचेतनस्य प्रासादस्याप्यानन्दावहमिति सूचितम् ।

अनन्तरं सभाप्रवेशमाह । अतिक्रान्तेति ।

**अतिक्रान्तकक्ष्यावलिर्माधवोऽयं**
**कनद्रत्नचित्रोच्छ्रितस्तम्भगुम्भाम् ।**
**उदग्रासनालिस्फुरस्थानभागां**
**सभां प्राविशल्लोलमुक्ताकलापाम् ॥ ५१ ॥**

अयं सन्ध्यर्थमागतः माधवः श्रियःपतिः श्रीकृष्णः । एतेन स्वयं श्रियःपतित्वात् दुर्योधनसम्पदि नैव दृष्टिरस्येति सूचितम् । अतिक्रान्ता कक्ष्यन्तरावलिः येन स तथोक्तस्सन् । कनद्भिः भासुरैः रत्नैः नवरत्नैः चित्राः नानावर्णविशिष्टाः उच्छ्रिताश्च स्तम्भानां गुम्भाः परिगुम्भनानि यस्यास्सा तथोक्ता ताम् । उदग्राणि समुन्नतानि यानि आसनानि तेषां आलिः परम्परा तया स्फुरन् प्रकाशमानः स्थानभागः स्थलविशेषः यस्यास्सा तथोक्ता ताम् । लोलाः डोलायमानाः मुक्ताकलापाः मौक्तिकस्तबकाः यस्यां सा तथोक्ता ताम् । सभां प्राविशत् प्रविवेश ।

अक्ष्णेति ।

**अक्ष्णा काणस्तदनु कुरुराड्विष्टरादुत्थितस्सन्**
**मन्दं मन्दं स्खलितगमनः कृष्णमभ्येत्य हर्षात् ।**
**एह्येहीति प्रकटितमहासम्भ्रमस्तत्र दोर्भ्यां**
**द्रागालिंग्य प्रथितविभवं विष्टरं प्रापयत्तम् ॥ ५२ ॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणमहाकविविरचिते**
**अद्भुतदूताख्यकाव्यरत्ने**
**नवमस्सर्गः ।**

तदनु श्रीकृष्णप्रवेशानन्तरं । अक्ष्णा लोचनेन काणः अन्धः । येनाङ्गविकारे इति सूत्रात्त्रितीया । कुरुराट् धृतराष्ट्रः विष्टरात् आसनात् उत्थितस्सन् । स्खलितगमनस्सन् नेत्राभावात् रिङ्खणाकुलपदन्यासस्सन् । मन्दं मन्दं अत्यन्तमन्दं कृष्णं अभ्येत्य अभिमुखमागत्य हर्षात् स्वभवनं प्रति श्रीकृष्णागमनेन सम्भूतात् आनन्दातिशयात् । एह्येहीति आयाहि आयाहीति । आदरातिशयेन द्विरुक्तिः । उक्त्वेति शेषः । प्रकटितमहासम्भ्रमस्सन् प्रदर्शितत्वरातिशयस्सन् । दोर्भ्यां भुजाभ्यां द्राक् सत्वरं आलिंग्य समाश्लिष्य । आनन्दातिशयकार्यमिदम् । तत्र सभायां तं श्रीकृष्णं प्रथितविभवं अनर्घमित्यर्थः विष्टरं आसनम् । यद्वा प्रथितविभवं महामहिमातिशयविशिष्टं श्रीकृष्णं प्रापयत् । पीठे समुपवेशयामासेत्यर्थः ।

इति श्रीभगवल्लक्ष्मीदासानुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
नवमस्सर्गः ।

॥ श्रीः ॥

# दशमस्सर्गः ।

कविरिदानीं श्रीकृष्णस्य विदुरालयप्रवेशं विवक्षुः प्रथमं धृतराष्ट्रादीनां कुशलप्रश्नप्रकारमाह । परीति ।

**परिपृच्छ्य ततस्समन्दहासं**
**कुशलं सादरमब्रवीन्मुकुन्दः ।**
**भवतां चिरकाङ्क्षितं तु दिष्ट्या**
**समुपात्तं खलु दर्शनं मयेति ॥ १ ॥**

ततः उपवेशानन्तरं । मुकुन्दः श्रीकृष्णः समन्दहासं यथा तथा मन्दहासपूर्वकं यथा तथा । एतेन स्मितपूर्वाभिभाषित्वमुक्तम् । सादरं यथा तथा प्रीतिपूर्वकं यथा तथा । एतेन दोषभोग्यत्वरूपवात्सल्यमुक्तम् । कुशलं परिपृच्छ्य कुशलप्रश्नं कृत्वा । चिरकाङ्क्षितं बहुकालापेक्षितं भवतां बन्धुभावमापन्नानां युष्माकं दर्शनं तु प्रत्यक्षीकरणं तु मया दिष्ट्या दैववशात् समुपात्तं खलु लब्धं खलु । इति एवंप्रकारेण अब्रवीत् उवाच । एतेन सौजन्यं सूचितम् ।

धृतराष्ट्रोक्तिमाह । अवकर्ण्येति ।

**अवकर्ण्य कुरूद्वहस्तमूचे**
**किमिदं नाथ निगद्यते त्वयेत्थम् ।**
**त्वदधीनमिदं जगत्समस्तं**
**प्रतिपाल्यं तव दर्शनं मयैव ॥ २ ॥**

कुरूद्वहः धृतराष्ट्रः । अवकर्ण्य श्रीकृष्णोक्तिं निशम्य । हे नाथ, अस्मत्स्वामिन् त्वया सर्वस्वामिना भवता । इत्थं पूर्वोक्तप्रकारेण निगद्यते प्रोच्यते । किमिदं किमेतत् ? एवं न कदापि वक्तव्यमित्याशयः । कुत इति चेत् । इदं परिदृश्यमानं । यद्वा श्रूयमाणं समस्तं जगत् ब्रह्माण्डमित्यर्थः । त्वदधीनं भवदायत्तम् । जगच्छरीरतया । आत्मायत्तं खलु शरीरम् । तस्मात्कारणात् तव दर्शनं मयैव जगदन्तर्गतेन कीटकल्पेनाल्पेन मयैव प्रतिपाल्यं कदा भविष्यति भगवद्दर्शनमिति प्रतिपालनयोग्यम् । निरीक्षणीयामिति यावत् । इतीति शेषः । एवं प्रकारेण तं श्रीकृष्णं प्रति ऊचे अवदत् ।

भगवतः कारुण्यातिशयमाह । विपिन इति ।

**विपिने तपसा तपोधनास्त्वां**
**ननु पश्यन्ति न वा चिरेण नाथ ।**
**मम भाग्यवशादिहागतोऽसि**
**स्वयमेवेदृशदर्शनो दयाब्धे ॥ ३ ॥**

ननु नाथ, हे सर्वजगत्स्वामिन्, तपोधनाः वातातपादिभिः क्लेशितशरीराः मुनयः। विपिने विविक्ते कान्तारे तपसा कायक्लेशेन नियमेन वा त्वां वाङ्मनसागोचरं भवन्तं चिरेण सहस्रवत्सरसंख्याकेन कालेन पश्यन्ति । अथवा न पश्यन्ति । भवद्दर्शनविषये संशय एवेत्याशयः । हे दयाब्धे करुणापूर्ण । अनिर्वचनीया ते करुणा । मम तपःप्रभृतिकर्म-विमुखस्य मम भाग्यवशात् पुण्यविशेषात् । ईदृशदर्शनः मांसचक्षुर्गोचरदिव्यमङ्गलविग्रह-विशिष्टस्सन् त्वं स्वयमेव अप्रार्थित एवेत्यर्थः । इह मद्भवनं प्रति आगतस्सन्नसि । अत्याश्चर्यमानन्दावहञ्च भवदागमनमित्याशयः । अहो ते कारुण्यातिशयः ।

भगवत एवोपायत्वमुपेयत्वञ्च प्रतिपादयति । नहीति ।

**नहि कारणमम्बुजाक्ष सत्यं**
**यजनं दानमथो तपश्श्रुतञ्च ।**
**तव दर्शनदापने त्वहेतुः**
**निपतेद्यत्र कटाक्षकस्स धन्यः ॥ ४ ॥**

हे अम्बुजाक्ष, हे पुण्डरीकाक्ष, यजनं भवत्पूजा दानं स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादक-रूपद्रव्यत्यागः । अथो अनन्तरं तपः कायक्लेशः व्रतादिकं चान्द्रायणादिव्रतानुष्ठानं श्रुतं च वेदाध्ययनं शास्त्राध्ययनं च एतत्सर्वं तव वाचामगोचरवैभवस्य भवतः दर्शनदापने साक्षात्कारप्रतिपादने विषये कारणं न हि भवति । किन्तु यस्मिन्प्राणिनि अहेतुः निर्निमित्तकः तव कटाक्षकः । अल्पार्थे कन्प्रत्ययः । अपाङ्गवीक्षणाल्पभागः निपतेत् । सः प्राणी धन्यः सुकृती । वेदविहितकर्मानुष्ठानेन भवत्साक्षात्कारो नैव भवति । किन्तु भवन्निर्हेतुककटाक्षेणैवेत्याशयः । तथा चोक्तम् । नायमात्मा प्रवचनेन लभ्यः न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यः इति । भगवताप्यनुगृहीतं, "नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा" इति ।

आत्मापेक्षया पौराणां धन्यतामाह । ममेति ।

**मम पौरजनेक्षणानि धन्या-**
**न्यवलोक्यैनमहो भवन्तमारात् ।**
**सुहितानि यतोऽन्ध एष कृष्ण**
**प्रथितः पापिषु नावलोकयामि ॥ ५ ॥**

मम पौरजनेक्षणानि पुरवासिजननयनानि धन्यानि लब्धसुकृतविशेषाणि । यतः यस्मात्कारणात् एनं साक्षात्सन्निहितं भवन्तं त्वां आरात् समीपे अवलोक्य दृष्ट्वा सुहितानि तृप्तानि । एषः भूमिभारभूत इत्यर्थः । पापिषु घोरतरपापविशिष्टेषु मध्ये प्रथितः प्रसिद्धः । अत एव अन्धः जात्यन्धः अहं हे कृष्ण, भवन्तं सन्निहितमपि त्वां नावलोकयामि । धिङ्मामिति यावत् ।

एवं स्वस्याधन्यतामभिधाय पक्षान्तरमवलम्ब्य स्वस्य धन्यतामाह । अथवेति ।

**अथवा मुनिभिस्तु नारदाद्यैः**
**असकृच्छ्रावितसद्भवद्गुणौघः ।**
**मनसैव निरन्तरं स्मरामि**
**श्लथदुःखस्तव विग्रहं मनोज्ञम् ॥ ६ ॥**

अथवा पक्षान्तरे । नारदाद्यैः निरन्तरं भवद्दर्शनमननकीर्तनाद्येकतानैः नारदप्रभृतिभिः मुनिभिस्तु मननशीलैः स्वयमागतैः तपोधनैरेव । असकृत् मुहुर्मुहुः श्राविताः कर्णे पातिताः सन्तः श्रेष्ठतमाः मङ्गलरूपाः भवतः गुणौघाः गुणसमूहाः यस्य स तथोक्तः । एतेन भगवत्कल्याणगुणनामानन्त्यमुक्तम् । अहं अत एव श्लथदुःखस्सन् गलितक्लेशस्सन् । एतेन संसारिणां भगवद्गुणमननापेक्षया सुखप्रदं नान्यदस्तीति सूचितम् । तव मनोज्ञं दृगासेचनकरूपं विग्रहं दिव्यमूर्तिं मनसैव निरन्तरं अनवरतमपि स्मरामि चिन्तयामि । अन्धत्वात् बाह्यविषयपराङ्मुखेन मया निरन्तरं भवन्मननावकाशो लब्धः । तस्मादहमेव धन्य इत्याशयः । एतेन श्रवणं मननं च प्रोक्तं भवति ।

पञ्चभिश्श्लोकैः मननप्रकारमाह । उदयदिति ।

**उदयद्दिननाथताम्रघृष्टि-**
**प्रतिबुद्धाम्बुजसन्निभे तवैते ।**
**करुणारसपूर्णदिव्यकुल्ये**
**नयने भात इतीरितं मुनीन्द्रैः ॥ ७ ॥**

उदयद्दिननाथः प्रादुर्भवत्सूर्यः तस्य ताम्रवृष्टिप्रतिबुद्धं रक्तकिरणविकसितम् । एतेन सद्योविकसितत्वमुक्तं भवति । यदम्बुजं पुण्डरीकं तेन सन्निभे सदृशे एते अद्य मत्पुरतस्स्थिते करुणारसपूर्णदिव्यकुल्ये दयारससम्भृतदिव्यकृत्रिमसरितौ । एतेन दैर्घ्यमुक्तम् । तव नयने भातः प्रकाशेते । इति एवं प्रकारेण मुनीन्द्रैः भवत्साक्षात्कारसन्तुष्टैः मुनिश्रेष्ठैः । ईरितं अभिहितम् । यथोक्तं तथैव तव नयने स्मरामीत्याशयः ।

अमृतेति ।

**अमृतप्रतिपादनोन्मुखोऽयं**
**दहराकाशविराजमानरूपः ।**
**तव भाति सुविग्रहस्तटित्वान्**
**इव लक्ष्म्येति मया श्रुतं मुकुन्द ॥ ८ ॥**

हे मुकुन्द, उभयविभूतिसौख्यप्रद हे कृष्ण, अमृतस्य सलिलस्य मोक्षस्य च प्रतिपादने समुत्पादने वितरणे च उन्मुखः आसक्तः अभिमुखश्च । अयमेव अद्य परिदृश्यमान एव दहराकाशे योगिहृत्पुण्डरीकावकाशे । यद्वा सर्वान्तर्यामित्वात् सर्वचेतनहृत्पुण्डरीकावकाशे आकाशे च । विराजमानरूपः प्रकाशमानस्वरूपः लक्ष्म्या जगज्जनन्या कान्त्या च तटित्वानिव सौदामिनीविशिष्टमेघ इव । तव सुविग्रहः दिव्यमङ्गलविग्रहः भाति प्रकाशते । इति एवं प्रकारेण मया अक्ष्णा काणेन मया श्रुतम् । यथा श्रुतं तथैव चिन्तयामीत्याशयः ।

नन्विति ।

**ननु वक्षसि कौस्तुभं दधासि**
**प्रतिजीवात्ममहाधिदेवतां त्वम् ।**
**दिवसोऽसितनिर्मलेन्तरिक्षे**
**द्युमणिं भासुररोचिषं यथेश ॥ ९ ॥**

नन्वीश हे सर्वैश्वर्यविशिष्ट श्रीकृष्ण, प्रतिजीवात्ममहाधिदेवतां जीवात्मसामान्याभिमानिदेवतां कौस्तुभं कौस्तुभाख्यं रत्नं । वक्षसि उरस्स्थले भवान् दिवसः असितनिर्मले नीलवर्णविशिष्टे परिशुद्धे च अन्तरिक्षे आकाशे भासुररोचिषं दीप्तकान्तिं द्युमणिं सूर्यं यथा दधाति । तथा दधासि । एवमेव चिन्तयामीत्याशयः । उपमालङ्कारः ।

अलिक इति ।

**अलिके तव नीलकुन्तलालिः**
**स्फुटकौटिल्यपरम्परा मुरारे ।**
**श्रितचित्तचिरानुवृत्तसान्द्रं**
**ननु कौटिल्यमपाकरोति चित्रम् ॥ १० ॥**

हे मुरारे, हे कृष्ण, तव अलिके फालदेशे स्फुटा व्यक्ता कौटिल्यानां वक्रिम्णां परम्परा पंक्तिः यस्यास्सा । नीलकुन्तलालिः मेचकालकपंक्तिः । श्रितानां आश्रितानां भक्तानां चित्ते मनसि चिरानुवृत्तं अनादिकालानुवृत्तं सान्द्रं च निबिडं च कौटिल्यं कुटिलत्वं कापट्यादिकमित्यर्थः । अपाकरोति ननु परिहरति ननु । एतच्चित्रम् । स्वयं कौटिल्य-विशिष्टः परेषां कौटिल्यं परिहरतीति चित्रमित्याशयः । भवन्मुखकमलदर्शनात् आश्रितानां अनादिकालानुवृत्तमनःकालुष्यं सर्वमपि दूरोत्सारितं भवतीत्याशयः । एवमेव चिन्तयामी-त्याशयः । विभावनाभेदः ।

नखरेति ।

**नखरद्युतिकैतवात्सृजन्ता-**
**वधुनापि त्रिदशापगां मुकुन्द ।**
**चरणौ निहितौ यतोत्र तस्मात्**
**प्रयतं गेहमिदं तु मामकीनम् ॥ ११ ॥**

हे मुकुन्द, हे चतुर्वर्गप्रदातः, हे कृष्ण, नखराणां नखानां द्युतिकैतवात् कान्तिव्याजात् अधुनापि इदानीमपि त्रिदशापगां देवगङ्गां सृजन्तौ विसृजन्तौ उत्पादयन्ताविति यावत् । चरणौ चतुर्मुखेड्यौ पादौ । यतः यस्मात्कारणात् अत्र अस्मिन्गेहे निहितौ निक्षिप्तौ तस्मात्कारणात् मामकीनं मदीयं इदं परिदृश्यमानं गेहं तु आवासस्थानमेव प्रयतं परिशुद्धं सत् अभूत् । कैतवापह्नुत्यलङ्कारः ।

इतीति ।

**इति सादरमुद्गिरन्तमेनं**
**धृतराष्ट्रं स सुयोधनस्सहासम् ।**
**निजगाद सुहृत्प्रणुन्नचित्तः**
**किमिदं कालकलात्यवर्ततेति ॥ १२ ॥**

इति पूर्वोक्तप्रकारेण सादरं यथा तथा प्रीत्यतिशयपूर्वकं यथा तथा। उद्गिरन्तं पारवश्यान्निगदन्तं एनं कृष्णाधीनचित्तं धृतराष्ट्रं। सः सभायामुपविष्टः सुयोधनः दुर्योधनः सुहृदा कर्णेन प्रणुन्नं प्रेरितं चित्तं मनः यस्य स तथोक्तः सन्। सहासं यथा तथा किमिदं किमेतदिति क्रोधोक्तिः। काल कला काल इत्यर्थः। अत्यवर्तत अतिक्रान्ता बभूव। अत्र कलाशब्देन धृतराष्ट्रस्य कालगौरवानभिज्ञत्वं सूचितम्। इति एवं प्रकारेण निजगाद उवाच।

सकलमिति।

**सकलं विहितं कदुष्णमम्भः**
**स्नपनार्थं तव सिद्धमेव देव।**
**विविधोपि च भक्ष्यभोज्यवर्गः**
**भवदर्थे परिकल्पितोऽस्ति सज्जः ॥ १३ ॥**

हे देव, क्रीडादिविशिष्ट हे कृष्ण। अत्र देवेति सम्बोधनेन विजिगीषुत्वं सूचितम्। तव सत्यसङ्कल्पस्य भवतः स्नपनार्थं स्नानाय कदुष्णं उपभोगानुकूलं कोष्णं मन्दोष्णमम्भः सलिलं सिद्धमेव प्रथममेव कल्पितं इत्यर्थः। अपिच किञ्च। विविधः अदृष्टपूर्वः नानाप्रकारः भक्ष्यभोज्यवर्गः। वर्ग इत्यनेन चोष्यपेयादिकं गृह्यते। भवदर्थे भवन्तमुद्दिश्येत्यर्थः। परिकल्पितस्सन् निर्मापितस्सन् सज्जस्सन् सिद्धस्सन् अस्ति। एवं सकलं भवत्सपर्यासामग्रीविशेषस्सर्वोपि सज्जीकृतो वर्तते। अत एव परस्परसल्लापेन कालकलात्यवर्ततेत्युक्तम्।

भगवन्निति।

**भगवन्नधुना मयार्पितं त-**
**त्सकलं सम्प्रतिपत्तुमर्हसीति।**
**विनयानतमस्तको महीपः**
**प्रियमभ्यर्थय इत्युवाच कृष्णम् ॥ १४ ॥**

भगवन्, षाड्गुण्यपरिपूर्ण हे कृष्ण, अधुना इदानीं मया भवत्सेवाबद्धदीक्षेण मया अर्पितं वितीर्णं तत् पूर्वोक्तं सकलं समस्तं सपर्याविशेषं सम्प्रतिपत्तुं अङ्गीकर्तुं अर्हसि। इति एवंप्रकारेण। महीपः दुर्योधनः विनयेन आनतः नम्रः मस्तकः यस्य स तथोक्तस्सन्। प्रियं भवत्प्रीतिं। यद्वा मां भवदिष्टं सन्तं अभ्यर्थये प्रार्थये। इति एवं प्रकारेण कृष्णं प्रति उवाच। एतत्सर्वमङ्गीकृत्य मद्दोषमविगणय्य मयि प्रीतो भवेत्याशयः।

मधुरेति ।

**मधुराधिपतिस्समन्दहासं**
**धृतराष्ट्रात्मजभाषितं निशम्य ।**
**घनरावगभीरया गिरा तं**
**निजगादाथ तदाशयानुकूलम् ॥ १५ ॥**

अथ अनन्तरं । मधुराधिपतिः श्रीकृष्णः धृतराष्ट्रात्मजस्य दुर्योधनस्य भाषितं उक्तिवैखरीं निशम्य । घनरावगभीरया स्तनितगम्भीरया गिरा । समन्दहासं यथा तथा तस्य दुर्योधनस्य आशयानुकूलं यथा तथा अभिप्रायानुगुणं यथा तथा । तं सुयोधनं प्रति निजगाद वक्ष्यमाणप्रकारेणोवाच ।

बहुधेति ।

**बहुधा विनयेन साधु राजन्**
**भवताभ्यर्थित एव सम्प्रहृष्टः ।**
**अधुना तु तथापि किञ्चिदत्र**
**प्रतिवक्तुं कुतुकी निवेदयामि ॥ १६ ॥**

हे राजन्, प्रजारञ्जनैकतत्पर हे दुर्योधन, बहुधा अनेकप्रकारेण विनयेन प्रह्वभावेन साधु सम्यक् भवता साक्षात्त्वया अभ्यर्थितः प्रार्थितः अहं सम्प्रहृष्ट एव सम्यक्प्रमुदित एव यद्वा अभ्यर्थित एव प्रार्थनामात्रेणैवेत्यर्थः । सम्प्रहृष्टः । किमुत सत्कारेणेत्याशयः । अस्मीति शेषः । तथापि एवं प्रहृष्टोपि अधुना तु अद्यैव अत्र भवत्सपर्याङ्गीकारविषये किञ्चित् किमपि प्रतिवक्तुं प्रत्युत्तरयितुं कुतुकी सन् कुतूहलविशिष्टस्सन् । निवेदयामि बोधयामीत्यर्थः ।

निवेदनप्रकारमाह । नगरेति ।

**नगरप्रतिकर्मपूर्णकुम्भ-**
**प्रमुखैर्यद्यपि मानितोऽस्मि राजन् ।**
**प्रकटीकृतवैभवोऽसि सम्यक्**
**मयि राज्याधिकृतिप्रदूषितेपि ॥ १७ ॥**

हे राजन्, परस्वापहरणलब्धराजभाव दुर्योधन । नगरस्य हास्तिनपुरस्य यत्प्रतिकर्म प्रसाधनं यौ च पूर्णकुम्भौ गौरवार्थं मङ्गलार्थं वा पूर्णकलशौ एतत्प्रमुखैः कर्मविशेषैः

यद्यपि मानितस्सन् पूजितस्सन् अस्मि । राज्याधिकृतिप्रदूषितेपि राज्याधिकारहीनेपि । अपिर्विरोधे । मयि मद्विषये त्वं प्रकटीकृतवैभवस्सन् प्रकाशितैश्वर्यपराकाष्ठस्सन्नित्यर्थः । असि । न तावद्भक्त्या भवता कृतमेतत्सर्वम् । किन्तु राज्याधिकारपरिभ्रष्टो भवान्पश्य तु मे वैभवातिशयमिति दर्पप्रकाशनायैव कृतमेतत्सर्वमित्याशयः ।

भक्तिक्रीतो जनार्दनः इत्याशयाविष्करणायाह । बह्विति ।

**बहुवित्तगणव्ययेन सम्य-**
**क्सकलं कल्पितमद्य मत्कृतेच ।**
**ननु भक्तिरसैकपूर्णकुम्भ-**
**स्मरणेनैव धरेश तृप्तिमीयाम् ॥ १८ ॥**

हे धरेश दुर्योधन, बहुवित्तगणव्ययेन अनेकद्रविणराशित्यागेन । सम्यक् साधु जननयन-चित्ताकर्षणयोग्यं यथातथेति यावत् । सकलं समस्तमाराधनोपकरणं अद्य मत्कृते च मदर्थमेव कल्पितं सज्जीकृतम् । त्वयेति शेषः । नाहमेवं बाह्याडम्बरेण तृप्तिमाप्नुयाम् । किन्तु भक्तिपुरस्सरं मदर्थं केवलतीर्थोदकस्मरणमात्रेणापीत्याह । नन्वित्यादिना । भक्तिरस एव रसः सलिलं तदैकपूर्णः यः पूर्णकुम्भः तस्य स्मरणेनैव स्मृतिमात्रेणैव तृप्तिमीयां ननु आप्नुयामेवेत्यर्थः । भक्तिं विना बहुद्रव्यव्ययेन कृतं सर्वं निरर्थकमिति भावः । किञ्च भक्तिपुरस्सरं द्रव्यसमर्पणमन्तरा केवलं मदर्थमिति मनसैव स्मृतमपि मदर्पितं भवतीत्याशयः ।

द्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत् इत्याह । नेति ।

**न कदापि विपक्षदत्तमन्नं**
**ननु भोक्तव्यमथैव भोजयेन्न ।**
**अभियातिमिति प्रसिद्धमेत-**
**त्तदहं नाद्मि भवत्प्रदत्तमन्नम् ॥ १९ ॥**

ननु हे दुर्योधन, कदापि विपक्षदत्तं शत्रुवितीर्णं अन्नं भक्ष्यभोज्यादिकमिति यावत् । न भोक्तव्यम् । अथैव एवमित्यर्थः । अभियातिं शत्रुं न भोजयेत् । इति एवं प्रकारेण एतत् प्रसिद्धं लोकविदितमित्यर्थः । तत् तस्मात्कारणात् अहं पाण्डवपक्ष्योऽहं भवत्प्रदत्तं भवता वितीर्णं अन्नं नाद्मि न भक्षयामि ।

सकल इति ।

सकलेप्यहमस्मि भूतवर्गे
सम एवैतदृतं तथापि राजन् ।
मयि भक्तिरतांस्तु पाण्डवांस्त्वं
प्रगुणं द्वेक्ष्ययमेक एव दोषः ॥ २० ॥

हे राजन्, दुर्योधन, सकले चराचरात्मके समस्ते भूतवर्गे प्राणिसमूहेपि । अहं सर्वकारणभूतोहं । यद्वा सर्वेश्वरोहं सम एव एकरूप एव पक्षपातरहितस्सन्नेवेत्यर्थः । अस्मि । एतत्समत्वं ऋतं सत्यम् । तथापि एवं सत्यपि । मयि मद्विषये भक्तिरतान् प्रीतियुक्तान् पाण्डवांस्तु मत्प्राणभूतान् धर्मराजप्रभृतीन् पञ्चपाण्डुपुत्रानेव । त्वं अपहृततद्राज्यस्त्वं प्रगुणं यथा तथा अत्यधिकं यथा तथा । द्वेक्षि द्वेषेण पश्यसि । अयं एतादृशद्वेषरूपः एक एव दोषः । पाण्डवद्वेषिविषये न मे वात्सल्यमित्याशयः । एतेन भागवतापराधो न कार्य इति सूचितम् ।

इतीति ।

इति कृष्ण उदीर्य विष्टराद्रा-
गवतीर्याथ ससात्यकिः प्रतस्थे ।
धृतराष्ट्रगृहाद्रथाधिरूढो
विदुरागारमुदारवस्तुभोग्यम् ॥ २१ ॥

कृष्णः इति पूर्वोक्तप्रकारेण उदीर्य उक्त्वा । अथ समनन्तरमेव । विष्टरात् उच्चासनात् द्राक् तत्क्षणमेव अतर्कितमिति यावत् । अवतीर्य ससात्यकिस्सन् सात्यकिविशिष्टस्सन् । रथाधिरूढस्सन् धृतराष्ट्रगृहात् धृतराष्ट्रसौधं विहायेत्यर्थः । उदारं अपरिमितं यद्वस्तु विषयविशेषः तेन भोग्यं विदुरस्य अगारं गेहं प्रति । प्रतस्थे प्रस्थितवान् । एतेन भक्तिक्रीतत्वं प्रदर्शितम् ।

विदुरकार्यमाह । विदितेति ।

विदितात्मगृहाभियानवृत्तो
विदुरस्सादरमभ्युपेत्य नम्रः ।
कटिबद्धपटः प्रणम्य दीर्घं
भवनाभ्यन्तरमानिनाय कृष्णम् ॥ २२ ॥

विदितं ज्ञातं आत्मनः आह्वानपराङ्मुखस्य स्वस्य गृहं प्रति अभियानं आभिमुख्येनागमनं तस्य वृत्तं उदन्तः येन स तथोक्तः । विदुरः सादरं अत्यन्तप्रीतिपूर्वकं यथा तथा नम्रस्सन् आश्रितप्रह्वभावस्सन् । अभ्युपेत्य अभिमुखं गत्वा कटिबद्धपटस्सन् अवलम्बावेष्टितोद्गमनीयस्सन् । दीर्घं प्रणम्य दीर्घदण्डप्रणामं कृत्वा कृष्णं भवनाभ्यन्तरं निजगृहान्तःप्रदेशं । आनिनाय प्रावेशयदित्यर्थः । एतेन विदुरस्य भक्त्यतिशयस्सूचितः ।

विदुरस्य धन्यतां भगवतः कारुण्यातिशयश्चाह । अहमिति ।

**अहमस्मि कृतार्थ एष धन्यः**
**कृपया मद्गृहमागतोऽसि शौरे ।**
**मयि नास्ति तपोव्रतादिनिष्ठा**
**ननु कारुण्यमहेतुकं किमेतत् ॥ २३ ॥**

अहं अकिञ्चनोहं एषः ईदृशाभाग्यवान् कृतार्थः कृतकृत्यस्सन् । अत एव धन्यस्सन् भवच्चरणारविन्दरूपधनं प्राप्तस्सन् अस्मि । यत् यस्मात्कारणात् हे शौरे, हे कृष्ण, कृपया केवलदयया गृहं मत्कुटीरं आगतोसि अप्रार्थितस्स्वयमेवागतोसि । मयि तपोव्रतादिनिष्ठा कायक्लेशचान्द्रायणादिनियमनिष्ठा भवत्प्राप्त्युपाय इति यावत् । नास्ति । अहेतुकं कारणशून्यं कारुण्यं ननु । किमेतत् इत्याश्चर्ये । धर्मानुष्ठानगन्धरहितस्य अकिञ्चनस्यापि मम गृहमागतो भवानिति महदिदमाश्चर्यम् । अत एव धन्योस्मि । कृतकृत्योस्मीत्याशयः ।

आकिञ्चिन्येन विदुरस्य हर्षातिशयेतिकर्तव्यतामूढतामाह । अनलङ्कृतमिति ।

**अनलङ्कृतमेतदेव गेहं**
**भवदीयं सकलं च विद्धि कृष्ण ।**
**भवदंघ्रिसरोजदासदासः**
**किमहं नाथ समर्पयामि तेऽद्य ॥ २४ ॥**

एतत् मदीयत्वेन स्थितं गेहं अनलङ्कृतमेव भवदागमनार्थं चूतपल्लवादिभिः नैव परिष्कृतम् । पक्षान्तरमवलम्ब्य मदीयत्वाध्यवसाय एव नास्तीत्याह । सकलं च अत्र विद्यमानं समस्तमपि वस्तु । यद्वा जगत्सर्वमपीत्यर्थः । भवदीयं भवच्छेषभूतं सत् विद्धि जानीहि । अहमपि भवच्छेषभूत इत्याह । भवदंघ्रिसरोजदासदासः भवच्चरणसरसिजदासस्यापि दासः । एतेन भागवतप्रतिपत्तिर्दर्शिता । अहं हे नाथ इदानीमहं सनाथोस्मीति-

भावः । अद्य अस्मिन्नवसरे ते तुभ्यं किं समर्पयामि । सर्वमपि भवदीयम् । समर्पणीय-मन्यत्किमपि नास्तीत्याशयः । हर्षातिशयेन इतिकर्तव्यतामौढ्येनोक्तमिदम् ।

इदमिति ।

**इदमासनमर्पितं निषीद**
**त्रिदशेड्यौ चरणौ निधेहि पात्रे ।**
**प्रथमं परिशोध्य पाथसा तौ**
**तदुपस्पृश्य पवित्रतां लभेय ॥ २५ ॥**

इदं परिदृश्यमानं आसनं पीठं अर्पितं भवदर्थं समर्पितम् । निषीद तस्मिन्नुपविश । पात्रे वितते भाजने त्रिदशेड्यौ सुरपूजितौ चरणौ कुसुमसुकुमारौ पादौ । निधेहि निक्षिप । प्रथमं तौ भाजने विनिहितौ । यद्वा गङ्गाजनकत्वेन प्रसिद्धौ चरणौ पाथसा तीर्थोदकेन परिशोध्य प्रक्षाल्य । तत् भवत्पादारविन्दतीर्थोदकं उपस्पृश्य आचम्य पवित्रतां परिशुद्धतां लभेय प्राप्नुयाम् । एतेन आदरातिशयस्सूचितः ।

इतीति ।

**इति भक्तिभराश्रुपूर्णनेत्रो**
**विनिवेश्यैनमुदग्रविष्टरे सः ।**
**चरणौ ततभाजने निविष्टौ**
**परिशोध्यात्मकरद्वयेन तीर्थैः ॥ २६ ॥**

इति पूर्वोक्तप्रकारेण । उक्तेतिशेषः । सः विदुरः भक्तिभरेण प्रीत्यतिशयेन अश्रुपूर्णे आनन्दबाष्पभरिते नेत्रे यस्य स तथोक्तस्सन् । उदग्रविष्टरे उच्चासने एनं श्रीकृष्णं विनिवेश्य उपवेश्य ततभाजने विशालपात्रे निविष्टौ विनिहितौ चरणौ आत्मकरद्वयेन साक्षात्स्वपाणियुगलेन तीर्थैः परिशुद्धोदकैः परिशोध्य प्रक्षाल्य ।

परिमृज्येति ।

**परिमृज्य विशुद्धवस्त्रतस्तौ**
**शिरसि प्रोक्ष्य तदम्बु चात्मनोऽयम् ।**
**चुलुकेन निपीय तत्त्रिकृत्वः**
**रचितप्राञ्जलिरब्रवीन्मुकुन्दम् ॥ २७ ॥**

अयं विदुरः विशुद्धवस्त्रतः धवलतरांशुकेन तौ श्रीकृष्णचरणौ परिमृज्य शोधयित्वा तदम्बु श्रीकृष्णचरणतीर्थं आत्मनः स्वस्य शिरसि मस्तके प्रोक्ष्य। तत् श्रीपादतीर्थं चुलुकेन त्रिकृत्वः वारत्रयं निपीय रचितप्राञ्जलिस्सन् बद्धाञ्जलिपुटस्सन् मुकुन्दं चतुर्वर्गप्रदातारं श्रीकृष्णं प्रति अब्रवीत्। एतेन भक्तिपराकाष्ठा सूचिता।

उक्तिप्रकारमाह। गरुडेति।

**गरुडध्वज भक्तवत्सलस्त्वं**
**यदिहैव त्रिदशापगां मदर्थम्।**
**परिसृज्य च पापचित्तवृत्तिं**
**प्रयतं मामकरोः कृपैकसिन्धो ॥ २८ ॥**

हे गरुडध्वज, गरुडध्वजत्वं भवत एवासाधारणं चिह्नं इत्याशयः। कृपैकसिन्धो सत्स्वप्यनन्तेषु कल्याणगुणेषु एतेन कारुण्यस्यैव प्राधान्यमुक्तम्। त्वं भक्तवत्सलः आश्रितानां दोषान् भोग्यतया गणयसीत्यर्थः। यत् यस्मात्कारणात् मदर्थं मामुद्दिश्येत्यर्थः। इहैव मद्भवन एव। त्रिदशापगां देवगङ्गां परिसृज्य उत्पाद्य पापचित्तवृत्तिं पापात्मकं मां अकिञ्चनं मां प्रयतं सन्तं परिशुद्धं सन्तं अकरोः। साक्षान्मद्भवनमागत्यानुगृहीतवतो भगवतो भवतः चरणारविन्दप्रक्षालनजस्य तीर्थस्य गङ्गात्वात्। तत्प्रोक्षणेन तदाचमनेन च दुरितगन्धरहितः परिशुद्धोऽभवमित्याशयः। अत एव तव कृपाऽनिर्वचनीयेत्यभिप्रायः। काव्यलिङ्गालङ्कारः।

अथ कुन्तीसमानयनमाह। विदुर इति।

**विदुरस्त्वति सन्निगद्य बाष्पैः**
**तिमितक्षामतराच्छगण्डभित्तिम्।**
**सुचिरात्मजदर्शनाभिकांक्षा-**
**मनयद्दुःखमयीमिवाथ कुन्तीम् ॥ २९ ॥**

विदुरस्तु। इति पूर्वोक्तप्रकारेण सन्निगद्य अभिधाय। अथ अनन्तरं। सुचिरेण बहुकालात् आत्मजानां धर्मराजप्रभृतीनां पुत्राणां दर्शने अवलोकने अभि आभिमुख्येन काङ्क्षा इच्छा यस्यास्सा तां। अत एव बाष्पैः शोकाश्रुजलैः तिमिता क्लिन्ना क्षामतरा च अत्यन्तकृशा च अच्छा पाण्डरवर्णविशिष्टा च गण्डभित्तिः कपोलस्थली यस्यास्सा तां। अत एव दुःखमयीमिव स्थितां दुःखमेव स्त्रीरूपेण परिणतमिव स्थितां इत्युत्प्रेक्षा। कुन्तीं अनयत् कृष्णसमीपं प्रापयामासेत्यर्थः।

नन्विति ।

**ननु पाण्डवदूत एष पादौ**
**शिरसा संस्पृशतीति सन्निवेद्य ।**
**प्रणिपत्य पदाब्जयोश्च कुन्त्याः**
**व्युदतिष्ठद्गलदश्रुदृङ्मुकुन्दः ॥ ३० ॥**

मुकुन्दः श्रीकृष्णः । ननु हे पितृष्वसः । पाण्डवदूतः पाण्डवानां सन्देशहर्ता एषः भवद्भ्रातृपुत्रः कृष्णः । पादौ त्वच्चरणौ शिरसा मूर्ध्ना संस्पृशति सम्यक् स्पृशति प्रणमतीति यावत् । इति एवं सन्निवेद्य उक्त्वा । कुन्त्याः पदाब्जयोः प्रणिपत्य प्रणम्य च । गलदश्रुदृक्सन् प्रसरद्बाष्पाविलेक्षणस्सन् व्युदतिष्ठत् समुत्तस्थौ । कुन्त्याः दुर्दशानुध्यानेन बाष्पाविललोचनत्वमुक्तम् । पाण्डवदूतत्वोक्त्या कथमपीतःपरमहमेव सम्पादयिष्यामि त्वत्पुत्राणां समीहितमित्याशयस्सूचितः ।

तदा विदुरस्यावस्थामाह । उभयोरिति ।

**उभयोरपि वीक्ष्य मौनमुद्रां**
**क्षणकालं स्फुरिताधरां सबाष्पाम् ।**
**विदुरस्सदरं विवर्णवक्त्रो**
**बत चित्रार्पितवच्च सोपि तस्थौ ॥ ३१ ॥**

सः एतदवस्थावलोकनतत्परः विदुरोपि । अपिना कुन्तीकृष्णौ समुच्चीयेते । उभयोः कुन्तीकृष्णयोः क्षणकालं स्फुरिताधरां अन्तर्निरुद्धदुःखभरतया स्पन्दमानाधरां सबाष्पां निरोद्धुमप्यशक्यतया नयनप्रणालिकागलदश्रुजलां मौनमुद्रां अनिर्वचनीयतया अवचनं प्रदर्श्यमानदुःखातिशयामित्यर्थः । तूष्णीं स्थितिमिति यावत् । वीक्ष्य निर्वर्ण्य सदरं यथा तथा सभयं यथा तथा । विवर्णवक्त्रस्सन् क्षीणवदनकान्तिस्सन्नित्यर्थः । चित्रार्पितवत् चित्रे विलिखित इव चेष्टाविहीनस्सन् । तस्थौ च स्थितवानेव । बतेति खेदे । यद्वा बतेत्याश्चर्ये । परस्परदर्शनजनितदुःखातिशयेन किमपि वक्तुमप्यनीशतया मौनमवलम्ब्य स्थितौ कुन्तीकृष्णौ विलोक्य विदुरोपि उत्तरत्र किं वाऽपतिष्यतीति भयग्रस्तः कान्तिशून्यमुखः आवेगेन स्तब्धस्तस्थौ । स तु शोचनीयस्सन्निवेश इत्याशयः । स्वभावोक्तिः ।

अथ कुन्त्या उक्तिप्रकारमाह । अथेति ।

**अथ गद्गदिकानिरुद्धकण्ठी**
**बहुयत्नोद्गतभाषिता मुरारिम् ।**

**गलदश्रुसमुन्नवत्सचेला**
**हृदि दुःखं विनिगूढमुज्जगार ॥ ३२ ॥**

अथ मौनानन्तरं। कुन्ती गद्गदिकया दम्यमानगलतया गलपीडाविशेषेणेत्यर्थः। निरुद्धः स्तम्भितः कण्ठः यस्यास्सा। अत एव बहुयत्नेन कृच्छ्रप्रयत्नेन उद्गतं प्रवर्तितं भाषितं वचनं यस्यास्सा सती। गलदश्रुभिः निर्निरोधं प्रवहद्बाष्पैः समुन्नं क्लिन्नं वत्सस्य वक्षसः चेलं यस्यास्सा सती। मुरारिं प्रति श्रीकृष्णं प्रति हृदि हृदये विनिगूढं निगूहितमित्यर्थः। दुःखं उज्जगार उद्गिरतिस्म। अन्तर्निगूह्यमानमपि दुःखं श्रीकृष्णदर्शनात्स्वयमेव बहिर्निस्ससारेत्याशयः।

त्वयीति।

**त्वयि सत्यपि रुक्मिणीप्रिये य-**
**द्विपिने पाण्डुभुवां चिरेण वासः।**
**विलसत्यपि भानुमत्यहो त-**
**त्तमसां गाढतरः प्रसार एव ॥ ३३ ॥**

रुक्मिणीप्रिये रुक्मिण्या वल्लभे। पुरुषकारभूतलक्ष्मीसहचरे इति यावत्। एतेन रुक्मिणीपुरुषकारेणापि भवता पाण्डवा अवश्यं रक्षणीयाः इति सूच्यते। त्वयि सत्यपि सर्वशक्ते जाग्रत्यपि विपिने घोरारण्ये पाण्डुभुवां पाण्डवानां चिरेण त्रयोदश संवत्सरान् वास इति यत्। तत् भानुमति सूर्ये विलसत्यपि प्रकाशमाने सत्यपि तमसां अन्धकाराणां गाढतरः सान्द्रः प्रसार एव। निदर्शनालङ्कारः।

यदुनाथेति।

**यदुनाथ भवांस्तु लोकबन्धुः**
**तदपि भ्रातृसुतोऽस्ति मेतिबन्धुः।**
**किमिदं सति कैरवाधिनाथे**
**मुकुलत्वं न भवेद्धि कैरवाणाम् ॥ ३४ ॥**

हे यदुनाथ, हे कृष्ण, भवांस्तु त्वन्तु। लोकबन्धुः चेतनसामान्यबन्धुः। तदपि तत्रापि मे शोकशीलाया मम भ्रातृसुतः भ्रातुः वसुदेवस्य सुतः पुत्रः। अत एव अतिबन्धुः निकटबान्धव्यविशिष्ट इत्यर्थः। एवं सत्यपि किमिदं अस्माकमेतादृशदुःखपरम्परेत्यर्थः। व्यतिरेकमुखेन दृष्टान्तयति। सतीति। कैरवाधिनाथे कुमुदबान्धवे चन्द्रे सति विलसति सति। कैरवाणां कुमुदानां मुकुलत्वं कुड्मलत्वं न भवेद्धि। अत्र पुष्कलकारणे सत्यपि कार्याजनिरूपविशेषोक्त्यलङ्कारः।

शुभकृदिति ।

**शुभकृच्छुभमेष्यतीति यत्त्वं**
**कथयस्यम्बुजपत्रकान्तनेत्र ।**
**विपरीततया तदद्य सर्वं**
**फलतीहाद्भुतमेतदेव नाथ ॥ ३५ ॥**

हे अम्बुजपत्रकान्तनेत्र, हे पुण्डरीकाक्ष नाथ, अस्मत्स्वामिन् श्रीकृष्ण । शुभकृत् पुण्यकर्मकृत् शुभं पुण्यफलं मङ्गलं एष्यति प्राप्स्यति । इति एवं प्रकारेण यत् वचः कथयसि तत्सर्वं अद्य अस्मिन्काले इह पाण्डवविषये । विपरीततया प्रतीपतया फलति । एतदेव फलवैपरीत्यमेव अद्भुतं अत्याश्चर्यं । पाण्डवाः धर्मनिष्ठा अपि दुःखमेवानुभवन्ति । महदिदमाश्चर्यं खल्वित्याशयः ।

ममेति ।

**मम नाथ मुखानि पुत्रकाणां**
**अवलोकेय हरे न वा न जाने ।**
**अथवा नलिनीव शारदेन्दोः**
**पिहिताक्ष्यभ्युदये भवेयमेषाम् ॥ ३६ ॥**

हे नाथ, हे मत्स्वामिन् हरे, आश्रितानां सर्वदुःखापहारक मम पुत्रविरहिताया मम पुत्रकाणां पाण्डवानां मुखानि अवलोकेय पश्येयं अथवा नावलोकेय । न जाने । अथवा पक्षान्तरे । शारदेन्दोः शरत्कालिकचन्द्रस्य अभ्युदये आविर्भावसमये नलिनीव कमलिनीव । एषां पाण्डवानां अभ्युदयकाले पिहिताक्षी सती निमीलिताक्षी सती उपरता सतीति यावत् । भवेयं । मत्पुत्राणामभ्युदयमनवलोक्यैव मृता भवेयमित्याशयः । उपमालङ्कारः ।

जननीति ।

**जननीरहितौ यमौ मनोज्ञौ**
**विपिने हन्त मयाभिरक्षितौ तौ ।**
**सुकुमारशरीरकौ मुरारे,**
**ननु संस्मृत्य चिरेण नाथ दूये ॥ ३७ ॥**

हे नाथ, मुरारे, जननीरहितौ एतयोर्बाल्य एव माद्र्याः पत्या सममनुमृतत्वात् जननीविहीनौ मनोज्ञौ रूपवन्तौ विपिने अरण्य एव मया अनाथया मया अभिरक्षितौ

कृच्छ्रात्पालितौ तौ मामेव जननीति भावयन्तौ। सुकुमारशरीरकौ अत्यन्तकोमलाङ्कौ एतेन क्लेशासहिष्णुत्वं सूचितम्। यमौ नकुलसहदेवौ संस्मृत्य। एतेन निजोदरजातपुत्रापेक्षया नकुलसहदेवस्मरणाधिक्यं सूचितम्। चिरेण चिरकालात्। दूये दुःखितास्मि।

उदित इति।

**उदिते सति फल्गुने तदानी-**
**मुदभूद्वागशरीरिणी वनान्ते।**
**अयमेव जगद्विजित्य च त्वां**
**सुखयिष्यत्यचिरादिति प्रसन्ना ॥ ३८ ॥**

वनान्ते कान्तारसीम्नि। फल्गुने अर्जुने उदिते सति समुत्पन्ने सति। तदानीं अर्जुनजन्मकाले अयमेव त्वदुदरे समुत्पन्नोऽर्जुन एक एव जगत् भूमण्डलं सर्वमपि विजित्य अचिरात् अविलम्बेनैव त्वां च एवं दुःखितां त्वां च। चकारेण वसुमती समुच्चीयते। सुखयिष्यति सुखविशिष्टां करिष्यति। इति एवं प्रकारेण प्रसन्ना प्रसादविशिष्टा अशरीरिणी वाक् आकाशवाणी उदभूत् आविर्बभूव।

विफलेति।

**विफला किमु कृष्ण सापि वाणी**
**विपिनावासविवर्धितातिदुःखाम्।**
**परिसान्त्व्य धनञ्जयैकचित्तां**
**व्यतनोन्मां मुदितां सुधामयी या ॥ ३९ ॥**

हे कृष्ण, विपिने घोरारण्ये आवासः स्थितिः तेन विवर्धितं विशेषेण वृद्धिं प्रापितं अतिदुःखं यस्यास्सा तां मां। या सुधामयी अमृतप्रचुरा वाणी परिसान्त्व्य सान्त्वयित्वा धनञ्जयैकचित्तां अर्जुनैकनिहितभाविसमृद्धिसङ्कल्पां सतीमित्यर्थः। अत एव मुदितां सतीं हृष्टमानसां सतीं। व्यतनोत् विशेषेण चकार। सापि तादृश्यपि वाणी विफला किमु निष्फला किमु। मद्विषये सापि मिथ्याबभूवेत्याशयः।

हतेति।

**हतभाग्यमदीयकुक्षितो हा**
**जनिमान्योपि वृकोदरः क्षुधार्तः।**
**उदरार्थमहन्पुरैकचक्रे**
**बकमुग्रं बत यातुधानमेकः ॥ ४० ॥**

हतभाग्यमदीयकुक्षितः भाग्यहीनमदुदरात् जनिमान् लब्धजन्मा यः वृकोदरोपि। अपिना तत्पराक्रमस्सूच्यते। अत्र वृकोदरशब्देन क्षुदाधिक्यं सूचितम्। अप्रतिहतपराक्रमो भीमोपीत्यर्थः। क्षुधार्तस्सन् एककबलस्याप्यभावात् क्षुत्पीडितस्सन्। उदरार्थं स्वजठरपिठरपूरणार्थं। सद्यः क्षुत्परिहारार्थमिति यावत्। पुरा एकचक्रे एकचक्राख्ये जनपदे उग्रं स्वभावत एव क्रूरं बकं बकाख्यं यातुधानं राक्षसं। एक एव अन्यजनसाह्यविरहित एव अहन् जघान। हा बतेति अत्यन्तखेदे। एतेन भीमस्य पराक्रमातिशयस्सूचितः। बाल्यादारभ्य क्लेशपरम्परेत्यपि सूचितम्। एतदुत्तरश्लोकेनान्वेति।

सत्विति।

स तु सम्प्रति कानने चरन्स-
न्फलमूलाशनतो यथाकथञ्चित्।
शमयन्क्षुधमम्बुजाक्ष दीनो
ननु निद्रात्यटवीधरातलेषु ॥ ४१ ॥

स तु तादृशपराक्रमः भीमस्तु। हे अम्बुजाक्ष, हे पुण्डरीकाक्ष कृष्ण, सम्प्रति इदानीं। सम्प्रतीत्यनेन पूर्वं तावत् स्वभुजबलेन यथेच्छमन्नं सम्पाद्य स्वोदरपूरणमकरोत्। इदानीं तु तस्यापि नावकाश इति सूच्यते। कानने कठोरारण्ये चरन्सन् पर्यटन्सन्। फलमूलाशनतः वन्यफलकन्दप्रभृतिमुनिजनोचितवस्तुभक्षणेन यथाकथंचित् अतिप्रयासेन। एतत्तस्योदरपूरणाय नालमित्याशयः। क्षुधं जठराग्निपीडां शमयन्सन् नाशयन्सन् दीनस्सन् दुर्गतस्सन्। अटवीधरातलेषु अरण्यभूप्रदेशेषु। एतेन तल्पशून्यता सूचिता। बहुवचनेन निरन्तरमपि काननान्तरपर्यटनं सूचितम्। निद्राति ननु स्वपिति ननु। निद्रातीत्यनेन क्षुत्क्षामतया स्वयमतर्कितं निद्राश्लिष्टो भवतीति सूचितम्।

सततमिति।

सततं स युधिष्ठिरो महात्मा
स्थिरचित्तो मुनिसेवनैकसक्तः।
न हि राज्यमपेक्षतेऽक्षमाला-
मसियोग्येन करेण सम्बिभर्ति ॥ ४२ ॥

महात्मा उदात्तहृदयः सः सर्वज्येष्ठः युधिष्ठिरः। नाममात्रेण युधिष्ठिरः। कुत्यतः परं धर्मराज इत्यर्थः। स्थिरचित्तस्सन् अचञ्चलमनस्कस्सन्। वनवास एव निश्चितमानसस्सन्निति यावत्। सततं निरन्तरमपि मुनिसेवनैकसक्तस्सन् तपोधनानां शुश्रूषैकरतस्सन्

राज्यं न ह्यपेक्षते नैवेच्छति। अपितु असियोग्येन खड्गग्रहणयोग्येन करेण पाणिना अक्षमालां ब्राह्मणयोग्यजपमालिकां सम्बिभर्ति सम्यक् धारयति। धर्मराजः क्षत्रियत्वमपहाय ब्राह्मण इव शान्तचित्तो वर्तते इत्याशयः।

इदमिति।

**इदमस्तु रमेश पाण्डवीयं**
**तदिदं हन्त कथं सहे स्मरन्ती।**
**द्रुपदस्य सुता मम स्नुषा सा**
**ग्लपिता शोचति यद्वने कृशाङ्गी ॥ ४३ ॥**

हे रमेश, हे श्रियःपते श्रीकृष्ण, पाण्डवीयं पाण्डवसम्बन्धि इदं वृत्तं अस्तु न गणनीयमित्यर्थः। न तावच्छोचनीयमिति यावत्। तर्हि शोचनीयं किमिति चेदाह। द्रुपदस्येति। द्रुपदस्य द्रुपदमहाराजस्य सुता दुहिता। एतेन सुखैकभाजनत्वं सूचितम्। मम महावीरस्य पाण्डोः भार्याया मम स्नुषा। एतेन वीरपत्नीत्वं सूचितम्। सा द्रौपदी वने भयङ्करे कान्तारे ग्लपिता ग्लानिं प्रापिता क्लेशितेति यावत्। अत एव कृशाङ्गी क्षीणगात्री सती। शोचतीति यत् दुःखिता भवतीति यत्। तदिदं तदेतदनुभवं स्मरन्ती अहं दीर्घायुष्मती अहं कथं केन प्रकारेण सहे सोढुमेव न समर्थास्मि। हन्तेति खेदे। पाण्डववृत्तान्तापेक्षया द्रौपद्यास्तावदवस्था अत्यन्तदुस्सहेत्याशयः।

द्रौपदीवृत्तान्तस्यातिशोचनीयत्वमेवाह। बतेति।

**बत सा तु शिरीषकोमलाङ्गी**
**चिरतप्ता पतिभिर्वनेचरीव।**
**कटुकण्टकपाटिताङ्घ्रिपद्मा**
**फलमूलाशनकर्शिता कथं स्यात् ॥ ४४ ॥**

शिरीषकोमलाङ्गी शिरीषकुसुमवत्सुकुमारशरीरा सा तु द्रौपदी तु। तुस्तु वैलक्षण्ये इतरयोषिदपेक्षया जन्मरूपसौकुमार्याभिजात्यादिवैलक्षण्यमुक्तं भवति। पतिभिः वल्लभैः पाण्डवैः सह। अत्र पतिवियोगासहिष्णुत्वोक्त्या पातिव्रत्यातिशयस्सूचितः। वनेचरीव व्याधस्त्रीव। कटुकण्टकैः तीक्ष्णशल्यैः पाटिताङ्घ्रिपद्मा सती विदारितकमलकोमलचरणा सती अत एव चिरतप्ता सती त्रयोदशवत्सरान् अनुभूतक्लेशा सती। फलमूलादीनां अशनेन भक्षणेन कर्शिता सती कार्श्यं प्रापिता सती कथं स्यात्? एवं भवितुमेव नार्हतीत्यर्थः। बतेति खेदे।

तस्याः पातिव्रत्यातिशयमेवाह । भवदिति ।

**भवदङ्घ्रिसरोजसक्तचित्ता**
**पतिसेवैकरता विसृष्टभोगा ।**
**तनयानपि वत्सला विसृज्य**
**प्रविदूरे विपिनं जगाम धीरा ॥ ४५ ॥**

भवतः आश्रितवत्सलस्य तव अङ्घ्रिसरोजयोः चरणकमलयोः सक्तं सम्बद्धं विन्यस्तमिति यावत् । चित्तं मनः यस्यास्सा । निरन्तरमपि भवच्चरणसरसिजानुस्मरणैकतानेत्यर्थः । पतीनां पञ्चपाण्डवानां सेवैकरता शुश्रूषैकनिरता । अत एव विसृष्टः त्यक्तः भोगः विषयानुभवः यया सा । वत्सलापि पुत्रेषु वात्सल्यविशिष्टापि तनयानपि पञ्चोपपाण्डवानपि प्रविदूरे अत्यन्तदूरे विसृज्य विहाय । धीरा सती स्थिरचित्ता सती विपिनं पतिभिस्सहारण्यं जगाम । इदं पातिव्रत्यकार्यं खलु ?

भवत्सान्निध्ये सत्यपि अनिर्वचनीयकष्टपरम्परेति महदिदमाश्चर्यमित्याह । त्वयीति ।

**त्वयि सत्यपि कृष्ण नाथहीना**
**कटुदुश्शासनकृष्टकेशपाशा ।**
**अबला नृपमध्यगा विचेला**
**रचिता पुष्पवतीति किन्न्विदं स्यात् ॥ ४६ ॥**

हे कृष्ण, त्वयि सत्यपि सर्वजगत्स्वामिनि बान्धवे त्वयि वर्तमाने सत्यपि । नाथहीना अनाथा अत एव कटुदुश्शासनेन नृशंसेन दुश्शासनेन कृष्टः करालकराकृष्टः केशपाशः चिकुरकलापः यस्यास्सा सती । स्त्रीत्वाद्दुर्बला यद्वा पतिपारतन्त्र्याद्बलसत्वेपि दुर्बला पुष्पवती रजस्वला नृपमध्यगा सती बलान्नपसभं प्रापिता सतीत्यर्थः । विचेला विकृष्टवस्त्रा सती रचितेति यत् दुश्शासनेन कृतेतियत् । इदं पूर्वोक्तमेतत् स्यात्किन्नु अपि नाम भवेद्वा । क्वाप्येवमभूद्वा । इत्याशयः ।

इतीति ।

**इति बाष्पपरम्परासमुन्न-**
**स्तनचेलां करतः पिधाय वक्त्रम् ।**
**रुदतीमवलोक्य चक्रपाणिः**
**निजगादामितदुःखरुद्धवाणिः ॥ ४७ ॥**

इति पूर्वोक्तप्रकारेण बाष्पाणां अश्रुजलानां परम्परया अविच्छिन्नसन्तानेन समुन्नं सम्यक् क्लिन्नं स्तनचेलं स्तनमण्डलवस्त्रं यस्यास्सा तां। स्तनयोस्समुन्नतत्वात् तत्रत्यचेलस्य क्लिन्नत्वमुक्तं। करतः पाणिभ्यां वक्त्रं निजमुखं पिधाय रुदतीं रोदनपरां कुन्तीं अवलोक्य चक्रपाणिः श्रीकृष्णः। कुन्तीदुःखदर्शनानुपदमेव शत्रुनिषूदनमवश्यकर्तव्यमित्याशय-सूचनार्थं चक्रपाणिरित्युक्तं। अमितदुःखेन असह्यशोकेन रुद्धा निरुद्धा वाणी वाक् यस्य स तथोक्तस्सन्। निजगाद वक्ष्यमाणप्रकारेणोवाच।

यथासंख्यरीत्या कुंत्युक्तीस्समाधत्ते। त्वयि सत्यपीत्यस्य समाधानमाह। अयीति।

**अयि जाग्रति पूर्वकर्मजाले**
**भवितव्यं यदिहानुवर्तते तत्।**
**पिहिते सति भास्करे घनाल्या**
**प्रसरत्येव तमस्स्वयं प्रपञ्चे ॥ ४८ ॥**

अयि हे कुन्ति, पूर्वकर्मजाले प्राचीनपुण्यपापरूपकर्मसमूहे कर्मरूपानाये च। अत्र कर्मणां जालत्वरूपणेन कर्मभ्यः परिच्यावनं दुष्करमिति गम्यते। असंख्येयतया कर्मणामोत-प्रोतत्वं च सूचितम्। जाग्रति सति प्रबुद्धे सति फलप्रदानोन्मुखे सतीति यावत्। भवितव्यं अवश्यप्राप्यं यत्फलं। तत्फलं इह अस्मिन्जन्मनि अनुसृत्य वर्तते "अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभं"। इति ह्युक्तम्। तदेव दृष्टान्तेन द्रढयति। भास्करे सूर्ये घनाल्या मेघपंक्त्या पिहिते सति आच्छादिते सति प्रपञ्चे जगति तमः अन्धकारः स्वयं निरर्गलमिति यावत्। प्रसरत्येव व्याप्नोत्येव। मयि सत्यपि पूर्वार्जितस्य कर्मणः फलमनुभवेनैवापोह्यमित्याशयः।

यदुनाथेति श्लोकस्योत्तरमाह। उदय इति।

**उदयेपि च कैरवैकबन्धोः**
**विकसत्येव न कुड्मलन्त्वपक्वम्।**
**परिपाकमपेक्षते सुखं वा**
**ननु दुःखं च नरेषु कर्मणां तत् ॥ ४९ ॥**

कैरवैकबन्धोः चन्द्रस्य उदये सत्यपि च प्रादुर्भावे सत्यपि। अपिर्विरोधे। अपक्वं विकासानुकूलपाकविरहितं कुड्मलं तु कैरवमुकुलस्तु। तुस्तु भेदे। नैव विकसति। विकासं नैव प्राप्नोति। तत् तस्मात्कारणात् नरेषु। नराणामेव कर्मकर्तृत्वात् नरेष्वि-त्युक्तम्। यद्यपीतरेषां प्राणिनामपि कर्मबद्धत्वं वर्तते। तथापि बुद्धिपूर्वककर्मकर्तृत्वं

नराणामेव। सुखं वा दुःखं वा कर्मणां पुण्यपापरूपकर्मणां परिपाकं फलप्रदानोन्मुखत्वमित्यर्थः। अपेक्षते ननु। यदा प्राचीनपुण्यकर्म फलप्रदानोन्मुखं भवति तदा सुखी भवति नरः। एवं पापकर्मापि फलप्रदानोन्मुखं चेत् तदा दुःखी भवतीत्याशयः। एतेन इदानीं क्रियमाणस्य धर्मकार्यस्य इदानीमनुभूयमानं दुःखं तु नैव फलं। अपितु प्राचीनकर्मणामित्याशयः। अत एवोक्तं विचित्रा कर्मणो गतिरिति।

शुभकृच्छुभमेष्यतीत्यस्योत्तरमाह। शुभकृदिति।

**शुभकृच्छुभमेष्यतीति सत्यं**
**सहसा हन्त तदैव नाश्नुते तत्।**
**अनुपालयतीह बीजवप्ता**
**फलकालं कृषिकश्चिराभिकांक्षी ॥ ५० ॥**

शुभकृत् पुण्यकार्यकर्ता शुभं पुण्यफलं एष्यति प्राप्स्यति इति एवं यदुक्तं मया तत्सत्यमेव। नानृतं ब्रवीमीत्यर्थः। तर्हि शुभकर्मकर्तारः पाण्डवाः किमर्थं क्लेशमेवमनुभवन्तीति चेत्। आह। सहसेति। सहसा शीघ्रमेव तदैव पुण्यकर्मनिर्वर्तनानुपदमेव तत् शुभकर्मफलं नाश्नुते नानुभवति। हन्तेति खेदे। जनाः पुण्यकर्म कृत्वा अनुपदमेव नाद्यापि तत्फलमागतमिति त्वरातुरा भवन्तीति तेषां मौढ्यमनुचिन्त्य खेदः। दृष्टान्तमुखेन तदेव साधयति। अनुपालयतीति। इह भूमौ बीजवप्ता बीजावापकर्ता कृषिकः कृषीवलः चिराभिकांक्षी सन्नपि चिरकालात् बीजावापकालादारभ्येति यावत् अभिकांक्षी सन्नपि कदा वा भविष्यति फलमिति आभिमुख्येन स्पृहाविष्टस्सन्नपि फलकालं फलोद्गमतत्पाककालमित्यर्थः! अनुपालयति निरीक्षते। तस्माच्छुभकृच्छुभफलमुत्तरत्रानुभविष्यत्येवेत्याशयः।

दुष्टानां स्वभावमाह। जगतीति।

**जगति प्रथितं किलेदमार्ये**
**सुचिरं स्त्रीमुखसञ्चयास्तु नाकुम्।**
**रचयन्ति ततः पृदाकवोऽन्तः**
**निवसन्तीति यदत्र किन्नु चित्रम् ॥ ५१ ॥**

हे आर्ये, ममापि भवती पूज्या खल्वित्याशयः। कुन्ति, स्त्रीमुखसञ्चयास्तु वल्मीकरचयितॄणां कीटविशेषाणां समूहास्तु। नाकुं वल्मीकं सुचिरं चिरकालादारभ्य रचयन्ति कुर्वन्ति। ततः वल्मीकनिर्माणानन्तरं पृदाकवः क्रूरास्सर्पाः अन्तः वल्मीकाभ्यन्तरे निवसन्ति वासं

कुर्वन्ति। इति यत् पूर्वोक्तं यत्। तदिदं जगति लोके प्रथितं किल प्रसिद्धं किल। सर्वविदितमिति यावत्। अत्र अस्मिन्विषये किन्नु चित्रं किमाश्चर्यं। नैवाश्चर्यमित्यर्थः। दुष्टानां स्वभाव एवेतादृगित्याशयः।

पूर्वोक्तं प्रकृते योजयति। नन्विति।

**ननु पाण्डुसुतैर्विजित्य काष्ठा**
**विधिनिर्वर्तितराजसूययागैः।**
**अखिलापि समार्जिता सुसम्प-**
**च्छठचित्तैरनुभूयतेऽद्य धूर्तैः ॥ ५२ ॥**

ननु हे कुन्ति, काष्ठाः सर्वा दिशः विजित्य आत्मबाहुबलेन वशीकृत्य। अत एव विधिना शास्त्रोक्तप्रकारेण निर्वर्तितः साधितः राजसूययागः राजसूयाख्ययज्ञविशेषः यैस्ते तैः। पाण्डुसुतैः धर्मराजप्रभृतिभिः पञ्चपाण्डवैः समार्जिता सम्पादिता अखिलापि सर्वापि सुसम्पत् स्वार्जितत्वात्सुसम्पदित्युक्तम्। शठचित्तैः गूढविप्रियकृद्भिः धूर्तैः कितवैः दुर्योधनप्रभृतिभिः अद्य अनुभूयते। एतेन एतेपि सर्पकल्पा इत्युक्तं भवति।

आत्मागमनकारणमाह। उभयोरिति।

**उभयोरपि सन्धिमद्य कर्तुं**
**तव पुत्रानुमतेरिहागतोऽस्मि।**
**यदि नेच्छति मानमौनमुद्रः**
**स दुरात्मा प्रथनं तु सिद्धमेव ॥ ५३ ॥**

तव एवं दुःखशीलाया भवत्याः पुत्रस्य धर्मराजस्य अनुमतेरिति पञ्चमी। सम्मत्येति यावत्। उभयोरपि कौरवपाण्डवयोरपि सन्धिं संयोगं। सौहार्दरूपसम्बधमिति यावत्। कर्तुं उत्पादयितुं अद्य इह हास्तिनपुरं प्रति। आगतोस्मि। दुरात्मा दुष्टहृदयः सः दुर्योधनः मानेन गर्वेण मौनमुद्रस्सन् अनिच्छया तूष्णीं स्थितस्सन्। नेच्छति यदि सन्धिं नापेक्षते चेत्। प्रथनं तु युद्धं तु सिद्धमेव। भीमार्जुनापेक्षितं युद्धमेव भविष्यतीत्याशयः।

तर्हि यदा कदा वापि भविष्यति युद्धं। तेनेदानीं किं मे प्रयोजनमिति चेदाह। अधुनेति।

**अधुना विजहीहि दुःखमार्ये**
**सुतवक्त्राण्यचिराद्वेक्षसे त्वम्।**

**जयिनश्चरणाम्बुजद्वये ते**
**निपतिष्यन्ति ससम्मदं सदाराः** ॥ ५४ ॥

हे आर्ये कुन्ति, अधुना इदानीमेव दुःखं पुत्रविरहजं क्लेशं। विजहीहि त्यज। त्वं पुत्रमुखदर्शनलालसा त्वं अचिरात् क्षिप्रमेव। न तु कालविलम्बः। सुतानां धर्मराजादीनां पुत्राणां वक्त्राणि मुखानि। अवेक्षसे पश्यसि। क्षिप्रमेवागमिष्यन्तीत्यर्थः। जयिनः युद्धे जयशीलाः सदाराः द्रौपद्या समेताः। ससम्मदं यथा तथा ससन्तोषं यथा तथा। ते भवत्याः चरणाम्बुजद्वये पादकमलयुगले। निपतिष्यन्ति प्रणामं करिष्यन्तीत्यर्थः।

इतीति।

**इति चक्रधरो निवेद्य कुन्त्यै**
**विदुरेणार्पितमादरातिभोग्यम्।**
**रसवत्फलपायसादिभोज्यं**
**सुहितोऽभूदुपभुज्य सात्यकिश्च** ॥ ५५ ॥

इति पूर्वोक्तप्रकारेण। चक्रधरः श्रीकृष्णः कुन्त्यै निवेद्य। विदुरेण अर्पितं भक्त्या समर्पितं अत एव आदरातिभोग्यं प्रीतिरसेनात्यन्तभोग्यं रसवत् षड्रसोपेतं कदलीरसालप्रभृतीनि-फलानि पायसं पयसा पक्वमन्नादिकं। आदिपदेन चोष्यपेयादिकं गृह्यते। भोज्यं भोक्तुं योग्यं वस्तुजातं उपभुज्य भुक्त्वा। सुहितस्सन् तृप्तस्सन् अभूत्। सात्यकिश्च पूर्वोक्तं सर्वमुपभुज्य सुहितोभूत्।

अथ विदुरकार्यमाह। विदुर इति।

**विदुरो मृदुलं प्रकल्प्य तल्पं**
**यदुनाथं त्वथ तत्र शाययित्वा।**
**निजपाणिपुटेन तत्पदाब्जे**
**परिमृद्नन्सुसुखं जगाद भक्त्या** ॥ ५६ ॥

विदुरः मृदुलं अत्यन्तकोमलं तल्पं शय्यां प्रकल्प्य स्वयमेव विस्तृतं कृत्वा। अथ तल्प-रचनानन्तरं। यदुनाथं श्रीकृष्णं तत्र शय्यायां शाययित्वा। निजपाणिपुटेन आत्मकरतल-पुटेन तत्पदाब्जे श्रीकृष्णचरणयुगलं सुसुखं यथा तथा यथा सुखं भवेत्तथेत्यर्थः। परि-मृद्नन्सन् परितः मर्दनं कुर्वन्सन्। भक्त्या प्रीत्यतिशयेन निजगाद वक्ष्यमाणप्रकारेणोवाच।

उक्तिप्रकारमाह । अहमिति ।

**अहमस्मि रमेश धन्य एष**
**त्रिजगद्वन्द्यमिदं पदारविन्दम् ।**
**कमलाकरपल्लवैकसेव्यं**
**परिमृद्नामि यदद्य दासदासः ॥ ५७ ॥**

यत् यस्मात्कारणात् । दासदासः भवद्भृत्यानामपि भृत्यः । एतेन भागवतनिष्ठत्वं सूचितम् । त्रिजगद्वन्द्यं सुरनरतिर्यक्स्थावरपूजनीयं । कमलायाः लक्ष्म्याः करपल्लवैकसेव्यं कोमलपाणिकिसलयाभ्यामेव संवाहनयोग्यं । एतेन अन्यदौर्लभ्यं सूचितम् । इदं मत्पाणिगतं पदारविन्दं चरणसरसिजद्वन्द्वं । अद्य अस्मिन्नवसरे । अद्येत्यनेन स्वसुकृतपरिपाककालस्सूचितः । मृद्नामि संवाहयामि । तस्मात्कारणात् । हे रमेश, हे श्रियःपते एषोहं शूद्रयोनौ समुत्पन्नोहं धन्योस्मि ।

इतीति ।

**इति भक्तिभरेण साश्रुनेत्रो**
**विदुरोऽपृच्छदनल्पदुःखभाजः ।**
**यदुनाथ वनेऽथ पाण्डवास्ते**
**कथमासन्निति गद्गदाक्षरस्सन् ॥ ५८ ॥**

इति पूर्वोक्तप्रकारेण । विदुरः भक्तिभरेण प्रीत्यतिशयेन साश्रुनेत्रस्सन् आनन्दबाष्पपूर्णलोचनस्सन् । उक्त्वेति शेषः । अथ अनन्तरं । हे यदुनाथ, हे श्रीकृष्ण, वने महारण्ये अनल्पदुःखभाजः अनुभूतापरिमितक्लेशाः ते धर्मात्मानः पाण्डवाः कथं कया रीत्या । आसन् । इति गद्गदाक्षरस्सन् दुःखातिशयदम्यमानगलतया स्फुटिताक्षरस्सन् । अपृच्छत् ।

पृष्ट इति ।

**पृष्टस्तेन यदूद्वहः प्रकथयन्दुःखाश्रुपूर्णेक्षणः**
**क्लेशं पाण्डुभुवां कठोरमथ तद्दुर्योधनादेः कटु ।**
**शाठ्यं च प्रतिपन्नरोषकलुषो निर्निद्र एव क्षपां**
**दीर्घामक्षपयच्च शोकवशतो लब्धातिमौनामिव ॥५९॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणमहाकविविरचिते**
**अद्भुतदूताख्यकाव्यरत्ने**
**दशमस्सर्गः ।**

तेन विदुरेण पृष्टः कृतप्रश्नः यदूद्वहः श्रीकृष्णः। दुःखेन यदश्रु तेन पूर्णेक्षणस्सन्। गम्भीरप्रकृतेरपि श्रीकृष्णस्य दुःखाश्रुपूर्णेक्षणत्वोक्त्या पाण्डवक्लेशानां वाचामगोचरत्वमुक्तं भवति। पाण्डुभुवां पाण्डवानां क्लेशं वनवासदुःखं प्रकथयन्सन् विस्तरशः कथयन्सन्। अथ पाण्डवक्लेशोक्त्यनन्तरं। दुर्योधनादेः आदिपदेन दुश्शासनकर्णप्रभृतयो गृह्यन्ते। कठोरं अतिकठिनं कटु अनिवार्यक्लेशदायकं तत् अनिर्वचनीयं शाठ्यं च गूढविप्रियकृत्त्वं च। प्रकथयन्सन् प्रतिपन्नः लब्धः यः रोषः कोपः तेन कलुषः आलोडितस्वान्तस्सन्। अत एव निर्निद्र एव जाग्रन्नेव। दीर्घां निद्राभावाद्युगायमानामित्यर्थः। शोकवशतः श्रीकृष्णदुःखदर्शनजनितदुःखवशेन। लब्धातिमौनामिव अङ्गीकृतमौनमुद्रामिवेत्युत्प्रेक्षा। निश्शब्दामिति यावत्। क्षपां च रात्रिमेव। अक्षपयत् अतिवाहयामास। एतेन वक्तव्यांशस्य अवशिष्टत्वं सूचितम्।

इति श्रीभगवल्लक्ष्मीदासानुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
दशमस्सर्गः।

॥ श्रीः ॥

# एकादशस्सर्गः ।

कविरिदानीमपरेद्युः प्रभाते धृतराष्ट्रदुर्योधनादीनां मन्त्रं विवक्षुः एकादशसर्गमारभते । अथेत्यादिना ।

**अथ प्रगेऽन्धो धृतराष्ट्र ऊचे**
**दुर्योधनं क्रोधधनं मदान्धम् ।**
**आहूय कर्णेन समं शठेन**
**कृष्णातिभीतः परिसान्त्वनोक्तिम् ॥ १ ॥**

अथ अनन्तरं । प्रगे प्रातःकाले । अन्धः अक्ष्णा काणः । एतेन पुत्राधीनत्वमुक्तं भवति । धृतराष्ट्रः कृष्णात् अतिभीतस्सन् पाण्डवद्रोहेण कृष्णः कुपितः निर्मूलयेदास्मानिति भियाक्रान्तस्सन् । क्रोध एव धनं यस्य स तथोक्तः तम् । अत्यमर्षात्कृत्याकृत्यविवेकशून्यत्वमुक्तं भवति । मदान्धं तत्रापि राज्यमदेन अन्धं । शठेन तत्सदृशहृदयेन गूढविप्रियकृता कर्णेन समं अङ्गराजेन समं । आहूय परिसान्त्वनोक्तिं समाधानोक्तिं । ऊचे अब्रवीत् ।

उक्तिप्रकारमाह । वत्सेति ।

**वत्साद्य मे संश्रृणु वाचमेनां**
**क्रोधं जहीहि प्रकटीकुरुष्व ।**
**प्रीतिं बहिः प्रापय कृष्णमेनां**
**सभां मनोज्ञामवनम्रमौलिः ॥ २ ॥**

हे वत्स, तात दुर्योधन । वत्सेत्यनेन वात्सल्याद्ब्रवीमि नान्यथेत्याशयस्सूचितः । अद्य अस्मिन्समये । मे त्वय्येवार्पितप्रीतिसम्भारस्य मम । एनां वाचं प्रीत्युक्तिमिति यावत् । सम्यक् श्रृणु अवधारय । क्रोधं सर्वकार्यविनाशकं कोपं । जहीहि त्यज । वहिः प्रीतिं प्रकटीकुरुष्व प्रकाशय । एतेन अभ्यन्तरे तत्वतो मास्तु प्रीतिः अहमिव त्वमपि दाम्भिकप्रीतिं प्रकाशयेत्याशयस्सूचितः । अत एव अवनम्रमौलिस्सन् अवनतमस्तकस्सन् । कृष्णं स्वयमेवागतं किमपि विवक्षुं श्रीकृष्णं । एनां मदीयां मनोज्ञां सर्ववैभवमनोहरां । एतेन कृष्णोपि अस्मत्सभामवलोक्य मात्सर्याविष्टो भवत्वित्याशयस्सूच्यते । सभां प्रापय सभां प्रत्यानयेत्यर्थः ।

दुर्योधनस्वभावमाह । निशम्येति ।

**निशम्य तातेरितमुग्रनेत्रः**
**भ्रूभङ्गबद्धालिकजिह्मरेखः ।**
**रोषोत्स्फुरत्कण्ठसिरोऽब्रवीत्तं**
**सुयोधनो मित्रमुखेङ्गितज्ञः ॥ ३ ॥**

सुयोधनः तातेन धृतराष्ट्रेन ईरितं अभिहितं वचनं निशम्य श्रुत्वा । उग्रनेत्रस्सन् क्रोधातिरेकपरिकुपितनयनस्सन् । भ्रुवोः भङ्गेन वक्रिम्णा बद्धाः समुत्पादिताः अलिके ललाटे जिह्माः कुटिलाः रेखाः येन स तथोक्तस्सन् । रोषेण क्रोधेन उत्स्फुरन्त्यः उद्गच्छन्त्यः कण्ठसिराः गलतटधमनयः यस्य स तथोक्तस्सन् मित्रस्य कर्णस्य यन्मुखं तस्य इङ्गितं आकारचेष्टितं तत्ज्ञस्सन् जानन्सन् । तं स्वतातं धृतराष्ट्रं प्रति अब्रवीत् । स्वभावोक्तिः ।

उक्तिप्रकारमाह । तवेति ।

**तवोपदेशेन धराधिनाथो**
**दासीकृतोऽहं व्रजवासिनोपि ।**
**अनन्तसामन्तनरेशरत्न-**
**किरीटनीराजितपादपद्मः ॥ ४ ॥**

अनन्ताः असंख्याताः ये सामन्तनरेशाः अधीनसामन्तनृपाः तेषां रत्नकिरीटैः नीराजितपादपद्मः नीराजिनीकृतचरणारविन्दः । अत एव धराधिनाथः चक्रवर्ती । अहं मानोन्नतोहं तव वृद्धस्य मद्गौरवानभिज्ञस्य भवतः । उपदेशेन माननीयः कृष्णः इत्याकारकोपदेशेन व्रजवासिनोपि लोकतंत्रानभिज्ञस्य क्षुद्रग्रामनिवासिनः कृष्णस्यापि । दासीकृतः भृत्यवत्कृतः अतिनिहीनकल्पस्तमनुसृतवानस्मीत्याशयः ।

यदिति ।

**यद्दर्शनायैव चिरेण भूपाः**
**उपायनालङ्कृतपाणिपद्माः ।**
**दौवारिकैर्वेत्रलतानिरुद्धाः**
**तिष्ठन्ति कालं प्रतिपालयन्तः ॥ ५ ॥**

भूपाः राजानः । उपायनैः उपग्राह्यैः अलङ्कृतपाणिपद्माः परिमण्डितहस्तकमलास्सन्तः दौवारिकैः द्वारपालैः वेत्रलताभिः निरुद्धास्सन्तः वारितान्तःप्रवेशास्सन्तः । चिरेण चिर-

कालमित्यर्थः । यस्य मम दर्शनायैव अवलोकनायैव । अत्र एवकारेण प्रयोजनान्तरशून्यत्वं सूचितम् । कालं मद्दर्शनसमयं प्रतिपालयन्तः निरीक्षमाणास्सन्तः । तिष्ठन्ति न तूपविशन्ति । तादृशोहं दासीकृत इति पूर्वेणान्वयः । अत्र यच्छब्दस्योत्तरवाक्यगतत्वात् नास्ति पूर्ववाक्ये तच्छब्दापेक्षा ।

कथं दासीकृत इति चेत्तदाह । त्वदिति ।

**त्वदाज्ञया गोपकुलोद्भवोऽपि**
**प्रभ्रष्टराज्याधिकृतिर्मयैव ।**
**अमेयमद्वैभवदर्शनीयं**
**प्रवेशितः पत्तनमभ्युपेत्य ॥ ६ ॥**

त्वदाज्ञया भवदादेशेन । गोपकुलोद्भवोपि गोरक्षणतत्परवृषलकुलसम्भवोपि । प्रभ्रष्टराज्याधिकृतिरपि राज्याधिकारहीनोपि । एतद्विशेषणद्वयेन दृगन्तेनाप्यनवेक्षणीयत्वं सूचितम् । कृष्णः मयैव चक्रवर्तिना साक्षान्मयैव । न तु भृत्यमुखेनेत्यर्थः । अभ्युपेत्य अभिमुखीभूय स्वयमेव तत्समीपं गत्वेति यावत् । अमेयमद्वैभवदर्शनीयं अपरिमितालङ्करणदर्शितमद्वैभवतया अत्यन्तमनोहरं पत्तनं हास्तिनपुरं प्रवेशितः । सर्वस्याप्येवंविधकार्यस्य भवदाज्ञैव निदानमित्याशयः ।

नेति ।

**नैच्छन्मया यः प्रवितीर्णमन्नं**
**भोक्तुं तमद्यैव तिरस्कृतोऽहम् ।**
**उपेत्य नम्रः कथमानयेयं**
**न मेऽभिमानः किमु राज्यभाजः ॥ ७ ॥**

यः कृष्णः मया चक्रवर्तिना मया । प्रवितीर्णं प्रकर्षेण समर्पितं अन्नं भोग्यतमं बहुद्रव्यव्ययकारितं मिष्टान्नमित्यर्थः । भोक्तुं नैच्छत् नापेक्षितवान् । अत एव अद्यैव अचिरादेव न तु कालान्तरे । तिरस्कृतः तुच्छीकृतः अहं नम्रस्सन् विनयावनतस्सन् । उपेत्य अनुसृत्य तं तादृशं निष्कारणबद्धवैरं कृष्णं । कथं वा आनयेयं । नैवानेतुमिच्छामीत्याशयः । राज्यभाजः राज्याधिकारमहोन्नतस्य मे मानिनो मम । अभिमानः गर्वः नास्ति किमु अस्त्येवेत्याशयः ।

त्यक्त्वेति ।

**त्यक्त्वा मदीयं मधुरोपभोग्यं**
**राजार्हमन्नं स तु गोपलुब्धः ।**

**यदा कदन्नैकरतो बभूव**
**व्यक्तीकृता हालिकता तदैव ॥ ८ ॥**

गोपलुब्धः गोपालकबालकसहवासप्रमुदित इत्यर्थः । स तु कृष्णस्तु । मदीयं मया दत्तमित्यर्थः । मधुरं स्वादु अत एव उपभोग्यं उपभोक्तुं योग्यं राजार्हं राज्ञामसाधारणं अन्नं त्यक्त्वा दूरतः परिहृत्य । चक्षुषाप्यनवलोक्येति यावत् । यदा कदन्नैकरतस्सन् कुत्सितान्नभोजनासक्तस्सन् । शूद्रकृतत्वात्कुत्सितत्वमुक्तम् । बभूव । तदैव हालिकता ग्राम्यत्वं व्यक्तीकृता प्रकटीकृता । स्थानगौरवानभिज्ञ इत्याशयः ।

वनेचराणामिति ।

**वनेचराणां बत पाण्डवानां**
**दूतं व्रजावासविवृद्धबुद्धिम् ।**
**राजाधिराजो विनयावनम्रः**
**सेवे कथं शात्रवपक्षभाजम् ॥ ९ ॥**

वनेचराणां किरातकल्पानां । एतेन मौढ्याधिक्यं सूचितम् । पाण्डवानां । एतेन तेषामरण्य एव जन्म सूचितम् । दूतं वार्ताहरं । एतेन अत्यन्ततुच्छत्वं सूचितम् । व्रजे गोकुले आवासः स्थितिः तेन विवृद्धा कन्दलिता बुद्धिः यस्य स तथोक्तः तम् । एतेन नागरिकव्यवहारानभिज्ञत्वं सूचितम् । तत्रापि शात्रवपक्षभाजं अस्मद्विपक्षपक्षावलम्बिनं कृष्णं । राजाधिराजः विजिताशेषभुवनमण्डलश्चक्रवर्ती अहं । विनयेन अवनम्रस्सन् अवनतस्सन् । कथं सेवे ? बतेति खेदे । सर्वथा तत्सेवानुचितेत्याशयः । काव्यलिङ्गालङ्कारः ।

मदिति ।

**मद्गौरवं साधु विचार्य चित्ते**
**ततो भवान्वक्तुमिहार्हतीति ।**
**निवेदयाम्यद्य न वच्मि रोषा-**
**त्स्वयं समेष्यत्यचिरात्सभां सः ॥ १० ॥**

चित्ते मनसि मद्गौरवं मम सर्वश्रेष्ठत्वं साधु सम्यक् विचार्य विमृश्य । ततः विमर्शनानन्तरं भवान् विमर्शनविचक्षणस्त्वं । इह अस्मिन्विषये वक्तुं अर्हति योग्यो भवति । एतेन भवदुक्तमविचाररमणीयमिति भावस्सूचितः । इति एवंप्रकारेण निवेदयामि । अद्य

रोषात् न वच्मि न भणामि । सः गोपालकः स्वयं मयानाहूत एव स्वयं अचिरात् क्षिप्रमेव सभां इमां संसदं समेष्यति आगमिष्यति । अस्मिन्विषये चिन्ता न कार्येत्याशयः ।

इतीति ।

**इति प्रगल्भं समुदीर्य तस्मि-**
**न्पीठे निषण्णे सहसा स कर्णः ।**
**उत्थाय रोषामितताम्रनेत्रो**
**निवेदयामास कुरूद्वहाय ॥ ११ ॥**

इति पूर्वोक्तप्रकारेण । प्रगल्भं यथा तथा सधाष्टर्यं यथा तथा । समुदीर्य अभिधाय तस्मिन् दुर्योधने पीठे निजासने निषण्णे सति उपविष्टे सति । सहसा तत्क्षणमेव कर्णः उत्थाय रोषेण क्रोधातिशयेन अमितताम्रनेत्रस्सन् अत्यन्तरक्तलोचनस्सन् । कुरूद्वहाय धृतराष्ट्राय निवेदयामास वक्ष्यमाणप्रकारेणोक्तवान् ।

उक्तिप्रकारमाह । भवन्निति ।

**भवन्निदेशेन वयं विभूत्या**
**पुरीं तमभ्येत्य यदल्पवृ[illegible] ।**
**प्रावेशयामेति तदेव चित्तं**
**अद्यापि मे क्लेशयति स्मृतं तु ॥ १२ ॥**

भवन्निदेशेन भवदाज्ञया । वयं सार्वभौमा वयं । अल्पवृत्तिं करीषादिविक्रयणेन प्रवर्तितजीविकं तं गोपालकं । अभ्येत्य प्रत्युद्गम्य पुरीं अस्माकं राजधानीं । विभूत्या सह वैभवेन सह प्रावेशयामेति यत् । तदेव स्मृतं तु सत् स्मृतिमात्रेणेत्यर्थः । मे चित्तं अद्यापि क्लेशयति दुःखितं करोति ।

एषेति ।

**एषा सपर्या बत दूतकस्य**
**क्वापि त्वया किं भुवि दृष्टपूर्वा ।**
**एतादृशं वैभवमेष दिष्टचा**
**ददर्श साक्षात्स्वपनाधिगम्यम् ॥ १३ ॥**

दूतकस्य अत्यल्पदूतस्य अनादरणीयस्येति यावत्। एषा इदानीं प्रवर्तिता सपर्या पूजाविशेषः। त्वया वृद्धेन भवता क्वापि यत्र कुत्रापि भुवि इह लोके दृष्टपूर्वा किं पूर्वमवलोकिता किमित्यर्थः। न क्वापि प्रचलिता तादृशी सपर्येति यावत्। बतेत्याश्चर्ये। एषः गोपालकः एतादृशं अनिर्वचनीयं स्वपनाधिगम्यं स्वप्नैकदर्शनीयं वैभवं सम्पत्समृद्धिं दिष्ट्या अदृष्टवशात् साक्षात् चक्षुर्भ्यामित्यर्थः। ददर्श दृष्टवान्। स्वप्नेऽपि दुर्लभं वैभवं सुकृतविशेषात्साक्षाद्ददर्शेत्याशयः।

शूद्रेति।

**शूद्रान्नभोजी किमु स प्रतीक्ष्यः**
**नावेक्षणीयं वदनन्तु तस्य।**
**एवं स्थिते सर्वनृपाश्रितोऽय-**
**मानेष्यति स्वं कथमालयं तम् ॥ १४ ॥**

शूद्रान्नभोजी विदुरेणार्पितस्यान्नस्य भोक्ता सः ग्रामवासी गोपालकः प्रतीक्ष्यः किमु पूज्यः किमु। नैव पूज्य इत्यर्थः। किञ्च तस्य शूद्रान्नभोक्तुः वदनं तु मुखमेव नावेक्षणीयं नावलोकनीयम्। एवं स्थिते सर्वनृपाश्रितः सकलनृपालमौलिमालालालितचरणकमलः अयं चक्रवर्ती दुर्योधनः। तं तादृशतुच्छवृत्तिं गोपालकं। स्वमालयं आत्मनः गृहं। कथं केन प्रकारेण आनेष्यति? तदानयनमेवानुचितमित्याशयः।

स इति।

**स चक्रपाणिः पतगेशवाहो**
**दशावतारो यदुराडितीमाम्।**
**श्रुत्वा मुनिभ्यस्तु बिभीषिकोक्तिं**
**तस्माद्बिभेत्यद्य भवान्मुधैव ॥ १५ ॥**

सः जगत्प्रसिद्धः यदुराट् यादवकुलसम्भूतः कृष्णः। एतेन तस्य राज्याधिकारविरहितत्वं सूचितम्। चक्रं पाणौ यस्य स तथोक्तः। एतेन अप्रतिहतदिव्यायुधत्वं सूचितम्। पतगेशवाहः गरुडवाहनः। एतेन अप्रतिहतवेगगामित्वमभिहितम्। दशावतारः मत्स्यकूर्मादिदशदिव्यावतारः। एतेन भक्तत्राणदुष्टदमनसामर्थ्यं सूचितं। इति एवं रीत्या इमां बिभीषिकोक्तिं भयोत्पादकवचोभङ्गीं। मुनिभ्यः लोकतंत्रानभिज्ञेभ्यः वनवासिभ्यः वेदाध्ययनमात्रजडेभ्यः केवलमननशीलेभ्यः सकाशात् श्रुत्वा। भवांस्तु। तुस्त्ववधारणे। भवानेक एव नान्य इत्यर्थः। तस्मात् कृष्णात् मुधैव भयकारणं विनैवेत्यर्थः। बिभेति। तस्माद्भयमनुपपन्नमित्याशयः।

पूर्वोक्तमेव क्रमशः दूषणमुखेन वर्णयति। बिभर्तीति।

**बिभर्ति सोयं बहुशत्रुभीतः**
**चक्रायुधं चित्रमिहास्ति किं वा।**
**पुंसात्मरक्षार्थमुपात्तकिञ्चि-**
**च्छस्त्रेण भाव्यं किल भीरुणाऽत्र ॥ १६ ॥**

सोयं पूर्वोक्तः कृष्णः। बहुशत्रुभीतस्सन् शत्रुबाहुल्याद्भयग्रस्तस्सन्नित्यर्थः। एतेन तस्य विनयनीतिविवर्जितत्वं सूचितम्। चक्रायुधं शत्रुनिवारणार्थं सुंदर्शनाभिधमायुधं बिभर्ति सर्वदा निजपाणिना धत्ते। इह अस्मिन्विषये किं वा चित्रमस्ति न किमप्याश्चर्यमित्यर्थः। सामान्योक्त्या तदेव साधयति। पुंसेति। भीरुणा शत्रुभ्यो भयग्रस्तेन पुंसा पुरुषेण न तु वीरेण। आत्मनो रक्षार्थं उपात्तकिञ्चिच्छस्त्रेण अङ्गीकृतयत्किञ्चिदायुधेन सता। अत्र अस्मिन्लोके भाव्यं किल भवितव्यं किलेत्यर्थः। किलेति प्रसिद्धौ। अर्थान्तरन्यासालङ्कारः। सर्वत्र शत्रुत्वमापन्नेन तेनात्मरक्षणार्थं धृयते चक्रायुधं। तावता किं नश्छिन्नं। एतत् जगत्प्रसिद्धमेवेत्याशयः।

पतगेशवाहत्वं दूषयति। तुरङ्गेति।

**तुरङ्गरक्षास्वसमर्थ एव**
**रिक्तैर्मुनीन्द्रैः परिसेव्यमानः।**
**सर्वत्र सर्पान्सुलभानदन्तं**
**अकल्पयद्वाहनमण्डजं सः ॥ १७ ॥**

सः गोपालकः। रिक्तैः धनाभावात् वने कन्दमूलफलाशनेनोदरपोषणं कुर्वद्भिः मुनीन्द्रैः केवलमननशीलैः। धनाभावान्निरन्तरमपि कानने चिन्तासक्तैरिति यावत्। परिसेव्यमानस्सन्। परीत्यनेन तद्बाहुल्यं सूचितम्। अत एव तुरङ्गरक्षासु अनवरतमपि भक्षणपरवाजिपरिपालनविषयेषु। असमर्थस्सन् द्रव्याभावात् कुण्ठितसामर्थ्यस्सन्। सर्वत्र समस्तदेशेष्वपि। सुलभान् द्रविणव्ययं विना सुखेन दृष्टिगोचरानित्यर्थः। सर्पान् कीटतुल्यान्बहुविधान्भुजगान्। अदन्तं अश्नन्तं अण्डजं पक्षिविशेषं गरुडं वाहनं सत् अकल्पयत्। गरुडवाहनत्वोक्त्या तस्यातितुच्छत्वमुक्तं भवति।

दशावतारत्वं दूषयति। कर्मेति।

**कर्मानुरूपं हि वयं च लोके**
**देहान्विचित्रान्बिभृमैव पूर्वम्।**

**एतावता नैव भयं च तस्मा-**
**त्साधारणस्सोपि पुमान्किलात्र ॥ १८ ॥**

लोके अस्मिन्जगति। कर्मानुरूपं प्राचीनपुण्यपापरूपकर्मानुगुणं। वयं च विचित्रान् तत्कर्मफलतया सुरनरतिर्यक्स्थावरात्मकान् देहान्। पूर्वं बिभृमैव हि धृतवन्त एव खलु। एतावता एवं नानाविधशरीरधारणमात्रेण। तस्मात् कृष्णात् भयं च नैवास्ति। अत्र अस्मिन् लोके। सोपि कृष्णोपि साधारणः पुमान्किल अस्मत्सजातीय एवेत्यर्थः। यद्वा पुरुषसाधारण्योक्त्या आत्मनो वीरत्वात् आत्मापेक्षया स तु निहीन इत्यर्थः। काव्यलिङ्गालङ्कारः।

एवं दूषयित्वा सिद्धवत्कृतं स्वाशयमाह। इच्छेति।

**इच्छा यदि स्यात्स्वयमेव सोऽय-**
**मायातु नो चेद्विदुरालयेऽस्तु।**
**वयं न गन्तास्म इति प्रजल्प्य**
**कर्णो रुषा विष्टरमाससाद ॥ १९ ॥**

सोयं पूर्वोक्तदोषभूयिष्ठः कृष्णः। इच्छा कांक्षा स्याद्यदि वर्तेत चेत्। स्वयमेव अस्माभिरनाहूत एव। आयातु आगच्छतु। नो चेत् तादृशकांक्षा न स्याद्यदि। विदुरालये शूद्रस्य विदुरस्य गृह एव। अस्तु तिष्ठतु नाम। वयं राज्यपरिपालनदक्षाः वीराः सकलमहीपालवन्दिताः वयं। न गन्तास्मः तदानयनाय नैव गमिष्यामः। इति एवं रीत्या कर्णः रुषा रोषातिशयेन प्रजल्प्य यथेच्छं व्याहृत्य। प्रजल्प्येत्यनेन विवेकराहित्यं सूचितम्। विष्टरं आसनं। आससाद भेजे। निजासने समुपाविशदित्यर्थः।

अथ कर्णकर्कशं कर्णवचनमवकर्ण्य भीत्या तन्निराकरणपूर्वकं धृतराष्ट्रः प्रत्युत्तरमाह। एतदिति।

**एतन्निशम्याथ जगाद मन्दं**
**कुरूद्वहस्साध्वसकम्पितात्मा।**
**एवं कदाप्यम्बुजपत्रनेत्रं**
**ब्रूयान्न कृष्णं निगमान्तवेद्यम् ॥ २० ॥**

अथ अनन्तरं। कुरूद्वहः धृतराष्ट्रः। एतत् कर्णेनोक्तं वचः निशम्य श्रुत्वा साध्वसेन स्वकुलनाशभीत्या कम्पितात्मा सन् चालितहृदयस्सन्। मन्दं स्वतनयभीत्या मन्दमित्युक्तं।

जगाद वक्ष्यमाणप्रकारेणोवाच । निगमान्तवेद्यं वेदान्तगोचरं अम्बुजपत्रनेत्रं पुण्डरीकाक्षं कृष्णं इदानीं यदुकुलसम्भूतं श्रीकृष्णं । कदापि एवं पूर्वोक्तरीत्या न ब्रूयात् न निन्देदित्यर्थः ।

"श्रुत्वा मुनिभ्य" इत्यनेनोक्तं दूषयति । तपोधनानामिति ।

**तपोधनानां फणितिन्तु मिथ्या**
**ब्रवीषि नैवोचितमेतदङ्ग ।**
**तपःप्रभावग्लपितात्मपापाः**
**परोक्षनेत्राः प्रवदन्त्यमुं ते ॥ २१ ॥**

तप एव धनं येषां तेषां । एतेन ऐहिकभोगलिप्सा नास्तीत्युक्तं भवति । फणितिं तु उक्तिमेव मिथ्या मृषेति ब्रवीषि । हे अङ्ग, तात कर्ण, एतत् भवद्वचनं नैवोचितं न समीचीनमेव । ते तपोधनाः । तपः प्रभावेन तपोमहिम्ना ग्लपितात्मपापाः भस्मीकृतनिजदुरितास्सन्तः । अत एव परोक्षनेत्राः ज्ञानचक्षुषस्सन्तः । अमुं श्रीकृष्णं प्रवदन्ति स्तुवन्ति । ज्ञानदृष्ट्या भगवन्तं श्रीकृष्णं सम्यगनुभूय तत्कल्याणगुणान्कथयन्तीत्याशयः । उत्तरार्धेन कर्णोक्तेरनुचितत्वं समर्थितमिति काव्यलिङ्गालङ्कारः ।

बिभर्ति सोयमित्यनेनोक्तं दूषयति । तदिति ।

**तच्चक्रमाहात्म्यममेयमत्र**
**स चेदिराजः प्रबलो हि साक्षी ।**
**दुर्दान्तदैत्योरुकठोरकण्ठ-**
**कोष्णास्रधारारसलम्पटं यत् ॥ २२ ॥**

तच्चक्रमाहात्म्यं श्रीकृष्णसुदर्शनाख्यचक्रायुधमहिमातिशयः अमेयं इयत्तया परिमातुमशक्यं वाचामगोचरमिति यावत् । अत्र अस्मिन्विषये । सः जगद्विख्यातः प्रबलः युष्मदपेक्षया बलाढ्य इत्यर्थः । चेदिराजः शिशुपालः साक्षी हि तन्महिमातिशयं साक्षादनुभूतवान्खलु । हीति प्रसिद्धौ । यत् चक्रायुधं दुर्दान्ताः दुर्दमनाः ये दैत्याः तेषां उरुकठोराः अत्यन्तकठिनाः ये कण्ठाः तेषां कोष्णास्रधारायाः कवोष्णरुधिरच्छटायाः रसे आस्वादने इति यावत् । लम्पटं अत्यन्तस्पृहाविशिष्टं । दुर्दान्तदैत्यदमनशीलं चेदिराजकण्ठच्छेदकं चेत्याशयः ।

"तुरङ्गरक्षास्वसमर्थं" इत्यनेनोक्तं निराकरोति । त्रयीति ।

त्रय्यात्मकं तं गरुडं सधैर्यं
को वाऽधिरोढुं चतुरोऽतिवेगम् ।
क्षुत्पीडितो यस्सरसि प्रमग्नौ
सम्भक्षयामास पुरेभकूर्मौ ॥ २३ ॥

त्रय्यात्मकं वेदस्वरूपं । अतिवेगं अप्रतिहतापरिमितजवातिशयं तं जगत्प्रसिद्धं । यद्वा कृष्णमात्रासाधारणं गरुडं । को वा कृष्णं विना अन्यः कोवेत्यर्थः । सधैर्यं यथा तथा अधिरोढुं चतुरः समर्थो भवेत् । अधिरोढुमेव सामर्थ्यं नास्ति । किमुत तत्प्रचारणे इत्याशयः । यः गरुडः पुरा क्षुत्पीडितस्सन् क्षुद्बाधासहिष्णुस्सन्नित्यर्थः । सरसि अपारे सरोवरे प्रमग्नौ प्रकर्षेण मग्नौ इभकूर्मौ गजकमठौ भक्षयामास । पर्वताकारौ गजकमठौ निजबलेन गृहीत्वा भक्षितवानितीयं कथा महाभारतस्थानुसन्धेया ।

कर्मानुरूपमित्यनेनोक्तं निराकरोति । निषूदनायेति ।

निषूदनायैव दुरात्मकानां
संरक्षणायाथ महात्मनाञ्च ।
अजायमानो बहुधा मुकुन्दो
विजायते तस्य न कर्मबन्धः ॥ २४ ॥

दुरात्मकानां कंसप्रभृतीनां दुष्टानां निषूदनायैव हननायैव । अथ दुष्टनिग्रहानन्तरं महात्मनां सत्पुरुषाणां शिष्टानामिति यावत् । संरक्षणाय च तदभीष्टदानेन परिपालनार्थं च । अवाप्तसमस्तकामस्य न किमपि प्रयोजनान्तरमिति यावत् । मुकुन्दः ऐहिकामुष्मिकफलदाता श्रीकृष्णः । अजायमानोपि अस्पृष्टजन्मगन्धोपीत्यर्थः । बहुधा नानाप्रकारेण विजायते स्वेच्छया इह लोके लब्धशरीरो भवति । तस्य श्रीकृष्णस्य न कर्मबन्धः अस्माकमिव कर्मकृतशरीरबन्धो नास्ति ।

पूर्वोक्तमेव दृढीकुर्वन्नष्टभिश्श्लोकैस्तस्य दशावतारान्वर्णयति । आम्नायेति ।

आम्नायरक्षार्थमयं पुराभू-
ज्जगत्यशेषे सलिलैकपूर्णे ।
लक्ष्मीचलन्नेत्रसमानकायो
मत्स्योऽतिकल्लोलविलोलवालः ॥ २५ ॥

अयं अद्यात्रागतश्श्रीकृष्णः। पुरा अशेषे जगति समस्तेपि प्रपञ्चे सलिलैकपूर्णे सति जलमये सति। एतेन महाप्रलय उक्तः। आम्नायरक्षार्थं प्रणष्टवेदसमुद्धरणार्थं। लक्ष्म्याः यच्चलत् तरलायमानं नेत्रं तेन समानः सदृशः कायः देहः यस्य स तथोक्तः। एतेन लावण्यपूर्णत्वं चाकचक्यं दर्शनीयत्वं च द्योत्यन्ते। किञ्च लक्ष्मीसम्बन्धाविनाभावस्सूचितः। अतिकल्लोलेषु महावीचिषु विलोलवालः चलाचलपुच्छः मत्स्योभूत्।

कठोरेति।

**कठोरपृष्ठः कमठोऽथ भूत्वा**
**सुरासुरभ्रामितमुच्चशृङ्गम्।**
**कल्लोलमालापरिघट्ट्यमान**
**मुवाह शैलं किल मन्दरं सः ॥ २६ ॥**

अथ अनन्तरं। सः श्रीकृष्णः कठोरपृष्ठस्सन् कुलाचलोद्वहनसमर्थकठिनचरमाङ्गस्सन् कमठः कूर्मः भूत्वा। सुरासुरभ्रामितं अमृतार्थं सुरैः देवैः असुरैश्च दानवैश्च भ्रामितं मथनाय चालितं। उच्चशृङ्गं समुच्छ्रितशिखरं कल्लोलमालाभिः मथनावसरसमुज्जृम्भमाणात्युन्नतमहोर्मिपरम्पराभिः परितः घट्ट्यमानं आस्फाल्यमानं। मन्दरं मन्दराख्यं शैलं पर्वतं उवाह किल निजपृष्ठेनोढवान्किल। किलेति प्रसिद्धौ।

अगाधेति।

**अगाधपाथोनिधिमज्जितं त-**
**द्भूगोलमत्यद्भुतपोत्रिकायः।**
**अत्युद्भटस्फूर्जथुघुर्घुरोऽयं**
**बभार दंष्ट्राकुटिलाग्रतश्च ॥ २७ ॥**

अयं श्रीकृष्णः। अत्यद्भुतपोत्रिकायस्सन् अत्यन्ताश्चर्यकरवराहशरीरस्सन्। अत्युद्भटः अत्यन्तभयङ्कर इत्यर्थः यः स्फूर्जथुः वज्रनिर्घोषः स इव घुर्घुरः घुर्घुर इति शब्दविशेषः यस्य स तथोक्तस्सन्। अगाधः गम्भीरः यः पाथोनिधिः समुद्रः तस्मिन् मज्जितं हिरण्याक्षेण विक्षिप्तं। अन्तर्नीतमिति यावत्। तद्भूगोलं भूमण्डलं दंष्ट्राकुटिलाग्रतः अर्धचन्द्राकारदंष्ट्राग्रभागेन बभार च।

प्रह्लादेति।

**प्रह्लादरक्षाविवशस्त्वरार्तः**
**स स्तम्भडिम्भो नरसिंहरूपः।**

विपक्षवक्षः परितक्ष्य रूक्षैः
नखैररक्षत्क्षितिमुज्ज्वलाक्षः ॥ २८ ॥

प्रह्लादस्य भक्तस्य प्रह्लादाख्यस्य बालस्य रक्षाविवशः पालनैकपरवशः। एतेन स्वोत्पत्तिस्थानविवेचनानवकाशस्सूचितः। अत एव त्वरया आर्तः पीडितः। एतेन परदुःखदुःखित्वरूपदया सूचिता। सः श्रीकृष्णः नरसिंहरूपः। एतेन चतुर्मुखप्रदत्तवरसाफल्यं सूचितम्। स्तम्भडिम्भस्सन् स्तम्भादाविर्भूतस्सन्। एतेन भक्तपराधीनत्वं सूचितम्। रूक्षैः तीक्ष्णैः कठिनैश्च नखैः विपक्षस्य शत्रोः हिरण्यकशिपोः वक्षः उरस्स्थलं परितक्ष्य विदार्येत्यर्थः। उज्ज्वलाक्षस्सन् देदीप्यमाननयनस्सन्। एतेन अत्यमर्षस्सूचितः। क्षितिं भूमण्डलं। अरक्षत् पालयामास।

वामेति।

वामाननो हन्त स वामनोऽथ
पादत्रयाक्रान्तजगत्त्रयश्च।
बलिं बलाढ्यं समनीनयत्तं
पातालमातालसमुच्छ्रिताङ्गः ॥ २९ ॥

सः श्रीकृष्णः। वामाननः स्पृहणीयमुखकमलस्सन् वामनः। अथ अनन्तरम्। हन्तेत्याश्चर्ये। आतालसमुच्छ्रिताङ्गस्सन् आसमन्तात् तालवृक्षवत् समुन्नतशरीरस्सन्नित्यर्थः। पादत्रयेण आक्रान्तं स्वायत्तीकृतं जगत्त्रयं येन स तथोक्तस्सन्। बलाढ्यं प्रबलबलशालिनं तं इन्द्रशत्रुं बलिं बलिचक्रवर्तिनं। पातालं पाताललोकं अनीनयत् प्रापयामास। अस्मिन्नवतारद्वयमभिहितम्।

त्रिस्सप्तेति।

त्रिस्सप्तकृत्वस्स कुठारपाणिः
क्षीबक्षितीशक्षपणैकदक्षः।
बभौ पुरा तत्क्षतजप्रदत्त-
पितृक्रियः काश्यपसात्कृतेलः ॥ ३० ॥

सः श्रीकृष्णः। पुरा कुठारपाणिः। एतेन परशुरामावतार उक्तः। त्रिस्सप्तकृत्वः एकविंशतिवारं। क्षीबाः दृप्ताः ये क्षितीशाः क्षत्रियाः तेषां क्षपणे निबर्हणे एकदक्षः अत्यन्तसमर्थस्सन्। अद्वितीय इति यावत्। तत्क्षतजैः तेषां रुधिरैः प्रदत्ता वितीर्णा पितृक्रिया निवापाञ्जलिः येन स तथोक्तस्सन्। काश्यपसात्कृतेलस्सन् काश्यपाय प्रदत्तस्वाधीनसमस्तभूमण्डलस्सन्। बभौ चकाशे।

वनइति ।

**वने चरंस्तातमतेन सीता-**
**वियोगतो दाशरथिः प्रदूनः ।**
**उल्लङ्घिताब्धिर्दशकन्धरन्तं**
**हत्वाभिषिक्तः पुरि सीतयाभूत् ॥ ३१ ॥**

दाशरथिः अयमेव दशरथात्मजः रामस्सन्। तातमतेन पितुरभिप्रायेण। वने दण्डकारण्ये चरन्सन् सीतावियोगतः रावणापहृतत्वात् स्वधर्मपत्न्याः सीतायाः विरहात्। प्रदूनस्सन् अत्यन्तदुःखितस्सन् उल्लङ्घिताब्धिः सेतुबन्धनेन अतिक्रान्तसमुद्रस्सन्। तं लोककण्टकत्वेन प्रसिद्धं दशकन्धरं रावणं। हत्वा सीतया सह पुरि अयोध्यायां अभिषिक्तस्सन् पट्टाभिषिक्तस्सन्। अभूत्।

स इति ।

**स एव जातो वसुदेवसूनुः**
**श्रीरुक्मिणीप्रीतिविवर्धनो यः ।**
**कृष्णोऽद्य दिष्ट्या समुपागतोऽस्म-**
**त्सौधं स्वयं सन्धिचिकीर्षयाङ्ग ॥ ३२ ॥**

हे अङ्ग, तात कर्ण, स एव पूर्वाभिहितावतारभाग्भगवानेव वसुदेवसूनुस्सन् जातः वसुदेवस्य तपःफलतया पुत्रत्वेन जात इत्यर्थः। यः वसुदेवसूनुः रुक्मिण्याः लक्ष्म्यभिन्नरुक्मिण्याः प्रीतिविवर्धनः। एतेन नित्यानपायित्वं सूचितम्। तादृशः श्रीकृष्णः अद्य इदानीं दिष्ट्या अस्मद्भाग्यवशात्। सन्धिचिकीर्षया परस्परसौहार्दरूपसन्धिं कर्तुमिच्छया अस्मत्सौधं अस्माकं प्रासादं स्वयं प्रार्थनयाप्यसुलभः साक्षादप्रार्थित एव स्वयं समुपागतः। श्रियःपतिरजायमानोपि दुष्टदमनायैव लब्धजन्मा योगिनामप्यगोचरः पाण्डवप्राणतया सन्धिनिमित्तेन स्वयमेवास्मद्गृहमागत इति यावत्। तदस्मद्भाग्यविशेष एवेत्याशयः।

पूर्वोक्तकारणेन तावदिदानीमवश्यकर्तव्यमाह। तदिति।

**तदद्य यूयं तु मदाज्ञया द्रा-**
**गभ्येत्य गेहं विदुरस्य नम्राः ।**
**सभां सुधर्मासदृशीमिमां तं**
**रमाप्रियं प्रापयतादरेण ॥ ३३ ॥**

तत् तस्मात्कारणात्। अद्य तु अधुनैव यूयं भवन्तः। मदाज्ञया श्रीकृष्णमहिमातिशयज्ञस्य मम निदेशेन। विदुरस्य श्रीकृष्णभक्तस्य विदुरस्य गेहं द्राक् क्षिप्रमेव अभ्येत्य आभिमुख्येन गत्वा नम्रास्सन्तः तत्रापि त्यक्तौद्धत्यास्सन्तः। सुधर्मासदृशीं देवसभासमानां अत्यन्त-वैभवयुक्तामित्यर्थः। इमां अस्मदीयां सभां तं जगत्पूज्यं रमाप्रियं श्रियःपतिं श्रीकृष्णं आदरेण प्रीत्यतिशयेन प्रापयत आनयतेत्यर्थः।

प्रविश्येति !

**प्रविश्य पौरप्रमुखास्सभायां**
**स्थाने निषीदन्तु यथाधिकारम्।**
**निवेशिताश्चित्र इव प्रसन्ना**
**नानाविधालङ्कृतिभूषिताङ्गाः ॥ ३४ ॥**

प्रसन्नाः श्रीकृष्णावलोकनसमुत्सुकाः अतएवाकलुषमनस्काः पौरप्रमुखाः पुरवासिषु गण्य-तया सभार्हा इति यावत्। प्रविश्य सभायां अस्मत्संसदि नानाविधालङ्कृतिभूषिताङ्गा-स्सन्तः स्वाधिकारवैभवानुगुणालङ्कारालङ्कृतास्सन्तः। यथाधिकारं स्वस्वाधिकारानुगुणं स्थाने नियमिते स्थले। चित्रे आलेख्ये निवेशिता इव लिखिता इव निश्चलास्सन्तः। निषीदन्तु उपविशन्तु।

प्रसूनेति।

**प्रसूनमालाढ्यरसालपत्र**
**श्रीनारिकेलाञ्चितमङ्गलास्यौ।**
**स्वर्णोदकुम्भौ परिकल्पनीयौ**
**सौधप्रतीहारपुरोद्वयान्ते ॥ ३५ ॥**

सौधस्य प्रासादस्य प्रतीहारपुरोद्वयान्ते द्वाराग्रोभयपार्श्वप्रान्तप्रदेशे प्रसूनमालाढ्यानि पुष्पस्रगलङ्कृतानि रसालपत्राणि चूतकिसलयानि तैः सङ्कलितं नारिकेलं हरिद्राचूर्णानु-लिप्तनारिकेलफलं तेन अञ्चितं अलङ्कृतं। अत एव मङ्गलं शुभकरं आस्यं वदनकुहरप्रदेशः ययोस्तौ। स्वर्णोदकुम्भौ कनकमयपूर्णकुम्भौ परिकल्पनीयौ स्थापनीयौ।

अस्मदिति।

**अस्मद्गृहद्वारपुरस्थलादा**
**क्षत्रप्रतीहारपुरस्थलान्तम्।**
**समास्तृता चित्रकुथा विधेया**
**विश्वम्भरा कृष्णपदाब्जयोग्या ॥ ३६ ॥**

अस्माकं गृहस्य प्रासादस्य यत् द्वारं बहिः प्रतीहारः तस्य पुरस्थलात् अग्रभूमिप्रदेशात् आरभ्य आ सौधप्रतीहारपुरस्थलान्तं विदुरगृहद्वारपुरप्रदेशपर्यन्तमित्यर्थः। चित्रकुथा कोमलतरचित्र कम्बलं समास्तृता सम्यग्विस्तृता सती विधेया कर्तव्या। किं बहुना विश्वम्भरा भूः ईशाः कृष्णपदाब्जयोग्या सती श्रीकृष्णपदकमलविन्यासोचिता सती विधेया कर्तव्या।

मदिति।

मद्गौरवाशु ... दीयम
महस्य निर्वनुदेशम धुना ... ।
... इति प्रचोद्य ... पन्नमौने
कुरूद्वहे कर्णमुवाच राजा ॥ ३७ ॥

हे वत्स, मत ... त्रिपात्र सुयोधन, स्वनिदेशनिर्वहणाय वत्सेति सम्बोधनं कृतम्। मद्गौरवात् मयि गुरुभाव ... दित्यर्थः। मदीयं मया कृतमिति यावत्। निदेशं आज्ञां अधुना इदानीमेव आशु क्षिप्रमे ...। एतेन कृष्णे गौरवातिशयो द्योत्यते। निर्वोढुं कर्तुं अर्हसि समर्थो भवसि। इति ... पूर्वोक्तप्रकारेण प्रचोद्य कुरूद्वहे धृतराष्ट्रे प्रतिपन्नमौने सति अङ्गीकृतमौने सति राजा प्रजार ... नशीलो दुर्योधनः। कर्णं प्रति वक्ष्यमाणप्रकारेणोवाच।

उक्ति प्रकारमाह। गुरोरिति।

गुरोरिदानीं वचनं कथञ्चि-
न्निर्वर्तयामः कृतमौनमुद्राः।
किं वा सभायां प्रचलिष्यतीति
प्रतीक्ष्य कर्तव्यप ा भवेम ॥ ३८ ॥

इदानीं सद्य ... गुरोः अस्मत्पितुः वचनं आज्ञारूपं वचनम्। एतेन अत्यवश्यकर्तव्यत्वं सूच्यते। ... कथञ्चित् अनिच्छयैवेत्यर्थः। अत एव कृतमौनमुद्रास्सन्तः अदत्तप्रतीपोत्तरास्सन्तः। ... निर्वर्तयामः। सभायां कृष्णालङ्कृतायां सभायां। किं वा कीदृशो व्यवहारः प्रचलिष्यतीति ... प्रतीक्ष्य ज्ञात्वा तदनन्तरं कर्तव्यपराः अस्मदाशयानुगुणं कर्तव्यतत्परास्सन्तः भवेम। इ ... नीं प्रतीपोत्तरदानेन अस्मदाशयकुण्ठनं भवतीति भावः।

सभ्य ... नेति।

सभ्यान्सभायामखिला न्निवेश्य
प्रवेशिते चक्रिणि कोपि नम्रः।
नैवोच्चलेत्प्राञ्जलिरित्युदीर्य
ततो व्रजामो विदुरालयं तत् ॥ ३९ ॥

सभायां अस्मत्संसदि। अखिलान् सर्वानपि सभ्यान् सभास्तारान् निवेश्य उपवेश्य। चक्रिणि श्रीकृष्णे प्रवेशिते सति प्रवेशं कारिते सति। कोपि सभ्येषु यः कश्चनोपि नम्रस्सन् अवनमितमस्तकस्सन् प्राञ्जलिस्सन् बद्धाञ्जलिपुटस्सन्। नैवोच्चलेत् नैवोत्तिष्ठेत्। इति पूर्वोक्तप्रकारेण उदीर्य आज्ञाप्य। ततः अनन्तरं तत् कृष्णावासस्थानभूतं विदुरालयं। व्रजामः गच्छामः।

यथेति।

**यथामनीषं परिकल्प्य सर्वं**
**रथाधिरूढोऽल्पपरिच्छदस्सन्।**
**सुयोधनो मानधनोपि नम्रः**
**पितृप्रणुन्नस्ससुहृत्प्रतस्थे ॥ ४० ॥**

सुयोधनः मानधनस्सन्नपि चित्तसमुन्नतिसर्वस्वस्सन्नपि। यथामनीषं स्वसङ्कल्पानुगुणं। सर्वं कर्तव्यं समस्तमपि परिकल्प्य सर्वत्र कृत्वा। पितृप्रणुन्नः धृतराष्ट्रप्रेरितस्सन् ससुहृत्सन् कर्णसमेतस्सन्। रथाधिरूढः अल्पपरिच्छदपरिमितपरिवारस्सन्। नम्रः विनयान्वितः प्रतस्थे निर्जगाम।

क्षत्तुरिति।

**क्षत्तुर्गेहं प्राप्य दुर्योधनोऽथ**
**श्रीमद्दैत्यारातिवीक्षाप्रतीक्षः।**
**चञ्चद्वासस्सन्निबद्धावलग्नः**
**तस्थौ राजा स्वस्तिकासक्तबाहुः ॥ ४१ ॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणमहाकविविरचिते**
**अद्भुतदूताख्यकाव्यरत्ने**
**एकादशस्सर्गः।**

अथ अनन्तरं। दुर्योधनः क्षत्तुः विदुरस्य गेहं प्राप्य। श्रीमद्दैत्यारातेः भक्तविदुरसपर्याङ्गीकारात् कान्तिपूर्णस्य श्रीकृष्णस्य वीक्षाप्रतीक्षस्सन् दर्शनावसरानुपालनतत्परस्सन्। चञ्चद्वाससा महाधनेन सन्निबद्धावलग्नस्सन् बद्धपरिकरस्सन्। स्वस्तिकासक्तबाहुस्सन् किङ्करत्वसूचकस्वस्तिकासक्तभुजयुगलस्सन्। तस्थौ।

इति श्रीभगवल्लक्ष्मीदासानुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
एकादशस्सर्गः।

॥ श्रीः ॥

# द्वादशस्सर्गः ।

क्षत्रेति ।

**क्षत्रा द्रागथ परिकल्पितां सपर्यां**
**स्वीकृत्य प्रमुदितमानसः प्रभाते ।**
**दिव्याल ङ्कृतिमधुराकृतिर्मुरारिः**
**प्रस्थाने नृपसभमातनोन्मतिं सः ॥ १ ॥**

अथ अनन्तरं । क्षत्रा विदुरेण द्राक् त्वरातिशयेन परिकल्पितां परितः औचित्येन भोग्यत्वेन च सर्वतो निर्मितामिति यावत् । सपर्यां पूजां आतिथ्यमिति यावत् । स्वीकृत्य भोग्यतयाङ्गीकृत्य । प्रमुदितमानसः भक्त्यादरातिशयेन समर्पितत्वात् सन्तुष्टहृदयः सः दूतः मुरारिः शत्रुदमनसमर्थः श्रीकृष्णः प्रभाते प्रातरेव दिव्यालङ्कृतिमधुराकृतिस्सन् दिव्यालङ्कारालङ्कृततया दृगासेचनकदिव्यमङ्गलविग्रहस्सन्नित्यर्थः । नृपसभं धृतराष्ट्रसभां प्रति । प्रस्थाने गमने मतिमातनोत् सङ्कल्पयामास । स्वयमपि गमनाय सज्जो बभूवेत्याशयः ।

निष्क्रमणप्रकारमाह । कृष्ण इति ।

**कृष्णोऽयं विदुरकरार्पितात्मपाणिः**
**वेश्मान्तर्निवसनतो बहिः प्रयातः ।**
**राजानन्त्वजिरगतं विलोक्य नम्रं**
**पप्रच्छ स्मितवदनस्सभाभियानम् ॥ २ ॥**

अयं पाण्डवार्थं दौत्यकरणेपि समुत्सुकः कृष्णः । विदुरस्य करे पाणितले अर्पितः विन्यस्तः आत्मपाणिः येन स तथोक्तस्सन् । वेश्मान्तर्निवसनतः गृहाभ्यन्तरगृहात् । बहिः प्रयातस्सन् बहिर्निर्गतस्सन् । अजिरगतं अङ्कणे स्थितं नम्रं विनयान्वितं राजानन्तु दुर्योधनमेव । तुकारेण प्रथमदर्शनं सूचितम् । विलोक्य स्मितवदनस्सन् मानिनो दशावलोकनेन स्मितवदन इत्युक्तम् । यद्वा स्मितपूर्वाभिभाषित्वमुक्तम् । सभाभियानं सभाभिमुखगमनं पप्रच्छ अपि नाम सभां प्रति गच्छामः इति पप्रच्छेत्यर्थः ।

श्रीकृष्णप्रस्थाने कर्णस्य कार्यमाह । कर्ण इति ।

**कर्णोपि स्मितमुखदर्शितात्मतोषः**
**प्रह्वाङ्गो हरिपुरतः करौ प्रसार्य ।**

**तस्मै तत्सरणिमभिप्रदर्शयन्स-**
**न्विस्मृत्य स्वकुटिलतां स निर्जगाम ॥ ३ ॥**

स दुर्योधनार्थं दुष्कर्मकरणैकतानः कर्णोऽपि। स्मितमुखेन दर्शितः प्रकाशितः आत्मतोषः अकपटनिजानन्दः येन स तथोक्तस्सन्। एतेन भगवद्दर्शनमात्रेण कलुषमानसानामपि नैसर्गिकानन्दोदयस्सूचितः। प्रह्वाङ्गस्सन् नम्रपूर्वकायस्सन्। हरिपुरतः श्रीकृष्णस्याग्रभागे करौ आत्मपाणिद्वयं प्रसार्य तस्मै श्रीकृष्णाय तत्सरणिं तस्य गमनयोग्यं मार्गं। अभि-प्रदर्शयन्सन् आभिमुख्येन प्रकर्षेण च दर्शयन्सन् स्वकुटिलतां परद्रोहरूपं कौटिल्यं विस्मृत्य निर्जगाम। एतेन भिद्यन्ते हृदयग्रन्थीनि तस्मिन्दृष्टे परावरे इत्यादिकं सूचितम्।

छत्र इति।

**छत्रे द्राक्शिरसि धृते सुधांशुशुभ्रे**
**पार्श्वे च प्रविशदचामराभिरामे।**
**पादूभाक्पदकमलस्समन्दहासं**
**निर्यातो विदुरगृहाद्धरिः प्रतस्थे ॥ ४ ॥**

द्राक् क्षिप्रमेव। सुधांशुशुभ्रे चन्द्रमण्डलवदतिधवले। सुधांशुसादृश्येन दर्शनीयत्वं कान्ति-पूर्णत्वं तापापहारकत्वं च सूच्यन्ते। छत्रे आतपत्रे शिरसि मकुटोर्ध्वप्रदेशे धृते सति। पार्श्वे च कृष्णस्योभयपार्श्वभागे च प्रविशदे शुभ्रतरे ये चामरे ताभ्यां अभिरामे सति मनोहरे च सति हरिः श्रीकृष्णः पादूभाक्पदकमलस्सन् पादुकालङ्कृतचरणारविन्दस्सन् समन्दहासं यथा तथा। विदुरगृहात् निर्यातः निर्गतः प्रतस्थे सभां प्रति प्रस्थितवान्।

आतोद्येति।

**आतोद्यध्वनिमुखरीकृताग्रभागः**
**पादाभ्यामिभरिपुचङ्क्रमाभिरामः।**
**वन्द्यौघस्तुतिरवकृष्टसर्वचित्तः**
**गोविन्दो नृपगृहमाससाद मन्दम् ॥ ५ ॥**

गोविन्दः श्रीकृष्णः। धर्माधर्मज्ञानशून्यानां पशुकल्पानां दुर्योधनप्रभृतीनां रक्षण-कुतूहलद्योतनार्थं गोविन्द इत्युक्तम्। आतोद्यस्य चतुर्विधवाद्यविशेषस्य ध्वनिभिः विचित्रतरनादैः मुखरीकृतः शब्दापितः अग्रभागः पुरःप्रदेशः यस्य स तथोक्तस्सन् पादाभ्यां चरणारविन्दाभ्यामेवेत्यर्थः। इभरिपुः कण्ठीरवः तस्य चङ्क्रमः गमनं चङ्क्रम इव

वक्रमो यस्य सः । अतएव अभिरामः दर्शनीयः । वन्द्यौघस्य स्तुतिपाठकसमूहस्य स्तुतिः अवदानस्तोत्रं तस्याः रवः ध्वनिः तेन कृष्टानि वशीकृतानि सर्वेषां तत्रत्यानां जनानां चित्तानि यस्य स तथोक्तस्सन् । मन्दं यथा तथा नृपगृहं धृतराष्ट्रस्य सौधम् । अत्र विदुरगृहापेक्षया दुष्टजनबाहुल्यात्तुच्छत्वद्योतनार्थं नृपगृहमित्युक्तम् । न तु प्रासादमिति । आससाद ।

अन्तःपुरवनितानां श्रीकृष्णदर्शनकुतूहलं दर्शयति । सर्वेति ।

सर्वान्तःपुरवनिता निगूढदेहाः
क्षौमाग्रप्रविततजालिकाहितास्याः ।
श्रीकृष्णप्रथितशरीरसुन्दरत्वं
द्रष्टुं प्राक्सकुतुकमन्वगुस्सभाग्रम् ॥ ६ ॥

सर्वान्तःपुरवनिताः साकल्येन कौरवावरोधवधूजनाः । निगूढदेहाः तिरस्करिणीपिहितकायास्सत्यः । क्षौमाग्रे अट्टाग्रदेशे प्रविततताः प्रकर्षेण विस्तृताः याः जालिकाः सूक्ष्मतरागवाक्षाः तासु आहितानि विनिहितानि आस्यानि मुखानि याभिस्तास्सत्यः । श्रीकृष्णस्य प्रथितं मन्मथमन्मथत्वेन प्रसिद्धं यच्छरीरसुन्दरत्वं दिव्यमङ्गलविग्रहसौन्दर्यं । द्रष्टुं प्राक् श्रीकृष्णागमनात्प्रथममेव सकुतुकं यथा तथा । सभाग्रं सभायाः ऊर्ध्वप्रदेशं अन्वगुः सादरं प्रापुः । श्रीकृष्णदर्शने परस्परसौहार्दप्रकाशनार्थमन्वित्युक्तम् ।

श्रीकृष्णप्रवेशावसरे सभ्यानां पारवश्यमाह । कृष्ण इति ।

कृष्णोऽथ प्रविशति संसदं क्षणात्ते
व्युत्तस्थुः परवशमानसाश्च सभ्याः ।
गोविन्द श्रितजनवत्सल प्रकामं
कीर्त्या त्वं ननु विजयीभवेति भक्त्या ॥ ७ ॥

अथ अन्तःपुरवनितानां सभाप्रवेशानन्तरं । कृष्णे सर्वजनमनःकर्षणसौन्दर्याभिरामे वासुदेवे संसदं सभां प्रविशति सति । क्षणात् सभादेहल्यभ्यन्तरे श्रीकृष्णचरणारविन्दन्यासानुपदमेव । ते न केनाप्युत्थातव्यमिति दुर्योधनादिष्टाः सभ्याः सभास्तारः । परवशमानसास्सन्तः स्वानायत्तान्तःकरणास्सन्तः । श्रितजनवत्सल शरणागतानां दोषमखिलमपि भोग्यत्वेन मन्वान । एतेन जीविकार्थं पराधीनानामस्माकं दोषान्नगणयसीति व्यज्यते । ननु गोविन्द, अश्रितरक्षक श्रीकृष्ण । गोविन्देति सम्बोधनेन पाञ्चालीकल्पानामस्माकमपि रक्षणं भवदायत्तमिति सूच्यते । प्रकामं त्वं कीर्त्या भवदागमनप्रयोजनजनकेन यशसा

सह विजयीभव । इति एवं प्रकारेण भक्त्या प्रीत्यतिशयेन । उक्त्वेति शेषः । चकारेण उक्तिस्समुच्चीयते । न केवलं व्युत्तस्थुः विजयीभवेत्यप्यूचुरित्याशयः ।

अथैकादशभिश्श्लोकैस्सभामेव वर्णयति । येत्यादिना ।

**या मुक्ताफलपृथुवल्लरीसुफेना**
**सान्द्राच्छप्रचलवितानवीचिमाला ।**
**सभ्यानां कलकलताररावधीरा**
**वेलेव प्रलसति दुग्धवारिराशेः ॥ ८ ॥**

या सभा । मुक्ताफलानां पृथुवल्लर्यः स्थूलकलापविशेषाः एव सुफेनाः स्पृहणीयाब्धिकफाः यस्यां सा सती । सान्द्राणि निबिडानि अच्छानि धवलानि प्रचलन्ति विलोलानि च यानि वितानानि उल्लोचाः तान्येव वीचिमालाः तरङ्गपरम्पराः यस्यां सा सती । सभ्यानां सभासदां कलकलताररावधीरा कलकलेत्युच्चध्वानगभीरा सती । दुग्धवारिराशेः क्षीरसमुद्रस्य वेलेव तीरप्रदेश इव । प्रसलति प्रकाशते । रूपकसङ्कीर्णोपमालङ्कारः ।

स्तम्भेति ।

**स्तम्भाग्रप्रसृमरजिह्मवीरुदाभैः**
**धावल्यप्रहसितशुभ्रमेघभङ्गैः ।**
**धूपानां क्रमपरिवर्धमानपिण्डैः**
**या धूमैः परिमलबन्धुरैर्विभाति ॥ ९ ॥**

या सभा । स्तम्भानां अग्रेषु पुरोभागेषु प्रसृमराः प्रसरणशीलाः जिह्माश्च वक्राश्च या वीरुधः लताः तदाभैः तत्सदृशैः । उपज्ञतरुप्ररोपितलताकुटिलैरित्यर्थः । धावल्येन प्रहसिताः विडम्बिताः शुभ्रमेघभङ्गाः शरत्कालिकधवलघनशकलविशेषाः यैस्ते तैः । क्रमेण परिवर्धमानाः विजृम्भमाणाः पिण्डाः येषां ते तैः । उद्गमस्थाने सरलतया प्रसरणशीलाः क्रमेण पिण्डाकारेण गगने विजृम्भमाणा इत्यर्थः । परिमलबन्धुरैः जनमनोहरगन्धव्याप्तैः । धूपानां धूमैः । विभाति प्रकाशते । स्वभावोक्तिः ।

यैति ।

**या कैश्चित्स्फटिकमयैस्सपत्रभङ्गैः**
**कैश्चिच्च स्फुरदुरुरत्नपुत्रिकाढ्यैः ।**
**सौवर्णैरपि कतिचिद्विचित्रचित्रैः**
**स्तम्भैरालसति समुच्छ्रितैर्मनोज्ञा ॥ १० ॥**

था सभा । कैश्चित् सपत्रभङ्गैः समुत्कीर्णनानाविधस्पृहणीयकुसुमितलताप्रतानसहितैः । स्फटिकमयैः स्फटिकैरेव विरचितैरित्यर्थः । कैश्चिच्च स्फुरन्त्यः स्फुटतया प्रकाशमानाः याः उरुरत्नपुत्रिकाः रत्नप्रचुरसमुत्कीर्णपाञ्चालिकाः ताभिः आढ्यैः दन्तुरैरित्यर्थः । क्वतिचित् विचित्रचित्रैः बहुविधाश्चर्यकरसमुत्कीर्णचित्रविशेषविशिष्टैः सौवर्णैरपि कनकविरचितैरित्यर्थः । अपिस्समुच्चये । समुच्छ्रितैः अत्युन्नतैः स्तम्भैः मनोज्ञा दर्शनीया सती । आलसति आसमन्तात्प्रकाशते । उदात्तालङ्कारः ।

आलोलेति ।

**आलोलभ्रमरकरम्बितोरु[illegible]रावैः**
**सौरभ्यव्यतिकरितोल्ल[illegible]सद्दुकूलैः ।**
**माल्यैरप्यतिकुटिलैर्वितानभाग्भिः**
**नक्षत्रैरिव निचिता च नभ[illegible]श्रीः ॥ ११ ॥**

था सभा । आलोलाः उड्डयनशीलाः ये भ्रमराः चञ्चरीकाः तेषां करम्बिताः व्याप्ताः उरुरावाः उल्बणतरझङ्काराः येषां तानि तैः । सौरभ्येण परिमलेन व्यतिकरितानि सम्बद्धानि उल्लसन्ति ऊर्ध्वतटे प्रकाशमानानि वितानाधस्स्थले कलापतया लम्बितानीति यावत् । दुकूलानि येषां तानि तैः । अतिकुटिलैः वन्दनमालावन्निबद्धतया तरङ्गकल्पैरित्यर्थः । वितानभाग्भिः उल्लोचाधस्स्थलनिबद्धैः । माल्यैः विविधविचित्रप्रसूनमालाभिः निचिता सती व्याप्ता सती । नक्षत्रैः निचिता नभश्श्रीरिव गगनाभोग इव । आलसतीति शेषः । उपमालङ्कारः ।

आलेख्येति ।

**आलेख्यप्रकटनृपापदानवृत्ताः**
**काश्चिद्राट्प्रतिकृतिमञ्जुलाश्च यस्याः ।**
**काश्चिच्च स्फुटबहुवन्यजन्तुचेष्टाः**
**राजन्ते मुकुरनिभास्सुभित्तयोऽपि ॥ १२ ॥**

यस्याः सभायाः । सुभित्तयोपि सुरुचिरकुड्यान्यपि । काश्चित् आलेख्ये चित्रे । यद्वा चित्ररूपेणेत्यर्थः । प्रकटानि प्रस्फुटानि नृपाणां पुराणमहीपतीनां । यद्वा धृतराष्ट्रप्रभृतीनां अपदानवृत्तानि पूर्वचरित्राणि यासु ताः । राज्ञां प्रतिकृतिभिः प्रतिमाविशेषैः मञ्जुलाः दर्शनीया इत्यर्थः । काश्चिच्च स्फुटाः सुविशदं प्रकाशिताः इत्यर्थः । बहुवन्यजन्तुचेष्टाः नानाविधवनजन्तुचेष्टाविशेषाः यासु ताः सत्यः । अत एव मुकुरनिभाः आदर्शसङ्काशाः राजन्ते । एतेन भित्तीनां नैर्मल्यस्वैग्ध्ये सूचिते ।

उत्कीर्णेति ।

उत्कीर्णस्फुटतरपत्रभङ्गभङ्गैः
सौवर्णैरजतमयैश्च चान्दनैश्च ।
दान्तैरप्यमितकलैश्च दर्पणाढ्यैः
द्वारैर्या हरति मनांसि मानवानाम् ॥ १३ ॥

या सभा । उत्कीर्णाः आयुधविशेषसमुट्टङ्किताः । स्फुटतराः निम्नोन्नततया स्पष्टं प्रकाशमानाः ये पत्रभङ्गाः लताकुसुमवल्लरीप्रमुखचित्रविशेषाः तेषां भङ्गाः तरङ्गाः येषु तानि तैः । कैश्चित्सौवर्णैः कनकमयैः । कैश्चिद्रजतमयैः । कैश्चिच्चान्दनैश्च चन्दनमयैः । कैश्चिद्दान्तैः दन्तमयैः । कैश्चिद्दर्पणाढ्यैः । प्रत्युतविचित्रतरप्रकाशमानमुकुरशकलैरित्यर्थः । अमितकलैः विचित्रदर्शनीयकलाविशिष्टैः द्वारैः । मानवानामित्यनेन मनुष्यसामान्यमुक्तं भवति । एतेन पण्डितानां पामराणां चेत्यर्थो लभ्यते । मनांसि हरति परवशीकरोति । उदात्तालङ्कारः ।

शार्दूलेति ।

शार्दूलद्विपमृगखड्गसिह्मवक्त्रैः
भित्युच्चस्थलघटितैश्च निर्विकारैः ।
वन्यैर्या मुररिपुदर्शनाय सत्वैः
नृभ्यो भीप्रसृतगलैरिवास्त्युपेता ॥ १४ ॥

या सभा । भित्तीनां उच्चस्थले ऊर्ध्वप्रदेशे घटितैः शङ्कुकीलितैः । निर्विकारैश्च तत्तद्वर्णानुविद्धदारुमयतया विकारविरहितैः । शार्दूलगजकुरङ्गखड्गसिह्मप्रभृतीनां वक्त्रैः मुखैः । मुररिपुदर्शनाय श्रीकृष्णावलोकनाय । नृभ्यः सभागतमनुष्येभ्यः भिया भयेन । प्रसृतगलैः बहिर्निस्सारितकण्ठमात्रैः । वन्यैस्सत्वैः वनजन्तुभिः । उपेतेवेत्युत्प्रेक्षा । अस्ति । धनिधिष्ण्येषु तत्तद्वर्णशबलितानां मृण्मयानामथवा दारुमयानां वनसत्वानां मुखानि भित्युपरि शङ्कुकीलितानि निक्षिपन्त्यलङ्कारार्थं । तद्वदित्याशयः ।

स्तम्भेति ।

स्तम्भाग्रस्थितपृथुपुत्रिकाकरान्त-
र्विन्यस्तोद्गलितपटीरनीरपात्रा ।
या नासानयनमनांसि साधु नृणा-
माकर्षत्यनुगतदेवतेव कान्ता ॥ १५ ॥

या सभा। स्तम्भानां अग्रे शिखरभागे स्थिताः स्थापिता इति यावत्। याः पृथुपुत्रिकाः बृहत्तरपाञ्चालिकाः तासां करान्तः पाणिपुटे निन्यस्तानि विनिहितानि उद्गलितानि आवर्जिततया धारारूपेण ऊर्ध्वमुखं पातितानि पटीरनीराणि चन्दनजलानि येभ्यस्तानि च तानि पात्राणि च कलशाकारभाजनानि यस्यां सा। अत एव अनुगतदेवतेव अनुगताः भगवन्तमनुसृत्यागताः देवताः यस्यां सा इवेत्युत्प्रेक्षा। अत एव कान्ता मनोहरा। नृणां द्रष्टॄणां नासानयनमनांसि। साधु कर्षति परवशीकरोतीत्यर्थः। पटीररसपरिमलेन नासाकर्षणं पुत्रिकासौन्दर्यातिशयेन नयनाकर्षणं इन्द्रियद्वयद्वारा मनसोप्याकर्षणमुक्तम्। उदात्तालङ्कारः।

कापोतमिति।

**कापोतं वलभितटार्पितं च यस्यां**
**वर्णाढ्यं कृतकमपि प्रलोभितास्तत्।**
**पार्श्वाग्रभ्रमणविकूजितैः कपोताः**
**उत्कण्ठास्समनुसरन्ति लम्बबर्हाः ॥ १६ ॥**

यस्यां सभायां। कपोताः पारावताः। वलभितटार्पितं गोपानसीतटप्रदेशे स्थापितं वर्णाढ्यं कपोतवर्णसदृशधूम्रवर्णादिग्धं कृतकमपि मृण्मयमपीत्यर्थः। तत् कापोतं कपोतसमूहं प्रलोभितास्सन्तः सजीवकपोतभ्रान्त्या वञ्चितास्सन्तः। अत एव पार्श्वाग्रभ्रमणविकूजितैः उभयपार्श्वे पुरोभागे च भ्रमणेन परितः सञ्चरणेन विकूजितैः प्रेमप्रदर्शनपरध्वनिविशेषैश्च उत्कण्ठास्सन्तः उन्नमितस्निग्धतरग्रीवास्सन्तः। लम्बबर्हास्सन्तः नामिततया क्षितितलविस्तृतलम्बमानपिञ्छास्सन्तः। समनुसरन्ति सम्यगनुसृत्य गच्छन्ति। एतेन शिल्पकौशलं प्रदर्शितम्। स्वभावोक्तिः।

उल्लोचेति।

**उल्लोचप्रघटितहेमचारणानां**
**हस्ताब्जद्वयपरिवर्जितैः करण्डैः।**
**पुष्पौघैः परिमलिभिः प्रकीर्यमाणैः**
**या शुभ्रैरभिहसतीव कृष्णलक्ष्म्या ॥ १७ ॥**

या सभा। उल्लोचे वितानतटभागे प्रघटिताः प्रकर्षेण निबद्धाः। प्रेत्युपसर्गेण स्तोकावनतत्वं सूच्यते। ये हेमचारणाः कनकमयदेवविशेषाः तेषां हस्ताब्जद्वयेन कमलसदृशकरयुगलेन परिवर्जितैः आवर्जितैरित्यर्थः। करण्डैः पुष्पभाजनविशेषैः कर्तृभिः। प्रकीर्यमाणैः परितः

प्रकर्षेण कीर्यमाणैः । परिमलिभिः विमर्दप्रसृमरगन्धविशिष्टैः । शुभ्रैः केवलधवलवर्णैः पुष्पौघैः कुसुमसमूहैः । एतेन अशुम्भितत्वं सूचितम् । कृष्णलब्ध्या श्रीकृष्णप्राप्त्या अभिहसतीव अभितः यद्वा आभिमुख्येन हसतीव । सन्तोषातिशयपिशुनं हासं करोतीवेत्युत्प्रेक्षा । निश्शब्दहासोक्त्या सभायाः वरवर्णिन्या इवोत्तमत्वं सूचितम् ।

जालान्तरिति ।

जालतम [illegible] णिफलकसक्त [illegible] सूर्य-
प्रत्य [illegible] र्चिः प्रसृमरक [illegible] चापजालैः ।
मायूर [illegible] प्रविततबर्हचन्द्रका [illegible] भैः
य [illegible] ा व्याप्ता विलसति सर्ववर्णपूर्णा ॥ १८ ॥

मायूरेण मयूरगणेन प्रविततानां प्रकर्षेण विस्तृतानां बर्हाणां नानावर्णशबलितपिंछानां चन्द्रकाभैः मेचकसदृशैः । जालानां वातायनानां अन्तः मध्ये प्रत्युप्तानां मणीनां नवरत्नानां फलकेषु प्रसक्तानि प्रकर्षेण पतितानि यानि सूर्यस्य प्रत्यर्चींषि प्रतिफलकसक्तमयूखाः तेभ्यः प्रसृमराः प्रसरणशीलाः शक्रचापाः इन्द्रचापाः तेषां जालैः आनायसदृशतेजोविशेषैः इति यावत् । व्याप्ता करम्बिता । या सभा । सर्ववर्णपूर्णा सती प्रभाविशेषदर्शनीयविविधविचित्रवर्णमयी सती । विशेषेण लसति प्रकाशते । उदात्तालङ्कारः ।

एवं सभावैभवं वर्णयित्वा श्रीकृष्णस्य सभास्थापितपीठसमीपगमनमाह । कृष्ण इति ।

कृ [illegible] ष्णोथ स्व [illegible] यमपि च [illegible] क्षुषानुमोदं
सन्दर्श्य द्विपगमनस्स [illegible] मेत्य पीठम् ।
अरुं पद [illegible] कमलं सुराभिसेव्यं
[illegible] सोपाने कनकमये निधित्सति स्म ॥ १९ ॥

अथ सभाप्रवेशानन्तरम् । कृष्णः । अत्र कृष्ण इत्यनेन दुर्योधनकर्णप्रभृतीनामपि मनोनयनाकर्षणचणरूपातिशयस्सूचितः । स्वयमपि चक्षुषा नेत्रेणैव अनुमोदं विजयीभवेत्यादिसम्योक्त्यभिनन्दनमित्यर्थः । सन्दर्श्य प्रकाश्य । एतेन गाम्भीर्यं सूचितम् । द्विपगमनस्सन् गजेन्द्ररम्यगतिस्सन् । पीठं कृष्णार्थं परिकल्पितमासनम् । समेत्य उपसृत्य आरोढुं सुराभिसेव्यं सर्वजगद्वन्द्यमित्याशयः । एतेन दुर्योधनस्यास्पृश्यायास्सभाया अपि पवित्रीकृतत्वं सूचितम् । पदकमलं कोमलतरचरणारविन्दम् । कनकमये सुवर्णेनैव रचिते सोपाने । निधित्सति स्म निधातुमिच्छति स्म । न तु न्यधात् ।

तदा विदुरस्य कृष्णे भक्त्यतिशयकार्यमाह । भक्ताग्र्य इति ।

**भक्ताग्र्यस्स तु विदुरो दरातिदीर्णः**
**शत्रुभ्यो हरितनुरक्षणैकतानः ।**
**पीठं तन्मृदुतरोपधानभव्यं**
**पस्पर्श प्रथममपायशङ्कयैव ॥ २० ॥**

भक्ताग्र्यः प्रथमतया भक्तेषु परिगण्यः । सः कृष्णानुयातः विदुरस्तु । तुस्तु भेदे । एतेन तत्रत्यापेक्षया तस्य वैलक्षण्यं सूचितम् । हरेः श्रीकृष्णस्य तनुरक्षणैकतानस्सन् दिव्यमङ्गलविग्रहरक्षणैकमनस्कस्सन् । एकतानोनन्यवृत्तिरित्युक्तम् । अत एव शत्रुभ्यः पाण्डवपक्ष्यहननैकतानदुर्योधनप्रभृतिभ्यः । दरातिदीर्णस्सन् भयातिशयजर्झरितस्सन् । अपायशङ्कयैव शाठ्येन किमपि क्रूरकृत्यमन्तःकृतं भवेदित्यपायशङ्कयैव । वस्तुतो नास्त्यपायः । अतिस्नेहः पापशङ्की इति न्यायेन तादृशी शङ्का समुत्पन्नेति द्योतनार्थमेवकारः । मृदुलतरोपधानभव्यं अत्यन्तकोमलोपबर्हतया उपभोगक्षममित्यर्थः । तत् कृष्णार्थमेव दुर्योधनेन परिकल्पितं पीठं दर्शनीयमासनम् । प्रथमं कृष्णोपवेशात्प्रागेव । पस्पर्श कराभ्यां स्पर्शस्पर्शं ददर्शेत्यर्थः ।

अथ श्रीकृष्णस्य भद्रासनारोहणमाह । श्रीनाथ इति ।

**श्रीनाथो विदुरकरावलम्ब एव**
**प्राक्सर्वानपि परितो विलोक्य सभ्यान् ।**
**क्रीडाद्रिं मधुरगतिस्स केसरीव**
**प्रारोहद्रुचिरतरं सुविष्टरं तत् ॥ २१ ॥**

सः सभ्यैरवलोक्यमानः श्रीनाथः श्रियःपतिः श्रीकृष्णः । विदुरकरावलम्बस्सन्नेव विदुरकरं गृहीत्वेवेत्यर्थः । प्राक् पीठारोहणात्पूर्वम् । सर्वानपि सभ्यान् तत्रत्यानखिलानपि सभास्तारान् परितः विलोक्य । मधुरगतिस्सन् आरोहणावसरेपि दर्शनीयगमनस्सन् । रुचिरतरं विविधालङ्कारालङ्कृततया दर्शनीयं । तत् विदुरेण सम्यक्परीक्षितं । अत एव सुविष्टरं अपायराहित्येन शोभनतरं पीठम् । क्रीडाद्रिं क्रीडार्थं परिकल्पितं पर्वतम् । मधुरगतिः केसरीव सिंह इव । प्रारोहत् प्रकर्षेणारुरोह । उपमा ।

कृष्णोपवेशानन्तरं सभ्यानामुपवेशक्रममाह । तस्मिन्निति ।

**तस्मिन्द्रागुपविशति प्रसन्नवक्त्रे**
**स्वस्थानेष्वथ जनता क्रमान्निषीदत् ।**

व्रीडार्ता द्रुतपरिसङ्कुचच्छरीरा
कृष्णाग्रे क्षितिमवगाहते सभेव ॥ २२ ॥

प्रसन्नवक्त्रे सभ्यानामादरातिशयावलोकनेन प्रसन्नवदनत्वमुक्तम्। यद्वा कुटिलमतिषु दुर्योधनप्रभृतिष्वपि निजार्जवप्रकटनाय प्रसन्नवदनत्वमुक्तम्। एतेन उत्तमपुरुषत्वं सूचितम्। तस्मिन् श्रीकृष्णे द्रागुपविशति सति। अथ अनन्तरं जनता सभास्तारसमूहः स्वस्थानेषु नियमितनिजस्थानेषु। क्रमात् पङ्क्तिशः न्यषीदत् उपाविशत्। उत्प्रेक्षते। कृष्णाग्रे श्रीकृष्णस्य पुरतः। व्रीडार्ता लज्जापीडिता सभा द्रुतपरिसङ्कुचच्छरीरा सती क्षिप्रमेव परितः सङ्कुचद्गात्रा सती। क्षितिं भूतलं अवगाहत इव प्रलीना प्रविशतीवेत्युत्प्रेक्षा। एतेन सभायाः मुग्धादशा सूचिता। समासोक्तिः।

अथ सभ्यानां पीठोपविष्टश्रीकृष्णदर्शनक्रममाह। सभ्या इति।

सभ्यास्ते तदनु मुकुन्दमेनमारा-
त्सिह्मोच्चस्फुरदुरुरत्नपीठजुष्टम्।
मुक्तालिप्रचुरसितातपत्रशीर्षं
भक्त्या तं ददृशुरनल्पविस्तृताक्षाः ॥ २३ ॥

तदनु। ते उपविष्टाः सभ्याः सभास्ताराः। अनल्पविस्तृताक्षास्सन्तः आनन्दातिशयेन साकल्येन श्रीकृष्णदिव्यमङ्गलविग्रहप्रत्यवयवसौन्दर्यदर्शनस्पृहया सम्यग्विस्तृतलोचनास्सन्तः। सिह्मोच्चस्फुरदुरुरत्नपीठजुष्टं समुत्कीर्णसिह्माभ्यां उच्चस्फुरत् अत्यधिकतया प्रकाशमानं उरुरत्नं च नवरत्नविशिष्टं च यत्पीठं तज्जुष्टं तस्मिन्नुपविष्टमिति यावत्। मुक्तात्या मौक्तिकपंक्त्या प्रचुरं वलयतया व्याप्तमित्यर्थः। सितातपत्रं श्वेतच्छत्रं शीर्षे शिरस ऊर्ध्वदेशे यस्य स तथोक्तः तम्। श्रियःपतित्वेन प्रसिद्धं एनं इदानीं कृष्णरूपेणागतं मुकुन्दं ऐहिकामुष्मिकफलप्रदं श्रीकृष्णं। आरात् दूरात् भक्त्या अविच्छिन्नप्रीत्यतिशयेन ददृशुः।

तदेवोपपादयति त्रयोदशभिश्श्लोकैः। यदिति।

यच्छीर्षे लसति सितातपत्रमूर्ध्वं
कृष्णास्यद्युतिहरणेप्सयेन्दुबिम्बम्।
खे कालं स्वयमनुपालयद्वियातो
मुक्ताच्छश्रमजलबिन्दिवात्तदण्डम् ॥ २४ ॥

यच्छीर्षे यस्य श्रीकृष्णस्य शीर्षे शिरोभागे। ऊर्ध्वं उपरिभागे सितातपत्रं श्वेतच्छत्रं कृष्णस्य आस्यद्युतेः मुखेन्दुकान्तेः हरणेप्सया अपजिहीर्षया। खे आकाशे कालं अपहरणसमयं। स्वयं साक्षात्स्वयमेव। अनुपालयत् प्रतीक्षमाणं। अतः श्रीकृष्णात् भिया भीत्या मुक्ता एव अच्छश्रमजलबिन्दवः शुभ्रस्वेदबिन्दवः यस्मिंस्तत्तथोक्तम्। अत एव आत्तदण्डं गृहीतदण्डं। इन्दुबिम्बमिव चन्द्रमण्डलमिव। लसति प्रकाशते। पश्यतोहरः यथा भिया स्वेदबिन्दुनिचिताङ्गः गृहीतदण्डश्च समयमनुपालयति। तद्वदित्याशयः। समासोक्तिरीत्या चोरवृत्तान्तस्सूचितः। उपमालङ्कारः। प्रतीपालङ्कारो व्यज्यते।

यदिति।

यद्वक्त्रं मणिमकुटाञ्चितं ललाट-
प्रान्तोरुभ्रमरकजिह्मपंक्तिकान्तम्।
आभाति प्रसृतनभोन्तरातिनैल्यं
रोहिण्या युतमिव चन्द्रबिम्बमारात् ॥ २५ ॥

मणिमकुटाञ्चितं हीरमयकिरीटालङ्कृतं। ललाटस्य फालस्य प्रान्ते सीमाप्रदेशे उरुभ्रमरकाणां अमितकुन्तलानां जिह्मपंक्त्या वक्रपरम्परया कान्तं अत्यन्तमनोहरं यद्वक्त्रं यस्य श्रीकृष्णस्य मुखं। आरात् दूरात् प्रसृतं व्याप्तं नभसः आकाशस्य अन्तरे अवकाशे अतिनैल्यं अत्यन्त नीलिमा यस्य तत्तथोक्तम्। रोहिण्या युतं चन्द्रबिम्बमिव इन्दुमण्डलमिवाभाति। उपमा।

गाम्भीर्यमिति।

गाम्भीर्यं निरूपमवत्सलत्वमेवं
कारुण्यं जगदवलोकधोरणीश्च।
लावण्यं सुमधुरताञ्च बिभ्रतस्ते
यन्नेत्रे प्रमुषितसारसाभिशोभे ॥ २६ ॥

ते सद्योविकसितपुण्डरीकसादृश्यभावेन श्रुतिप्रसिद्धे। अत एव प्रमुषितसारसाभिशोभे अपहृतकमलकान्तिविशेषे। यन्नेत्रे यस्य श्रीकृष्णस्य नयने। गाम्भीर्यं दुरवगाहभावगर्भत्वं निरुपमवत्सलत्वं निरतिशयवात्सल्यं। दोषभोग्यत्वमित्यर्थः। एवं कारुण्यं परदुःखदुःखित्वरूपकरुणां। जगदवलोकधोरणीञ्च वृषभवत् लोककटाक्षवैखरीविशेषं च। लावण्यं मुक्ताफलकान्तिसदृशकान्तिविशेषं च। सुमधुरतां च दर्शनीयमाधुर्यं च। बिभ्रतः पोषयत इत्यर्थः। एतेन पूर्वोक्तगुणानामेतन्नेत्र एव सत्तेति सूचितम्। दृगासेचनकमेतत्तन्नयनसौन्दर्यमित्याशयः।

यदिति ।

यच्छ्रोत्रे मकरसुकुण्डलातिभारा-
दंसाग्रं पतनभियेव संश्रिते ते ।
भक्तानां श्रवणकुतूहलादिवारा-
न्नुत्यालेर्दरविनते च संविभातः ॥ २७ ॥

मकरसुकुण्डलातिभारात् मकराकारदर्शनीयमणिमयकर्णवेष्टनामितभाराद्धेतोः । पतनभियेव अधःपतनभीत्येवेति हेतूत्प्रेक्षा । अंसाग्रं भुजशिखरतलं स्कन्धतलमिति यावत् । संश्रिते अवलम्बमाने इत्यर्थः । ते सुन्दरतया प्रसिद्धे भक्तानां स्वाश्रितानां भगवन्तमेवानन्यभोग्यत्वेन मन्वानानामिति यावत् । नुत्यालेः स्तोत्रपरम्परायाः । आरात् दूरात् श्रवणकुतूहलादिवेत्युत्प्रेक्षा । दरविनते च स्तोकावनते च । यच्छ्रोत्रे यस्य श्रीकृष्णस्य श्रवसी । संविभातः प्रकाशेते । अत्र भारासहिष्णुतया पतनभयग्रस्तस्य अत एव स्कन्धतलावलम्बिनः पुरुषस्य वृत्तान्तपरिस्फूर्त्या समासोक्तिश्च । उत्तरार्धेन भक्तवात्सल्यं सूचितम् ।

यन्नासेति ।

यन्नासा तिलकुसुमाकृतिर्नताङ्गी
वंशत्वप्रचुरनिरूपणात्कवीन्द्रैः ।
लौभ्यात्तन्मधुरतराधरामृतेप्सुः
तत्प्राप्त्यै किमु मुरलीव काशते सा ॥ २८ ॥

सा सुन्दरतया प्रसिद्धा । तिलकुसुमाकृतिः तिलपुष्पसमानरूपा । नताङ्गी क्रमोन्नतनतगात्री यन्नासा यस्य श्रीकृष्णस्य नासिका । कवीन्द्रैः वर्णनानिपुणैः कविश्रेष्ठैः । वंशत्वेन नासावंश इति वेणुत्वेन प्रचुरतया बाहुल्येन निरूपणाद्धेतोः । लौभ्यात् आशातिरेकात् । तस्य श्रीकृष्णस्य मधुरतरं अत्यन्तमधुरं यदधरामृतं तदीप्सुस्सती प्राप्तुमिच्छुस्सती तस्य अधरामृतस्य प्राप्तयै लब्धये । मुरलीव वेणुरिव काशते किमु । नासायाः वंशमुपमानतया वर्णयन्ति कवयः । वंशत्वादेव नासा मुरलीभावमासाद्य श्रीकृष्णमधुराधरामृतमपेक्षते किमित्युत्प्रेक्षा । स्त्रीलिङ्गस्वारस्यात् नायिकात्वं व्यज्यते ।

स्निग्धेति ।

स्निग्धाच्छौ मरकतदर्पणाभिरामौ
संव्यासस्फुरदुरुकुण्डलोस्रदीप्तौ ।

**आभ्रसर...रफलकाविवाभिवृत्तौ**
**यस्योच्चौ कुसुमसुकोमलौ कपोलौ ॥ २९ ॥**

स्निग्धौ मसृणतरौ अच्छौ च निर्मलौ च अत एव मरकतफलकसमुत्कीर्णमुदुभिरामौ ... दर्शनीयौ। अत एव सम्यग्ध्यासाः प्रतिबिम्बिताः ये स्फुरन्तः नक्षत्रवत्प्रकाशमानाः कुण्डलयोः अपरिमितोस्राः निरन्तरप्रसृमरकिरणाः तैः दीप्तौ जाज्वल्यमानौ। स्मरफलकाविव मन्मथस्य खड्गापघातनिवारकचर्ममयायुधविशेषाविव। अभिवृत्तौ वर्तुलाकारौ। अत्र स्मरफलकसादृश्येन सौन्दर्यातिशयदर्शनीयत्वं सूचितम्। उच्चौ तुन्दिलौ। कुसुमसुकोमलौ प्रसूनसुकुमारौ। यस्य श्रीकृष्णस्य कपोलौ। आभातः आसमन्तात्प्रकाशेते।

यदिति।

**यद्ग्रीवा तनुतरमञ्जुलत्रिरेखा**
**पद्मायाः करवलयालिचिह्नितेव।**
**उत्कीर्णस्फुटतरनीलरत्नकम्बु**
**स्फीतत्विड्विलसति कोमला सुवृत्ता ॥ ३० ॥**

तनुतराः अत्यन्तसूक्ष्मतया प्रकाशमानाः अत एव मञ्जुलाः स्पृहणीयाः त्रिरेखाः यस्यां सा। पद्मायाः लक्ष्म्याः आलिङ्गनसमये करस्य वलयालिः कङ्कणपङ्क्तिः तया चिह्नितेव कृतलाञ्छनेवेत्युत्प्रेक्षा। उत्कीर्णः आयुधविशेषैः समुट्टङ्कितः अत एव स्फुटतरः स्पष्टतया प्रकाशमानः यः नीलरत्नकम्बुः इन्द्रनीलमणिमयशङ्खः तस्य स्फीतत्विडिव त्विट् उज्ज्वलकान्तिरिव कान्तिः यस्यास्सा। कोमला अत्यन्तसौकुमार्यविशिष्टा। सुवृत्ता वर्तुलाकारा यद्ग्रीवा यस्य श्रीकृष्णस्य कण्ठः। लसति दृगासेचनकतया प्रकाशते। अत्र नीलमणिशङ्ख-सादृश्योक्त्या श्रीकृष्णकण्ठे काठिन्यं यत्किञ्चिन्निम्नोन्नतत्वं च गृहीते भवतः। तत्परि-हाराय व्यतिरेकविधया कोमला सुवृत्तेत्युक्तम्।

यदिति।

**यद्वक्षः पृथुतरमौक्तिकालिमालं**
**श्रीवत्सप्रियकमलोचकौस्तुभाढ्यम्।**
**नक्षत्रप्रकटतटित्समुद्यदिन्दु**
**स्तोकाभ्रं गगनमिव प्रकाशते च ॥ ३१ ॥**

यद्वक्षश्च यस्य श्रीकृष्णस्य वक्षस्स्थलमपि। चकारः पूर्वोक्तावयवसमुच्चयार्थकः। पृथुतर-मौक्तिकालिमालं सत् स्फीतमुक्ताफलपरम्पराप्रोतदिव्यमालाविशिष्टं सत्। श्रीवत्साख्येन

लाञ्छनेन प्रियकमलया वल्लभतमया लक्ष्म्या च उच्चकौस्तुभेन च उन्नततया प्रकाशमानेन कौस्तुभाख्येन दिव्यरत्नेन च एतैः आढ्यं परिपूर्णं सत्। नक्षत्रैः प्रकटतटिता प्रकाशमानया विद्युता समुद्यदिन्दुना प्रादुर्भवता चन्द्रेण स्तोकाभ्रेण च मेघशकलेन च एतैः विशिष्टं गगनमिव अन्तरिक्षमिवेत्युपमा। प्रकाशते। अत्र क्रमो न विवक्षितः। गगन-सादृश्येन वक्षसो विशालातिशयस्सूचितः।

यदिति।

**यद्बाहू मृगपतिवक्त्रचिह्निताग्रे**
**कौशेयद्विगुणितमार्दवोपधाने।**
**आधारे विषधरनाथभोगकान्तौ**
**विन्यस्तौ मणिरुचिरोर्मिकालिहस्तौ ॥ ३२॥**

मृगपतेः सिंहस्य वक्त्रेण मुखभागेन चिह्निते अङ्किते अग्रे पुरःप्रदेशौ यस्य तस्मिन् कौशेयेन क्रिमिकोशविशेषनिर्मितेन अंशुकेन अत एव द्विगुणितं अत्यधिकतया आपादितं मार्दवं मृदुलत्वं यस्य तत् उपभोगार्हमार्दवविशिष्टमित्यर्थः। उपधानं उपबर्हः यस्य तस्मिन्। आधारे बाहुविन्यासायोभयपार्श्वकल्पिते भुजाकारदण्डविशेषे। विषधर-नाथस्य आदिशेषस्य भोगः कायः तद्वत्कान्तौ अत्यन्तमनोहरौ। अत्र आदिशेषभोग-सादृश्येन वर्तुलत्वं स्निग्धत्वं दीर्घत्वं मृदुलत्वं गन्धविशेषविशिष्टत्वं शीतलत्वं च सूच्यन्ते। मणिभिः नवरत्नैः रुचिराः दीप्ताः मनोहराश्च याः ऊर्मिकाः अङ्गुलीयकानि तासां आलिः पंक्तिः हस्ते पाणौ ययोस्तौ। यद्बाहू यस्य श्रीकृष्णस्य बाहू भुजौ विन्यस्तौ विनिहितौ।

कण्ठादिति।

**कण्ठादाक्षितिपरिलम्बितेन हंस-**
**प्रान्तेन प्रगुणरुचाम्बरेण हेम्ना।**
**यस्स्वर्णद्रवपृथुनिर्झरोभयान्तो**
**नीलाद्रिर्लसति यथा विशालसानुः ॥ ३३॥**

कण्ठादारभ्य आक्षिति परिलम्बितेन भूपर्यन्तं डोलायितेन। हंसाः प्रान्ते अञ्चलप्रदेशे यस्य तेन। प्रान्तं परितः सुवर्णतन्तुस्यूतैः हंसैः समलङ्कृतेनेत्याशयः। प्रगुणरुचा जाज्वल्य-मानेन हेम्ना अम्बरेण पीताम्बरेण। यः श्रीकृष्णः स्वर्णद्रवस्य द्रवीकृतकनकस्येत्यर्थः। पृथुनिर्झरः स्थूलगिरितटप्रवाहः उभयान्ते उभयपार्श्वे यस्य स तथोक्तः। विशालसानुः

अत्यायतप्रस्थप्रदेशः। एतेन अधःप्रदेशे प्रसरणशीलत्वं सूचितम्। नीलाद्रिः यथा अञ्जनपर्वत इव। लसति प्रकाशते। असम्भावितोपमा।

शुभ्रेति।

**शुभ्राभ्रभ्रमजनकप्रबद्धचञ्च-**
**त्कौशेयप्रविसरदापदाग्रकच्छः।**
**आवर्तप्रसृमरवीचिभिर्हरिर्यो**
**गङ्गायास्तुहिनगिरिर्यथा वृतस्नुः ॥ ३४ ॥**

शुभ्राभ्रस्य शरत्कालिकस्वच्छमेघस्य भ्रमजनकं भ्रान्तिसमुत्पादकम्। तद्वद्धवलमिति यावत्। प्रबद्धं प्रकर्षेण कटितटे बद्धं चञ्चत् प्रकाशमानं यत् कौशेयं क्रिमिकोशकल्पितं परिधानं तस्मात् प्रविसरन् गुल्फपर्यन्तं लम्बमानः अत एव आपदाग्रकच्छः पादपर्यन्तालम्बिकच्छः यस्य स तथोक्तः। यः हरिः श्रीकृष्णः गङ्गायाः सुरसरितः आवर्तप्रसृमरवीचिभिः जलभ्रमविसृत्वरतरङ्गैः आवृतस्नुः परिवृतसानुप्रदेशः। तुहिनगिरिर्यथा हिमवानिव लसतीति शेषः। उपमालङ्कारः।

माणिक्येति।

**माणिक्यग्रसनपरास्यसिंह्युग्मं**
**प्रत्युप्ताद्भुतमणिपत्रभङ्गभङ्गम्।**
**यो धत्ते सुकटितटेन हेमकाञ्ची**
**दामाग्रग्रथितविलोलरत्नमालम् ॥ ३५ ॥**

यः श्रीकृष्णः। माणिक्यग्रसनपरं काञ्चीदाम्नः मध्यदेशे प्रत्युप्तस्य स्थूलतरस्य मांसपिण्डसवर्णतया स्पृहया ग्रसनं गिलनं तस्मिन् परं आसक्तं आस्यं विवृतवदनं यस्य तत् सिंह्योः समुत्कीर्णस्वर्णमयकेसरिणोः युग्मं परस्पराभिमुखतया स्थितं युगलं यस्मिंस्तत् प्रत्युप्ताः प्रतिवापचातुर्यविनिहिताः अद्भुतमणयः संविधानविशेषेण विस्मयावहरत्नविशेषाः यस्मिन्सः पत्रभङ्गानां समुत्कीर्णस्वर्णमयलताकुसुमादिचित्रविशेषाणां भङ्गः तरङ्गः प्रत्युप्ताद्भुतमणिः पत्रभङ्गभङ्गः यस्मिंस्तत्। अग्रे प्रान्तदेशे ग्रथिताः प्रोताः विलोलाश्च ताः डोलायमानाश्च ताः रत्नमालाश्च यस्य तत्। हेमकाञ्चीदाम सुवर्णमयमेखलादाम। सुकटितटेन शोभनावलग्नदेशेन। अत्र शोभनत्वं सिंह्यावलग्ननिभत्वमेव। धत्ते परिधानकौशेयोपरि धृतवानित्यर्थः।

यदिति ।

**यत्पादौ मणिमयनूपुराभिरामौ**
**भक्तानां हृदतिमृदूपधानभोग्ये ।**
**सौवर्णे मृगपतिपादभाजि पीठे**
**काशेते कमलरुचौ निवेशितौ च ॥ ३६ ॥**

मणिमयनूपुराभिरामौ नवरत्नखचिततुलाकोटिमनोहरौ । कमलरुचौ कमलारुणौ तद्वत्कोमलौ च । यत्पादौ च यस्य श्रीकृष्णस्य चरणावपि । चकारः पूर्वोक्तावयवविशेषसमुच्चयार्थकः । भक्तानां स्वनामामृतपानैकसक्तानां स्वाश्रितानां हृदिव हृदयमिव अतिमृदु अत्यन्तकोमलं यदुपधानं उपबर्हः तेन भोग्ये उपभोगक्षमे । सौवर्णे कनकमये मृगपतिपादभाजि सिंहचरणाकारपादचतुष्टयविशिष्टे । पीठे पादनिधानार्थं कल्पिते विष्टरके । विनिहितौ सन्तौ काशेते ।

दृष्ट्वेति ।

**दृष्ट्वैवं सुचिरममुं यदूद्वहं तं**
**सभ्यास्ते निरवधिहर्षसिन्धुमग्नाः ।**
**मन्वानास्सुकृतविशेषमात्मनां द्रा-**
**क्सौहित्यं न खलु समीयुरुन्मिषन्तः ॥ ३७ ॥**

एवं पूर्वोक्तप्रकारेण । प्रत्यवयवसौन्दर्यविशिष्टं अमुं इदानीं सभायां प्रत्यक्षीभूतं तं श्रियःपतित्वेन प्रसिद्धं । किञ्च पूर्वं यच्छब्देन निर्दिष्टतया अत्र तच्छब्दप्रयोगः यत्तदोर्नित्यसम्बन्धात् । यदूद्वहं यदुवंशोत्पन्नं श्रीकृष्णं । सुचिरं दृष्ट्वा सम्यगवलोक्य । ते सभ्याः दुर्योधनाधीनास्सभास्ताराः । निरवधिहर्षसिन्धुमग्नास्सन्तः निरतिशयानन्दतुन्दिलास्सन्त इत्यर्थः । इहैव मोक्षानन्दमधिगता इति यावत् । आत्मनां सुकृतविशेषं पुरार्जितपुण्यविशेषं मन्वानास्सन्तः जन्मान्तरनिरतिशयसुकृतविशेषेणेदृशदर्शनप्राप्तिरिति मन्यमानास्सन्तः । उन्मिषन्तस्सन्तः निमेषरहितास्सन्तः । एतेन दृगासेचनकरूपत्वं सूचितम् । सौहित्यं तृप्तिं द्राक् क्षिप्रं न खलु समीयुः नैव प्रापुः ।

तदिति ।

**तत्पार्श्वे तदनु स दक्षिणे निषण्णः**
**शैनेयो विनिहित एव विष्टरे प्राक् ।**
**वामे तु स्वयमतिनम्रपूर्वकायः**
**क्षत्तापि प्रणत उपाविशच्च पीठे ॥ ३८ ॥**

तदनु कृष्णोपवेशानन्तरं सः । कृष्णानुयातः शैनेयः सात्यकिः । दक्षिणे तत्पार्श्वे श्रीकृष्णस्य पार्श्वभागे प्रागेव विनिहिते इदं सात्यकिकृते इति प्रथममेव सज्जीकृते इत्याशयः । विष्टरे आसने निषण्णस्सन् उपविष्टस्सन् । अभूदिति शेषः । वामे श्रीकृष्णस्य वामपार्श्वविनिहिते पीठे तु क्षत्तापि विदुरोपि । स्वयं अप्रार्थित एवेत्यर्थः । अतिनम्रपूर्वकायस्सन् विनयविनतशरीरस्सन् प्रणतः । उपाविशच्च ।

आविरिति ।

**आविर्भविष्यति कथं यदुनाथवक्त्रात्**
**पीयूषवर्षणचणा निपुणा च वाणी ।**
**इत्यादरेण सकलाः कृतमौनमुद्राः**
**सभ्यास्तदाननदृशस्सहसा बभूवुः ॥ ३९ ॥**

यदुनाथवक्त्रात् श्रीकृष्णस्य वदनारविन्दात् । पीयूषवर्षणचणा अमृतवर्षिणी निपुणा युक्तिनीतियुक्ता सकलजनमनोवशीकरणशक्ता च वाणी उपदेशवैखरी कथं । केन प्रकारेण आविर्भविष्यति । इति आदरेण आभिमुख्येन औत्सुक्यातिशयेनेति यावत् । सकलाः समस्ताः अपि सभ्याः सभां गताः जनाः । सहसा तत्क्षणमेव कृतमौनमुद्रास्सन्तः निश्शब्दास्सन्तः । तदाननदृशस्सन्तः श्रीकृष्णमुखारविन्ददत्तदृष्टयस्सन्तः । बभूवुः ।

कृष्ण इति ।

**कृष्णोपि सभ्यान्लिखितानिवैक**
**चित्तानकम्पानवलोकयन्सन् ।**
**मन्दस्मितस्मेरमुखारविन्दो**
**गाम्भीर्यसन्धुक्षितकौतुकोऽभूत् ॥ ४० ॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणमहाकविविरचिते**
**अद्भुतदूताख्यकाव्यरत्ने**
**द्वादशस्सर्गः ।**

कृष्णोपि । लिखितानिव चित्रे निवेशितानिव अकम्पान् अचलान् एकचित्तान् कृष्णवाणीश्रवणैकमनस्कान् सभ्यान् मन्दस्मितेन मन्दहासेन स्मेरं प्रफुल्लं मुखारविन्दं यस्य स तथोक्तस्सन् । गम्भीर्येण सन्धुक्षितं वर्धितं कौतुकं सभ्यकुतूहलं यस्य स तथोक्तस्सन् । अवलोकयन्सन् अभूत् ।

इति श्रीभगवल्लक्ष्मीदासानुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
द्वादशस्सर्गः ।

॥ श्रीः ॥

# त्रयोदशस्सर्गः ।

अथ कविः श्रीकृष्णोक्तिप्रकारमभिधातुं त्रयोदशसर्गमारभते । मन्दहासेति।

**मन्दहासस्फुरद्दंष्ट्रामधुरो मधुराधिपः ।**
**मेघगम्भीरनिर्घोषो वाचमूचे हितां प्रियाम् ॥ १ ॥**

मन्दहासेन स्फुरन्त्यौ प्रकाशमाने ये दंष्ट्रे ताभ्यां मधुरः मनोहरः। मधुराधिपः श्रीकृष्णः मेघगम्भीरनिर्घोषः स्तनितध्वानः। हितां भाविसौख्यदायिनीं। प्रियां सद्यस्सुखप्रदां। वाचं गिरं। ऊचे उक्तवान्। एतैः विशेषणैः स्मितपूर्वाभिभाषित्वं उत्तमपुरुषत्वं सर्वसमत्वं च सूच्यन्ते ।

सरलहृदयैश्शान्तचित्तैरेव मद्वचसां समीचीनार्थो गृह्यते। नान्यैरित्याह। यस्येति।

**यस्य चित्ते स्थिरो धर्मश्शान्तिश्च वसति स्थिरा ।**
**स ग्रहीष्यति मे वाचं साधु नान्यः कथञ्चन ॥ २ ॥**

यस्य जनस्य चित्ते मनसि धर्मः वेदविहितसन्मार्गविषयिकार्थः स्थिरः निश्चलस्सन् वसति वर्तते। एतेन संशयात्मकत्वं निराकृतम्। यस्य चित्ते शान्तिश्च अरिषड्वर्गपराङ्मुखता च स्थिरा निश्चला सती वसति। सः धर्मात्मा शान्तात्मा च जनः मे निष्पक्षपातेन धर्मसूक्ष्मार्थवक्तुः मम। वाचं सदर्थगर्भितं वचनं। साधु समीचीनतया ग्रहीष्यति बुध्यारूढं करिष्यति। अन्यः पूर्वोक्तगुणप्रतिभटः अधर्मनिष्ठः अरिषड्वर्गपरिपूर्णश्च। कथञ्चन अत्यन्तप्रयासेनापि न ग्रहीष्यति। एतेन धुर्योधनप्रभृतिभ्यो मद्वचो न रोचते इत्याशयः स्सूचितः।

बाधिर्यदोषदूषितोपि न मे श्रोष्यति वचनमित्याह। अमर्षेति।

**अमर्षस्फूर्जथुध्वस्तकर्णोऽथ बधिरोपि यः ।**
**वक्ष्यमाणान्तु मे वाणीं सोपि न श्रोष्यति ध्रुवम् ॥ ३ ॥**

यः अमर्ष एव क्रोध एव स्फूर्जथुः वज्रनिर्घोषः तेन ध्वस्तौ नाशितौ कर्णौ श्रोत्रेन्द्रिये यस्य स तथोक्तः। अथवा बधिरोपि जन्मतो बाधिर्यदोषदूषितोपि। यद्वा अथेति पक्षान्तरे अमर्षस्फूर्जथुध्वस्तकर्णः अत एव बधिरः इत्यन्वयः। सोपि। अपिः पूर्वश्लोकार्थसमुच्चायकः। वक्ष्यमाणां मे वाणीं तु न श्रोष्यति नैव कर्णपथे पातयिष्यति। ध्रुवम्। रोषाविष्टाय न मे वचो रोचते इत्याशयः।

हितोक्तिस्वभावमाह । यद्यपीति ।

**यद्यप्यद्योच्यमाना वाक्कर्णारुन्तुदतां व्रजेत् ।**
**रुग्णस्येवौषधं तिक्तमग्रे सौख्याय कल्पते ॥ ४ ॥**

अद्य इदानीं । उच्यमाना मयोदीर्यमाणा वाक् वाणी । यद्यपि कर्णारुन्तुदतां अनिच्छतः कर्णयोः श्रोत्रयोः अरुन्तुदतां मर्मस्पृक्तां । व्रजेत् इति सम्भावनायां । दृष्टान्तमाह । रुग्णस्य व्याधिपीडितस्य तिक्तं कटुतरं औषधमिव । अग्रे उत्तरत्र सौख्याय कल्पते समर्थं भवति । भिषग्वरवितीर्णमौषधं यद्यपि रुग्णस्य सेवनावसरे कटुतरं तदेवोत्तरत्रारोग्य-मुत्पाद्यानन्दजनकं भवति । तथैव श्रवणावसरे मद्धितोक्तिः क्रोधप्रमुषितकृत्याकृत्य-विवेकस्य सद्यस्तावदसह्या । उत्तरत्र सैव विवेकमुत्पाद्य सुखसम्पत्तिप्रसवित्री भवती-त्याशयः ।

दुष्टानां सत्पुरुषोदयो नैव सम्मत इत्याह । जैवातृकेति ।

**जैवातृकोदयो लोके पङ्कजानान्तु दुस्सहः ।**
**भूयः कुवलयेनैव प्रार्थ्यते यश्च सादरम् ॥ ५ ॥**

लोके जैवातृकस्य आयुष्मतश्च चन्द्रस्य उदयः आविर्भावः । पङ्कजानान्तु कमलानामेव पापात्मनामेव च । दुस्सहः दुःखेनापि सोढुमसह्यः । यश्च जैवातृकोदय एव । कुवलयेनैव नीलोत्पलेनैव भूमण्डलेनैव । सादरं यथा तथा । भूयः आधिक्येन शश्वत् । प्रार्थ्यते । एतेन सत्पुरुषाणां लोकाभिनन्दितानां पाण्डवानामुदयः दुर्योधनप्रभृतीनां दुष्टानां दुस्सह इति सूचितम् । समासोक्तिः ।

जगति गुणवतां पीडाबाहुल्यमाह । गुणिष्विति ।

**गुणिषु प्रायशो लोके व्याघातः पतति ध्रुवम् ।**
**वधबन्धौ हि नियतौ कस्तूरीमृगकीरयोः ॥ ६ ॥**

लोके प्रायशः बाहुल्येन । गुणिषु दयादिसद्गुणवत्सु व्याघातः विशेषेण आसमन्तात् घातः पीडाविशेष इत्यर्थः । पतति उपनतो भवति । ध्रुवं । तदेव विशेषेणोपपादयति । वधेत्यादिना । कस्तूरीमृगकीरयोः कस्तूरीमृगशुकयोः वधबन्धौ कस्तूर्यर्थं वधः मधुर-वाण्यर्थं बन्धः एतौ । नियतौ स्वतस्सिद्धौ । हीति प्रसिद्धौ । एतेन गुणवतां पाण्डवानां निर्निमित्तं दुष्टैः दुर्योधनप्रभृतिभिः पीडा क्रियते इति सूचितम् ।

दुष्टः स्थानविशेषप्राप्त्या परस्परमैत्रीमपि नाशयतीत्याह । लब्धेति ।

**लब्धस्थानविशेषस्तु तीक्ष्णस्स्नेहं विनाशयेत् ।**
**धूमायमानस्सदृशो वह्निर्दीपगतो यथा ॥ ७ ॥**

लब्धः प्राप्तः स्थानविशेषः अधिकारविशेषः पात्रविशेषश्च । तीक्ष्णः निसर्गतः क्रूरस्वभावः दहनशक्तिविशिष्टश्च । पुरुषस्तु धूमायमानस्सन् अन्तरेवासूयाक्षुब्धस्सन् धूमावृतश्च सन् सदशस्सन् दशाविशिष्टस्सन् वर्तिकाग्रवर्ती सन् । दीपगतः वह्निर्यथा अग्निरिव । स्नेहं प्रीतिं तैलं च । विनाशयेत् । उपमा । एतेन दुर्योधनः राज्याधिकारप्राप्त्या नैसर्गिकतैक्ष्ण्यात् धर्मराजादिगतस्नेहं विनाशितवानिति सूचितम् ।

धृतराष्ट्रं मनसि निधायाह । य इति ।

**यस्स्वयं वर्धितान्बाल्ये स्वानुगान्मञ्जुभाषिणः ।**
**कालयत्युग्रतुण्डस्तान्स भवेत्काक एव हि ॥ ८ ॥**

यः मनुष्यः । स्वयं अन्योक्तिमन्तरा साक्षात्स्वयमित्यर्थः । बाल्ये शैशवदशायां वर्धितान् पोषणद्वारा वृद्धिं प्रापितान् । अत एव स्वानुगान् आत्मानमनुसृत्य सरतः । आत्मच्छायानुवर्तिन इति यावत् । मञ्जुभाषिणः हृदयङ्गमव्याहारान् । तान् । स्वसुतनिर्विशेषान् उग्रतुण्डस्सन् कठिनव्याहारस्सन् तीक्ष्णचञ्चुपुटस्सन् । कालयति स्वगृहान्निष्कासयति । सः मनुष्यः काक एव भवेद्धि । काकोपि कोकिलपोतान् शैशवदशायामाहारदानेन वर्धयति । तदनु पितृस्नेहेन समञ्जुलकूजितमनुसरतः तान् तीक्ष्णचञ्चुपुटेन तोदं तोदं स्वावासस्थानात्कालयति । एवमेव धृतराष्ट्रोपि स्वेन वर्धितान् स्वानुगान् सविनयं मृदुभाषिणः पाण्डुपुत्रान् क्रूरेण वचनेन स्वगृहात्कालयामासेत्याशयः ।

महात्मनां स्वभावमाह । स्वभाव इति ।

**स्वभावो महतां हन्त पराभ्युदयहर्षभाक् ।**
**प्रहृष्यत्युदये सिन्धुश्चन्द्रस्य न तु पल्वलम् ॥ ९ ॥**

महतां महात्मनां अतिपृथुलानाञ्च । स्वभावः परेषां अभ्युदयः उत्कर्षः आविर्भावश्च तेन हर्षं सन्तोषं भजतीति हर्षभाक् । भवतीति शेषः । हन्तेति आश्चर्ये । तेन तादृशानां दौर्लभ्यं सूचितम् । दृष्टान्तमाह । प्रहृष्यतीति । सिन्धुः समुद्रः चन्द्रस्य सर्वेषामाह्लादजनकस्येन्दोः उदये आविर्भावे उत्कर्षे च । प्रहृष्यति मुदमधिगच्छति स्वयमपि सन्तुष्ट्या पुष्टो भवतीत्याशयः । पल्वलन्तु अल्पसरस्तु । तुस्तु भेदे । न प्रहृष्यति । एतेन दुर्योधनादीनां पाण्डवाभ्युदयासह्यतया अतितुच्छत्वं सूचितम् ।

उत्तमपुरुषः वृक्षकल्प इत्याह । शीतेति ।

**शीतवातातपैः क्लिष्टः परेभ्यो जीवति स्वयम् ।**
**धन्यो वृक्ष इव क्षोण्यां छायापुष्पफलप्रदः ॥ १० ॥**

शीतवातातपैः तत्तत्कालानुगुणेन शीतेन वातेन आतपेन च स्वयं क्लिष्टः पीडितः क्षोण्यां भूमौ। क्षोण्यामित्यनेन दानादिपुण्यकर्मानुष्ठानेन परोपकारयोग्यत्वं सूचितम्। छायापुष्पफलप्रदः स्वस्मिन्यद्यद्वर्तते तत्सर्वं ददादित्यर्थः। अत एव धन्यः। एतेन आत्मजन्मसाफल्यं सूचितम्। वृक्ष इव परेभ्यः परोपकारार्थमेवेत्यर्थः। जीवति। न कदापि स्वार्थमनुचिन्तयतीत्याशयः।

महात्मनां स्वभावमभिधाय दुरात्मनां स्वभावमाह। एवमिति।

**एवं स्थिते परेषां स्वमपहृत्य शठो भुवि।**
**यो जीवति भयोत्पादी को भेदस्तस्य भोगिनः ॥ ११ ॥**

एवं पूर्वोक्तप्रकारेण। स्थिते सति। परेषां अन्येषां स्वं धनकनकराज्यादिकं अपहृत्य चोरवत् स्वायत्तीकृत्य। शठः गूढविप्रियकृत् वञ्चक इति यावत्। यः मनुष्यः भयोत्पादी सन् अनवरतमपि भयजनकस्सन्। भुवि इह जगति जीवति प्राणधारणं करोति। तस्य मनुष्यस्य भोगिनः सर्पस्य च को भेदः न कोपि भेद इत्यर्थः। मनुष्याकारस्सर्प एवेति यावत्। शाठ्येन पाण्डवानां स्वमपहृत्य भोगैकलम्पटः सर्वथा भयोत्पादी दुर्योधनः विषधर एवेत्याशयः।

मास्तूपकारः अहिंसात्मकधर्मविशिष्टोप्युत्तम एवेत्याह। विनेति।

**विनाप्युपकृतिं लोके परपीडाविवर्जितः।**
**यो यथालाभसन्तुष्टस्सोपि धन्यः कुरङ्गवत् ॥ १२ ॥**

लोके यः मनुष्यः। उपकृतिं विनापि त्यक्तोपकारोपीति यावत्। परेषां प्राणिसामान्यानामित्यर्थः। पीडया हिंसया विवर्जितः दूरीभूत इत्यर्थः। अहिंसात्मकधर्मविशिष्ट इति यावत्। यथालाभसन्तुष्टस्सन् कर्मानुगुणलब्धविषयेषु तृप्तस्सन्। वर्तेत इति शेषः। सोपि कुरङ्गवत् हरिण इव धन्यः। हरिणः वने चरन् परोपकारविहीनोपि परपीडाविवर्जितः यथालाभसन्तुष्टश्च वर्तते। एतेन पाण्डवानां स्थितिस्सूचिता।

पशुवैलक्षण्यं मनुष्यस्याह। वैलक्षण्यमिति।

**वैलक्षण्यं विवेकाद्धि चतुष्पादद्विपादयोः।**
**वृत्त्या यदि मनुष्यो यस्तत्तुल्यस्स्यात्स गर्हितः ॥ १३ ॥**

चतुष्पादः पशुः द्विपादः मनुष्यः एतयोः वैलक्षण्यं विलक्षणत्वं भिन्नतेति यावत्। विवेकात् विविच्य ज्ञानात् भवति। हीति प्रसिद्धौ। यः मनुष्यः वृत्त्या तत्तुल्यो यदि पशुतुल्यश्चेत्। सः मनुष्यः गर्हितः लोकनिन्दित इत्यर्थः। स्यात्। आहारनिद्राभयमैथुनैः पशुसदृश एव मनुष्य इत्याशयः।

मनुष्यापेक्षया पशुरेव श्रेष्ठ इत्याह । किञ्चेति ।

**किञ्च तस्य नरस्येव सक्तिः परधने न यत् ।**
**तद्वरिष्ठो मनुष्याद्धि पशुरेव स्वधर्मभाक् ॥ १४ ॥**

किञ्च यत् यस्मात्कारणात् । तस्य पशोः मनुष्यस्येव परधने अन्येषां वित्ते सक्तिः आशेति यावत् । नास्ति । तत् तस्मात्कारणात् । मनुष्यात् मनुष्यापेक्षया स्वधर्मभाक् दोहन-कर्षणरूपपरोपकारधर्मनिष्ठः । पशुरेव वरिष्ठो हि श्रेष्ठः खलु । पशोः परधनापेक्षा नैवास्ति । स्वकर्तव्यकर्मपरश्च वर्तते । तादृशधीरपि दुर्योधनस्य नास्ति । तस्मात् पश्वपेक्षया हीनवृत्तिरयमिति सूचितम् ।

विषयाणां स्वभावमाह । सद्य इति ।

**सद्यो यत्सुखदायि स्यादायत्यां क्लेशदं हि तत् ।**
**विषयाणां स्वभावोऽयं बुधानामेव गोचरः ॥ १५ ॥**

सद्यः अनुभवकाल एव । यत् वस्तु सुखदायि सत् सुखप्रदं सत् स्यात् । तत् वस्तु आयत्यां उत्तरकाले क्लेशदं हि । हीति प्रसिद्धौ । विषयाणां स्रक्चन्दनवनितादिभोग्य-वस्तूनां । अयं स्वभावः बुधानामेव विवेकशालिनामेव न त्वविवेकिनां गोचरः । अविवे-किनः सद्यस्सुखदायिनं विषयमनुभवन्तः तत्रैव मग्नाः उत्तरत्र क्लेशभाजनानि भवन्ति । विवेकिनस्तु न तथेत्याशयः । एतेन दुर्योधनः विषयैकसक्तः जगत्यविवेकिनामग्रणीरिति सूचितम् ।

बलादामिषाभिलषिणः क्लेशो दुर्निवार इत्याह । तस्येति ।

**तस्यानिवार्यः क्लेशो हि यः कांक्षत्यामिषं बलात् ।**
**आमिषार्थी जले मत्स्यो बडिशेन निहन्यते ॥ १६ ॥**

यः मनुष्यः बलात् बलात्कारेण आमिषं मांसं भोग्यवस्तुजातं च । कांक्षति अपेक्षते । तस्य क्लेशः अनिवार्यो हि स्वतस्सिद्ध इत्यर्थः । दृष्टान्तमाह । आमिषेत्यादिना । मत्स्यः जले आमिषार्थी सन् मांसापेक्षी सन् । बडिशेन मत्स्यबन्धनेन निहन्यते । जले इत्यनेन दुर्गमस्थाने स्थितस्यापीति सूच्यते । एतेन बलात्कारेण राज्याभिलाषिणः दुर्योधनस्य क्लेशबाहुल्यं सूचितम् ।

परिहृतपरद्रव्यास्सुखिनो भवन्तीत्याह । फलेति ।

**फलानुमेयकर्माणः परस्वं क्ष्वेलवच्च ये ।**
**परिहृत्य भवेयुस्ते समेधन्ते सुखाश्रयाः ॥ १७ ॥**

ये विवेकिनः। फलेन सुखदुःखादिरूपफलेन अनुमेयानि कर्माणि पुण्यपापरूपकर्माणि येषां ते। परस्वं परद्रव्यं क्ष्वेलवच्च विषवत् परिहृत्य दूरीकृत्य भवेयुः। ते मनुष्याः सुखानां आश्रयाः आश्रयदातारः इत्यर्थः। सुखान्यत्रैव वसन्तीत्याशयः। समेधन्ते वृद्धिमधिगच्छन्ति। द्रव्यमूलानि पापानीति रीत्या परस्वापहारिणः क्लेशाश्रया नश्यन्तीत्याशयः। एतेन परस्वाप्यहारिणो दुर्योधनस्यापि निरन्तरमपि क्लेशस्स्वतस्सिद्धः। वृद्धिरपि नास्तीति सूचितम्।

दुष्टस्सत्पुरुषवेषमात्रेण सद्भिर्न सेव्यते इत्याह। सतामिति।

**सतामभिनयेनैव न सद्भिस्सेव्यते कटुः।**
**द्राक्षानुकारि निम्बस्य फलं काकैर्हि भुज्यते ॥ १८ ॥**

कटुः क्रूरः। सतां सत्पुरुषाणां अभिनयेनैव वेषभाषाद्यनुकरणेनैव। सद्भिः सत्पुरुषैः न सेव्यते। व्यतिरेकेण दृष्टान्तमाह। द्राक्षेति। निम्बस्य निम्बतरोः द्राक्षानुकारि द्राक्षाफलसदृशं फलं काकैः भुज्यतेहि। हीति प्रसिद्धौ। नान्यैः पक्षिभिरित्यर्थः। एतेन सत्पुरुषवेषभाषादिविशिष्टः धृतराष्ट्रः सद्भिरसेव्य इति सूचितम्।

वेषभाषादिभिस्सतामनुकरणं निष्फलमित्याह। धर्मेति।

**धर्मात्मतां विनान्तर्यः प्रकटीकुरुते बहिः।**
**रामादिभूमिकाभाजो नटस्यास्य च का भिदा ॥ १९ ॥**

अन्तः हृदये। धर्मात्मतां धर्मनिष्ठतां इत्यर्थः। विना यः मनुष्यः बहिः जनाग्रे इत्यर्थः। प्रकटीकुरुते धर्मात्मत्वं प्रदर्शयति। रामादिभूमिकाभाजः रामकृष्णादिमहापुरुषवेषालङ्कृतस्य नटस्य अभिनयनिपुणस्य अस्य च बाह्याडम्बरतत्परस्य मनुष्यस्य च। का भिदा को भेदः न कोपि भेद इत्यर्थः। एतेन धृतराष्ट्रोपि सत्पुरुषवदभिनयति। हृदये धर्मलेशोपि नास्त्यस्येति सूचितम्।

केवलाकारोपि न गण्यते इत्याह। जनादर इति।

**जनादरो मनुष्येण नैवाकारेण लभ्यते।**
**पद्मपत्रगतं तोयं गण्यते किमु मौक्तिकम् ॥ २० ॥**

मनुष्येण जनादरः जनानां प्रीत्यतिशयः। यद्वा पुरस्कारः। आकारेण रूपमात्रेण नैव लभ्यते। दृष्टान्तमाह। पद्मेति। पद्मपत्रगतं कमलदलपतितं तोयं सलिलं मौक्तिकं सत् मुक्ताफलं सत्। गण्यते किमु न गण्यत एवेत्यर्थः। गुणविरहितः केवलाकारः जनादरपात्रं न भवतीत्याशयः। एतेन दुर्योधनप्रभृतीनां स्थितिस्सूचिता।

एतावत्पर्यन्तं सदृष्टान्तं सामान्येनाभिधाय सम्प्रति प्रकृतमावेदयति। युष्मा-भिरिति।

**युष्माभिः पाण्डवास्त्वक्षक्रीडया वञ्चिताः पुरा।**
**क्षुद्रैर्गजा इवारण्ये वार्या हन्त वशीकृताः ॥ २१ ॥**

पुरा पाण्डवास्तु। तुस्तु भेदे। युष्माभिः शाठ्यप्रधानैः भवद्भिः। अक्षक्रीडया अक्षक्रीडां निमित्तीकृत्येत्यर्थः। एतेन अक्षक्रीडायामपि शाठ्यं सूचितम्। वञ्चितास्सन्तः अरण्ये इत्यनेन स्वेच्छया निर्भयसञ्चरणं सूचितम्। क्षुद्रैः दुर्बलैः कापुरुषैः वार्या गजबन्धनेन गर्तेनेति यावत्। वञ्चिताः गजा इव वशीकृताः स्वायत्तीकृताः। हन्तेति खेदे। यद्वा आश्चर्ये। तादृशमत्तगजसदृशाः पाण्डवा अपि क्षुद्रैः युष्माभिः स्वायत्तीकृता इत्याश्चर्यम्।

दुश्शासनस्य पराक्रमं निन्दति। दुश्शासनस्येति।

**दुश्शासनस्य पौलस्त्याच्छ्लाघ्यः खलु पराक्रमः।**
**नाचकर्ष स यत्केशे परदारान्रजस्वलाम् ॥ २२ ॥**

पौलस्त्यात् रावणापेक्षया। दुश्शासनस्य पराक्रमः श्लाघ्यः खलु। यत् यस्मात्कारणात् सः रावणः केशे केशपाशं गृहीत्वेत्यर्थः। रजस्वलां परदारान् परनारीं नाचकर्ष। अस्य दौर्जन्यं वाचा वर्णयितुमप्यशक्यमित्याशयः। निन्दास्तुतिः।

सत्पुरुषविषये अपकारबुध्या कृतमखिलमप्युपकाराय भवतीत्याह। दुर्जनैरिति।

**दुर्जनैस्सत्स्वपकृतिः कृतोपकृतये भवेत्।**
**वनाय प्रेषितास्ते तु सत्क्षेत्राणि सिषेविरे ॥ २३ ॥**

सत्सु सत्पुरुषविषये। दुर्जनैः कृता आचरिता अपकृतिः अपकारः। उपकृतये उपकाराय भवेत्। वनाय अरण्यं प्रति प्रेषिताः ते तु पाण्डवास्तु। सत्क्षेत्राणि पुण्यक्षेत्राणि सिषेविरे। शिक्षाबुध्या वनाय प्रेषिताः पाण्डवाः पुण्यक्षेत्रयात्रां चक्रुरित्याशयः।

एवमभिधाय निजागमनकारणमाह। अलमिति।

**अलमद्यापदानेन प्रारब्धं यदि तद्बहु।**
**सन्धिं चिकीर्षुरायातो ब्रवीमि प्रकृतां गिरम् ॥ २४ ॥**

अद्य अस्मिन्समये। अपदानेन प्रचलितवृत्तान्तेन अलं। प्रारब्धं यदि वक्तुमुपक्रान्तं चेत्। तत् पुरावृत्तं बहु तस्यान्त एव नास्तीत्याशयः। अत एव न तद्विस्तारयामि।

किन्तु ।क्कतमावेदयामि। सन्धिं परस्परसौहार्दापादनेन सम्बन्धं चिकीर्षुः कर्तुमिच्छुः आया॰ ः धर्मराजसकाशादागतः। अहं प्रकृतां प्रकृतोपयुक्तामित्यर्थः। गिरं वाचं ब्रवीमि कथयामि।

प्रकृतमेव विशदयति। अन्धत्वादिति।

**अन्धत्वाद्धृतराष्ट्रस्य नाधिकारः प्रजावने।**
**अन्ययोनितया क्षत्तुर्नैवाकांक्षा महात्मनः ॥ २५ ॥**

अन्ध ॥त् जन्मत एव अक्ष्णा काणत्वाद्धेतोः। धृतराष्ट्रस्य प्रजावने प्रजापरिपालने विषये राजत इति यावत्। अधिकारो नास्ति। महात्मनः स्वभावत एव सद्गुणपूर्णस्य सदा॰ ॥स्य क्षत्तुः नीतिविशारदस्य विदुरस्य अन्ययोनितया शूद्रायां समुत्पन्नतया प्रजावने कांक्षै इच्छैव नास्ति। अत एव महात्मन इत्युक्तं। धर्मसूक्ष्मतत्त्वविन्नैवाभिलष-तीत्य ।यः।

पाण्डवानां वृत्तान्तमाह। मृगयेति।

**मृगयासक्तपाण्डोस्तु दैवात्सत्यां मृतौ वने।**
**असंस्तुतोग्रकापट्यैः मृगैरूषुस्तदात्मजाः ॥ २६ ॥**

मृग॰ सक्तस्य आखेटैकतानस्य पाण्डोस्तु। तुस्तु भेदे। दैवात् दैवयोगात् वने तत्रैव रण्ये। मृतौ सत्यां मरणे प्राप्ते सति। तदात्मजाः पञ्चपाण्डवाः असंस्तुतोग्रकापट्यैः अपा चितक्रूरतरकपटवृत्तिभिः मृगैस्सह कुरङ्गैस्सह। ऊषुः वसन्तिस्म। एतेन पितृ-विहि ।ाः पाण्डवा अपि साधुशीला इति सूचितम्।

तादृशेषु दुर्योधनादिदौर्जन्यमाह। पैतृकमिति।

**पैतृकं धनमादातुं भवदुत्सङ्गमागताः।**
**विषानलादिभिः प्लुष्टा अपि दैवेन रक्षिताः ॥ २७ ॥**

पाण्॰ ॥स्तु पैतृकं धनं स्वतः प्राप्तुं योग्यं पितृधनं। आदातुं भवतां उत्सङ्गं अङ्कतलं आ॰ ताः। विषानलादिभिः सजग्धौ विषदानेन जतुगृहे ज्वलनदानेन आदिना शा॰ ॥ेन वनप्रेषणादयो गृह्यन्ते। प्लुष्टा अपि दग्धा अपीति यावत्। दैवेन धर्म-पक्ष ।तिना विधिना रक्षिताः।

पाण्डवानां शौर्यातिशयमाह। जनकेनेति।

**जनकेन विहीनास्ते स्वराज्याद्भ्रंशिता अपि।**
**दोर्दण्डजितभूभागास्साम्राज्यं प्रापुरञ्जसा ॥ २८ ॥**

जनकेन पित्रा विहीनाः विरहिताः ते पाण्डवाः । स्वराज्यात् कुलक्रमागतात् राज्यात् भ्रंशिता अपि वञ्चनया निष्कासिता अपि । अञ्जसा दोर्दण्डेन जितसर्वभूमिभागास्सन्तः साम्राज्यं प्रापुः । सम्राट्प्राभवमगमन्नित्याशयः ।

दुर्योधनप्रभृतीनां वञ्चनाव्यापारमाह । दुरोदरेणेति ।

**दुरोदरेण युष्माभिस्तेषां लक्ष्मीश्शठैः बलात् ।**
**सभायां तेषु पश्यत्सु विकृष्टा द्रौपदीव सा ॥ २९ ॥**

शठैः गूढविप्रियकृद्भिः युष्माभिः । दुरोदरेण द्यूतेन तेषां पाण्डवानां । सा आत्मभुजबलार्जिता लक्ष्मीः सर्वा सम्पत् । सभायां सर्वशास्त्रतत्वज्ञानां महात्मनां परिषदि । तेषु पाण्डवेषु पश्यत्सु सत्सु । बलात् हठात्कारेण द्रौपदीव विकृष्टा । एतद्द्वयमप्यन्याय्यमित्याशयः ।

तस्मान्नयायप्राप्तं राज्यं तेभ्य एव प्रयच्छन्तु भवन्त इत्याह । तत इति ।

**ततस्तैर्वनवासेन निस्तृतो नियमार्णवः ।**
**दत्ताधुना यथान्याय्यं तेभ्यस्तत्सम्पदं मुदा ॥ ३० ॥**

तैः राज्यान्निष्कासितैः पाण्डवैः । वनवासेन घोरारण्यवासेन नियमार्णवः एवं वनवासोऽज्ञातवासश्च कर्तव्यः इत्याकारकनियमोदधिः निस्तृतः निस्तीर्णः । ततः तस्मात्कारणात् अधुना यथान्याय्यं न्यायमनतिक्रम्य तेभ्यः पाण्डवेभ्यः तत्सम्पदं तैर्भुजबलार्जितां राज्यश्रियं । यद्वा पितृक्रमागतां तेषां राज्यश्रियं । मुदा सन्तोषेण न तु क्रोधेन । दत्त प्रयच्छत ।

आनन्ददायिपरस्परसौहार्दमनुभवन्तु भवन्त इत्याह । अन्योन्येति ।

**अन्योन्यबन्धुसम्प्रीतेर्नान्यद्वस्तु जगत्त्रये ।**
**आमोददायि तद्यूयं मोदध्वं पाण्डवैस्सह ॥ ३१ ॥**

जगत्त्रये इत्यनेन मध्यमालोक इव स्वर्गादिलोकेपीति सूचितम् । अन्योन्यबन्धुसम्प्रीतेः परस्परबान्धवमनस्सन्तोषणापेक्षया । अन्यद्वस्तु आमोददायि आनन्दजनकं नास्ति । तत् तस्मात्कारणात् । यूयं पाण्डवैस्सह मोदध्वं सौहार्देनानन्दमनुभवत ।

धर्मराजस्य सौजन्यमाह । पञ्चेति ।

**पञ्चग्रामप्रदानेनाप्यतितुष्टा वयन्त्विति ।**
**प्रहिण्वतेमं मां दूतं प्रोक्तं धर्ममहीभृता ॥ ३२ ॥**

वयन्तु । तुस्तु भेदे । अत्र अभिनिवेशवशीकृतमानसत्वनिराकरणेन भेदः प्रतिपादितः । वयमित्यनेन मद्वचनानुवर्तिनः भीमादय इति सूचितम् । पञ्चग्रामप्रदानेनापि कैतवाप-

हृतेऽस्मदार्जिते साम्राज्ये अर्थिभ्यो नः ग्रामपञ्चकवितरणेनापि । अतितुष्टाः अत्यन्तसन्तोषयुक्ताः । अतीत्यनेन साम्राज्यप्राप्तया यादृशस्सन्तोषः तादृशो भवतीति सूचितम् । इति एवं रीत्या इमं मां धर्मैकपक्षपातिनं मां दूतं सन्तं प्रहिण्वता प्रेषयता धर्ममहीभृता युधिष्ठिरेण । प्रोक्तं प्रकर्षेणाभिहितम् । प्रेत्यनेन याथार्थ्यं सूचितम् ।

युद्धस्यानर्थप्रदत्वं प्रकटयन्युधिष्ठिरस्य स्वभावमाह । जन्यमिति ।

**जन्यमन्योन्यमन्याय्यं सैन्यमन्येन हन्यते ।**
**जन्युमन्युं मन्यमानो दैन्यं मान्योऽन्वमन्यत ॥ ३३ ॥**

अन्योन्यं भ्रातृवर्गे परस्परं । जन्यं युद्धं अन्याय्यं न्यायविरुद्धम् । तत्कथमिति चेत् । सैन्यं स्वस्वचतुरङ्गबलं अन्येन साह्यार्थमागतेन बन्धुजनबाह्येन जनेन । हन्यते विनाश्यते । अत एव जन्युमन्युं निरपराधिप्राणिपीडां मन्यमानः मनसि चिन्तयन् । अत एव मान्यः पूज्यः दयालुत्वात्पूज्यत्वम् । धर्मराजः दैन्यं याचकत्वमित्यर्थः । अन्वमन्यत आश्रितवानित्यर्थः । न ह्ययं दौर्बल्यात्पञ्चग्राममात्रमयाचत । किन्तु दययेत्याशयः ।

सम्प्रति भीमार्जुनयोर्गुणमाह । सांयुगीनाविति ।

**सांयुगीनावपि स्फीतशस्त्रास्त्रौ भीमफल्गुनौ ।**
**ज्येष्ठभ्रातृवचोभिस्तौ दम्यतां गमितौ बलात् ॥ ३४ ॥**

तौ जगद्विश्रुतौ भीमफल्गुनौ भीमार्जुनौ । सांयुगीनावपि रणे समर्थावपि । स्फीतशस्त्रास्त्रावपि शत्रुहृदयविदारणनिपुणप्रहरणगणावपि । ज्येष्ठभ्रातृवचोभिः धर्मराजसान्त्वोक्तिभिः दम्यतां वश्यतां बलात् प्रयत्नशतेनेत्यर्थः । गमितौ प्रापितौ । तावुभावेव भवद्दर्पदमनसमर्थौ । नान्यापेक्षेत्याशयः ।

पुनरपि तयोर्धर्मराजवश्यतामाह । धर्मराज इति ।

**धर्मराजस्तयोर्बाहुवीर्यवीचिपरम्पराम् ।**
**निरुणद्धि समुद्रस्य वेलेवोल्लोलसन्ततिम् ॥ ३५ ॥**

धर्मराजः तयोः भीमार्जुनयोः बाह्वोः भुजयोः वीर्यमेव वीचिः तरङ्गः तस्याः परम्परां इत्यनेन अगण्यत्वं तेनाप्रतिहतत्वं च सूचितम् । वेला तटप्रदेशः समुद्रस्य उल्लोलसन्ततिमिव कल्लोलपरम्परामिव । निरुणद्धि । अन्यथा तावुभावेव भवन्नाशकावित्याशयः ।

अर्जुनस्य पराक्रमातिशयमाह । गाण्डीविन इति ।

**गाण्डीविनः पुरो यूयं तदा तिष्ठत निर्भयम् ।**
**यद्यंशुमालिनोऽप्यग्रे तमांसि स्युर्निरर्गलम् ॥ ३६ ॥**

यूयं कैतवेनापहृतपाण्डवराज्याः भवन्तः। गाण्डीविनः अग्निदत्ताप्रतिहतगाण्डीवधनुर्धारिणः अर्जुनस्य पुरः रणचत्वराग्रभागे। निर्भयं यथा तथा तदा निष्ठेत। अंशुमालिनोपि तीक्ष्णतरसहस्रकिरणस्य सूर्यस्याप्यग्रभागे। अत्र अंशुमालिन इत्यनेन अर्जुनस्य सूर्यकिरणवत् बाणसहस्रवर्षित्वं सूचितम्। तमांसि तिमिराणि। अत्र तमांसीत्यनेन दुर्योधनप्रभृतीनां तिमिरप्रायत्वं सूचितम्। निरर्गलं यथा तथा निर्बाधं यथा तथा। यदि स्युः। तदा तिष्ठेतेति पूर्वेणान्वयः। एतेन असम्भवत्वं सूचितम्।

उपसंहरति। बहुनेति।

**बहुनोक्तेन किं यूयं कश्चित्कालं स्थितीप्सवः।**
**यद्याश्रयेत सौहार्दं नो चेत्क्षिप्रं विनंक्ष्यथ ॥ ३७॥**

बहुनोक्तेन किं वाग्विस्तरेण किं प्रयोजनं न किमपीत्यर्थः। यूयं आशापोषितमानसाः अत एव अविवेकिनः भवन्तः। कश्चित्कालं यद्यपि दुरितबाहुल्यान्नष्टजीवितकालाः यूयम्। तथापि स्थितीप्सवो यदि जीवितुमिच्छा यदि सौहार्दमाश्रयेत। तथा नो चेत्। क्षिप्रं अचिरादेव विनंक्ष्यथ। सौहार्दावलम्बनमेव प्राणधारणोपायः। नान्यदित्याशयः।

इतीति।

**इत्युक्त्वा मन्दमधुरं पश्यन्सभ्यान्जनार्दनः।**
**लाक्षारुणाधराबद्धमौनमुद्रो व्यराजत ॥ ३८ ॥**

इति पूर्वोक्तप्रकारेण। उक्त्वा अभिधाय जनार्दनः श्रीकृष्णः। अत्र जनार्दन इत्यनेन स्वसङ्कल्पपूरणाय युद्धमेव कारयिष्यतीति सूच्यते। गाम्भीर्यधैर्यद्योतनाय मन्दमित्युक्तम्। कृपारसपूरितत्वान्मधुरमित्युक्तम्। सभ्यान् पश्यन्सन् लाक्षावदरुणः यः अधरः तेन बद्धा मौनस्य मुद्रा येन स तथोक्तस्सन् व्यराजत। मौनमङ्गीचकारेत्याशयः।

श्रीकृष्णस्योक्त्यनन्तरं भीष्मोक्तिप्रकारमाह। निशम्येति।

**निशम्य कृष्णवचनं हर्षाद्विष्णुपदीसुतः।**
**अब्रवीदभ्रगम्भीरं कृष्णपारम्यसत्तमम् ॥ ३९ ॥**

विष्णुपदीसुतः गङ्गापुत्रो भीष्मः। हर्षात् कृष्णवचनं कृष्णोक्तं सारार्थं निशम्य। अभ्रगम्भीरं यथा तथा मेघस्तनितगम्भीरं यथा तथा। कृष्णपारम्यसत्तमं अत्यन्तमुपादेयं श्रीकृष्णपारम्यं। अब्रवीत्।

श्रुतीति।

**श्रुतिवेद्योपि यद्दौत्यमङ्गीचक्रे च चक्रभृत्।**
**तदेव पाण्डुपुत्राणां धर्म्यं मार्गं प्रशंसति ॥ ४० ॥**

श्रुतिवेद्योपि वेदैकसमधिगम्योपि चक्रभृत् चक्रायुधधरः । एतेन कृष्णस्यैकस्यैव चतुरङ्गबलविशिष्टदुर्योधननाशकत्वं सूचितम्। दौत्यं दूतभावं वार्ताहरत्वमिति यावत्। अङ्गीचक्रे इति यत्। तदेव पाण्डुपुत्राणां धर्म्यं धर्मादनतिक्रान्तं मार्गं प्रशंसति प्रकटयतीत्यर्थः ।

अद्यापीति ।

**अद्यापि यदि राजायं शाठ्यमत्र प्रकाशयेत् ।**
**धनञ्जयोऽस्य वंशस्य भवेद्दावधनञ्जयः ॥ ४१ ॥**

अयं विप्रियकारी अस्मत्पुरो वर्ती राजा दुर्योधनः । अद्यापि पाण्डवानां धर्म्यवर्त्मश्रवणानन्तरमिदानीमपीत्यर्थः । अत्र पाण्डवविषये। यद्वा श्रीकृष्णविषये शाठ्यं गूढविप्रियकृत्वं वञ्चनामिति यावत्। प्रकाशयेद्यदि प्रकटयेच्चेत्। धनञ्जयः अर्जुनः अस्य वंशस्य कुरुकुलमेव वंशः वेणुबृन्दं तस्य। दावधनञ्जयः दावाग्निः सन्। भवेत्। सम्भावनायां लिङ्। कुरुवंशं भस्मीकरोतीति यावत्।

कलङ्किन इति ।

**कलङ्किनः कुले जातः कथंवायं सुयोधनः ।**
**अकलङ्कं कुलं कुर्याच्चेष्टते हि कुलोचितम् ॥ ४२ ॥**

कलङ्किनः चन्द्रस्य अपवादविशिष्टस्य च। कुले वंशे जातः समुत्पन्नः अयं अगणितकलङ्कः सुयोधनः। कुलं निजवंशं अकलङ्कं सत् कलङ्कविरहितं सत्। कथं वा कुर्यात् कथमपि कर्तुं न शक्नोतीत्याशयः । स्थाने हि। कुलोचितं निजवंशानुगुणं चेष्टते हि कार्यं करोति हि। निजकुलाचारं न त्यजतीत्याशयः।

राज्ञेति ।

**राज्ञा शिक्षा विधेया हि जगत्युत्पथगामिनाम् ।**
**राजा चेदुत्पथासक्तः कोदण्डयति तं तदा ॥ ४३ ॥**

जगति उत्पथगामिनां दुर्मार्गगामिनां। शिक्षा दण्डनं राज्ञा नृपालेन विधेया हि कर्तव्या- खलु। राजा अपराधिशिक्षकः नरपतिरेव उत्पथासक्तश्चेत् दुर्मार्गप्रवर्तको यदि भवेत्। तदा तं तादृशं नरपतिं कः दण्डयति ? न कोपि दण्डयतीत्यर्थः । तं कोदण्डयति कोदण्डवत् चापवत् करोति। कोदण्डं यथा बलान्नामयति तथेत्याशयः।

तेजस्वीति ।

**तेजस्विमण्डलवसुप्रापितात्मप्रकाशतः ।**
**पूर्णदोषाकरत्वं हि राज्ञात्र प्रकटीकृतम् ॥ ४४ ॥**

राज्ञा दुर्योधनेन चन्द्रेण च । अत्र अस्मिन्क्षितितले आकाशे च । तेजस्विमण्डलस्य पराभिभवनसामर्थ्यविशिष्टस्य पाण्डवपञ्चकस्य तेजोविशिष्टसूर्यमण्डलस्य च । वसुभिः द्रविणैः किरणैश्च । प्रापितः विवर्धितः आत्मनः स्वस्य प्रकाशः तेजोविशेषः कान्तिविशेषश्च तस्मात् । पूर्णदोषाकरत्वं अपरिमितानां दोषाणां आकरत्वं आवासस्थानत्वं पूर्णचन्द्रमण्डलत्वञ्च । प्रकटीकृतं हि प्रकाशितं हि । हीति प्रसिद्धौ । पाण्डवानां धनमादाय स्वयं वृद्धिमवाप्य अपरिमितदोषावासस्थानभूतो दुर्योधनोभवत् । चन्द्रोप्येवमेव सूर्यमण्डलात्पूर्णतया तेजोविशेषमवाप्य पूर्णमण्डलः दोषाकरो भवति । श्लेषालङ्कारः ।

शृणोतीति ।

**शृणोति यो हरेर्वाणीं हितामृतसुवर्षिणीम् ।**
**ऐहिकामुष्मिकसुखं तस्य नो चेन्नहि द्वयम् ॥ ४५ ॥**

यः मनुष्यः । हरेः श्रीकृष्णस्य हितामृतसुवर्षिणीं भाविसुखप्रदायिसुधां सुष्ठु वर्षतीति सुवर्षिणीं वाणीं । शृणोति कर्णपथं नयति । तस्य मनुष्यस्य ऐहिकामुष्मिकसुखं इहलोकसुखं परलोकसुखं च एतद्द्वयमपि भवति । नो चेत् तथा कर्णपथं न नयेच्चेत् द्वयं ऐहिकसुखमामुष्मिकसुखमपि नास्ति । इह हिताभिभाषी दुर्लभः । तस्मादवश्यं कृष्णवचनं श्रोतव्यमित्याशयः ।

अथ नारदोक्तिमाह । नारद इति ।

**नारदो नीरदारावगभीरं सारवर्षिणा ।**
**वचसा सान्त्वयामास धार्तराष्ट्रं ततो मनाक् ॥ ४६ ॥**

ततः भीष्मोक्त्यनन्तरं । नारदः नीरदारावगभीरं यथा तथा स्तनितगम्भीरं यथा तथा सारवर्षिणा सारार्थप्रतिपादकेन वचसा उपदेशरूपेण वचसा । धार्तराष्ट्रं दुर्योधनं मनाक् मन्दमिति यावत् । सान्त्वयामास ।

उक्तिक्रममाह । यदिति ।

**यन्मानसानुकूलोरुनिजाचारः कनद्वपुः ।**
**व्यनक्षि धार्तराष्ट्रत्वं कृष्णवर्णाविलाननः ॥ ४७ ॥**

त् यस्मात्कारणात् । मानसस्य मनसः मानससरोवरस्य च अनुकूलः स्फूर्तिप्रकारमिति यावत् अनुकूलं कूलमनुसृत्य उरु अत्यधिकं यथा तथा निजाचारः आत्मनः व्यवहारः यस्य स तथोक्तः आत्मनः आसमन्तात् चारः पर्यटनं यस्य स तथोक्तः । कनद्वपुः प्रकाशमानवर्णविशिष्टशरीरः । कृष्णवर्णाविलाननः कृष्णवर्णैः दुष्टाक्षरैः अथवा क्रूरवचनैः आविलं अनच्छं आननं आस्यं यस्य स तथोक्तः । कृष्णवर्णेन आविलं अनच्छं आननं चञ्चुपुटः यस्य स तथोक्तः । धार्तराष्ट्रत्वं धृतराष्ट्रपुत्रत्वं हंसत्वं च व्यनक्षि प्रकटयसि । श्लिष्टरूपकं ।

तदिति ।

**तद्ब्रवीमि हितं तेऽद्य नवजीमूतसन्निभम् ।**
**कृष्णन्तु जनसामान्यं मा जानीहि सुयोधन ॥ ४८ ॥**

त् तस्मात्कारणात् । ते शठाय तुभ्यं । हितं भाविसुखदायि वचनं ब्रवीमि । उक्तिक्रममाह सुयोधन, नवजीमूतसन्निभं नीलमेघश्यामं । एतेन सन्तापहृत्वं सूचितम् । कृष्णं र्वजनमनोनयनाकर्षणचणदिव्यमङ्गलविग्रहं वासुदेवं । तुस्तु भेदे । जनसामान्यं नुष्यसाधारणं । मा जानीहि । किन्तु पुरुषोत्तमं जानीहीत्यभिप्रायः ।

भवद्भाग्यविशेषादीदृशदर्शनप्राप्तिरित्याह । यद्वा भगवन्निर्हेतुककटाक्षेणेदृशदर्शन-प्तिरित्याह । सन्निरुद्धेति ।

**सन्निरुद्धेन्द्रियग्रामा योगीन्द्रा अप्यतन्द्रिताः ।**
**तेजोमात्रं निरीक्षन्ते नैवं पश्यन्त्यमुं सदा ॥ ४९ ॥**

तन्द्रिताः प्रमादालस्यादिदोषविरहिताः । सन्निरुद्धेन्द्रियग्रामाः सम्यक् बाह्यविषयानास-न्द्रियसमूहाः । योगीन्द्रा अपि योगिश्रेष्ठा अपि । तेजोमात्रं केवल तेजःपुञ्जं निरीक्षन्ते क्षात्कुर्वन्ति । एवं अस्मद्दृष्टिगोचरदिव्यमङ्गलविग्रहविशिष्टं अमुं अग्रे समुपविष्टं वासुदेवं दा अतिरोहिततया अनवरतमपि सुलभतया । न पश्यन्ति एतादृशदर्शनं तावत् न्निर्हेतुककृपाकटाक्षैकलभ्यमस्माभिरित्याशयः ।

तदेवोपपादयति । कारुण्येति ।

**कारुण्यैकनिधिश्श्रीमानयमेवं स्वयं प्रभुः ।**
**अस्मद्भाग्यविशेषाद्धि प्रददात्यात्मदर्शनम् ॥ ५० ॥**

मान् श्रियःपतिः । अयं वासुदेवः कारुण्यैकनिधिस्सन् हेतुगर्भविशेषणमिदं । कारुण्यैक धित्वाद्धेतोरित्यर्थः । प्रभुः सर्वेश्वरः । एतेन ब्रह्मरुद्रादीनामपि स्वामीति सूचितम् ।

अस्मद्भाग्यविशेषात्। स्वयं साक्षात्स्वयं। स्वयमित्यनेन स्वसङ्कल्पकल्पितात्मप्रदर्शनं सूचितम्। एवं च न चक्षुषा पश्यति कश्चिदेनं इत्यादि श्रुतिविरोधो नास्तीत्याशयः। एवं कृष्णरूपेण आत्मदर्शनं स्वस्य दिव्यमङ्गलविग्रहप्रदर्शनं। प्रददाति प्रकर्षेण ददाति। एतेन सौलभ्यसौशील्यगुणः प्रदर्शितः।

निर्वर्तयतीति।

**निर्वर्तयति कृष्णस्य यो वाणीं हितकारिणीम्।**
**तस्मिन्लक्ष्मीस्स्थिरा नित्यं सत्यमेतद्ब्रवीमि ते ॥ ५१ ॥**

यः मनुष्यः। कृष्णस्य हितकारिणीं भाविशुभप्रदायिनीं वाणीं निर्वर्तयति। तस्मिन् मनुष्ये। लक्ष्मीः सम्पत् स्थिरा सती अचला सती नित्यं अनवरतमपि वसति। एतत् इदं वचनं सत्यं ते आयुष्मते तुभ्यं ब्रवीमि। प्रलोभनार्थमिदं वचनं न। किन्तु सत्यमित्याशयः।

इतीति।

**इति निगदिता वाचश्श्रुत्वा क्रुधारुणवीक्षणः**
**क्षणमिव नतग्रीवो ग्रावातिरूक्षमना मनाक्।**
**कृतकहसितः पीठं क्षिप्रं व्युदस्य समुत्थितः**
**सरभसमगादन्तर्गेहं नृपस्सुहृदा समम् ॥ ५२ ॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणमहाकविविरचिते**
**अद्भुतदूताख्यकाव्यरत्ने**
**त्रयोदशस्सर्गः।**

इति पूर्वोक्तप्रकारेण। निगदिताः पूज्यैः प्रोक्ताः वाचः हितोक्तीः श्रुत्वा। क्रुधा रोषातिरेकेण अरुणवीक्षणः प्रकुपितनयनः नृपः दुर्योधनः। क्षणमिव क्षणकालमात्रं। नतग्रीवः सभ्यानां कृष्णपक्षपातित्वं चिन्तयन्नमितमस्तकस्सन्। ग्रावातिरूक्षमनास्सन् पाषाणवत्कठिनहृदयस्सन् मनाक् स्वल्पमेव। कृतकहसितस्सन् अवधीरणापिशुनकृत्रिममन्दहासस्सन्। क्षिप्रं तत्क्षणमेव पीठं स्वासनं व्युदस्य त्यक्त्वा। समुत्थितस्सन् सरभसं यथा तथा सुहृदा समं कर्णेन समं अन्तर्गेहं गृहाभ्यन्तरं। यद्वा अन्तरङ्गमन्त्रगृहं। अगात् निर्जगाम।

इति श्रीभगवल्लक्ष्मीदासानुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
त्रयोदशस्सर्गः।

॥ श्रीः ॥

# चतुर्दशस्सर्गः ।

कविरिदानीं चतुर्दशसर्गे भगवतो वासुदेवस्य विश्वरूपं वर्णयति । प्रथमं तावत्सभ्यानां भयमाह । निर्गतवतीति ।

**निर्गतवत्यथ कौरवनाथे**
**सभ्यवरा मुरवैरिकृताक्षाः ।**
**किन्नु करोति धराधिप एष**
**क्रुद्ध इति द्विगुणं भयमापुः ॥ १ ॥**

कौरवनाथे दुर्योधने निर्गतवति सभां परित्यज्य गतवति सति । अथ अनन्तरं सभ्यवराः सभास्ताराः। मुरवैरिकृताक्षास्सन्तः श्रीकृष्णमेव पश्यन्तस्सन्तः। क्रुद्धः अमर्षितः एषः कृत्याकृत्यविवेकरहितः धराधिपः राज्यैश्वर्यमत्तः दुर्योधनः। किन्नु किंवा करोति आचरति इति द्विगुणं अत्यधिकं भयमापुः । कृष्णस्य क्षतिर्माभूदित्याशयेन भीता बभूवुरित्याशयः ।

श्रीकृष्णस्य धैर्यातिशयमाह । द्रागिति ।

**द्रागथ तत्सहजो निरगात्तं**
**द्रष्टुमनाश्शकुनिः प्रययौ च ।**
**शाठ्यमवेक्ष्य हरिस्स्वयमेषा-**
**मन्तरभूत्प्रहसन्नचलाङ्गः ॥ २ ॥**

अथ दुर्योधननिर्गमनानन्तरं । तत्सहजः दुर्योधनस्यानुजः दुश्शासनः। द्राक् तत्क्षणमेव तं दुर्योधनमनुसृत्य निरगात् सभां परित्यज्य निर्गच्छतिस्म । शकुनिश्च मातुलश्शकुनिरपि द्रष्टुमनास्सन् एते किं कुर्वन्ति पश्यामः इति दिदृक्षया प्रययौ दुर्योधनान्तिकं प्रकर्षेण ययौ। एषां दुष्टचतुष्टयस्येत्यर्थः । शाठ्यं गूढविप्रियकरत्वं अवेक्ष्य हरिः श्रीकृष्णः स्वयं अन्तः मनस्येव । प्रहसन्सन् अचलाङ्गस्सन् निर्भयतया निष्कम्पगात्रस्सन् अभूत् ।

दुर्योधनदुर्नीतिमाह । कर्णेति ।

**कर्णसमेधितमन्त्रविशेषः**
**क्ष्मापतिराशु समेत्य सभां ताम् ।**

स्वानुजमायतरज्जुकरं तं
बन्धनमस्य समादिशदुच्चैः ॥ ३ ॥

कर्णेन समेधितः वृद्धिं प्रापितः समेधित इत्यनेन प्रथममेव दुर्योधनस्य मनसि शाठ्यं धूमायमानमासीत् तदिदानीं कर्णेन सन्धुक्षितमिति सूच्यते । मन्त्रविशेषः श्रीकृष्ण-बन्धनरूपगुप्तचिन्तनं यस्य सः । क्ष्मापतिः दुर्योधनः । तां कृष्णालङ्कृतां सभां आशु मन्त्रश्रवणसमनन्तरमेव समेत्य आयतरज्जुकरं दीर्घतरदामपाणिं तं निजादेशनिर्वर्तनशीलं स्वानुजं निजभ्रातरं दुश्शासनं। उच्चैः सभास्तारश्रवणपथप्रवेशप्रगल्भं यथा तथा। अस्य पुरोवर्तिनः कृष्णस्य बन्धनं नियन्त्रणं समादिशत् निर्भयमादिशदित्यर्थः ।

कर्णेति ।

कर्णपुटप्रविभेदनमेत-
त्ते तु निशम्य सविस्मयमूचुः ।
श्रोत्रपुटाहितपाणितला द्रा-
ग्धिग्धिगिति प्रभुमात्मसु सभ्याः ॥ ४ ॥

ते श्रुतदुर्योधनवचनाः सभ्यास्तु सन्मार्गैकसक्तास्सभास्तारास्तु । कर्णपुटप्रविभेदनं श्रोत्रेन्द्रियविदारणं एतत् दुर्योधनस्य कठोरं वचनं निशम्य सविस्मयं यथा तथा साश्चर्यं यथा तथा । श्रोत्रपुटाहितपाणितलास्सन्तः करयुगलतलपिहितश्रवणपुटास्सन्त इत्यर्थः । आत्मसु मनस्सु द्राक् श्रवणसमनन्तरमेव। प्रभुं दुर्योधनं धिक् धिक् इति ऊचुः अब्रुवन्।

तदा सात्यकेः कोपकार्यमाह । रोषेति ।

रोषकषायितनेत्रसरोज-
स्तीक्ष्णतरासिकरो युयुधानः ।
हन्म्यचिरादधुना शठमेनं
पापिनमित्युदतिष्ठदचाल्यः ॥ ५ ॥

युयुधानः सात्यकिः । रोषेण अमर्षातिशयेन कषायितं कलुषीकृतं पाटलीकृतमिति यावत्। नेत्रसरोजं कमलसदृशं नयनं यस्य स तथोक्तस्सन् । तीक्ष्णतरः अत्यन्तनिशितः असिः खड्गः करे यस्य स तथोक्तस्सन् । अधुना इदानीमेव शठमेनं वञ्चनैकतानं पापिनं पुरोवर्तिनं पापात्मकं दुर्योधनं। हन्मि प्राणैर्वियोजयामि । इति एवं निगदन्नित्यर्थः। अत एव अचाल्यस्सन् कृष्णेनापि निवारयितुमशक्यस्सन्नित्यर्थः । अचिरात् तत्क्षणमेव उदतिष्ठत्।

तदा कृष्णकृततन्निरोधमाह । मन्देति ।

**मन्दमनोहरहासमुखाब्जः**
**तत्करमाश्ववलम्ब्य मुकुन्दः ।**
**सम्भ्रम एष तवाद्य किमर्थं**
**फेरुवधाय हरेः किमु यत्नः ॥ ६ ॥**

मुकुन्दः श्रीकृष्णः । मन्दमनोहरहासमुखाब्जस्सन् स्पृहणीयमन्दहासगम्भीरमुखकमलस्सन् एतेन दुर्योधनप्रभृतीनां तृणीकृतत्वं सूचितम् । आशु तत्क्षणमेव तत्करं सात्यकिपाणिं अवलम्ब्य गृहीत्वा । अद्य इदानीं तव गम्भीरप्रकृतेस्तव । किमर्थं एष सम्भ्रमः त्वरातिशयः आवेग इति यावत् । हरेः सिंहस्य फेरुवधाय जम्बुकहननाय यत्नः किमु यत्नापेक्षापि नास्तीत्याशयः । औदास्येन पादन्यासमात्रेण जम्बुको निहन्यते खल्विति भावः ।

इतीति ।

**इत्यभिधाय बलादुपवेश्य**
**क्रुद्धममुं निजगाद मुरारिः ।**
**आगतवानहमेक इदानीं**
**बन्धनभाजनमस्मि तथास्तु ॥ ७ ॥**

मुरारिः मुरासुरनिहन्ता श्रीकृष्णः । एतेन मुरपाशविमोचनशक्तस्यास्य दुश्शासनक्रियमाणं बन्धनं तावन्न कार्यकारीति सूचितम् । इति पूर्वोक्तप्रकारेण अभिधाय व्याहृत्य क्रुद्धं रोषाविष्टं अमुं सात्यकिं । बलात् बलात्कारेण उपवेश्य निजगाद उवाच । उक्तिप्रकार-माह । आगतवानिति । इदानीं अहमेक एव असहाय इत्यर्थः । आगतवान् । अत एव बन्धनभाजनमस्मि नियन्त्रणपात्रमस्मि । तथास्तु दुर्योधनाशयप्रकार एवास्त्वित्यर्थः ।

इतीति ।

**इत्यचिराद्यदुराङ्कृतहासः**
**तत्र ससर्ज निरन्तरभासः ।**
**विस्मयमीलितपक्ष्मपुटास्ते**
**संसदि सर्वजनाः क्षणमासन् ॥ ८ ॥**

इति पूर्वोक्तप्रकारेण। उक्त्वेति शेषः। अचिरात् तत्क्षणमेव यदुराट् श्रीकृष्णः कृतहासस्सन् विरचिताट्टहासस्सन्। तत्र सभायां निरन्तरभासः निबिडतरतेजोविशेषान् ससर्ज उत्पादयामास। संसदि सभायां ते कृष्णदर्शनैकतत्पराः सर्वजनाः सर्वशब्देन दुर्योधनप्रभृतयोपि सङ्गृहीताः। विस्मयेन आश्चर्यातिशयेन मीलितपक्ष्मपुटास्सन्तः तेजोविशेषाभिभूतनयनास्सन्त इत्यर्थः। क्षणं क्षणकालं आसन्।

दुर्योधनप्रभृतीनां मौढ्यमाह। अत्रेति।

**अत्र मुकुन्द इहाम्बुजनेत्रः**
**कृष्ण इहेति सुयोधनमुख्याः।**
**आत्मन एव परस्परमारा-**
**त्स्तम्भतटेष्वचिरान्निबबन्धुः ॥ ९ ॥**

सुयोधनमुख्याः कर्णदुश्शासनादयः। अत्र मम पुरत एव मुकुन्दः। इह मम पुरत एव अम्बुजनेत्रः पुण्डरीकाक्षः। इह तत्र न हि मत्पुरत एवेत्यर्थः। कृष्णः वर्तते इति शेषः। इति एवं रीत्या। परस्परं अन्योन्यं आत्मन एव स्वकानेव आरात् समीपे विद्यमानेषु स्तम्भतटेषु। अचिरात् अतित्वरिततया निबबन्धुः नितरां बबन्धुः। एतेन कृष्णवैभवं प्रदर्शितम्।

सभ्योक्तिमाह।

**हन्त महामहिमातिशयोऽयं**
**वक्त्रसहस्रसमुद्गिरदग्निः।**
**श्रीपतिराशु विवर्धितगात्रो**
**भाति सहस्रभुजो जगदाढ्यः ॥ १० ॥**

अयं श्रीकृष्णः। महामहिमातिशयः निरवधिमाहात्म्यविशिष्टः। कथमिति चेत् वक्त्रसहस्रेण समुद्गिरन् अग्निः ज्वलनज्वालामाला यस्य स तथोक्तः। श्रीपतिः वक्षस्थलप्रकाशितलक्ष्मीकः। आशु क्षणमात्रेण विवर्धितगात्रः वृद्धिं प्रापितदिव्यमङ्गलविग्रहः। सहस्रभुजः शाखोपशाखबाहुसहस्र इत्यर्थः। जगदाढ्यः भुवनव्यापी भाति प्रकाशते। एतेन सहस्रशीर्षापुरुषः इत्यादिपुरुषसूक्तार्थः प्रकटीकृतः। विश्वरूपमुक्तं भवति।

तदा धृतराष्ट्रप्रार्थनामाह। इत्थमिति।

**इत्थमुदीरितमादरतोऽन्ध-**
**स्सभ्यगणैरवकर्ण्य भयार्तः।**

**देहि दयैकनिधे नयने मे**
**त्वद्विनिभालनतस्सुकृती स्याम्** ॥ ११ ॥

अन्धः जन्मतः अक्ष्णा काणः धृतराष्ट्रः । इत्थं पूर्वोक्तप्रकारेण सभ्यगणैः तत्रत्यैः सर्वैरपि समास्तारैः । उदीरितं अभिहितं भाषितं आदरतः प्रीत्यतिशयेन । अवकर्ण्य सम्यक् श्रुत्वा भयार्तस्सन् स्वपुत्रस्य किं वा भविष्यतीति भयपीडितस्सन् । हे दयैकनिधे, कृतमपराधमखिलमपि विस्मृत्य करुणया रक्षणैकशीलेत्यर्थः । मे जात्यन्धाय मह्यं । नयने भवद्दर्शनयोग्ये चक्षुषी देहि । त्वद्विनिभालनतः भवद्रूपावलोकनेन सुकृती स्यां धन्यो भवेयम् ।

याचित इति ।

**याचित एवमदादथ नेत्रे**
**यादवराडचिरात्कुरुनेत्रे ।**
**विस्मयसिन्धुनिमग्नमना द्रा-**
**ग्विस्तृतचक्षुरुवाच स राजा** ॥ १२ ॥

एवं पूर्वोक्तप्रकारेण । याचितः धृतराष्ट्रेण प्रार्थितः । एतेन प्रार्थनामन्तरा पुरुषार्थत्वं न सम्भवतीति सूचितम् । यादवराट् श्रीकृष्णः । अथ प्रार्थनानन्तरं कुरुनेत्रे धृतराष्ट्राय । नेत्रे चक्षुषी अचिरात् क्षिप्रमेव । एतेन कालविलम्बासहिष्णुत्वं सूचितम् । अदात् । सः लब्धचक्षुः राजा धृतराष्ट्रः । द्राक् विस्तृतचक्षुस्सन् विस्फारितनयनस्सन्नित्यर्थः । विस्मयसिन्धुनिमग्नमनास्सन् निरतिशयानन्दप्रफुल्लहृदयस्सन्नित्यर्थः । उवाच ।

उक्तिप्रकारमाह । धन्यतम इति ।

**धन्यतमो भगवन्न मदन्यो**
**दृष्टमिदं तव रूपमहो यत् ।**
**चक्षुरपि प्रथमं भवतेदं**
**दत्तमभूत्सफलीकृतमद्य** ॥ १३ ॥

भगवन् षाड्गुण्यविशिष्ट श्रीकृष्ण, मदन्यः अस्मदपेक्षया अन्यः धन्यतमः अत्यन्तभाग्यवान् । नास्ति । अहो मद्धन्यत्वमनुचिन्त्याश्चर्यम् । यत् यस्मात्कारणात् । इदं विश्वात्मकं तव रूपं मया दृष्टम् । अद्य विश्वरूपप्रदर्शनावरे भवता कृपालुना त्वया दत्तं मत्प्रार्थनानुसारेण वितीर्णं इदं चक्षुरपि प्रथमं इतरहेयवस्तुदर्शनात्पूर्वमेव । सफलीकृतं भवत्साक्षात्कारेण असफलमिदानीं सफलं जातमित्यर्थः ।

पश्येति ।

पश्य सुयोधन कृष्णममेयं
विश्वशरीरिणमद्भुतरूपम् ।
शङ्खरथाङ्गगदाकरवाला-
द्युज्ज्वलहेतिविराजितबाहुम् ॥ १४ ॥

हे सुयोधन, श्रीकृष्णं मनुष्यसाधारणं मन्वान दुर्योधन, अमेयं इयत्त्वेन मातुमयोग्यं विश्वशरीरिणं चराचरात्मकजगच्छरीरकं । अत एव अद्भुतरूपं अत्याश्चर्यकरस्वरूपं शङ्खरथाङ्गगदाकरवालाद्युज्ज्वलहेतिविराजितबाहुं शङ्खचक्रकौमोदकी-नन्दकप्रभृतिसमुज्ज्वलदिव्यायुधदेदीप्यमानभुजसहस्रं । कृष्णं वासुदेवं पश्य दृष्ट्वा धन्यो भवेत्याशयः ।

तामरसेति ।

तामरसोपमनेत्रयुगं त-
त्क्वापि गतं मधुराकृति हन्त ।
भ्रामिततारकविस्फुरदग्नि-
स्फीतदृगालिरभूद्वदनेषु ॥ १५ ॥

मधुराकृति दृगासेचनकमित्यर्थः । तत् श्रुतिप्रसिद्धं तामरसोपमनेत्रयुगं पुण्डरीकाक्षत्व-मित्यर्थः । क्वापि गतं कुत्रापि लीनम् । हन्तेति आश्चर्ये । भ्रामिताः परितः समुद्भ्रामिताः तारकाः कनीनिकाः यस्मिन्कर्मणि तद्यथा भवति तथा विस्फुरन्तः समुज्वलन्तः अग्नयः अनलज्वालामालाः यस्यां सा स्फीतदृगालिः अतिविततलोचनपङ्क्तिः वदनेषु सहस्रसंख्याकमुखेषु । अभूत् आविर्बभूव ।

नेत्रेति ।

नेत्रततिर्ज्वलनोज्वलरूपा
वक्त्रगुहोद्गलदग्निशिखानाम् ।
निस्तलधूमकरम्बितदीप्त-
स्फीतदवानललोलकणाभा ॥ १६ ॥

नेत्रततिः नयनानां सहस्रपरम्परा । ज्वलनवत् अग्निवत् उज्वलरूपा सती तेजोरूपा सती वक्त्रगुहाभ्यः गुहासदृशवदनेभ्यः । यद्वा वक्त्राण्येव गुहाः ताभ्यः उद्गलन्त्यः ऊर्ध्वं

प्रसरणशीलाः याः अग्निशिखाः तासां निस्तलाः वर्तुलाः ये धूमाः तैः करम्बिताः व्याप्ताः दीप्ताः उज्वलाः स्फीताश्च पृथुलतराः च दावानलानां लोलकणाः चलाचलस्फुलिङ्गाः तदाभा तत्सदृशा । उपमा ।

हीरेति ।

**हीरमणिप्रचुरोच्चकिरीटाः**
**वक्त्रपरम्परिकाः प्रविभान्ति ।**
**काञ्चनपर्वतरत्नमयोच्च-**
**प्रस्फुटशृङ्गगणा इव सान्द्राः ॥ १७ ॥**

हीरमणिभिः वज्राख्यरत्नैः प्रचुराणि व्याप्तानि उच्चकिरीटानि यासां ताः । वक्त्रपरम्परिकाः मुखराजयः । सान्द्राः निबिडाः काञ्चनपर्वतस्य मेरोः रत्नमयानि रत्नप्रचुराणि उच्चप्रस्फुट-शृङ्गाणि समुन्नतविशदतरशिखराणि तेषां गणा । इव प्रविभान्ति ।

वारीति ।

**वारिधरासितलम्बिशिरोजा**
**वेगिसमीरणपृष्ठविनुन्नाः ।**
**उज्वलवक्त्रविभावसुजाता**
**धूमगणा इव भान्त्यतिजिह्माः ॥ १८ ॥**

वारिधरा इव मेघा इव असिताः नीलाः लम्बिनश्च लम्बमानाश्च शिरोजाः चिकुराः वेगेन समीरणेन वायुना पृष्ठप्रदेशं प्रति विनुन्नाः विशेषेण प्रापितास्सन्तः । उज्वलानि भासुराणि यानि वक्त्राणि वदनानि तान्येव विभावसवः अग्नयः तेभ्यो जाताः समुत्थिताः अतिजिह्माः कुटिलतराः धूमगणा इव धूमसमूहा इव । भान्ति ।

विस्तृतेति ।

**विस्तृतरन्ध्रजुषो ननु घोणा**
**मादृशपापिनिषूदनक्लृप्ताः ।**
**दीर्घतरा विलसन्ति शतघ्नी-**
**पंक्तिपरम्परिका इव घोराः ॥ १९ ॥**

विस्तृतानि अमर्षातिशयेन विततीकृतानि रन्ध्राणि श्वभ्राणि जुषः प्राप्ताः । तादृशरन्ध्र-विशिष्टा इति यावत् । घोणाः नासाः । मादृशपापिनिषूदनक्लृप्ताः निरन्तरापराधपरम-

त्सदृशपापिहननार्थं विनिहिताः । दीर्घतराः अत्यन्तं दीर्घाः घोराः भयङ्कराः । शतघ्नीपंक्ति-परम्परिका इव नलिकाविशेषराजिपरम्परा इव । विलसन्ति ।

कुण्डलेति ।

कुण्डलपंक्तिरमन्दमरीचि-
लम्बशिरोरुहमध्यविलोला ।
वारिधरान्तरविष्फुरिताङ्गी
भात्युडुपंक्तिरिवाक्षिपिधात्री ॥ २० ॥

लम्बशिरोरुहाणां चरमाङ्गपर्यन्तं प्रसरणशीलानां चिकुराणां मध्यदेशे विलोला डोलायमाना । श्रवणपुटचरमदेशे प्रसृमरतया चिकुराणां मध्यविलोलेत्युक्तम् । अमन्द-मरीचिः अपरिमितकिरणमण्डलपरीता कुण्डलपंक्तिः कर्णवेष्टनपरम्परा । वारिधराणां मेघानां अन्तरं अवकाशः तस्मिन् विष्फुरितं तरलतरं अङ्गं यस्यास्सा । अत एव अक्षिपिधात्री नयनप्रतिहतिक्षमा । उडुपंक्तिरिव नक्षत्रपरम्परेव । भाति ।

सृक्केति ।

सृक्कयुगातिशिताच्छसुदंष्ट्रा
मध्यललद्रसनाः प्रविभान्ति ।
अद्रिगुहोभयपार्श्वझरीप्सा
स्पन्दनपीवरवाहसकल्पाः ॥ २१ ॥

सृक्कयुगेषु वदनप्रान्तप्रदेशयुगलेषु अतिशिताः आसमन्तात्तीक्ष्णाः अच्छाश्च धवलाश्च सुदंष्ट्राः तासां मध्येषु ललन्त्यः चलाचलाः रसनाः जिह्वाः । अद्रेः पर्वतस्य गुहोभयपार्श्वे दरीप्रान्तप्रदेशे या झरी गिरिनदीप्रवाहः तस्याः ईप्सा प्राप्तुमिच्छा तया स्पन्दनः चञ्चलः पीवरश्च पृथुलतरश्च यः वाहसः अजगरः तत्कल्पाः तत्सदृशाः । प्रविभान्ति ।

कानिचिदिति ।

कानिचिदब्जसमानरुचीनि
स्वर्णमयान्यतसीसुमभांसि ।
कैरववर्णनिभानि विभान्ति
भ्रमरुचीनि मुखानि पृथूनि ॥ २२ ॥

कानिचिन्मुखानि अब्जसमानरुचीनि कमलसदृशवर्णानि । कानिचिन्मुखानि स्वर्णमयानि कनकप्रभाणि । कानिचिन्मुखानि अतसीसुमभांसि अतसीकुसुमवर्णानि । कानिचिन्मुखानि

कैरवनिभानि कैरवकुसुमवद्धवलानि । कानिचिन्मुखानि अभ्ररुचीनि धूम्रवर्णानि । पृथूनीति सर्वत्रान्वेति । विभान्ति ।

पङ्कजेति ।

पङ्कजपीठमुखास्सुरसङ्घाः
सिद्धगणा मरुतः पितरश्च ।
किन्नरचारणयक्षपुमांसः
वक्षसि सम्प्रति ते विहरन्ति ॥ २३ ॥

पङ्कजपीठमुखाः चतुर्मुखप्रमुखाः सुरसङ्घाः देवसमूहाः । सिद्धगणाः योगादिना सिद्धिं प्राप्ताः । यद्वा देवविशेषगणाः । सप्तमरुतः पितरश्च पितृदेवताः च । किन्नरचारणयक्षाः एते देवविशेषाः । पुमांसः मध्यमलोकवासिनः जनाश्च । सम्प्रति मद्दर्शनावसरे । ते भवतः वक्षसि विशाले वक्षस्स्थले । विहरन्ति क्रीडन्तीत्यर्थः ।

द्वीपीति ।

द्वीपितरक्षुमृगेन्द्रगजादि-
क्रूरमृगाकुलपर्वतसान्द्रैः ।
शैवलिनीसरसीरमणीयैः
कुक्षिरियं निचिता विपिनैश्च ॥ २४ ॥

द्वीपिनः शार्दूलाः तरक्षवः भल्लूकाः मृगेन्द्राः सिंहाः एतत्प्रभृतिभिः क्रूरमृगैः घातुकमृगैः आकुलाः व्याप्ताः ये पर्वताः तैस्सान्द्राणि निबिडानि तैः । शैवलिन्यः नद्यः सरस्यः सरोवराणि एतैः रमणीयानि दर्शनीयानि तैः । विपिनैश्च घोरारण्यैश्च । इयं भवदीया परिदृश्यमाना कुक्षिः जठरस्थलं । निचिता व्याप्ता ।

मीनेति ।

मीनतिमिङ्गिलराघवमुख्यैः
प्राणिभिराकुलितोदरदेशाः ।
स्फीततरङ्गकुलाहततीराः
भान्ति सरित्पतयः कटिदेशे ॥ २५ ॥

मीनाः विचित्रविविधपृथुलतरझषाः तिमिङ्गिलाः तादृशमीनगिलनपटुपर्वताकारभयङ्कर-मीनविशेषाः राघवाः तादृशतिमिङ्गिलगिलनदक्षाः अद्भुतभयङ्कराकाराः प्राणिविशेषाः

एतत्प्रभृतिभिः प्राणिभिः आकुलितोदरदेशाः आन्दोलितजठरप्रदेशाः । स्फीततरङ्गकुलैः कल्लोलपरम्पराभिः आहतं अस्फालितं तीरं येषां ते । सरित्पतयः सप्तसमुद्राः । कटिदेशे अवलग्नप्रदेशे । भान्ति ।

हास्तिनेति ।

हास्तिनपत्तनमत्र तदन्त-
वासिजनाश्च सभापि मदीया ।
सभ्यगणा भगवान्यदुनाथ-
स्सन्ति वपुष्यहमप्युदिताक्षः ॥ २६ ॥

अत्र वपुषि अस्मिन् श्रीकृष्णशरीरे । हास्तिनपत्तनं मदीयं नगरं । तदन्तर्वासिजनाश्च मदीयपुरवासिन्यः समस्ताः प्रजाश्च । मदीया सभापि इयं सभापि । सभ्यगणाः अत्रत्यास्सभास्ताराश्च । भगवान्यदुनाथोपि षड्गुणपरिपूर्णः दिव्यमङ्गलविग्रहविशिष्टः पुरुषोत्तमः श्रीकृष्णोपि । उदिताक्षः प्रादुर्भूतनयनः अहमपि पापिष्वग्रगण्यः । एते सर्वेपि । सन्ति ।

विश्लथेति ।

विश्लथलोलशिरोरुहभाजा
बाष्पजलाविलगण्डजुषा च ।
दैन्यविनामितमञ्जुलमूर्ध्ना
पाण्डुसुतानिह यज्ञभुवेक्षे ॥ २७ ॥

विश्लथलोलशिरोरुहभाजा शिथिलविस्तृतचलाचलचिकुरया । बाष्पजलाविलगण्डजुषा विगलदश्रुकलुषितकपोलया । दैन्यविनामितमञ्जुलमूर्ध्ना दीनभावावनमितमनोहरमस्तकया यज्ञभुवा सह । द्रौपद्या सह । पाण्डुसुतान् पाण्डवान् । इह वपुषि । ईक्षे पश्यामि ।

दिगिति ।

दिक्करिणोत्र विचित्रशरीरा-
न्व्यालपतिं धवलोज्वलभोगम् ।
निश्चलशीर्षतटोद्धृतलोका-
न्सक्थितटे भगवन्नहमीक्षे ॥ २८ ॥

हे भगवन्, हे कृष्ण, अत्र सक्थितटे भवदीयोरुदेशे । विचित्रशरीरान् अद्भुतदेहान् दिक्करिणः दिग्गजान् । धवलोज्वलभोगं शुद्धतरदेदीप्यमानशरीरं व्यालपतिं आदिशेषं

एतान् निश्चलशीर्षतटोद्धृतलोकान् स्थिरतरमस्तकसमुद्धृतभुवनान् । अहं जात्यान्धोऽप्यहं वीक्षे पश्यामि ।

क्षेत्रमिति ।

क्षेत्रमहो कुरुसंज्ञकमत्र
स्फीततलं चतुरङ्गबलाढ्यैः ।
शस्त्रकरैर्मदमत्तनरेन्द्रै-
र्व्याकुलितं लसति प्रथनार्थम् ॥ २९ ॥

चतुरङ्गबलाढ्यैः गजरथतुरगपदातिसैन्यपरिपूर्णैः । शस्त्रकरैः विविधविचित्रायुधपाणिभिः मदेन मत्ताः कृत्याकृत्यविवेकशून्याः ये नरेन्द्राः राजानः तैः । प्रथनार्थं युद्धाय व्याकुलितं व्याप्तं कुरुसंज्ञकं स्फीततलं विशालतलं क्षेत्रं । अत्र श्रीकृष्णशरीरे । लसति प्रकाशते ।

पार्थेति ।

पार्थरथादवतीर्य मुकुन्द-
स्सारथिरेष विवर्धितदेहः ।
ईदृशमेव विदर्शयतीह
स्पष्टमहो निजरूपममेयम् ॥ ३० ॥

एषः अत्र परिदृश्यमानः मुकुन्दः श्रीकृष्णः । सारथिस्सन् अर्जुनरथ्यप्रचालने सूतस्सन् पार्थरथात् अर्जुनस्य स्यन्दनात् । अवतीर्य रणाङ्कणे स्थित्वा । विवर्धितदेहस्सन् नभस्थल-पर्यन्तं प्रांशुस्सन् । इह अस्मिन्देहे । अमेयं मानातीतं ईदृशमेव अद्य परिदृश्यमानदिव्य-मङ्गलविग्रहसदृशमेव । निजरूपं आत्मनः विश्वरूपं सहस्रशीर्षं सहस्राक्षं सहस्रपादं एतादृशविराड्रूपं इत्यर्थः । स्पष्टं यथा तथा असम्बाधं यथा तथेत्यर्थः । विदर्शयति विशेषेण दर्शयति । अहो अत्याश्चर्यम् । एतेन आगामिकार्यं सूचितम् ।

हन्तेति ।

हन्त हतस्सुरसिन्धुतनूजः
फल्गुनतीक्ष्णशरेण सुविद्धः ।
कुम्भभवोऽपि हतो बत धृष्ट-
द्युम्नकरासिलताविनिकृत्तः ॥ ३१ ॥

फल्गुनतीक्ष्णशरेण अर्जुननिशितबाणेन। सुविद्धः सुष्ठु विद्धः सुरसिन्धुतनूजः गङ्गापुत्रः भीष्मः हतः। हन्तेति खेदे। धृष्टद्युम्नस्य करे पाणौ विद्यमाना या असिलता लतासदृशखड्गः तया विनिकृत्तः हत इत्यर्थः। कुम्भभवोपि द्रोणाचार्योपि। अपिना भीष्मद्रोणयोः वीराग्रगण्यत्वं सूचितम्। हतः निषूदितः। बतेत्याश्चर्ये। मनसाप्यचिन्तितं द्रोणस्य निधनमिदानीं मया साक्षाद्दृष्टमित्याश्चर्यम्।

हन्तेति।

**हन्त सुयोधनसोदरमाजौ**
**केशविकर्षणदूषितमत्र ।**
**मारुतिराशु निपात्य विदार्य**
**स्फीतमुरः पिबति क्षतजौघम् ॥ ३२ ॥**

अत्र श्रीकृष्णशरीरे। मारुतिः भीमः। आजौ युद्धे केशविकर्षणदूषितं द्रौपदीकेशपाशपरिकर्षणेन लोकनिन्दितं। यद्वा पापिष्ठं सुयोधनसोदरं दुश्शासनं। आशु क्षिप्रम्। आश्वित्यनेन अनायासस्सूचितः। निपात्य स्फीतं मांसलमित्यर्थः। उरः वक्षस्स्थलं विदार्य द्विधा कृत्वा। क्षतजौघं रुधिरप्रवाहं। पिबति।

अद्भुतमिति।

**अद्भुतमेतदिहार्यमसूनु-**
**श्श्वेतहयार्पितबाणचिताङ्गः ।**
**स्यन्दनतः परिघूर्णितनेत्रो**
**द्राक्पतति प्रगलत्करचापः ॥ ३३ ॥**

इह श्रीकृष्णशरीरे। अर्यमसूनुः कर्णः। श्वेतहयेन अर्जुनेन अर्पिताः प्रयुक्ताः ये बाणाः तैः चिताङ्गस्सन् व्याप्तावयवस्सन्। परिघूर्णितनेत्रस्सन् प्राणात्ययावसरयातनाकार्यमेतत्। प्रगलत्करचापस्सन् करात्प्रभ्रष्टशरासनस्सन्। स्यन्दनतः रथात् द्राक् पतति।

मारुतिरिति।

**मारुतिरुग्रगदायुध एष**
**प्रस्फुटघूर्णितशोणकटाक्षः ।**
**स्फूर्जथुघोररवोपमहस्ता-**
**स्फोटन एति जवादित एव ॥ ३४ ॥**

एषः इदानीमग्रे परिदृश्यमानः। मारुतिः भीमः। उग्रगदायुधस्सन् शत्रुभयङ्करगदापाणिस्सन्। प्रस्फुटः विस्तारितः घूर्णितश्च परिभ्रामितश्च शोणकटाक्षस्सन् रक्तापाङ्गवीक्षणस्सन् स्फूर्जथुघोररवोपमं शम्पाजर्झरध्वानसदृशं हस्तास्फोटनं परस्परकरसंघट्टनसमुत्पन्नः ध्वानः यस्य स तथोक्तस्सन्। इत एव जवादेति त्वरितगमनस्समभिगच्छति।

पुत्रमिति।

**पुत्रमुपेत्य गदायुधमारा-**
**द्भ्रामितघोरगदो वृककुक्षिः।**
**चित्रगतिस्सुचिरं प्रतियुध्य-**
**न्सक्थियुगे गदया विभिनत्ति ॥ ३५ ॥**

वृककुक्षिः भीमः। भ्रामितघोरगदस्सन् परिभ्रामितभयङ्करगदायुधस्सन्। गदायुधं गदापाणिं पुत्रं दुर्योधनं। उपेत्य आरात् समीपे चित्रगतिस्सन् नानाविधगमनविशेषस्सन् सुचिरं दीर्घकालं प्रतियुध्यन् गदया परिभ्रामितया गदया सक्थियुगे ऊरुयुगे। विभिनत्ति विदारयति।

भग्नेति।

**भग्नपृथूरुतया वसुमत्यां**
**हन्त विवेष्टितधूसरशीर्षः।**
**वेदनया भृशभङ्गुरफाल-**
**स्संलुठति प्रथितो मम पुत्रः ॥ ३६ ॥**

प्रथितः शौर्यातिशयेन जगद्विख्यातः। मम पुत्रवात्सल्यैकायत्तचित्तस्य मे पुत्रः सार्वभौमो दुर्योधनः। भग्नपृथूरुतया सञ्चूर्णितपृथुलसक्थितया। विवेष्टितधूसरशीर्षस्सन् परिलुठितधूलिधूसरितमस्तकस्सन्। वेदनया बाधातिरेकेण भृशं अत्यधिकं भङ्गुरफालस्सन् भ्रूकुटितवलितरङ्गितललाटफलकस्सन्। वसुमत्यां भूतले संलुठति परिवेष्टते। हन्तेति खेदे।

एवं धृतराष्ट्रः भगवतो विराट्स्वरूपं निर्वर्ण्य तदुपसंहारं प्रार्थयते। द्रागिति।

**द्रागुपसंहर रूपमिदं ते**
**द्रष्टुमहं भगवन्न समर्थः।**
**दत्तमिदं नयनं च गृहाण-**
**त्वद्विनिभालनतः कृतकृत्यम् ॥ ३७ ॥**

हे भगवन्, हे षड्गुणपरिपूर्ण कृष्ण, ते तव इदं रूपं परिदृश्यमानं विश्वरूपं। द्राक् शीघ्रमेव उपसंहर। अहं मनुष्यसाधारणोहं। द्रष्टुं समर्थस्सन् दक्षस्सन् न भवामि। त्वद्विनिभालनतः भवद्विश्वरूपावलोकनात्। कृतकृत्यं कृतार्थं भवता दत्तं कृपया वितीर्णं इदं नयनं च भवद्दर्शनयोग्यं लोचनं च। गृहाण अङ्गीकुरु।

इतीति।

**इत्यभिधाय कृताञ्जलिमन्धं**
**यादवराडवदत्स्मयमानः।**
**संहृतमेव मयाद्भुतमेत-**
**द्रूपमिति प्रकृतिं प्रतिपन्नः ॥ ३८॥**

इति पूर्वोक्तप्रकारेण। अभिधाय संप्रार्थ्य कृताञ्जलिं बद्धाञ्जलिं। अन्धं धृतराष्ट्रं प्रति यादवराट् श्रीकृष्णः। स्मयमानस्सन् समन्दहासस्सन्। प्रकृतिं पूर्वरूपं प्रतिपन्नस्सन् प्राप्तस्सन् अद्भुतं अत्याश्चर्यकरं अदृष्टपूर्वं एतद्रूपं विश्वरूपं मया भक्तच्छन्दानुवर्तिना मया संहृतमेव उपसंहृतमेव। इति एवं प्रकारेण अवदत्।

विश्वरूपोपसंहारानन्तरं धृतराष्ट्रोक्तिमाह। कौरवराडिति।

**कौरवराडथ पुत्रमवोच-**
**द्वत्स जहीहि भृशं तव शाठ्यम्।**
**पाण्डुसुताय तदीयमिदं स्वं**
**देहि न चेद्विपदेव करस्था ॥ ३९॥**

अथ विश्वरूपोपसंहारानन्तरं। कौरवराट् धृतराष्ट्रः। पुत्रं सुयोधनमुद्दिश्य वत्स मत्प्रीतिपात्र सुयोधन। एतेन वात्सल्याद्भवच्छाठ्यं मया निगूहितमिति सूचितम्। भृशं अत्यधिकम्। भृशमित्यनेन शाठ्यस्वरूप एव भवानिति सूचितम्। तव वञ्चनापहृत-राज्यस्य तव। शाठ्यं गूढविप्रियकृत्त्वं जहीहि त्यज। पाण्डुसुताय धर्मराजाय। पाण्डु-सुतत्वोक्त्या राज्याधिकारस्तस्यैवेति सूचितम्। तदीयं दिग्विजयार्जितं अत एव तदायत्तं इदं भवतेदानीं वञ्चनाव्यापारेणानुभूयमानं स्वं धनकनकादिसर्वसम्पदं। देहि वितर। न चेत् भवता न दीयेत चेत्। विपत् भवन्नाशः करस्थैव स्वतस्सिद्धैव। इत्यवोचत्।

कर्णेति।

**कर्णसमीरितवागनुयायी**
**मातुलमानसहर्षविधायी।**

बन्धुजनेक्षणबाष्पविदायी
मा ननु भूर्निखिलेषु च मायी ॥ ४० ॥

ननु भोस्सुयोधन। कर्णेन भवन्मित्रतया कुतोपि समागतेन राधेयेन समीरिता दुर्बोधनरूपा समुदीर्णा या वाक् दुर्वचः तामनुसृत्य यायी गमनशीलः मा भूः । मातुलस्य शकुनेः मानसे हर्षविधायी सन्तोषसमुत्पादकः। मा भूः। तदुक्तरीत्या वञ्चनाकर्म नैवाचरे-त्याशयः। बन्धुजनानां भवतो हितकाङ्क्षिणां भवदाश्रयसन्तुष्टानां बान्धवानां ईक्षणेषु नयनेषु बाष्पविदायी भवद्विपदा शोकाश्रुप्रदाता। मा भूः। कर्णशकुनिवचनानुवर्तनपरः विनष्टस्सन् बन्धुजनेभ्यो दुःखप्रदो भविष्यसीत्याशयः। निखिलेषु च सर्वजनविषयेष्वपि मायी सन् शठस्सन्। मा भूः।

कृष्णेति।

कृष्णसमागममस्मदगारे
सार्थय तच्छ्रममुत्पथगामिन्।
प्रार्थितनिर्वहणात्परिनुद्य
द्राक्तदनुग्रहमभ्युपगच्छ ॥ ४१ ॥

उत्पथगामिन् दुर्मार्गप्रवर्तक दुर्योधन। अस्मदगारे मदीयप्रासादे। एतेन पापिनामस्माकं गृहं प्रति भगवतः कृष्णस्य आगमनं दुर्लभम्। तस्मादिदानीं तदागमनं भवता सार्थयितव्यमित्याशयः। तच्छ्रममपि अस्मद्धितार्थं बहुप्रकारेण श्रान्तः कृष्णः तस्मात्त-च्छ्रममपि सार्थय सफलीकुरु। तदुक्तप्रकारेण अनुतिष्ठेत्याशयः। प्रार्थितनिर्वहणात् मया यथा प्रार्थितं तथा प्रार्थितस्य निर्वहणात्। परिनुद्य पूर्वोक्तं समस्तमपि दोषं विसृज्य द्राक् इदानीमेव। तदनुग्रहं श्रीकृष्णानुग्रहं अभ्युपगच्छ सम्मतिदानेन अङ्गीकुरु।

पितृवचनश्रवणानन्तरं दुर्योधनस्यामर्षप्रकारमाह। इतीति।

इत्यभिधाय च दीनमुखेऽस्मि-
न्मौनिनि रोषकषायितनेत्रः।
पन्नगवत्स्फुटफूत्कृतिरुग्र-
स्तत्र जगाद सुयोधन उच्चैः ॥ ४२ ॥

इति पूर्वोक्तप्रकारेण। अभिधाय उक्त्वा। अस्मिन् धृतराष्ट्रे दीनमुखे दैन्यविशिष्टमुखे। सुयोधनस्य निजानधीनत्वं दीनमुखे इत्यनेन सूचितम्। मौनिनि सति जोषंभावमाश्रिते

सति । रोषकषायितनेत्रः अमर्षातिशयकलुषितनयनः । पन्नगवत् सर्प इव स्फुटफूत्कृतिः स्पष्टतर फूत्कारः यस्य स तथोक्तः । अत एव उग्रः भयङ्करः सुयोधनः । तत्र सभायां उच्चैः तारध्वानेन जगाद उवाच ।

उक्तिप्रकारमाह । नाहमिति ।

**नाहमिहाद्यविभीषित एवं**
**केनचिदाशु बिभेमि धरेशः ।**
**ईक्षितमद्भुतमीदृशमुर्व्यां**
**मायिजनस्य मया बहु पूर्वम्** ॥ ४३ ॥

धरेशः सर्वलोकतन्त्रनिष्णातः सार्वभौमः अहं कर्णादिमित्रसम्पद्विशिष्टः दुर्योधनोहं । अद्य इदं प्रथमतया । एतेन पूर्वं केनाप्येवं कृतमिति सूचितम् । एवं अद्भुतरूपप्रदर्शनपूर्वकं केनचित् अनभ्यर्हितेन केनापि । एतेन कृष्णस्य तुच्छत्वं सूचितम् । किञ्च तन्नामग्रहणस्याप्यनिष्टत्वं सूचितम् । इह अस्मत्पितुरग्रे भीषितस्सन् भयं प्रापितस्सन् । न बिभेमि प्राप्तभयो न भवामि । उर्व्यां अस्मिन्भूतले मया प्राप्तराज्येन मया । मायिजनस्य ऐन्द्रजालिकस्य ईदृशं इदानीं कृष्णेन यथा प्रदर्शितं एतादृशमित्यर्थः । अद्भुतं कर्म आश्चर्यावहं कर्म । पूर्वं राज्यनिर्वहणावसरे विनोदार्थं पूरेत्यर्थः । बहु बाहुल्येनासकृदित्यर्थः । ईक्षितं दृष्टम् । ऐन्द्रजालिका अप्येवं कुर्वन्ति । किमत्र भयकारणम् । तस्मान्नाहं बिभेमीत्याशयः ।

मार्गणेति ।

**मार्गणवृत्तिरिहास्तु च तेषां**
**क्षत्रियवंशभुवां यदि शक्तिः ।**
**भूसुरवन्मयि मास्त्वणु सूची-**
**कोटिमितं न ददामि तलञ्च** ॥ ४४ ॥

क्षत्रियभुवां क्षत्रियवंशसमुत्पन्नानां तेषां पाण्डवानां । शक्तिर्यदि भुजबलं वर्तेत चेत् । इह मद्विषये मार्गणवृत्तिश्च युद्धमेव अस्तु । भूसुरवत् ब्राह्मणानामिव मार्गणवृत्तिः याचकवृत्तिः । मयि मद्विषये मास्तु । अणुसूचीकोटिमितं च अत्यल्पसूच्यग्रपरिमितमपि तलं प्रदेशं । न ददामि न यच्छामि । युद्धेनैव तदीयं राज्यमादातव्यम् । न तु याचनावृत्या सूच्यग्रपरिमितः प्रदेशोपि मत्सकाशादादातुं शक्यते इत्याशयः ।

इतीति ।

**इत्यतिरोषविमोचितबन्धः**
**श्मश्रुकलापकृतात्मकराग्रः ।**
**द्रागनुजेन जगाम निजान्त-**
**र्वेश्म तृणीकृतमाधववाणिः ॥ ४५ ॥**

इति पूर्वोक्तप्रकारेणोक्त्वेति शेषः । अतिरोषेण अत्यधिकामर्षेण विमोचितबन्धस्सन् विस्रंसितबन्धस्सन् । श्मश्रुकलापे कृतं निहितं आत्मकराग्रं अङ्गुली येन स तथोक्तस्सन् अनुजेन सह दुश्शासनेन सह तृणीकृतमाधववाणिस्सन् तुच्छीकृतश्रीकृष्णहितोक्तिस्सन् निजान्तर्वेश्म आत्मान्तर्गृहं । द्राक् तत्क्षणमेव । जगाम ।

मन्देति ।

**मन्दस्मितोज्वलमुखो मधुराधिनाथः**
**क्षत्रोत्थितोऽथ युयुधानकरावलम्बी ।**
**द्वारि स्थितं रथवरन्त्वधिरुह्य कर्ण-**
**मारोप्य सात्यकियुतः प्रययौ विचिन्तः ॥ ४६ ॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणमहाकविविरचिते**
**अद्भुतदूताख्यकाव्यरत्ने**
**चतुर्दशस्सर्गः ।**

अथ अनन्तरं । मधुराधिनाथः श्रीकृष्णः । मन्दस्मितोज्वलमुखस्सन् मन्दहासेन उज्वलं कान्तिविशिष्टं मुखं यस्य स तथोक्तस्सन् । दुर्योधनमौर्ख्यानुचिन्तनसमुत्थितं मन्दस्मितम् । अभीतिसूचकमुज्वलमुखत्वम् । क्षत्रा विदुरेण सह उत्थितस्सन् । युयुधान-करावलम्बीसन् । द्वारि प्रासादप्रतीहाराङ्कणे स्थितं रथवरं स्यन्दनोत्तमं अधिरुह्य कर्णन्तु राधेयमेकमेव नान्यमित्यर्थः । आरोप्य सात्यकियुतस्सन् विचिन्तस्सन् दुर्योधनप्रयुक्त-वाग्बाणक्लेशरहितस्सन् । प्रययौ ।

इति श्रीभगवल्लक्ष्मीदासानुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
चतुर्दशस्सर्गः ।

॥ श्रीः ॥

# पञ्चदशस्सर्गः ।

कविरिदानीं कर्णमनस्समावर्जनकृते कृष्णस्योपदेशप्रकारं वक्तुं पञ्चदशसर्गमारभते । प्रथमं तावत्कृष्णस्य निष्क्रमणप्रकारमाह । भीष्मेति ।

**भीष्मद्रोणकृपक्षत्तृननुयातान्निवर्त्य च ।**
**नारदादिमुनिश्रेष्ठैर्वन्दितोऽथ ययौ हरिः ॥ १ ॥**

हरिः श्रीकृष्णः । अनुयातान् अनुसृत्य आगतान् भीष्मद्रोणकृपक्षत्तॄन् निवर्त्य च । गच्छन्तु भवन्त इति प्रतिनिवर्त्य च । अथ तत्प्रतिनिवर्तनानन्तरं नारदादिमुनिश्रेष्ठैः भगवतो विश्वरूपदर्शनार्थमागतैः नारदप्रभृतिमुनिपुङ्गवैः । वन्दितस्सन् ययौ प्रतस्थे ।

कर्णं प्रति रथेन गच्छतः कृष्णस्योक्तिप्रकारमाह । गच्छन्निति ।

**गच्छन्रथेन गोविन्दो राधेयं शत्रुपक्षगम् ।**
**स्मयमानो जगादेत्थं कर्तव्यैकमना मनाक् ॥ २ ॥**

गोविन्दः कर्तव्यैकमनाः उत्तरत्र यद्यदवश्यकर्तव्यं तत्र दत्तदृष्टिस्सन्नित्यर्थः । अत एव स्मयमानः । यद्वा स्मितपूर्वाभिभाषित्वात् उक्तेः प्राक् निसर्गत एव स्मयमानस्सन् रथेन गच्छन् गमनवेलायामेवेत्यर्थः । शत्रुपक्षगं दुर्योधनपक्षपातिनं राधेयं राधाख्यया रथकारभार्यया परिवर्धितत्वात् राधेयमित्युक्तं । कर्णं प्रति मनाक् प्रारम्भदशायां अल्पतया इत्थं वक्ष्यमाणप्रकारेण । जगाद ।

दुर्जनसहवासः परित्याज्य इत्याह । व्यालेति ।

**व्यालवर्गोपगूढो हि चन्दनद्रुस्सुगन्ध्यपि ।**
**जनैर्न सेव्यते भीत्या तद्दूरीकुरु दुर्जनम् ॥ ३ ॥**

व्यालवर्गोपगूढः सर्पसमूहोपसमावृतः चन्दनद्रुः चन्दनवृक्षः । सुगन्ध्यपि उपभोगार्ह-भव्यगन्धविशिष्टस्सन्नपि । भीत्या सर्पभयेन जनैः गन्धानुभवकुतूहलविशिष्टैरपि जनैः । न सेव्यते हि । हीति प्रसिद्धौ । तत् तस्मात्कारणात् । दुर्जनं सर्पसदृशं दुर्योधनमित्यर्थः । दूरीकुरु परित्यज । यद्यपि भवान्सद्गुणभूयिष्ठः तथापि दुष्टदुर्योधनसहवासात् भवन्त-मनुसर्तुमपि बिभ्यति जनाः । तस्मात्कारणात् दुर्जनसहवासं परित्यज्य जनादरणीयत्व-माप्नुहि इत्याशयः ।

कर्णस्य वदान्यतामाह । सन्तानेति ।

**सन्तानकामधुक्चिन्तारत्ननेतापि वासवः ।**
**अर्थी यस्मादवापार्थं द्रोग्धापीप्सितमुत्सुकात् ॥ ४ ॥**

वासवः इन्द्रः । सन्तानः कल्पवृक्षः कामधुक् कामधेनुः चिन्तारत्नं चिन्तामणिः एतेषां नेतापि स्वाम्यपि । अर्थिजनसकलाभीष्टफलप्रद इत्यर्थः । द्रोग्धापि द्रोहच्चिकीर्षुरपि उत्सुकात् नाशकुतूहलात् । अर्थी सन् याचकस्सन् । ईप्सितं अर्थं अभेद्यकवचकुण्डलादिकं यस्मात् कर्णात् । अवाप अधिगतवान् ।

तादृश इति ।

**तादृशे त्वयि वक्तव्यं किं ममास्त्यर्यमात्मज ।**
**तथापि प्रकृतं किञ्चिद्वक्तुमिच्छामि साम्प्रतम् ॥ ५ ॥**

अर्यमात्मज हे सूर्यतनय कर्ण, तादृशे पूर्वोक्तप्रकारेण वदान्ये त्वयि भवद्विषये । एतेन मया प्रार्थितमप्यर्थं निर्वर्तयसीत्याशयस्सूचितः । मम प्रार्थयितुर्मम वक्तव्यं निवेदनीयं किमस्ति न किमप्यस्तीत्यर्थः । तर्हि जोषं स्थीयतामिति चेदाह । तथापीति । तथापि वक्तव्याभावेपि । साम्प्रतं इदानीं प्रकृतं अत्यवश्यवक्तव्यत्वेनोद्दिष्टं किञ्चित् स्वल्पं वक्तुं निवेदयितुं । इच्छामि अभिलषामि ।

मातृदेव इति ।

**मातृदेवो भवेत्येतच्छ्रुतिवाक्यमनुस्मरन् ।**
**वक्ष्यमाणां मया वाणीं निर्वर्तय दृढव्रत ॥ ६ ॥**

हे दृढव्रत, अचलव्रतनिष्ठ । एतेन भवता यत्सङ्कल्पितं तदेव निर्वर्तयसीति सूचितम् । 'मातृदेवो भव पितृदेवो भव' इति श्रुतिपर्यालोचने मातुरेवाभ्यर्हितत्वसूचनाय प्रथमं मातृदेवो भवेत्युक्तम् । तस्मान्निजजननी देवतेवावश्यं पूजनीया इत्यर्थस्सूचितः । तस्मान्मातृदेवो भवेति श्रुतिवाक्यं अनुस्मरन् अर्थतः स्मरन् । मया श्रुत्यर्थभावनावता मया । वक्ष्यमाणां वाणीं उत्तरत्रोदीर्यमाणां वाचं । निर्वर्तय सफलीकुरु इत्यर्थः ।

पाण्डवानामिति ।

**पाण्डवानां भवान्कर्ण ज्येष्ठभ्राता पितेव यत् ।**
**तद्वन्द्यस्सादरं तैरप्यद्य तत्कथयामि ते ॥ ७ ॥**

हे कर्ण, भवान् अन्यत्र प्रवर्धितस्त्वं । यत् यस्मात्कारणात् । पाण्डवानां धर्मनिष्ठानां । धर्मराजप्रभृतीनां । एतेन वेदविहितकर्मनिष्ठत्वं सूचितम् । पितेव पितृस्थानीय इत्यर्थः ।

भवान् ज्येष्ठभ्राता वर्तते। ज्येष्ठभ्राता पितृसमः इति ह्युक्तम्। तत् तस्मात्कारणात् तैः पाण्डुपुत्रैः सादरं भक्तिपुरस्सरम्। अत्र अपीत्यनेन ते तु लोकवन्द्याः तैरपि लोकवन्द्यैरपि वन्द्यः पूजनीयः इत्यर्थस्सूचितः। तत् तस्मात्कारणादेव अद्य अस्मिन्सन्दिग्धसमये। ते सर्वापेक्षया अभ्यर्हिताय तुभ्यं तत् ज्येष्ठभ्रातृत्वं कथयामि।

राधेय इति।

**राधेयो न हि कौन्तेयो भवानभ्यर्हितोऽनघ।**
**सुधांशुवंशजातोऽपि द्वादशात्मतनूभवः ॥ ८ ॥**

अनघ निर्दुष्ट। एवं भवितुं भवद्दोषो नहि किन्तु भवन्मातृदोष एवेत्याशयेन अनघेत्युक्तम्। भवान् राधेयो नहि राधापुत्रो नहि। किन्तु अभ्यर्हितः सर्वज्येष्ठः कौन्तेयः कुन्तीपुत्रः। सुधांशुवंशजातोपि चन्द्रवंशे समुत्पन्नोपि द्वादशात्मतनूभवः सूर्यात्समुत्पन्नः। कुन्त्यां सूर्यात्समुत्पन्नो भवान्पाण्डवानां ज्येष्ठभ्रातेत्याशयः।

क्वचिदिति।

**क्वचिज्जन्म क्वचिद्वृद्धिरिति यत्तदृणानुगम्।**
**अत्र साक्ष्यहमेवास्मि मास्तु चिन्ता तवानघ ॥ ९ ॥**

क्वचित् एकस्मिन्स्थले। जन्म समुत्पत्तिः। क्वचित् अन्यत्र वृद्धिः पोषणेन परिवर्धनं इति यत्। तत् ऋणानुगं ऋणानुसारेण सम्भवतीत्यर्थः। अत्र अस्मिन्विषये अहमेव साक्षी सन्नस्मि। वसुदेवाद्देवक्यां समुत्पन्नः तत्क्षणमेव गोकुले विसृष्टः नन्दगोपयशोदा-तनयत्वेन वृद्धिं प्रापितः। तावता किं नश्छिन्नम्। तस्मात् हे अनघ, निर्दुष्ट कर्ण। तव अन्यत्र प्रवर्धितस्य तव चिन्ता मास्तु। अहं यथा सन्तुष्टो वर्ते तथा भवानपि भवतु इत्याशयः।

धर्मेति।

**धर्मानुवर्तनं नृणामत्यवश्यं जगत्त्रये।**
**नोचेत्तथा विशेषः को मर्त्यानां मृगपक्षिणाम् ॥ १० ॥**

जगत्त्रये इत्यनेन केवलमस्मिन्लोके न। किन्तु लोकत्रयेपीति उक्तं भवति। नृणां मनुष्यसामान्यानां धर्मानुवर्तनं वेदविहितकर्मानुसरणं अत्यवश्यं अत्यन्तावश्यकर्तव्यम्। तथा नो चेत् एवं धर्मानुवर्तनाभावे इत्यर्थः। मर्त्यानां विवेकशालिनां मनुष्याणां मृगपक्षिणां विवेकरहितानां केवलाहारनिद्राभयमैथुनसक्तानां मृगपक्षिणां च को विशेषः न कोपि भेद इत्यर्थः। मृगपक्ष्यपेक्षया कृत्याकृत्यविवेकयुक्तत्वात् मनुष्यस्याभ्यर्हितत्व-मित्याशयः।

धर्मेति ।

**धर्मबु यान्यथा कर्म रचितञ्चापि निष्फलम् ।**
**तत्वा दर्शिभिर्भाव्यं धर्मकार्येषु मानवैः ॥ ११ ॥**

अन्यथा कृतमकृतमि न्यायेन। धर्मबुध्या वेदविहितकर्मण्यन्यथा ज्ञानेन। अयमेव धर्मः इति अधर्मे धर्मबुध्या अन्यथा वेदविहितव्यतिरिक्ततया रचितं चापि अनुष्ठितमपि। कर्म द्रव्यव्ययकायक्लेशादिक । निष्फलं निष्प्रयोजनम्। भस्माहुतिकल्पमित्याशयः। तस्मात्कारणात्। मानवैः मर्गाचरणप्रवृत्तिमद्भिः मनुष्यैः। धर्मकार्येषु वेदविहितकर्मानुष्ठानविषयेषु। तत्वार्थदर्शिभिः वेदानामनन्तत्वात् तदुक्तकर्मानुष्ठानविषये अल्पमतीनां मनुष्याणां भ्रमादिकं सम्भवत्येव। अतः वेदार्थानां सामञ्जस्यकल्पनेन यथावस्थितार्थदर्शिभिः भाव्यम्। यथावस्थितश्रुत्यर्थवेत्ता यः सः वेदविहितयथावस्थितकर्म कृत्वा आत्मोज्जीवनमार्गमधि ाच्छतीत्याशयः।

जननीमिति।

**जनन ं त्रतां त्यक्त्वा जननीतिविवर्जितः।**
**आत्म ार्थं क्वापि यो याति तमाचष्टे पशुं जनः ॥ १२ ॥**

यः मनुष्यः। देवतां देवतास्वरूपिणीं पूजार्हामित्यर्थः। जननीं मातरं त्यक्त्वा औदास्येन दूरतो विसृज्य। अत एव जननीतिविवर्जितस्सन् जनसामान्यनीतिबाह्यस्सन्। यः स्वमातरं परित्यज्य जनसामान नीतिबाह्यत्वात् पश्वपेक्षया तुच्छो वर्तते। सः जनमध्ये प्रवेष्टुमपि नार्हः इत्याशयः। तदेवाह। आत्मार्थमिति। आत्मार्थं केवलस्वदेहपोषणार्थं यः मनुष्यः क्वापि स्व नुकूलदेशं प्रति। याति धावति। तं मनुष्यं जनः पशुं सन्तं आचष्टे ब्रवीति। पशुरपि ास्संघं परित्यज्य निजाहारप्राप्तिदेशं धावति खलु।

पुत्रेति।

**पुत्रव त्सल्यमाधेयं त्वयावश्यं युधिष्ठिरे।**
**सम र्तीव यत्पुत्रो भवानप्यंशुमालिनः ॥ १३ ॥**

युधिष्ठिरे धर्मराजवि ये। त्वया सर्वज्येष्ठेन कुन्तीपुत्रेण भवता। अवश्यं अत्यवश्यकतया पुत्रवात्सल्यं पुत्रे आ नजे दोषभोग्यत्वरूपः प्रीतिविशेषः। एतेन यदि युधिष्ठिरे दोषस्स्यात् सोपि भवता मर्षणी इत्याशयस्सूचितः। आधेयं विन्यसनीयम्। एवं पुत्रवात्सल्यकरणे कारणं प्रद र्शयति। समवर्तीति। भवानपि समवर्तीव यम इव। अत्र समवर्तीत्यनेन स तु गुणैकपक्षपातितया सर्वत्र समो वर्तते इति सूचितम्। यत् यस्मात्कारणात्। अंशु ालिनः सूर्यस्य सर्वसाक्षिणः पुत्रः तस्माद्वात्सल्यमाधेयमित्यन्वयः।

उदन्त इति ।

**उदन्तोऽयं पतेत्तस्य यदि श्रोत्रे महात्मनः ।**
**भविष्यति तदा किंवेत्येतदावेदयाम्यहम् ॥ १४ ॥**

अयमुदन्तः कुन्तीपुत्रो भवान्सर्वज्येष्ठः इत्ययं वृत्तान्तः । महात्मनः धर्मैकनिरततया महामहिमविशिष्टस्य प्रतीक्ष्येषु नम्रतया प्रवर्तनशीलस्य तस्य धर्मराजस्य । श्रोत्रे कर्णपथे पतेद्यदि प्रविष्टश्चेदित्यर्थः । इयता कालेनापि भवतः यथावस्थितोदन्तः तस्य कर्णपथं न प्रविष्टः । यदि प्रविशेत् तदा किंवा भविष्यतीत्येतत् । अहं अनुभूततदन्तःकरणोहं आवेदयामि ।

सिह्मासनेति ।

**सिह्मासनाधिरूढस्य जननीहर्षदायिनः ।**
**ग्रहीष्यति मुदा धर्मः पादौ ते शिरसाऽऽनतः ॥ १५ ॥**

सिह्मासनाधिरूढस्य धर्मराज एव भवन्तं सिह्मासनमारोपयतीति भावः । जननीहर्षदायिनः सिह्मासनोपविष्टं अत्मज्येष्ठसुतं भवन्तमवलोक्य चिरदुःखिता ते जननी कुन्ती सन्तोषमधिगच्छतीति भावः । ते तव पादौ धर्मः धर्मराजः धर्मोपि । शिरसा आनतस्सन् मुदा एतादृशाग्रजसेवालाभजनितेन सन्तोषेण । ग्रहीष्यति भवते प्रणम्य भवत्सेवानिरतो भविष्यतीत्यर्थः ।

अर्जुन इति ।

**अर्जुनोप्यर्जुनं छत्रं त्वद्यशोमण्डलप्रभम् ।**
**धरिष्यति भवन्मौलौ किरीटोरुमणित्विषि ॥ १६ ॥**

अर्जुनोपि । अत्र अपिना साक्षात्भवत्प्रतिभटतया भवध्वंसनैकनिरतोर्जुनश्चेति सूचितम् । किरीटोरुमणित्विषि देदीप्यमानकिरीटनवरत्नकान्तिपूर्णे । भवन्मौलौ तव मस्तके । त्वद्यशोमण्डलप्रभं भवद्वदान्यताप्रसृतकीर्तिचक्रकान्तिविशिष्टं । यद्वा शत्रुपक्षपरित्यागपूर्वकं निजभ्रातृपक्षसमागमनजन्यकीर्तिमण्डलप्रभमित्यर्थः । अत एव अर्जुनं धवलतरं छत्रं धरिष्यति । भवत्प्रतिभटोपि दासो भविष्यतीत्याशयः ।

प्रताप इति ।

**प्रतापस्ते शरीरीव भीमो भीमोपि दण्डभृत् ।**
**यास्यत्यग्रे नतग्रीवो मार्गदर्शी मनस्विनः ॥ १७ ॥**

भीमः शत्रुभयङ्करः शरीरी मूर्तिमान् ते प्रताप इव । भीमोपि गजायुतबलविशिष्टो

भीमसेनोपि। दण्डभूत् सन् करगृहीतभवद्विरुददण्डस्सन्। मनस्विनः मानवतः। यद्वा यथेच्छं गमनशीलस्य तव अग्रे पुरोभागे। नतग्रीवस्सन् विनयनम्रवदनस्सन् मार्गदर्शी सन् हस्तं प्रसार्य गमनमार्गप्रदर्शकस्सन्। यास्यति।

कोमलाभ्यामिति।

**कोमलाभ्यां कराभ्यां तौ यमौ ते पार्श्वयोरपि।**
**शरच्चन्द्रमरीच्याभे चामरे च धरिष्यतः ॥ १८ ॥**

तौ सौकुमार्येण सौन्दर्येण च प्रसिद्धौ। यमावपि नकुलसहदेवावपि। ते धर्मराजसमीपमागतस्य तव पार्श्वयोः। कोमलाभ्यां सुकुमाराभ्यां कराभ्यां शरच्चन्द्रमरीच्याभे शरत्कालिकपूर्णचन्द्रकिरणधवले चामरे च। धरिष्यतः। तावुभावपि निजकरचामराभ्यां भवन्तं वीजयत इत्याशयः।

दन्तेति।

**दन्तपाञ्चालिकेवाथ सती पाञ्चालिकापि सा।**
**त्वदङ्घ्रिपङ्कजद्वन्द्वं स्प्रक्ष्यत्यानम्रमौलिना ॥ १९ ॥**

अथ अनन्तरं। दन्तपाञ्चालिकेव दन्तसमुत्कीर्णपुत्रिकेव मनोहरा। सती साध्वीशिरोमणिः सा पुरा भवतैव कर्णारुन्तुदतया अपवादनिन्दिता पाञ्चालिकापि द्रौपद्यपि। नम्रमौलिना आनतेन शिरसा त्वदंघ्रिपङ्कजद्वन्द्वं भवत्पादाब्जयुगलं। स्प्रक्ष्यति नमस्करिष्यतीत्यर्थः।

किं बहुना अहमपि ते भृत्यो भविष्यामीत्याह। सात्यकीति।

**सात्यकिप्रमुखैः कर्ण वृष्णिभिस्सह साञ्जलिः।**
**सेविष्ये सादरं नम्रो भवन्तं भृत्यवद्भिया ॥ २० ॥**

सात्यकिप्रमुखैः। अत्र सात्यकिनामग्रहणेन तस्यार्जुनतुल्यत्वं सूचितम्। वृष्णिभिस्सह हे कर्ण, साञ्जलिस्सन् बद्धाञ्जलिपुटस्सन्। नम्रः विनयविनतस्सन् भृत्यवत् दास इव भिया सादरं यथा तथा प्रीतिपुरस्सरं भवन्तं सर्वज्येष्ठं त्वां। अहमपि सेविष्ये।

त्वयि तत्रागते सति किं भविष्यतीति चेदाह। गाण्डीवीति।

**गाण्डीवी मण्डलीकृत्य गाण्डीवं चण्डविक्रमः।**
**दिशो विजित्य रत्नैस्ते कोशं सम्पूरयिष्यति ॥ २१ ॥**

चण्डविक्रमः जगत्त्रयप्रख्यातपराक्रमः। गाण्डीवी अग्निदत्तगाण्डीवधन्वा अर्जुनः। गाण्डीवं अप्रतिहतशक्तिविशिष्टं गाण्डीवाख्यं धनुः। मण्डलीकृत्य ज्याकर्षणेन मण्डलाकारं कृत्वा

दिशः दश दिशः विजित्य स्वायत्ताः कृत्वा। रत्नैः श्रेष्ठवस्तुभिः ते भवतः कोशं द्रविणागारं। सम्पूरयिष्यति सम्यक्पूरयिष्यति।

सामन्ता इति।

**सामन्ता निर्जितास्तेन करोपग्राह्यभाजनाः।**
**नीराजयन्तु राजानस्त्वदङ्घ्री रत्नमौलिभिः ॥ २२ ॥**

तेन अर्जुनेन निर्जिताः नितरां जिताः सामन्ताः समन्ताद्विद्यमाना अधीनाः राजानः नृपतयः। करोपग्राह्यभाजनास्सन्तः निजपाणिद्वयगृहीतोपायनपात्रविशेषास्सन्तः। रत्नमौलिभिः किरीटमस्तकैः त्वदंघ्री भवच्चरणौ। नीराजयन्तु नीराजनं कुर्वन्तु। किरीटालङ्कृतमूर्धानो राजानः भवच्चरणयोः प्रणिपतन्तु इत्याशयः।

यदीति।

**यद्यत्र सम्मतिस्ते स्यादद्यैवावेदयाम्यहम्।**
**युधिष्ठिराय कौन्तेय वृत्तान्तममुमादरात् ॥ २३ ॥**

हे कौन्तेय, हे कुन्तीपुत्र कर्ण, अत्र अस्मिन्विषये ते तव सम्मतिः अनुमतिरित्यर्थः स्याद्यदि। अद्यैव अनुपदमेव। अहं भवतामभ्युदयकाङ्क्षी साक्षादहं। युधिष्ठिराय अमुं वृत्तान्तं भवतस्सर्वज्येष्ठत्ववृत्तान्तं। आदरात् सन्तोषातिशयात् आवेदयामि।

दूरीकरोतीति।

**दूरीकरोति धर्मात्मा न भीत्या साम्परायकम्।**
**किन्तु संस्मृत्य जन्तूनाममन्तूनां निर्हिंसनम् ॥ २४ ॥**

धर्मात्मा धर्मैकनिष्ठहृदयः युधिष्ठिरः। साम्परायकं युद्धं भीत्या प्राणभयेन। न दूरीकरोति। किन्तु अमन्तूनां निरपराधिनां जन्तूनां प्राणिनां निर्हिंसनं वधं संस्मृत्य विचारपूर्वकं मनसि विचिन्त्येत्यर्थः। युद्धं दूरीकरोतीत्यर्थः। दयाकार्यमेतत् न तु भीतिकार्यमित्याशयः।

इतीति।

**इत्युदीर्णं वचः कर्णस्समाकर्ण्य कृताञ्जलिः।**
**अब्रवीदात्मनस्स्थास्नु सङ्कल्पं कल्पनातिगम् ॥ २५ ॥**

इति पूर्वोक्तप्रकारेण। उदीर्णं कृष्णेनोक्तं वचः समाकर्ण्य सम्यक् सावधानमित्यर्थः निशम्य कर्णः कृताञ्जलिस्सन्। आत्मनः स्वस्य कल्पनातिगं चिन्तनातीतमित्याशयः। स्थास्नु स्थिरतरं सङ्कल्पं। अब्रवीत् प्रकाशयामासेत्यर्थः। निजदृढसङ्कल्पमुज्जगारेत्याशयः।

परीति ।

**परीचिक्षिषया कृष्ण मच्चित्तस्य ब्रवीषि किम् ।**
**विज्ञापयामि किं वाज्ञस्सर्वज्ञाय श्रियःपते ॥ २६ ॥**

हे श्रियःपते, दुष्टदमनार्थमेव भुवि कृतमनुष्यावतार लक्ष्मीवल्लभ कृष्ण । एतेन भवत्सङ्कल्प एव प्रचलिष्यति नान्यथेत्याशयस्सूचितः । मच्चित्तस्य मम हृदयस्य परीचिक्षिषया परीक्षां कर्तुमिच्छया । कथं वर्ततेस्य हृदयं किमाशापोषितं उत निजस्वामिविषये दृढभक्तिपूरितं इति परीचिक्षिषयावेत्यर्थः । ब्रवीषि किं पूर्वोक्तरीत्या कथयसि किम् । अज्ञः मनुष्यसाधारणतया विवेकशून्यः अहं । सर्वज्ञाय कालत्रयसर्व-विषयज्ञाय भवते । किं वा विज्ञापयामि न किमपि विज्ञापयितुं समर्थ इत्याशयः ।

भवन्तमिति ।

**भवन्तमपि जानामि जगतामम्बुजेक्षण ।**
**सृष्टिस्थितिलयानाञ्च कारणं मर्त्यविग्रहम् ॥ २७ ॥**

भो अम्बुजेक्षण, हे पुण्डरीकाक्ष, श्रीकृष्ण, भवन्तमपि इदानीं मया साकं रथे साधारणतया समुपविष्टं त्वामपि । जगतां सुरनरतिर्यक्स्थावरात्मकानां भुवनानां सृष्टिः सर्जनं स्थितिः वर्तनं लयः नाशः एतेषां कारणं निदानं मर्त्यविग्रहं सन्तं दुष्टनिग्रहार्थं शिष्टपरिपालनार्थं च स्वेच्छया अङ्गीकृतमनुष्यरूपं सन्तं । जानामि च ।

मायेति ।

**मायाजालेन बध्द्वास्मान्सङ्कल्पेनैव माधव ।**
**लोकतन्त्रं स्वतन्त्रस्त्वं प्रवर्तयसि कर्मतः ॥ २८ ॥**

हे माधव, श्रियःपते । एतेन लीलापरत्वं सूचितम् । अस्मान् चेतनवर्गानित्यर्थः । मायाजालेन प्रकृतिरुपानायेन । सङ्कल्पेनैव न तु प्रयत्नपूर्वकं बध्द्वा । एतेन चेतनप्रयत्न-नैष्फल्यं सूचितम् । स्वतन्त्रः निरङ्कुशः त्वं सर्वज्ञस्सर्वशक्तो भवान् । कर्मतः कार्यमुखेन लोकतन्त्रं प्रपञ्चचलनवलनादिकमित्यर्थः । प्रवर्तयसि । उदासीनवदासीन एव सर्वं करोषीत्यर्थः ।

लौकिकमिति ।

**लौकिकं वैदिकञ्चार्थं यथाशास्त्रं त्वयेरितम् ।**
**श्रुत्वा तत्प्रतिवक्तुं मे जिह्वा जिह्वेति ते धुरि ॥ २९ ॥**

लौकिकं लोके भवं वैदिकञ्च वेदे भवञ्च यथाशास्त्रं शास्त्रमनतिक्रम्य त्वया सर्वज्ञेन भवता ईरितं उक्तं अर्थं श्रुत्वा। तत्प्रतिवक्तुं तत्प्रतीपतया अभिधातुं। ते धुरि वि दितसर्वविषयस्य भवतः पुरतः। मे अज्ञस्य मम जिह्वा जिह्रेति लज्जिता भवति।

तथापीति।

**तथापि कथयाम्यद्य त्वयि न्यस्तभरः प्रभो।**
**पाण्डवानिव मां शाधि यथान्याय्यं जगत्प्रज ॥ १० ॥**

तथापि एवं सत्यपि। हे प्रभो, हे मत्स्वामिन्। स्वामिनः पुरतः निजाज्ञा निवेदनं दासस्योचितमेवेत्याशयेन प्रभो इति सविनयमभिहितम्। त्वयि अपरा धेविषये क्षमाशीले त्वयि। न्यस्तभरस्सन् मद्दोषमविगणय्य मां रक्षसीति दृढविश्वासेन नि निहितसमस्तमद्भारस्सन्। अद्य प्राप्तकाले कथयामि मधृदयगतं सर्वं निवेदयामि। हे जगत्प्रज, हे सर्वलोकजनक। एतेन जगदन्तःपात्यहमपि भवत्सूनुरित्याशयस्सूचितः। यथान्याय्यं न्यायमनतिक्रम्य पाण्डवानिव मामपि शाधि कृत्याकृत्यविवेकबोधनेन शाधि।

जानन्निति।

**जानन्नपि जगन्नाथ धार्तराष्ट्रनृशंसताम्।**
**नैव त्यजामि तत्पक्षं येन रक्षा कृता मम ॥ ११ ॥**

हे जगन्नाथ, हे सर्वेश्वर, धार्तराष्ट्रनृशंसतां दुर्योधनस्य क्रौर्यं। जानन्नपि अनुभवन्नपीत्यर्थः। तत्पक्षं दुर्योधनपक्षं नैव त्यजापि भवतापि त्याजयितुमशक्यमित्यर्थः। येन दुर्योधनेन मम जनन्या त्यक्तस्यानाथस्य ममेत्यर्थः। रक्षा संरक्षणं कृता। आपद्बन्धुं तं नैव त्यजामीत्याशयः।

तदेवोपपादयति। मातृदेव इति।

**मातृदेवो भवेत्येवं यदुक्तं भवता हरे।**
**सूक्ष्मदृष्ट्या त्वया कार्यः विचारस्तत्र शास्त्रतः ॥ १२ ॥**

हे हरे, मद्दोषपरिहरणसमर्थ कृष्ण, मातृदेवो भवेति एवं विधिपूर्वकमित्यर्थः। भवता वेदप्रतिपाद्येन त्वया। यदुक्तं यद्वेदवाक्यमुक्तम्। तत्र तस्मिन्वेदवाक्ये सूक्ष्मदृष्ट्या सूक्ष्मांशावलोडनपूर्वकमित्यर्थः। शास्त्रतः शास्त्रोक्तप्रकारेणेत्यर्थः। विचारः विमर्शः त्वया सर्वज्ञेन भवता कार्यः।

त्यागेति ।

**त्यागभोगविधायिन्योर्जनन्योरभिसेव्यताम् ।**
**लब्धुं का वार्हतीत्येतद्वक्तव्यं वतैव हि म ॥ ३३ ॥**

त्यागभोगविधायिन्योः जननसमनन्तरमेव मां त्यक्तवती कुन्ती त्यक्तं मामादाय पोषितवती राधा एतयोः जनन्योः मात्रोः मध्ये। अभिसेव्यतां आभिमुख्येन सेव्यतां लब्धुं अधिगन्तुं । का वा कुन्ती अथवा राधा अर्हति योग्या भवति । इत्येतत् भवतैव सूक्ष्मदृष्ट्या शास्त्रदृष्ट्या च विमर्शकेन त्वयैव । वक्तव्यं हि निर्धारिततया अभिधातव्यं खलु । निष्पक्षपातेन कथयेत्याशयः ।

जातमात्रमिति ।

**जातमात्रं सुतं का वा त्यजेज्जगति राक्षसी ।**
**वृषस्यन्ती त्वियं कुन्ती वृत्त्या तामत्यगादपि ॥ ३४ ॥**

जगति इह लोके । जातमात्रं प्रसूतिसमनन्तरमेव जातक्षणमेवेत्यर्थः । सुतं पुत्रं राक्षसी क्रूरहृदया राक्षस्यपि का वा । कावेत्यनेन स्त्रीसामान्यमुक्तं भवति । त्यजेत् न कापि त्यजेदित्यर्थः । इयं कुन्ती तु । तुस्तु भेदे । एतेन स्त्रीसामान्यवैलक्षण्यं सूचितम् । वृषस्यन्ती सती कामुकी सती । वृत्त्या निजव्यापारेण तामपि राक्षसीमपि अत्यगात् अतिक्रान्तवती । मन्माता क्रौर्ये तावल्लोकविलक्षणेत्याशयः ।

अनाथमिति ।

**अनाथमिव संत्यक्तं जनन्या मां जनार्दन ।**
**रथकारोऽकुलीनोपि वात्सल्यादभ्यपालयत् ॥ ३५ ॥**

हे जनार्दन, हे भूभारावतरणार्थमेव कृतावतार भगवन्। जनन्या साक्षात्प्रसवित्र्या कुन्त्या अनाथमिव रक्षकविहीनमिव । इवेत्यनेन सत्यपि रक्षके निजदुश्शीलतागूहनाय निर्दयं त्यागस्सूचितः । संत्यक्तं सम्यक् त्यक्तं मां । अकुलीनोपि पुण्यपापविवेकशून्यजाति-समुत्पन्नोपीत्यर्थः । रथकारः वात्सल्यात् दोषभोग्यत्वरूपप्रीतिविशेषात् । अभ्यपालयत् आभिमुख्येन पोषयामास ।

अकुलीनमिति ।

**अकुलीनमिति ज्ञात्वाप्ययं दुर्योधनस्तु माम् ।**
**प्रदर्शितसुहृद्भावो ह्यङ्गदेशेशमातनोत् ॥ ३६ ॥**

मां जनन्या परित्यक्तं मां अकुलीनमिति असत्कुलप्रसूतमिति ज्ञात्वापि । अयं दु त्वेन प्रसिद्धोयं दुर्योधनस्तु । तुस्त्ववधारणे । प्रदर्शितसुहृद्भावस्सन् प्रकटितमित्रभा स्सन् अङ्गदेशेशं अङ्गदेशाधिपतिं । आतनोद्धि । हीति प्रसिद्धौ ।

मदिति ।

**मत्स्वामिहृदयामोददत्तदृष्टिरहं सदा ।**
**धर्माधर्मविचारन्तु न तनोम्यात्मसम्पदे ॥ ३ ॥**

सदा अनवरतमपि । अहं दुर्योधनपोषितोहं । मम स्वामिनः कृतपोषणराज्याभिषेच दि-महोपकारतया सर्वप्रकारेणापि प्रभोः दुर्योधनस्य हृदयामोदे मनस्सन्तोषणे दत्तदृ स्सन् आत्मसम्पदे मम सद्गतिलाभाय । धर्माधर्मविचारन्तु पुण्यपापविचारमेव । न तन मि । अभ्यर्हितं मे दुर्योधनमनस्सन्तोषणमेवेत्याशयः ।

मदिति ।

**मत्कर्मणस्तु जानामि फलं नरकमेव मे ।**
**तथापि स्वामितोषार्थं दुष्कर्मनिरतोस्म्यहम् ॥ ३ ॥**

मत्कर्मणस्तु । तुस्तु भेदे । फलं मे नरकमेवेति जानामि । तथापि एवं जानन्नपीत्य र्थः । स्वामितोषार्थं दुर्योधनमनस्सन्तोषणार्थं । अहं दुष्कर्मनिरतस्सन् घोरकृत्यनिर स्सन् अस्मि । स्वाम्यर्थं नरकप्राप्तिरपि सह्येत्याशयः ।

सर्वधेति ।

**सर्वधा विधिना नाथ कुण्ठितप्रसरोस्म्यहम् ।**
**किमितोप्यन्यदाधेयं नियतिप्रहते मयि ॥ ३ ॥**

हे नाथ, हे मत्स्वामिन्, विधिना दैवेन सर्वधा सर्वप्रकारेण अहं । परपुष्टोहं कुं ठत-प्रसरस्सन् प्रतिहतात्मबलादिप्रसरस्सन् अस्मि । नियतिप्रहते दैवदूषिते इति यावत् । मयि मद्विषये इतोपि एतदपेक्षया अन्यत् आधेयं आधातुं योग्यं । किं वर्तते न किमपीत्य र्थः । विधिनैव प्रतिहते मयि भवतापि किमपि कर्तुं न शक्यते इत्याशयः ।

सर्वप्रकारेण विधिहतत्वमेवोपपादयति । शुभ्रांश्विति ।

**शुभ्रांशुवंशजातेस्मिन्क्षत्रियर्षभतां गते ।**
**लोकगर्हास्पदं मात्रा दुष्कुलीनत्वमाहितम् ॥ ४ ॥**

शुभ्रांशुः चन्द्रः तस्य वंशे जातः समुत्पन्नः तस्मिन् । क्षत्रियर्षभतां क्षत्रियश्रेष्ठत गते अस्मिन् मयि । मात्रा कुन्त्या लोकगर्हास्पदं सर्वजननिन्दास्पदं दुष्कुलीनत्वं अ हेतं आरोपितमित्यर्थः । एतदेकं विधिहतत्वमित्याशयः ।

**ब्राह्मणस्य गुरोश्शापाद्धानुष्कस्यापि मे प्रभो ।**
**शस्त्रास्त्राणाञ्च सर्वेषां विस्मृतिस्समयेऽभवत् ॥ ४१ ॥**

प्रभो गुरोः धनुर्विद्याचार्यस्य ब्राह्मणस्य द्विजोत्तमस्य परशुरामस्य शापात् मदुपदिष्टानां शस्त्रास्त्राणां प्रयोगसमये विस्मृतिर्भूयादित्याकारकशापात् धानुष्कस्य धनुर्विद्यापारङ्गतस्य मेपि उरसिलस्य ममापि । सर्वेषां गुरूपदिष्टानां सर्वप्रकाराणामपि शस्त्रास्त्राणां शस्त्राणि आयुधविशेषाः अस्त्राणि अभिमन्त्रितानि अग्नेयवायव्यप्रभृतीनि एतेषां । विस्मृतिः विस्मरणं समये प्रयोगकाले । अभवत् । एतद्द्वितीयं विधिहतत्वम् ।

तृतीयं परिभवमाह । नैसर्गिकमिति ।

**नैसर्गिकं तनुत्राणं कुण्डले च ममानघ ।**
**शठेन सुरनाथेन प्रलोभ्यापहृतानि हि ॥ ४२ ॥**

हे अनघ, सर्वसमतया निर्दुष्ट कृष्ण । मम दानैकतत्परस्य मे । नैसर्गिकं जन्मतस्स्वभावसिद्धं तनुत्राणं कवचं नैसर्गिके कुण्डले च कर्णवेष्टने च । एतानि शठेन गूढविप्रियकृता सुरनाथेन अर्जुनपक्षपातिना इन्द्रेण । प्रलोभ्य ब्राह्मणवेषग्रहणेन वञ्चयित्वा । अपहृतानि । हीति प्रसिद्धौ । एतत्तृतीयं विधिहतत्वम् ।

चतुर्थं विधिहतत्वमाह । जनन्येति ।

**जनन्या प्रार्थितश्चाहमेकवारं प्रचोदितम् ।**
**पुनस्तदस्त्रं मास्राक्षीरित्यस्मिन्ध्वस्तविक्रमः ॥ ४३ ॥**

एकवारं युद्धावसरे सकृत् प्रचोदितं प्रयुक्तं अस्त्रं पुनः द्वितीयवारं तत् प्राक्प्रयुक्तं अस्त्रमेवेत्यर्थः । मास्राक्षीः मा प्रयुंक्ष्व । इति एवं जनन्या अर्जुनपक्षपातिन्या कुन्त्या प्रार्थितस्सन् अभ्यर्थितस्सन् । अहं अस्मिन् अस्त्रप्रयोगविषयेपि ध्वस्तविक्रमस्सन् कुण्ठितपराक्रमस्सन् । अस्मि । एतच्चतुर्थं विधिहतत्वम् ।

एवमिति ।

**एवं कुन्त्या द्विजेनाथ शक्रेण प्रहतोस्म्यहम् ।**
**कथं जयेयं तं पार्थं तथाप्यद्य रणोत्सुकः ॥ ४४ ॥**

एवं पूर्वोक्तप्रकारेण । कुन्त्या मम मात्रा द्विजेन परशुरामेण अथ शक्रेण । अत्र अथेत्यनेन देवताविशेषेणेत्यपि सूच्यते । अहं दुर्योधनवशगोहं प्रहतस्सन्नस्मि । तस्मात्कारणात् ।

तं सर्वप्रकारेणाप्यकुण्ठितप्रतापप्रसरणं पार्थं पृथासुतमर्जुनं । कथं केन प्रकारेण जयेयं जेतुं शक्तो भवेयं । तथापि एवं सत्यपि । अद्य रणोत्सुकस्सन् अस्मि ।

पाण्डवानामेव जयः स्वतस्सिद्ध इत्याह । कौन्तेयेति ।

**कौन्तेयपक्षपाती यद्भवान्धर्मस्सनातनः ।**
**स्वतस्सिद्धो जयस्तेषां भवत्पादजुषां ततः ॥ ४५ ॥**

यत् यस्मात्कारणात् । भवान् पाण्डवप्राणस्त्वं । सनातनः धर्मः कौन्तेयपक्षपाती पाण्डवपक्षपाती । ततः तस्मात्कारणात् । भवत्पादजुषां त्वच्चरणारविन्दसेवकानां भवन्तमेव सर्वविधबन्धुत्वेन सविश्वासं मन्यमानानामित्यर्थः । तेषां पाण्डवानां जयः स्वतस्सिद्ध एव । यत्र धर्मः तत्र जयः ।

प्रवर्तयिष्यसीति ।

**प्रवर्तयिष्यस्यचिरात्प्रधनं पृथिवीभुजाम् ।**
**हनिष्यति तदा नाथ मामेव श्वेतवाहनः ॥ ४६ ॥**

हे नाथ, हे सर्वस्वामिन् । अचिरात् क्षिप्रमेव पृथिवीभुजां ऐश्वर्यप्रमत्तानां भोगैकलम्पटानां राज्ञां । प्रधनं परस्परं युद्धं । प्रवर्तयिष्यसि त्वमेव कारयिष्यसीत्यर्थः । तदा तस्मिन्काले श्वेतवाहनः अर्जुनः । मामेव दुर्योधनपक्षपातिनं मामेव । हनिष्यति ।

धर्मराज इति ।

**धर्मराजश्चिरं राज्यं प्रशास्तु त्वदनुग्रहात् ।**
**कृतस्य कर्मणोऽवश्यं भोक्तव्यं प्राणिभिः फलम् ॥ ४७ ॥**

त्वदनुग्रहात् सत्यसङ्कल्पस्य तव प्रसादात् । धर्मराजः धर्मैकनिरतः भवत्सेवैकतानः युधिष्ठिरः । राज्यं भुजबलार्जितं भूमण्डलमित्यर्थः । चिरं आचन्द्रार्कं प्रशास्तु । प्राणिभिः चेतनसामान्यैरित्यर्थः । कृतस्य आचरितस्य कर्मणः पुण्यपापरूपकर्मणः फलं सुखदुःखरूपं फलं । अवश्यं अनुभोक्तव्यं अनुभवेनैव क्षपणीयम् । अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभं इति ह्युक्तम् ।

अभ्यर्थनामिति ।

**अभ्यर्थनां धरित्र्याश्च तेऽवतारं गदाधर ।**
**सफलीकुरु कौन्तेयव्याजादुत्साद्य भूभरम् ॥ ४८ ॥**

हे गदाधर, शत्रुशमनसमर्थायुधविशेषधर कृष्ण। धरित्र्याः भूम्याः अभ्यर्थनां दुष्टजनबाहुल्यात् भारं वोढुमसमर्थास्मि तस्मात् मद्भारं परिहरेति प्रार्थनां। ते सर्वशक्तस्य भवतः अवतारं कर्मभूमौ मनुष्यत्वेन कृतं अवतारञ्च। कौन्तेयव्याजात् पञ्चपाण्डवान्निमित्तीकृत्य भूभरं भुवः भरं भारं। उत्साद्य दुष्टजननिषूदनेन परिहृत्य। सफलीकुरु सार्थय।

यदिति।

**यद्भव्यं तद्भवत्येव नात्र कार्या विचारणा।**
**सङ्कल्पं तेऽन्यथा कर्तुं शक्नुयात्क इहाच्युत ॥ ४९ ॥**

अच्युत, भवत्सङ्कल्पानुरूपं यद्भव्यं भवितव्यं तत् कार्यं भवत्येव। अत्र अस्मिन्विषये विचारणा स्वमतानुरोधेन विचारः न कार्या कर्तुं न योग्या। न कर्तव्येत्यर्थः। ते सत्यसङ्कल्पस्य भवतः। सङ्कल्पं एवमेव भवितव्यमित्याकारकं मानसं कर्म अन्यथा तद्व्यतिरिक्ततया कर्तुं इह अस्मिन्लोके अथवा ब्रह्माण्डे। कः ब्रह्माण्डान्तर्गतः को वा। शक्नुयात् समर्थो भवेत्? न कोपि समर्थ इत्यर्थः।

मदिति।

**मज्जन्मशंसिने तुभ्यं विहितोऽयं मयाञ्जलिः।**
**वात्सल्यान्मुञ्च मां नाथ स्वामिभक्त्यानघोस्म्यहम् ॥५०॥**

हे नाथ, हे जगत्स्वामिन् तत्रापि मत्स्वामिन्। मज्जन्मशंसिने ममोत्पत्तिवृत्तान्तनिवेदयित्रे तुभ्यं उपकारिणे ते। मया अज्ञेन मया अयं अञ्जलिः विहितः रचितः। मां भवदुक्तेरसम्मतिं सूचयन्तं मां। वात्सल्यात् प्रीतिपुरस्सरमित्यर्थः। मुञ्च मा निर्बध्नीहीत्यर्थः। अहं स्वामिभक्त्या मत्स्वामिनि दुर्योधने भक्त्या अनघोस्मि निर्दुष्टोस्मि। मया यत्कर्तव्यं तत्क्रियते त्वया यत्कर्तव्यं तत्क्रियतामित्याशयः।

इतीति।

**इत्युदीर्य स राधेयो रथादुत्प्लुत्य साञ्जलिः।**
**निर्जगाम स्वकर्तव्यं स्मरन्दुर्योधनान्तिकम् ॥ ५१ ॥**

इति पूर्वोक्तप्रकारेण। उदीर्य स्वनिश्चितार्थमुक्त्वा। सः राधेयः कर्णः। राधेय इत्यनेन कौन्तेयद्वेषस्सूचितः। रथात् उत्प्लुत्य रथं विहायावतीर्येत्यर्थः। साञ्जलिस्सन् स्वकर्तव्यं दुर्योधनसाह्यकरणरूपं कर्तव्यं। स्मरन्सन् दुर्योधनान्तिकं दुर्योधनसमीपं प्रति निर्जगाम।

श्लाघमान इति ।

**श्लाघमानोऽथ राधेयं युयुधानेन माधवः ।**
**आससाद रथेन द्रागुपप्लव्यमुपप्लुतम् ॥ ५२ ॥**

अथ कर्णनिर्गमनानन्तरं । माधवः श्रियःपतिः कृष्णः । युयुधानेन सात्यकिना राधेयं कर्णं श्लाघमानस्सन् तत्स्वामिभक्तिं स्तुवन्सन् । रथेन द्राक् शीघ्रमेव उपप्लुतं सन्निहितं उपप्लव्यं । आससाद प्राप्तवान् । अतित्वरितमुपप्लव्यमाजगमेत्याशयः ।

युधिष्ठिर इति ।

**युधिष्ठिरोऽथ सम्प्राप्य मुकुन्दं पुनरागतम् ।**
**अक्ष्णा काणो यथा दृष्टिं लेभे मुदमनुत्तमाम् ॥ ५३ ॥**

अथ युधिष्ठिरः कृष्णागमनैकतानो धर्मराजः । पुनः आगतं हास्तिनपुरात्प्रतिनिवृत्तं मुकुन्दं श्रीकृष्णं । सम्प्राप्य समीपमुपगम्य अक्ष्णा लोचनेन काणः अन्धः दृष्टिं यथा । तथा अनुत्तमां निरतिशयां मुदं आनन्दं । लेभे । एतेन पाण्डवानां नेत्रप्रायोयं कृष्ण इति सूचितम् ।

अपीति ।

**अपि कुशलिनस्सर्वे तत्र प्रसन्नहृदोऽनुजाः**
**तव च गमनं किंवा सार्थं बभूव जगत्पते ।**
**अपि कुरुपतिः प्रीत्याऽपश्यद्भवन्तमपेतदृ-**
**किमिति विदुरेणोक्तं ब्रूहीत्यपृच्छदसौ हरिम् ॥५४॥**

असौ कृष्णागमनप्रभवप्रमोदभरप्रसरदश्रुलोचनो युधिष्ठिरः । हे जगत्पते, हे सर्वेश्वर श्रीकृष्ण, तत्र हास्तिनपुरे सर्वे सकलाः पौराः अपि कुशलिनः इत्यर्थः । एतेन प्रथमतः प्रजास्वाभिमुख्यं सूचितम् । प्रसन्नहृदः भवत्समागमात्प्रसादोन्मुखमानसाः अनुजाः दुर्योधनादयः अपि कुशलिनः । भवदागमनं सुयोधनप्रभृतीनामिष्टमासीद्वेत्याशयः । तव सौहार्दापेक्षिणस्तव। गमनं च सार्थं सत् सफलं सत् बभूव किं। सन्धिविषये कृतसम्मतिर्दुर्योधन इत्याशयः । अपेतदृक् अन्धः कुरुपतिः धृतराष्ट्रः । भवन्तं पूज्यभावनया गतं त्वां प्रीत्या प्रीतिपुरस्सरं अप्यपश्यत् दृष्टवान्किमु । कुटिलत्वं नाप्राकाशयत्किमित्याशयः । विदुरेण धर्मात्मना विदुरेण किमिति सन्धिविषये किमिति उक्तं । किमभिप्रेतमित्याशयः । ब्रूहि निवेदय । इति एवं प्रकारेण हरिं श्रीकृष्णं अपृच्छत् ।

प्रकृतिरिति ।

**प्रकृतिर्नोपदेशेन व्यत्येति हि दुरात्मनाम् ।**
**शिला सलिलमग्नापि मार्दवं नाधिगच्छति ॥ ५५ ॥**

दुरात्मनां निसर्गतो दुष्टबुद्धीनां प्रकृतिः स्वभावः । उपदेशेन सन्मार्गसत्सम्प्रदायबोधनेन न व्यत्येति हि व्यत्यासं नैवाधिगच्छति हि । हीति प्रसिद्धौ । दृष्टान्तमाह । शिला सलिलमग्नापि चिरकालं सलिले मज्जितापि । मार्दवं मृदुलत्वं । नाधिगच्छति । शिला यथा स्वाभाविकं काठिन्यं न जहाति तथायमपीत्याशयः ।

स्वत इति ।

**स्वतस्सिद्धं युद्धं परिहरति कोवा जगदिदं**
**दुरात्मव्याप्तं तत्प्रशमनमवश्यं युधि भवेत् ।**
**स चाप्यन्धः पुत्राननुसरति ते तु प्रतिभटाः**
**ममाभूत्सन्ध्युक्तिस्त्विरणतलवृष्टिर्बत यथा ॥ ५६ ॥**

स्वतसिद्धं भगवतैव सङ्कल्पितमित्यर्थः युद्धं । कौरवपाण्डवानां समीकं कोवा परिहरति निवारयतीत्यर्थः । न कोपि निवारयितुं शक्नोतीति यावत् । इदं जगत् दुरात्मव्याप्तं दुर्योधनप्रभृतिदुष्टजनव्याप्तम् । तत् तस्मात्कारणात् । युधि युद्धे प्रशमनं दुष्टजननाशः अवश्यं भवेत् । यद्वा तत्प्रशमनं दुष्टजननाश इत्यर्थः । सः दुष्पुत्रवत्सलः अन्धोपि च ज्ञानेन चक्षुषा च काणः धृतराष्ट्रः । पुत्रान् दुर्योधनप्रभृतीन् अनुसरति तन्मतानुयायी भवति । ते तु दुर्योधनादयस्तु । तुस्तु भेदे । प्रतिभटाः युद्धैककांक्षिणः । मम भवत्प्रेषितस्य मम सन्ध्युक्तिस्तु सन्धानोपदेशस्तु । इरणतलवृष्टिर्यथा ऊषरक्षेत्रवर्षमिव अभूत् । निरर्थकमासीदित्यर्थः । बतेति आश्चर्ये यद्वा खेदे ।

तस्मादिति ।

**तस्माद्दुष्टजनान्निहत्य समरे गाण्डीवधन्वा प्रभो**
**श्रीमन्मारुतसूनुसाह्यचटुलो विश्वम्भरां जेष्यति ।**
**लघ्वीं दुर्जनबृन्दभारविगमात्पूतां प्रशास्तु स्थिरां**
**राज्यश्रीपरिरम्भणोज्वलतनुर्धर्मैकचित्तो भवान् ॥५७॥**

तस्मात् पूर्वोक्तकारणात् । हे प्रभो, युधिष्ठिर, गाण्डीवधन्वा अर्जुनः । एतेन अप्रतिहत-पराक्रमस्सूचितः । श्रीमन्मारुतिसूनुसाह्यचटुलस्सन् पराक्रमसम्पद्विशिष्टभीमसेन-

साह्यलब्धपाटवस्सन्। समरे युद्धे दुष्टजनान् दुर्योधनप्रभृतीन् मदोद्धतान् धर्मबाह्यान्। इत्य विश्वम्भरां भूमण्डलं। जेष्यति स्वाधीनं करिष्यति। राज्यश्रीपरिरम्भणोज्वलतनुः ज्य- लक्ष्मीसमालिङ्गनेन उज्वला देदीप्यमाना तनुः शरीरं यस्य स तथोक्तः। भवान् किं- चित्तस्सन् अस्पृष्टाधर्मगन्धहृदयस्सन्। दुर्जनानां बृन्दं समूहः तदेव भारः तस्य वि गात् अपगमात् हेतोः। लघ्वीं भारशून्यां दुर्जनबृन्दभारविगमात् हेतोः। पूतां च प शुद्धां पवित्रां स्थिरां भूमिं शत्रुभयाभावादचलामित्यर्थः। प्रशास्तु।

दुर्जनेति।

**दुर्जनौघदमनेन सज्जन-**
**प्रीणनेन च जगत्सुमङ्गलम्।**
**अस्त्विति प्रणिगदन्श्रियःपति-**
**र्धर्मराजहृदयन्त्वसान्त्वयत् ॥ ५ ॥**

श्रियःपतिस्तु श्रीकृष्णस्तु। तुस्तु भेदे। एतेन सन्धिमिच्छतो धर्मराजस्य अ ाय- विरुद्धप्रवर्तकत्वं सूचितम्। दुर्जनौघदमनेन दुर्योधनप्रभृतिभूभारभूतदुष्टजनध्वं नेन सज्जनप्रीणनेन च। जगतः लोकस्य सुमङ्गलं। यद्वा जगत् सुमङ्गलं शोभनमङ्गलविशि सत् अस्तु। इति एवं प्रकारेण प्रणिगदन्सन् प्रकर्षेण वदन् सन्। धर्मराजहृदयं प्राणि सा- सहिष्णोर्युधिष्ठिरस्य मनः। असान्त्वयत् सान्त्वयामास।

युधिष्ठिर इति।

**युधिष्ठिरः प्राञ्जलिरेवमस्तु**
**निघ्नोस्मि ते कृष्ण यथा शुभं स्यात्।**
**तथाचरेति प्रवदन्मुकुन्द-**
**मभ्यर्चयामास मुदा प्रसन्नः ॥ ५ ॥**

युधिष्ठिरः धर्मराजः। अत्र युधिष्ठिर इत्यनेन युधि तिष्ठतीति युधिष्ठिर इति व्यु त्या युद्धप्रवर्तनानुमतिदानं सूचितम्। अत एव प्राञ्जलिस्सन्नेवमस्त्विति ब्रवीति। ते धर्मप्रवर्तनपरस्य तव। निघ्नोस्मि अधीनोस्मि। भवदधीनसत्ताकतया भवान्यथा कि युङ्क्ते तथाचरामीत्याशयः। हे कृष्ण, एवं सत्यपीदमेकमभ्यर्थये। यथा शुभं गात् यथा लोककल्याणं भवेत्। तथा आचर तादृशरीत्या प्रवर्तय। इति एवं प्र रेण प्रवदन्सन् प्रकर्षेण निवेदयन्सन्। मुदा हर्षातिशयेन प्रसन्नः स्वस्थमना इत्यर्थः। तेन निरपराधिबन्धुसमस्तसैन्यजननिष्कारणवधजन्यसन्तापनिवृत्तिस्सूचिता। मुकुन्दं ऐ का- मुष्मिकसुखप्रदं श्रीकृष्णं। अभ्यर्चयामास।

निगमयति नीलाम्बरेणेति ।

**नीलाम्बरेण सह सात्यकिनाऽथ कृष्णः**
**धर्मात्मजानुमतितस्स्वपुरीं समेत्य ।**
**श्रीरुक्मिणीप्रभृतिदारगणैरुपेतः**
**सम्मोदमाप कथयंश्चलितं स्ववृत्तम् ॥ ६० ॥**

अथ अभ्यर्चनानन्तरं । कृष्णः नीलाम्बरेण बलरामेण सात्यकिना च सह धर्मात्मजस्य धर्मराजस्य अनुमतितः अभ्यनुज्ञया । स्वपुरीं द्वारकां समेत्य प्राप्य । श्रीरुक्मिणीप्रभृतिदारगणैः असंख्यातभार्यासमूहैरित्यर्थः । उपेतस्सन् चलितं स्ववृत्तं प्रवर्तितदौत्यादिवृत्तान्तं कथयन्सन् । सम्मोदं आप आनन्दतुन्दिलो बभूवेत्यर्थः । एतेन कृतकर्तव्यतया निर्दुष्टतया च कृष्णस्यानन्दतुंदिलत्वं सूचितम् ।

यत्करोषि यदाश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।
इत्युक्तदिशा कविरयं स्वकृतकाव्यमालां कृष्णायार्पयति । दासेनेति ।

**दासेन गुम्भितां भक्त्या कृतिमेनां श्रियःपते ।**
**अङ्गीकुर्वर्पितां प्रीत्या पुष्पमालामिवानघाम् ॥ ६१ ॥**

**इति श्रीयदुशैलवासि बालधन्वि जग्गूवकुलभूषणकवि विरचिते**
**अद्भुतदूतमहाकाव्ये**
**पञ्चदशस्सर्गः सम्पूर्णः**

श्रियःपते सोढस्वाश्रितसर्वसत्वापराधायाः लक्ष्म्याः वल्लभ । एतेन दोषे सत्यपि स्वस्य निर्भयत्वं सूचितम् । दासेन भवत्किङ्करेण भक्त्या प्रीत्यतिशयेन । भवदर्थमेवेत्यादरेणेति यावत् । गुम्भितां ग्रथितां रचिताञ्च । एनां अद्भुतदूताख्यां कृतिं अर्पितां भवते समर्पितां अनघां निर्दुष्टां पुष्पमालामिव प्रीत्या आदरातिशयेन अङ्गीकुरु स्वीकुरु । इति प्रार्थना । अत्र पुष्पमालासादृश्येन मधुररसभरितत्वं संविधानवैदग्ध्यं पदप्रयोगचातुर्यं सर्वादरणीयत्वं कण्ठधार्यत्वञ्चास्य काव्यस्य सूचितानि ।

इति श्रीभगवल्लक्ष्मीदासानुगृहीतायां रत्नप्रभासमाख्यायां व्याख्यायां
पञ्चदशस्सर्गः ।

प्रभा मुद्रणालय, बेंगलूर-४.

॥ श्रीः ॥

# जग्गू वकुलभूषण कविविरचिताः ग्रन्थाः

## गद्यकाव्यम्

**जयन्तिका** (इयं शय्यापाकादि सर्वविषयेष्वपि महाकवि बाणभट्टकृत कादम्बरीसहोदरी)

**यदुवंशचरितम्** (बाणभट्टकृत हर्षचरितकल्पम्)

**उपाख्यानरत्नमञ्जूषा** (क्षेमेन्द्रकविकृतचारुचर्या प्रदर्शितोपाख्यान विशदीकरणरूपा)

**भावकौमुदी** (कादम्बरीकल्याणाख्य नाटकस्य व्याख्या)

## पद्यकाव्यम्

**अद्भुतदूतमहाकाव्यम्** 84–75

**करुणरसतरङ्गिणी**

**पथिकोक्तिमाला**

**शृङ्गारलीलामृतम्**

## चम्पूकाव्यम्

**यतिराजचम्पूः**

**भारतसङ्ग्रहः**

## नाटकानि

**अद्भुतांशुकं** (वेणीसंहारस्य पूर्वभागः)

**स्यामन्तकं**

**प्रतिज्ञाकौटिल्यं** (मुद्राराक्षसस्य पूर्वभागः) 3–40

**मञ्जुळमञ्जीर**

**बलिविजयः** (द्व्यङ्कं)

**अमूल्यमाल्यम्** (द्व्यङ्कं)

**अप्रतिमप्रतिमम्** (द्व्यङ्कं)

**मणिहरणम्** (भासमहाकविकृतस्य एकाङ्कस्य ऊरुभङ्गस्योत्तर भागः)

**यौवराज्यम्** (एकाङ्कम्)

**प्रसन्नकाश्यपम्** (त्र्यङ्कं भावोल्लासिनी व्याख्यासमेतम्) अभिज्ञानशाकुन्तलस्योत्तरभागः 30–00

**संयुक्ता**

**वीरसौभद्रम्** (भासकृत दूतघटोत्कचस्य पूर्वभागः)

**प्रतिज्ञाशान्तनवम्**

**नवजीमूतम्**

**अनङ्गदाप्रहसनं**

**व्रतफलम्**

## स्तोत्राणि

**हयवदनस्तोत्रम्**

**अमृताधिरोहिणी**

**लक्ष्मीदण्डकम्**

**यदुशैलेशशतकम्**

**दाशरथि सुप्रभातम्**

**वासुदेव सुप्रभातम्**

**भार्गवी सुप्रभातम्**

**श्रीनृसिंह सुप्रभातम्**

**करुणोक्तिमाला**

---

*Copies can be had of :—*

**JAGGU ALWAR IYENGAR**

2721, IV Cross Road, Malleswaram,

BANGALORE-3.